Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# प्राचीनभारतीयमनोविद्या

श्रीदीनेशचन्द्रशास्त्रिविरचिता

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

sai 873.9 Prâcîna Bhâratîy-
a Manovidyâ

Dîśâ Dineś ch Śâstrî

16.

Fumigated · SEP 1985

*But thought nor word can seize eternal truth*

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

Presented by the Ministry
of Education [illegible]
Government of India

SRI AUROBINDO
LIBRARY
PONDICHERRY (India)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# प्राचीनभारतीयमनोविद्या

( सामान्याध्यायः )

कलिकाताविश्वविद्यालयस्य भारतीयमनोविद्याऽध्यापकेन
कलिकाता-राजकीय-संस्कृतमहाविद्यालयस्य च
भूतपूर्व-इउ. जि. सि. गवेषकाध्यापकेन

श्रीदीनेशचन्द्रशास्त्रिणा विरचिता

कलिकाता
१९७२

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

Sai 73 - 158

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# PRACINA-BHARATIYA-MANOVIDYA

## (ANCIENT INDIAN PSYCHOLOGY)

SĀMĀNYĀDHYĀYAH

(Studies in general problems)

**Dinesh Chandra Bhattacharya, Shastri** (Tarka-vedanta-tirtha)

(E-m) Lecturer, Calcutta University.
formerly, U. G. C. Research Professor,
Government Sanskrit College, Calcutta.

SRI AUROBINDO
LIBRARY
PONDICHERRY (India)

CALCUTTA
1972

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

Published by J. N. Sircar
*Nagendra Prajñā-Mandir*
C/27, Bagha Jatin Palli.
Calcutta-32.

Price Rs. 35 only.

*All rights reserved.*

Printed by
D. P. Mitra
Elm Press
63, Beadon Street.
Calcutta-6.

A work under U. G. C. appointment.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

Presented by the Ministry
of Education and Social Welfare,
Government of India

ग्रन्थोऽयं मम ज्ञानदातृभ्यः
सर्वेभ्य आचार्येभ्य
उत्सर्गीकृतः

To the sacred memory of all my
preceptors and teachers

SRI AUROBINDO
LIBRARY
PONDICHERRY (India)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# FOREWORD

I consider it distinct pleasure and pride to be called upon to write a brief foreword to the work entitted Prācina-Bhāratīya-Manovidyā composed by professor Dinesh Chandra Shastri in Sanskrit. The author has selected the salient portions of outstanding psychological and philosophical interest from philosophical classics in Sanskrit. I have been highly impressed by the language and mattor, and the scientific treatment made by him. He attempts to write a systematic treatise on Indian psychology. In India, as also in Europe, till the end of the eighteenth century, psychology was entangled with philosophical discussion. It was treated as a different discipline in recent time. Now psychology has acquired the status of a separate science, and has entirely extricated itself from metaphysical speculation. In the different courtries of Europe and America, the students of psychology have amassed a vast store of materials bearing great significance on the human mind and its activity. One cannot expect to find such a ready-made system in ancient Indian thought. But, as philosophy is concerned pre-eminently with human thought, it has taken cognizance of various data which have an independent value for a modern student of psychology. In all Indian schools epistemology occupies a place of outstanding importance. Infact, the study of epistemology known as *pramāṇaśāstra* forms an indispensable prolegomenon to metaphysics (the *prameya-śāstra*). Epistemology has been made as precise and comprehensive as our resources make it possible. Both in method, approach, and procedure, Indian epistemology still enjoys an unchallengable position. Professor Shastri, the author of the present work, has fully exploited the available materials as recorded in works of Indian philosophy of various schools. The result of his researches which occupied him for long years are now presented to the academic world for re-assessment of the findings. I presume I shall not be adjudged guilty of patriotic bias or intellectual nostalgia for recording my considered opinion that the data unearthed by the author are worthy to be studied not merely for their antiquarian interest, but for the intrinsic value as new discovery. The approach is not at all dogmatic. The author is steeped in modern thought and as such does not play the the role of an advocate. He holds brief for none, and his evaluation is based on mature judgement. He has his own convictions and philosophical perferences but they are not the outcome of blind dogmatism.

India's philosophical literature abounds in psychological investigations and findings which must strike a modern mind as extraordinarily modern.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



India's speculations on literary aesthetic experience of delight known as *'rasa'* are characterised by their profound insight and philosophical acumen. The psychology of emotions has been meticulously studied and the findings have not been superseded even by modern psychology. The innate emotional attitudes and dispositions called *sthāyibhāvas*, the accompanying emotions known as *sancāribhāvas*, and the aesthetic sense of propriety are unparalleled discoveries of the Indian mind. This topic has been briefly touched upon in the present volume and is reserved for elaborate treatment in the next volume.

I cannot withhold my tribute of admiration for the author's flair for the topics which are possessed of outstanding psychological value. The work is written in Sanskrit and the author's style of presentation is reminiscent of the celebrated classics. He has to follow the direction of the University Grants Commission in the choice of his medium. Though the cultivation of Sanskrit is not as extensive as desired by the admirers of this national cultural language in the present day, it is not entirely idle to hope that the cultivation of this language will grow from strength to strength in the days to come. Professor Shastri's achievement will then receive wider appreciation. But I am confident that the academic circles in India and the western world will cordially receive the author's contribution as an admirable intellectual land-mark.

Satkari Mookerjee
(Formerly Ashutosh Professor of Sanskrit, and Director of Nava-Nalanda Mahavihara, Nalanda, Bihar)

Sai 73-158

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

SRI AUROBINDO
LIBRARY
PONDICHERRY (India)

ॐतत्संद्ब्रह्मणे नमः

# निवेदनम्

ज्ञातं विद्वद्भिर्यत् प्राचीनभारते नासीन्मनोविद्यानामकं किञ्चित् पृथक् शास्त्रम्। तथापि ऋग्वेदादारभ्य सवत्रैव शास्त्रेषु मनोविषयकं वाक्यजातं मनस्तत्त्वविषयकमालोचनञ्च परिलक्ष्यते। स्त्रीकृतञ्च सर्वैरेवात्मानं विहाय मनस एव संघातमध्ये प्राधान्यम्—'मनो वै ब्रह्मेत्यमनसो हि किं स्या'दित्यादिन्यायेन। विशेषतः सर्वेष्वेव दर्शनशास्त्रेषु प्राचुर्येण मनस्तत्त्वालोचनं लभ्यते। अतस्तान्याकलय्य सङ्गतरूपैर्विन्यस्य च शास्त्राकारेण निवध्य विद्वज्जनेभ्य उपस्थापयितुं साम्प्रतमिति मया तदर्थं सङ्कल्पितं चेष्टितञ्च। यत्नो मम सफलो नवेति सुधीभिरेव विचारणीयम्।

अत्रेदमवश्यं ज्ञापनीयं यत्—'यूनिभार्सिटि ग्राण्ट्स् कमिशना'ख्येन केन्द्रीयसंस्थानेन एतद्ग्रन्थप्रणयनार्थं षड्वर्षाणि कलिकाताराजकीयसंस्कृतमहाविद्यालये नियुक्तः सन् सामान्याध्यायविशेषाध्यायात्मकं मनोविद्याविषयकं ग्रन्थद्वयं विरचितवान्। अयं च सामान्याध्यायात्मकः प्रथमो ग्रन्थः मुद्रणेन प्रकाशितः। सांख्य-पातञ्जल-जैन-बौद्धादिविभिन्नशास्त्रभेदेन निवद्धानि मनस्तत्त्वानि विशेषाध्यायत्मकग्रन्थान्तरे प्रकाशयितव्यानि। एतद्ग्रन्थप्रणयने कलिकाताराजकीय-संस्कृतमहाविद्यालयस्य तदानीन्तनाध्यक्षमहोदयस्य श्रीगौरीनाथशास्त्रिण उत्साहप्रदानमानुकूल्यं चावश्यमेव मया कृतज्ञतया स्वीकर्तव्यम्। अपि च यस्य भारतीयमनोविद्याविषयकाङ्गलग्रन्थेन मम मूलग्रन्थानुसन्धाने साहाय्यमभूत् तस्य डः श्रीयदुनाथसिंहमहोदयस्य सर्वोपरि यस्य प्राग्वाणीलेखनेन ग्रन्थस्य मम महद् गौरवं जातं तस्य डः श्रीसातकडि मूर्कजिमहोदयस्य च नामोल्लेखोऽप्यत्र मया अवश्यमेव कर्तव्यः।

ग्रन्थेऽस्मिन् प्रधानतः विभिन्नशास्त्रानुसारेण मनःस्वरूपनिरूपणं मनसो विभिन्नवृत्तिधर्मादीनां निरूपणं जाग्रदाद्यवस्थानां निरूपणं मनसोऽपरिदृष्टधर्माणां सुप्ततनुविच्छिन्नोदारावस्थानां च क्लेशानां निरूपणं कृतम्। विद्याग्रहण-छात्राचरणविधिषु सूचितं मनस्तत्त्वमपि एकस्मिन् परिच्छेदे आलोचिम्। उपसंहारे च मनःपर्यवेक्षणे दृष्टित्रयविभागेन सर्वेषां मनःस्वरूपविषयकमतानां संग्रहेन तेषां सारग्रहणाय यथासम्भवसामञ्जस्यस्थापनाय च यतितम्। प्राचीनभारतीयानां ऋषिमनीषिणां मनस्तत्त्वविषयकं ज्ञानं कीदृशं गभीरमासीत् कीदृशञ्च सूक्ष्मविश्लेषणं तैः कृतं तज्ज्ञानेन यदि विद्वज्जनानामामोदः श्रद्धोदयश्च स्यात् यदि च मनस्तत्त्वज्ञानामाधुनिकानां मनोविद्याविषये कश्चिदपि आलोकसम्पातः स्यात् तदैव मे कृतिरियं सफला भविष्यतीति।—

ग्रन्थकारस्य

कलिकातास्थितस्य

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# INTRODUCTION

With the dawn of civilization in a pre-historic age various arts and sciences developed in India, the rudiments of some of which were recorded for the first time in the Vedic hymns though in an intermixed eulozing manner. Descriptions of the nature and functions of mind occur even in the hymns of the Ṛgveda and Yajurveda. Subsequently, the fundamental Vedic concepts gradually took definite shapes, and, as recorded in the Upaniṣads, mind was given its proper important place in the human person, and also in the philosophical speculations of that time. But, precise psychological speculations are to be found only in the later philosophical literature of India like the Nyaya, Vaiśeṣika, Sāṃkhya, Pātañjala, Vedānta, Jaina, Bauddha and other systems. In every system psychology or speculations on 'mind' found its proper place in the scheme. But psychology was never treated as a separate branch of learning as it is done to-day.

Broadly speaking, the psychological theories which developed in ancient India may be divided into three sections or groups. The first group of psychologists or philosophers held mind or manas to be only a mechanical instrument of atomic size (*aṇuparimāṇa*) serving as a connecting link between the knowing agent (*jñātṛ, ātman*) and the sense-organs in order to produce knowledge. According to them mind is a very subtle insentient (*jāḍa*) substance (*dravya*) though not constituted of the five material elements called the *bhūtas*. Mind has got no special attributes like colour, touch, etc., or like knowledge, pleasure, pain, etc. which are all special attributes produced in the soul through soul-mind conjunction (*ātma-manaḥsaṃyoga*). Each eternal soul possesses an eternal mind as its eternal associate. The psychologists of the Nyāya, Vaiśeṣika, Mīmāṃsa, and some other systems, belong to this first group. This view may be called as the mechanistic view of mind.

The second group holds that mind is a very subtle substance (*dravya*) of plastic and transparent nature possessing a medium size (*madhya-parimāṇa*). Being of plastic or pliable nature mind admits of various modifications according to the object it takes. It expands and contracts according to the size of the objects, and being transparent, it takes the form (*ākāra*) of the object even with regard to its qualities in which the mind is interested.

Though mind is insentient (*jaḍa*) by nature, it appears as a conscious agent (*jñātṛ*) capable of knowing and functioning, due to its

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



contact with the soul.[1] Being of transparent nature due to *sattva-guṇa* constituting mind, it takes reflection of the consciousness of the soul which is pure basic consciousness by nature. Mind is constituted of three *guṇas*—substances or forces—called *sattva*, *rajas*, and *tamas*, generating cognition, activity, and inertia respectively. It is by the virtue of *sattvaguṇa*, that mind is predominantly inclined to knowing truths. '*Tattvapakṣapāto hi dhiyāṃ svabhāvaḥ*'. The sāṃkhya, Pātañjala, Vedānta and some others belong to this group. It should also be noted here that to these systems, and the systems to be mentioned in the third group, the word for 'mind' is *antaḥ-karaṇa* which includes *buddhi*, *citta*, *ahaṃkāra* and *manas* with all their denotations severally and collectively. The Upaniṣads also use these words loosely to mean mind as a whole, or to mean some distinct aspect of mind. The view of this second group may be called the psychic view of mind.

The third group, comparatively less known and favoured, includes the śākta Āgamas, Yogavāśiṣṭha philosophy, Pratyabhijñā Śaiva school, and some others. According to them, the self as pure consciousness assumes, through Its unrestricted power of freedom, some limitation so as to manifest as mind.[2] Therefore, mind is a form of consciousness itself. It is a limited form, or a descent of consciousness. This may be called as the spiritualistic view of mind.

These are the three main trends of Indian psychology.

In another way, it may be said, that some systems have formulated their view of mind from a lower level of 'matter' by raising and refining the matter, while the other systems have the mind constituted of somewhat higher principle of the *guṇas* having been evolved from *prakṛti*. Again, the third group of systems has held mind to be a modification or descent of the highest Reality of consciousness.

With the exception of this third group of schools, all other systems lay emphasis on the chāndyogya texts like—'*annamayaṃ somya manaḥ*' (mind is nourished by food), and hold that mind is by nature *jaḍa* or insentient. So, it may be said broadly that the Vedas and the Indian-philosophies hold mind to be a very subtle insentient (*jaḍa*) entity.

The Indian psychologists seldom confused mind with the soul. To them mind is *antaḥkaraṇa* or an inner instrument belonging to the

1 'Tasmāt tatsaṃyogādacetanaṃ cetanāvadiva lingam/' Iśvarakṛṣṇa-Kārikā-20.

2 'Citireva cetanapadādavaruḍhā cetyasaṃkocinī cittam/' Pratyabhijñā-hṛdaya-5; 'Calā citirmanonāmnī' ....Tripurarāhasyatantra-18.117

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



soul as an aid to knowledge, enjoyment, etc. Even the śākta Āgama, which holds mind to be a form of consciousness, treats mind as '*karaṇa*' or instrument of the soul. '*Ātmano hi manaḥ proktaṃ karaṇaṃ jñāna-karmaṇi*'.[3]

The different states of consciousness or knowledge are the three-states of 'waking', 'dream', and 'sleep., and also two other less considered' states of 'swoon' and 'death'. These five states of mind or mental consciousness have been defined and explained by different schools in their own way.

According to the Nyāya, Vaiśeṣika, Prābhākara, and others there is no consciousness or cognition in deep sleep. To them cognition and consciousness are synonimous. But to the Sāmkhya, Pātañjala, Vedānta and others there is a sort of cognition even in deep sleep. According to the Sāṃkhaya and pātañjala, sleep itself is a kind of subtle mental modification or *cittavṛtti*, while according to the Advaitins it is through the modifications of avidyā or causal mind that the soul-consciousness functions as a revealer even in sleep. The darkness of ignorance, and also some undifferentiated bliss are perceived through those modifications of the causal mind called *avidyā-vṛtti*.

According śākta Āgama sleep is a mental state of *nidrā-prakāśa*,[4] i.e. an indeterminate knowledge of *nidrā* or the unmanifested primal ignorance.[5] Due to the absence of *vimarśa* (*amarśa*) or determinate cognitions, the mind in deep sleep is said to be '*muḍha*' and '*līna*', i.e. unconscious and absorved.

The states of swoon and death are less discussed being less important or less known. The Brahmasūtra in an aphorism '*mugdhe-rdha-saṃpattiḥ pariśeṣāt*' [6] —states that in the state of swoon though the mind seems to be completely absorbed as in sleep, it is actually half-absorbed which is indicated by abnormal breathing, and facial or other physical expression.

The state of death, which has also some similarity with sleep in bringing about cessation of pain, [7] is also a different state when the mind rests in itself, or is absorved into prāṇa the life-principle[8] loosing all its functions and determinate cognitions. Of course, at the

---

3 Tripurarahasya, 18.47.
4 Tripurārahayatantra, 16.71 5 Tripurārahasya-tantra, 16.73
6 Brahmasūtra—3.2.10.
7 Suṣuptivad duḥkhābhāvajanakatvāt/
8 'Manaḥ prāṇe'-Chāndyogya-Upaniṣad. 6.8.6.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



point of death there is an inner flash of knowledge[9] which determines its future procedure. It is stated in the Upaniṣads and other scriptures that subsequently the mind of the dead recovers determinate consciousness at certain stages, and its cognitions are like dream-cognitions. The Buddhists also admit the persistence of mind (*manodhī*) even after death.

The most important of the states of mind or consciousness are the states of dream and sleep. They provide some clue to the ascertainment of the nature of mind and soul, and also raise many problems of great psychological interest.

According to the schools of logicians like the Nyāya, Vaiśeṣika, etc. the dream-cognitions are but confused or erroneous recollections—*smṛtivibhrama*—due to the defect of *nidrā* or drowsiness. The prābhākaras who deny anyathā-khyāti or otherwise-apprehension, hold dream-cognitions as recollections with omissions and want of discrimination.

According to the Sāṃkhya and Pātañjala systems also the dream cognitions are confused recollections with false mental constructions added, though, according to Vijñānabhikṣu, the Sāmkhya is inclined to the theory of *akhyāti* or omission like the Prābhākaras.

The Advaitavedānta school, however, has struck a different note with regard to the dream-cognitions, which according to them, are illusory cognitions, the objects being temporarily created from *saṃskāra* or impressions with the help of nescience and drowsiness,—*avidyā* and *nidrādoṣa*. Those objects of inscrutable nature are directly visualised through the functions of the causal mind as individual nescience (*avidyā*) by the soul through its own light. '*Atrāyaṃ puruṣaḥ svayaṃjyotiḥ*'—in this state of dream the self has (evidently) itself as light, says the Upaniṣad, there being no other external light to help its vision.

Again, passing of the soul through these states of *jāgrat*, *svapna*, and *suṣupti* without retaining the previous states, proves that the soul is unattached to these different states which are only mental. *Asaṅgo hyayaṃ puruṣaḥ*—the self is verily unattached—is the Upaniṣadic dictum.

The Vedas, the Upaniṣads, [10] the Āgamas, and the philosophical systems have mentioned many special attributes, modifications or functions of mind. The Nyāya-Vaiśeṣika schools however, enumerate them as

---

9 'Etasya hṛdayasyāgraṃ prodyotate'—Bṛhadāraṇyakopaniṣad—4.4.2

10 Aitareyopaniṣad—2.5.2 ; Bṛhadāraṇyakopaniṣad—1.5.3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



nine, viz. cognition, pleasure, pain, desire, hatred, volition, virtue (*dharma*), vice (*adharma*) and knowledge-impression (*saṃskāra*), which, according to them, are not attributes of mind, but are special attributes of the soul (*ātma-viśeṣaguṇa*). But, they also admit that these attributes are produced in the soul due to soul-mind conjunction (*ātmamanaḥ-saṃyoga*) and with the exception of *dharma*, *adharma* and *saṁskāra* which are imperceptible special attributes of the soul, the other six special attributes are perceived through mind (*mānasa-pratyakṣaviṣaya*). The Pātañjala and the Sāṃkahya have enumerated five kinds of mental modifications called *cittavṛtti*, as—*pramāṇa*, *viparyaya*, *vikalpa*, *nidrā* and *smṛti* i.e. the mental modifications in valid cognition, erroneous cognition, objectless verbal concept, sleep-cognition and recollection. It should be understood that these are only the cognitive mental modifications, the others being pleasure, pain, etc. or the more subtle modifications like *jnānāśaya*, *karmāśaya*, *jīvanahetuprayatna*, i. e. knowledge-impression, action-residue, and the life-sustaining volition, etc. Vyāsa, the commentator of the aphorisms of Patañjali, also gives a list of imperceptible attributes or modifications of mind—aparidṛṣṭacittadharma[11]—which may be considered as the preconscious and unconscious attributes and propellers of mind.

In fact, all the special attributes or modifications of mind may be divided into three groups as cognitive, emotional, and volitional—*jnānātmikā vṛtti*, *bhāvātmikā vṛtti*, and *prayatnātmikā vṛtti*.

(1) The cognitive modifications are broadly five as mentioned by Patañjali, doubt being included in *viparjaya*.

(2) The emotional modifications have been mentioned as pleasure, pain, desire (love) and hatred—*sukha*, *duḥkha*, *icchā*, *dveṣa*—as enumerated by the Nyāya and Vaiseṣika schools. This is also a very broad account for philosophical purpose, there being many other emotional modifications like heroism, fear, laughter, abhorrence, spiritual devotion, etc. The Nyāya system will, of course, intend to include all of them in those four emotions—pleasure pain, desire and hatred. Indian poetics or the Alaṅkāra-śāstras have exhaustively delt with variety of human emotions.

(3) The volitional modifications of mind which are called *prajatna* or *kṛti* are mainly of three kinds—*pravṛtti*, *nivṛtti* and *jīvanayoni*, i.e. inclination for effort, inclination for withdrawal, and the life-sustaining volition which is not perceptible. *Cikīrṣa* or desire for action which precedes *pravṛtti* is pro-

11 Yogasūtra-bhāṣya—3. 15

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



duced from *iṣṭasādhanatvajñāna* and *kṛtisādhyatvajñāna*[12], i.e. from the knowledge that some action is conducive to pleasure, and is also capable of being performed. Though included in *icchā* or desire, it may be regarded as quasi-volitional due to its direct causality of *pravṛtti* and *ceṣṭā*, i.e. incination and effort. There is an old psychological saying that—'*jñānajnyā bhavedicchā, icchājanyā bhavet kṛtiḥ/ kṛtijanyā bhaveccesṭā ceṣṭājanyā bhavet kṛyā//*' .

**General Survey and Synthesis**

Though the different schools of Indian psychologists differ greatly in their conclusions specially with regard to the ontological character of mind, as mentioned before, it may be said as a general survey that most of them agree with regard to the nature of the different modifications or functions of mind like cognition, pleasure, pain, desire, hatred, volition (inclination), and the unperceived attributes of mind like the knowledge-residue (*saṃskāra*), and action-residue (*adṛṣṭa*).

Even regarding the nature of mind, if may be said by way of reconciliation that there is some truth in every view of the nature of mind ; for, the human mind is a substance of very complex nature, as is truly described by the Vedic mantra—'*apūrvaṃ yakṣamantaḥ prajānām*'—unique and wonderful, (seated) within the hearts of men.

In certain aspect mind somehow operates as a conscious knowing principle very near and similar to the soul. In another aspect it is a part or evolute of *prakṛti*—the primary insentient principle, because, it undergoes development and decay, changes and modifications. In another aspect mind is just an organ to perceive pleasure and pain, and to serve as a link between the knower soul and the sense-organs. Therefore, none of the three views—that the mind is a modification of consciousness, or that the mind is an evolute of *prakṛti*, or that it is an inner organ or *antarindriya*, is totally false and negligible. Rather, we find some truth, some undeniable aspect in every view of mind.

Again, it is quite natural that those interested in Indian psychology would enquire if there is any mention and discussion of anything like the unconscious and preconscious, and of anything like id, ego, and super-ego in Indian psychology. Sufficiently aware of the perils of finding out parallels, I have ventured to put forward certain materials which will throw some light upon the views of Indian psychology

12 Bhāṣāpariccheda.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



regarding the unconscious and preconscious, and regarding id, ego, and super-ego. *Adṛṣṭa* and *saṃskāra*, which have been designated by Patañjali as '*aparidṛṣṭa-cittadharma*' or 'unseen mental attributes'—constitute the unconscious and preconscious in Indian psychology, though not strictly in Freudian sense. While the unconscious and preconscious conceived by Freud are derived from libido and are formed mainly, through censor, the unconscious and the preconscious in Indian psychology are formed through any interested action and cognition. But these *adṛṣṭa* and *saṃskāra*, (*karmāśaya* and *jñānāraya*) i.e. action-residues and cognition-residues, like the Freudian unconscious and preconscious, guide and determine the thoughts, actions, character, and destiny of man. They are also released and visualised in dreams which may indicate many past, present and future facts.[13] The same unconscious *adṛṣṭa* and *saṃskāra* which bring about the future events, being released partially in dreams, make it possible that the dreams are sometimes related with and indicative of future events. The *saṃskāra* or the cognition-residues always function in combination with *adṛṣṭa* and are mainly responsible for the particular forms of the dream-objects and also for all recollections, tendencies and proneness. *Adṛṣṭa* is mainly responsible for the particular events leading to some experience of pleasure and pain. '*Te hlāda-paritāpa-phalāḥ*'—they produce pleasure and pain—says Patañjali, (Yo. sū 2. 14).[14] Again at the time of deep sleep both *adṛṣṭa* and *saṃskāra* lie absorved in the mind, or in the unconscious—*avidyā* or *vyasti-ajñāna* with some very subtle function of apprehending the absence of cognitions and the bliss of repose at the time of sleep.[15]

Regarding id, ego, and super-ego conceived by Freud, it may be said that they are but different aspects or states of the same *antaḥkaraṇa* or *buddhi* due to different urges evolving from the three *guṇas*—*tamas, rajas* and *sattva* in the basic unconscious of *prakṛti* or *avidyā*. From *avidyā* the ego (*asmitā*) evolves with its primary drives of *rāga* and *dveṣa*—attachment and hatred, due to *tamas* and *rajas*. But, when *sattvaguṇa* prevails, due to various reasons, the *sāttvika* ego or mind dominates wherein good sense called 'higher reason' or '*śāstrojjvalā buddhi*' manifests with all its known functions of introspection, self-anālysis, self-judgment, etc. as in '*sāttvika-kartṛ*' and '*sāttvika- buddhi* described in the Bhagavad-Gītā.[16] Of course, these sections of buddhi

13 'Sūcakaśca hi śruterācakṣate ca tadvidaḥ'—Brahmasūtra, 3. 2. 4

14 For further details vide my paper on 'The unconscious in Indian Philosophy'—in the 'Samiksa'—Journal of the Indian Psycho-analytical Society' Vol. 22. No. 1, 1968.

15 'ānandabhuk cetomukhaḥ prājñaḥ'—Māṇḍukyopaniṣad.

16 Gītā. 18. 26, 30

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



are not strictly demarcated, since the *guṇas* are always more or less intermixed and so *rajās* or *tāmas* may distort *sattva* at any point. These three *guṇas* somehow explain id, ego, and super-ego of the Freudian school.

Above all, Indian psychology conveys a great message of hope for mankind by holding almost unanimously that human mind being predominantly made of *sattvaguṇa* is capable of knowing truths and even the ultimate Reality through proper discipline, and that the soul behind the mind is by nature pure and free.

Lastly, I must mention the great findings and achievements of Indian psychology in the field of spiritual sublimation and realisation. The Upaniṣads, the Āgamas, the Pātañjala, the Jainas and the Buddhists—all have their own methods of spiritual elevation though there are many common principles underlying the different systems. These systems will be discussed separately in the second volume of my work which will contain the studies in Indian psychology in specific lines.

In this first volume entitled 'Sāmānyādhyāya' I have attempted to collect and systematise the views of the different systems on the general problems of psychology like the nature of mind, modifications and attributes of mind, states of consciousness, different stages or planes of mind, etc.

DINESH CHANDRA SHASTRI

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# सूचीपत्रम् (Contents)


| | Page |
|---|---|
| 1. उपोद्घातः (Introduction) .... .... | 1 |
| 2. मनःस्वरूप-निरूपणम् (The nature of mind) .... | 7 |
| 3. सात्मसंघात-निरूपणम् (The soul and the human person) .... | 30 |
| (a) आत्मान्तःकरणसम्बन्ध-निरूपणम् (Relation between soul and mind) | 45 |
| (b) प्राणनिरूपणम् (The vital principle) .... .... | 47 |
| (c) इन्द्रिय-निरूपणम् (Sense-organs) .... .... | 51 |
| (d) इन्द्रियाणां प्राप्यकारित्व-निरूपणम् (The theory of sense-contact) | 68 |
| (e) शरीरनिरूपणम् (The body) .... .... | 72 |
| (f) नाडीचक्रादि-निरूपणम् (The nerves, veins, arteries and the plexuses) .... | 81 |
| 4. मनोधर्मपरिणानामादीनां सामान्यतो निरूपणम् (A general account of the attributes and modifications of mind) .... | 82 |
| 5. ज्ञानात्मकमनोवृत्ति-निरूपणम् (The cognitive modifications of mind) | 94 |
| (a) ज्ञानसामान्य-निरूपणम् (Cognitions) .... .... | 94 |
| (b) अनुभव-निरूपणम् (Cognitions other than recollection) .... | 100 |
| (c) यथार्थानुभव-निरूपपणम् (Kinds of valid anubhava) .... | 102 |
| (d) अयथार्थानुभव-निरूपणम् (Invalid anubhava) .... | 104 |
| (e) संशय-निरूपणम् (Doubt) .... .... | 107 |
| (f) विपर्यय-निरूपणम् (Error, Illusion) .... .... | 111 |
| (g) तर्क-निरूपणम् (Negative argument assuming a wrong proposition) .... | 115 |
| (h) अनध्यवसाय-निरूपणम् (Indefinite cognition) .... | 119 |
| (i) ऊह-निरूपणम् (Guess, Induction) .... .... | 121 |
| (j) विकल्प-निरूपणम् (Objectless verbal cognition) .... | 122 |
| (k) स्मृति-निरूपणम् (Recollection) .... .... | 123 |
| (l) प्रत्यभिज्ञा-निरूपणम् (Recognition) .... .... | 131 |
| 6. भावात्मकमनोवृत्ति-निरूपणम् (Emotional modifications of mind) | 135 |
| (a) सुख-निरूपणम् (Pleasure, bliss) .... .... | 135 |
| (b) दुःख-निरूपणम् (Pain, distress) .... | 146 |


CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust: Equipment Heritage Foundation, Jalgaon



Page

(c) इच्छा-निरूपणम् (Wish, desire, love) .... .... 150
(d) चिकीर्षा-निरूपणम् (Desire for action) .... .... 153
(e) द्वेष-निरूपणम् (Hatred, anger) .... .... 154

7. प्रयत्नात्मकमनोवृत्ति-निरूपणम् (Volitional modifications of mind) 156
(a) प्रवृत्तिः (Inclination for action) .... .... 156
(b) निवृत्तिः (Inclination for withdrawal from action) .... 158
(c) जीवनयोनिः (Spontaneous volition sustaining life) .... 158

8. अतीन्द्रियमनोधर्म-निरूपणम् (The unperceived modifications or attributes of mind) .... 160
(a) अदृष्ट-निरूपणम् (unseen action-residue-'dharma' and 'adharma') .... 161
(i) धर्म (Dharma) .... .... 166
(ii) अधर्मः (Adharma) .... .... 168
(b) संस्कार-निरूपणम् (The knowledge-impressions) .... 170
(c) जीवनयोनिप्रयत्नः (unperceived spontaneous volition sustaining life) .... 177
(d) अदृष्ट-स्वतन्त्रकर्म-स्वतन्त्रेच्छाविचारः (The law of Karma and the problem of free action and free will) .... 178

9. प्रत्यक्ष-निरूपणम् (Perception) .... .... 181
प्रत्यक्षलक्षणभेदाः (Different definitions of perception) .... 182

10. निर्विकल्पकप्रत्यक्ष-निरूपणम् (Indeterminate perception) .... 215

11. अलौकिकप्रत्यक्ष-निरूपणम् (Extra-ordinary perception) .... 212

12. साक्षिप्रत्यक्षनिरूपणम् (Direct or intuitive perception of the witness self) .... 232

13. दिक्कालाकाशाभावजातीनां प्रत्यक्षनिरूपणम् (Perception of time, space, negation and universals) .... 236

14. प्रातिभज्ञान-निरूपणम् (Intuitive knowledge) .... 252

15. परोक्षज्ञाने मनस्तत्त्वम् (Mediate cognitions) .... 256
(a) अनुमितौ मनस्तत्त्वम् (Psychology of Inference) .... 258
(b) शाब्दबोधे मनस्तत्त्वम् (Psychology of verbal cognition) .... 263
(c) स्फोटवादे मनस्तत्त्वम् (Psychology of sphoṭa) .... 266

16. विपर्यये ख्यातिनिरूपणम् (Theories of Error) .... 270

17. मानसभ्रान्ति-कल्पना-निरूपणम् (Hallucination and Fancy) .... 282

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

Page
150
153
154
156
156
158
158
160
161
166
168
170
177
178
181
182
215
212
232
236
252
256
258
263
266
270
282



| | | Page |
|---|---|---|
| 18. | जाग्रदाद्यवस्था-निरूपणम् (States of consciousness) .... | 286 |
| | (a) जाग्रन्निरूपणम् (The waking state) .... .... | 287 |
| | (b) स्वप्न-निरूपणम् (Dream) .... .... | 289 |
| | (c) स्वप्न-सूचनम् (Indication of dreams) .... .... | 301 |
| | (d) सुषुप्ति-निरूपणम् (The state of sleep) .... .... | 305 |
| | (e) मूर्च्छा-निरूपणम् (State of swoon) .... .... | 312 |
| | (f) मरण-निरूपणम् (State of consciousness at the point of death and after death) .... .... | 314 |
| 19. | मानसिक-प्रकारभेद-निरूपणम् (Psychological types) .... | 319 |
| 20. | विद्याचारशिक्षाविषयकमनस्तत्त्वम् (Psychology of Education) | 331 |
| 21. | मनस्तत्त्वद्योतकसुभाषितानि (Psychological sayings from here and there) .... .... | 341 |
| 22. | मनःपर्यवेक्षणम् (A general survey) .... .... | 356 |

———

SRI AUROBINDO LIBRARY PONDICHERRY (India)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

...gotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# सामान्याध्यायः

## ( १ )

## उपोद्घातः

परो यस्मिंश्चिदाभासो यद्धेतुर्बन्धमोक्षयोः।
यन्मूले सुखदुःखे हि यन्मूलं पुण्यपापयोः॥
येन यज्ञं वितन्वानाः स्वर्गं प्रयान्ति कर्मिणः।
तन्मनस्तत्प्रचारश्च यथाशास्त्रं निरूप्यते॥

इह खलु व्यक्तिनामधेये कार्यकरणाद्युपेते जीवसंघाते अन्तःकरणस्य प्राधान्यमवश्यमेव स्वीकरणीयम्। इदमेवान्तःकरणं सामान्यतः श्रुतिस्मृति-पुराणादिषु अत्र च निबन्धे मनःशब्देन विवक्षितम्। क्वचिच्च बुद्धिचित्तादि-पर्यायशब्देन, क्वचिद्वा मनोबुद्धिचित्तादिविभागवत्त्वेनैवास्य निरूपणं विद्यते। इह संसारे सुखदुःखानां पुण्यपापानां शुभाशुभानां च मनोमूलत्वात् अभ्युदयसाधनानां यज्ञादीनां निःश्रेयससाधनानां च श्रवण-मनन-निदिध्यासन-ब्रह्मसाक्षात्काराणां मनोजन्यत्वात् धर्मार्थकाममोक्षरूपाखिलपुरुषार्थसाधने मनःशब्दाभिधेयस्यान्तःकरणस्य प्राधान्यं ज्ञायते। यद्यप्यात्मवादीनां मतेषु नित्यत्वादन्तरतमत्वाच्चेतनत्वाच्चात्मन एव परत्वं प्राधान्यं च मन्यते, तथापि बहूनां वादीनां मतेष्वात्मनो निर्गुणत्वात् समत्वात् साधारणत्वाच्चान्तः-करणस्यैव मनोबुद्ध्याद्याख्यस्य प्राधान्यं सर्वव्यवहारहेतुत्वेन स्वीकार्यम्। सगुणात्मवादीनामपि आत्मविशेषगुणानां मनःसंयोगजन्यत्वेन मानसप्रत्यक्ष-गम्यत्वेन च मनसः प्राधान्यं प्रकारान्तरेण स्वीकृतमेव।

ऋग्वेदे प्रसिद्धमन्त्रेषु—'सं वो मनांसि जानताम्', 'समानं मनः सह चित्तमेषाम्[1]', 'मनो अस्या अन आसीत्'[2] इत्यादिषु बहुत्र मनसस्तत्-व्यापाराणां चोल्लेखो दृश्यते। तथा शुक्लयजुर्वेदे ऋग्वेदपरिशिष्टे च संकल्प-

---

1 Ṛgveda—10.191.2,3.    2 Ibid—10.85.10.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



सूक्ते-'यज्जाग्रतो दूरमुदैति दैव'[3]मित्यादिमन्त्रेषु 'यदपूर्वं यक्षमन्तः प्रजाना'[4]-मित्यत्र मनसोऽपूर्वत्वेन यक्षत्वेन प्रजानामन्तःस्थितत्वेन च वर्णनं दृश्यते। उपनिषद्यपि 'मनसैवानुद्रष्टव्यम्',[5] 'मन एव मनुष्याणां कारणं मोक्षबन्धयोः',[6] 'मनसा ह्येव पश्यति मनसा शृणोति',[7] 'मनो वै ब्रह्मे'त्यमनसो हि किं स्यात्',[8] 'मनोमयोऽयं पुरुषः'[9] इत्यादिवाक्यशतैर्मनस उल्लेखपूर्वकं सर्वत्र तस्य प्राधान्यं सकलव्यवहारहेतुत्वं सर्वपुरुषार्थसाधनत्वं च घोष्यते। सर्वप्रवृत्तिमूलत्वं च मनसः संकल्पस्याह—'तस्माद् यत् पुरुषो मनसाऽभिगच्छति तद्वाचा वदति तत् कर्मणा करोतीति।'[10] तथा परमेश्वरस्यापि मनःस्थानीयायां मायायां यः कामः स एव सृष्टिमूलमुक्तम्—'तस्यान्तर्मनसि कामः समवर्तत इदं सृजेयमिति।'[11] तथा—'कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्',[12] 'तदैक्षत बहु स्यां प्रजायेये'[13]ति च। एवं देहेन्द्रियादिसंघातरूपे मनुष्ये प्रत्यक्षेणागमेन च मनसः प्राधान्ये ज्ञाते यथा मनस्तत्त्वज्ञानस्य मनःस्वरूप-धर्म-परिणाम-नियन्त्रणोपायादिज्ञानरूपस्य सप्रयोजनत्वान्मनस्तत्त्वस्य जिज्ञास्यत्वमुपपद्यते तथा वक्ष्यते।

मनःस्वरूपस्य तद्धर्मव्यापाराणां च सम्यग्ज्ञाने तेषां यथायोग्यनियन्त्रण-शिक्षणादिभिः पुरुषार्थसाधनेषु मनसः पाटवप्रचयेन वर्धते सर्वपुरुषार्थ-सम्पादनसामर्थ्यमिति तस्य विजिज्ञास्यत्वं निश्चीयते। मनःस्वभावव्यापारा-दीनां सम्यग्विज्ञाने अन्येषामपि मनोभावगत्याद्यवगमेन तेषु प्रभावविस्तारेणापि अर्थकामादिपुरुषार्थसाधने भवति महत् सौकर्यम्। तथा धर्मसाधनेऽपि

---

3 Ṛgveda-pariśiṣṭa—33 ; Śukla-yajurveda—34.1-6.

4 Śukla-yajurveda—34.4.

5 Bṛhadāraṇyakopaniṣad—4.4.19.

6 Brahmabindūpaniṣad—1.2.

7 Bṛ. Up.—1.5.3.

8 Ibid—4.1.6.

9 Ibid—5.6.1.

10 Nṛsiṃhatāpanīyopaniṣad—1 ; Bṛhadjāvālopaniṣad—1.

11 Ibid—1 ; Ibid—1.

12 Ibid—1 ; Ibid—1 ; Ṛgveda—10.129.4.

13 Chāndogyopaniṣad—6.2.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



धर्ममूलभूताहिंसासत्यदयाप्रभृतिचित्तभावानां यथायथसम्पादने तेषां भावानामान्तःकरणधर्मरूपाणां स्वरूपमवश्यमेव ज्ञातव्यं भवति। अन्यथा तेषां स्वरूपाज्ञाने क्रौर्यकामरागादिष्वपि सत्यदयादिविभ्रमात् धर्मनाशोऽधर्मोपचयो वाऽवश्यम्भावी। स्वरूपाज्ञाने तेषामर्जनमपि न सम्भवति। अपि च योगशास्त्रानुसारेण मनसो वृत्त्यादिविज्ञानपूर्वकं यथाविधि नियमनेन चित्तसंयमात् धारणाध्यानसमाधिरूपात् जायन्ते बहुविधा विभूतय[14] ऐश्वर्यरूपा मनुष्याणां भृशमभीप्सिताः। तथा बहुषु तन्त्राख्येष्वागमशास्त्रेषु प्रसिद्धं सर्वं गुह्यमाध्यात्मिकसाधनं मनस्तत्त्वज्ञानसापेक्षमिति ध्येयम्। तस्मान्मनसः स्वरूपं तद्धर्मास्तत्परिणामाश्च वृत्तिरूपा एकाग्रतादिसम्पादनेन मनःशक्तिवर्धकोपायाश्चावश्यमेव ज्ञातव्याः सांसारिकाणामपि, किं पुनः मोक्षार्थिनां योगिनां चित्तवृत्तिनिरोधकामानामात्मज्ञानार्थिनां वा चित्तशुद्धिपूर्वकश्रवणमननादिपराणाम्।

चित्तस्य सत्त्वरूपत्वात्तत्त्वपक्षपातित्वं रजस्तमोमलेनायथार्थग्राहित्वं चित्तस्य क्षिप्तमूढविक्षिप्तैकाग्रनिरुद्धरूपपञ्चभूमित्वं चित्तस्य वितर्कबाधने[15] तन्निरोधोपायः—एतत् सर्वं पातंजलेऽभिहितं मनस्तत्त्वमवश्यमेव ज्ञेयं श्रेयोऽर्थिभिः। तत्रैव चित्तस्य प्रसादजनकं परिकर्म यदभिहितं सुखितदुःखितादिषु मैत्रीकरुणादिभावनारूपं[16] तदपि मैत्र्यादिभावनानां स्वरूपज्ञाने एव सम्भवतीति सप्रयोजनं मनस्तत्त्वविज्ञानं विशेषतः श्रेयोऽर्थिनाम्।

भगवान् सर्वज्ञोऽपि—'सुदुद्दसं सुनिपुणं यत्थकामनिपातिनं।
चित्तं रक्खेथ मेधावी चित्तं गुत्तं सुखावहम्॥'
इत्यत्र, 'फन्दनं चपलं चित्तं दूरक्ष्यं दुन्निवारयं।
उजु करोति मेधावी उसुकारोव तेजनं॥'[17]

इत्यत्र च यथाकामनिपातिनं चित्त रक्षेत्, गुप्तं (रक्षितं) चित्तं सुखावहमित्युक्त्वा मेधावी चपलं दुर्निवार्यं चित्तं ऋजु करोतीत्यनेन मनसः स्वभावं विनियम्यत्वं च दर्शयति। तच्च रक्षणनियमनादिकं चित्तस्वभावज्ञानमुपायादिज्ञानं च विना न सम्भवति।

---

14 Pātañjala-yogasūtra—3.13-48. 15 Ibid.—2.33.

16 Ibid—1.33, 17 Dhammapada—3.4; 3.1.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



गौडपादेनापि 'सकषायं विजानीयात् शमप्राप्तं न चालयेत्'[18]दित्यादौ ध्यानेन समाधौ आत्मतत्त्वसाक्षात्कारे कषायस्य परिहार्यत्वेन चित्तकषायस्य ज्ञानमेव विचारसहितं तत्परिहारोपाय इत्युक्तम्। अतः कषायादि-चित्तमलानां ज्ञानमपि सर्वथाऽपेक्षितं योगिनाम्।

विशेषतः श्रुतिस्मृतिपुराणेषु तर्क-सांख्य-योग-मीमांसादिशास्त्रेषु बहुषु चान्येष्वागमशास्त्रेषु तन्त्राख्येषु मनसस्तद्धर्मादीनां च निरूपणदर्शनादपि मनस्तत्त्वनिरूपणस्य सप्रयोजनकत्वं शास्त्रत्वं च प्रतीयते।

किंच, आध्यात्मिकदुःखेषु शारीरमानसभेदभिन्नेषु मानसदुःखानामेव बाहुल्यात्तत्प्रतीकारार्थं तेषामाधिरूपाणां सम्यग्ज्ञानमपेक्षितं दुःखनिवृत्ति-कामानां सर्वेषामेव। आयुर्वेदेऽपि चरकादौ मानसव्याधीनां परिगणनेन तेषां प्रतीकारोपाया मनोविज्ञानसम्मताः प्रदर्शिताः।

तस्मात् संस्कारभेदात् विविधगुणभेदवशाच्च मनसः सामर्थ्यभेदेन न्यूनाधिकपुरुषार्थसाधकत्वात्, शुभसंस्कारगुणादिजनने मनोनियमने मनोवृत्ति-निरोधे चानर्थनिवृत्तिजनके मनोविज्ञानस्य मनोविद्याया वोपयोगाज् ज्ञातव्य-मेव मनः बुद्धिचित्ताद्यपरपर्यायं सविशेषमिति तत्स्वरूप-धर्म गुण-वृत्ति-क्लेश-वितर्क-( सात्त्विकादि- ) रूपभेद-बन्ध-मोक्षादिज्ञानार्थं श्रुतिस्मृतिपूर्वाचार्य-प्रदर्शितमार्गेण मनोविद्याशास्त्रमारभ्यते।

अस्या मनोविद्यायाः के अधिकारिणः, किं वास्याः प्रयोजनमित्याद्यनु-बन्धाकांक्षायां धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयमेव प्रयोजनम्, तत्रापि नित्यत्वाच्चरमत्वाच्च मोक्ष एव परं प्रयोजनम्, तत्तत् पुरुषार्थकामाश्चाधि-कारिण इति ब्रूमः। विषयश्चास्य मनो-बुद्धि-चित्त-हृदयाद्यभिधानमन्तःकरणं सविचित्रधर्मप्रचारं तच्छोधननियन्त्रणोन्नयननिरोधाद्युपायाश्च। तार्किकाभि-मतात्मविशेषगुणानामप्येतन्मनोविद्याशास्त्रविषयत्वमेवेति बोध्यम्।

नन्वात्मतत्त्वसाक्षात्कारस्यैव मोक्षहेतुतया प्रसिद्धत्वात् कथं मनस्तत्त्व-ज्ञानस्य मोक्षप्रयोजनकत्वमुच्यते इति चेन्न, मनस्तत्त्वस्य पराक्तत्वेऽपि तत्स्वरूप-तद्धर्म तद्भूमि-वृत्ति-वितर्क-क्लेश-तन्निरोधादिज्ञानरूपस्य मनस्तत्त्व-ज्ञानस्य विरोधिसंस्कार-वितर्कादिनाशोपयोगितया चित्तपरिकर्मसाधनेन

18 Māṇḍukyakārikā—3.34.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



चित्तप्रसादोत्कर्षसम्पादकतया धारणाध्याननिदिध्यासनसहायकतया चात्मज्ञानद्वारा परम्परया मोक्षोपयोगित्वं स्फुटमेव ।

प्राचीनभारतीयमनोविद्या इत्यत्र प्राचीनभारतीयानां वेदादिशास्त्राणां ऋषि-मनीषिणां च या मनोविद्या साऽभिहिता। मनःपदेन च विभिन्नशास्त्रेषु मनोबुद्धिचित्ताहंकारादिशब्दैर्यदन्तःकरणमभिहितं तदेव बोध्यम्। मनोविद्या इत्यनेन मनस्तत्त्वस्य विद्या विशेषज्ञानं तत्प्रतिपादकत्वान्मनस्तत्त्वनिरूपकशास्त्रं वा बोध्यते इति ध्येयम्। एषैव मनोविद्याऽऽधुनिकैर्मनोविज्ञानमित्युच्यते ।

यद्यप्याधुनिके पाश्चात्त्ये मनोविज्ञाने मनसः स्वरूपनिरूपणे तादृशो यत्नो न कृतः, मनोव्यापाराणां व्यवहाराभिधेयानामेव तेषां मते मनोविज्ञानाख्यशास्त्रविषयत्वात्, अतीन्द्रियाणां दुर्ज्ञेयानां वा मनःस्वरूपधर्माणां तेषां मते दर्शनशास्त्रविषयत्वात्, तथापि फ्रयेड्प्रभृतीनामाधुनिकमनोवैज्ञानिकानामवचेतनाचेतनमनःस्तराणां स्वीकरणेनातीन्द्रियदुर्ज्ञेयमनःस्वरूपधर्माणामेवांगीकारात् भारतीयानां मनःस्वरूपधर्मनिरुपणे तादृशो महान् प्रयत्नः समर्थित एव। प्राचीनभारतीयास्तु दार्शनिकाः सर्व एव स्पष्टतया निःशेषेण च मनःस्वरूपनिरूपणे यत्नं कृतवन्तः। आत्मस्वरूपसाक्षात्कारस्यैव प्रायशस्तेषां मते निःश्रेयसहेतुत्वात् मनोबुद्धिचित्ताद्यपरपर्यायस्य हृदयस्यैवान्तःकरणस्य शुद्धस्यात्मसाक्षात्काराधिष्ठानत्वादात्मसाक्षात्कारकरणत्वाच्च[19] मनसः स्वरूपादिकं सविशेषमेव ज्ञातव्यं तत्त्वज्ञानार्थिभिः परमपुरुषार्थार्थिभिर्मनःशोधननियमनपूर्वकत्वादात्मतत्त्वज्ञानस्येति तेषामभिप्रायः।

इदमप्यत्रावधेयं यत् पाश्चात्त्ये मनोविज्ञाने मानसिकवृत्तीनामेव व्यवहाराख्यानामादृतत्वात् यथा पृथक्तया मनसः व्यवहाररीतीनां व्यापाराणां चैव मनोविज्ञानशास्त्रविषयत्वम्, मनःसम्बन्धिनो बहवो गूढविषया दर्शनशास्त्रविषयत्वेन परित्यक्ता मनोविज्ञानेन, न तथा दर्शनशास्त्रान्तर्गते भारतीयमनस्तत्त्वनिरूपणे कृतः। परन्तु दर्शनशास्त्रानुगुणतयाऽऽत्मतत्त्व-ज्ञानतत्त्वाद्यनुकूलरूपेणैव सर्वे मनस्तत्त्वधर्मव्यापारा निरूपिताः। विशेषत उपनिषत्सु

19 'हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवति।' Bṛ. Up. 3.9.23. 'हृदा हृदिस्थं मनसा य एनमेवं विदुः।' Śvetāśvataropaniṣad 4.20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



सर्वेषु च दर्शनशास्त्रेषु प्रायश आत्मनो ज्ञानादिकरणत्वेनैव[20] मनसो निरूपणा-दात्मसाक्षात्कारे च मनोजन्यमनननिदिध्यासनानां[21] कारणत्वादात्मतत्त्वादि-निरूपणसहितमेव मनसो निरूपणं कृतम्।

अपि च, यद्यपि बुद्धिधर्मत्वेन प्रसिद्धा मनःपरिणामा[22] ज्ञानसुखादय-स्तार्किकादिभिरात्मगुणत्वेनैवाभिमतास्तथापि सांख्य-पातंजल-वेदान्तादिमतेन तेषां मनोधर्मत्वात्, तार्किकादिमतेनापि तेषां मनःसंयोगजन्यत्वात् मानस-प्रत्यक्षगम्यत्वाच्च ते मनोविद्याशास्त्रविषया एवेति मनोधर्मरूपेणैवात्रालोचिता इति ध्येयम्।

'मनोमयोऽयं पुरुषः'[23] इत्युपनिषद्वाक्ये पुरुषस्य मनःप्राधान्येनोक्तत्वात् मनोधर्माणां ज्ञानसुखादीनां पुरुषधर्मत्वमपि मनउपाधियोगादित्यपि वदितुं शक्यते। अत एव नृसिंहाश्रमादिभिरद्वैतिभिः सुखादीनामन्तःकरणोपहिता-त्मधर्मत्वमंगीकृतम्।[24]

आत्मगुणत्वं वाऽन्तःकरणधर्मत्वं वा तेषां ज्ञानसुखादीनां निरूपणमन्तः-करणस्वरूपस्य च निरूपणमेव मनोविद्यायां प्रधानतो विधेयमिति बोध्यम्।

—o—

20 Bṛ. Up. 1.5.3.
21 Ibid 2.4.5; 4.5.6.
22 Ibid 1.5.3.
23 Ibid 5.6.1.
24 Advaitadīpikā p. 130. (Medical Hall Press. Benaras).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## ( २ )

## मनःस्वरूपनिरूपणम्

मनआत्मत्ववादिनं लोकायतमतं भूतमेलनजचैतन्यवादिनं च चार्वाकमतं विहाय प्रायशः सर्वे प्राचीनभारतीया वादिन आत्मव्यतिरिक्तत्वेन देहेन्द्रियादिव्यतिरिक्तरूपेण च मनसः सद्भावं स्वीकुर्वन्ति। मनआत्मत्ववादिनो लोकायतिका मन एवात्मत्वेनाभिमन्यन्ते। भूतमेलनजचैतन्यवादिनस्तु चार्वाका देहातिरिक्तस्य मनसः सद्भावमेव नांगीकुर्वन्ति, देहस्थभूतानां मेलनादेव मदशक्तिवत् ज्ञानाद्युत्पत्तिसम्भवे आत्ममनःप्रभृतिस्वीकारे प्रयोजनाभावात्। बौद्धा अपि ये क्षणिकविज्ञानसन्तानस्य चित्तात्मकस्यातिरिक्तमन्तरिन्द्रियं मन आत्मानं च न स्वीकुर्वन्ति तेषामपि विज्ञानमेव मन[1] आत्मा चेति पृथक् पन्था। अन्यानि सर्वाणि शास्त्राणि वादिनश्च देहबाह्येन्द्रियात्मव्यतिरिक्तमन्तःकरणं मनोबुद्ध्यादिविभिन्नशब्दाभिधेयं मतभेदेन कल्पितनानाविभागं स्वीकुर्वन्ति निरूपयन्ति च। यद्यपि मनोवृत्तीनां विस्तारेण पृथक् निरूपणं करिष्यते तथापि मनःस्वरूपपरिज्ञानार्थमपरिहार्यतया मनोवृत्तिधर्मादिनिरूपणं सामान्यतोऽत्रापि किञ्चित् तत्र तत्र क्रियते इति।

### मनःस्वरूपविषये श्रौतमतम्

अतिप्राचीना यजुर्मन्त्राः ऋङ्मन्त्राश्च 'यज्जाग्रतो दूरमुदैति दैवं प्रजाना'-मित्याद्युक्त्या बहुभिर्मनोज्ञैः श्लोकैर्मनसः सद्भावं महिमानं च कीर्तयन्तो मनसो दूरंगमत्वं ज्योतिषां ज्योतीरूपत्वं यज्ञादिसर्वक्रियानिर्वर्तकत्वमपूर्वत्वं प्रजानामन्तःस्थितत्वं प्रज्ञानधृत्यादिधर्मवत्त्वं भूतवर्तमानभविष्यद्ग्राहित्वं ऋगादिवेदप्रतिष्ठारूपत्वं सुसारथिरिव मनुष्यनेतृत्वं जविष्ठत्वं हृत्प्रतिष्ठत्वादिकांश्च धर्म-गुण-व्यापारान् प्रतिपादयन्ति, प्रतिश्लोकान्ते 'तन्मे मनः शिवसंकल्पमस्त्वि'त्युक्त्वा मनसः शुभसंकल्पान् प्रार्थयन्ति च।[2]

तथैवान्यत्रापि 'मनो जविष्ठं', 'ज्योतिर्हृदय आहितं यत्'[3] इत्यादि-

---

1 Abhi. ko. 1.17.

2 Śu. Yaju. 34. 1-6, 5-10.

3 Ṛgveda 6.9.5-6.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



ऋङ्मन्त्रेषु मनसो जविष्ठत्वं ज्योतीरूपेण हृदयाहितत्वं चाम्नायते। क्वचिच्च ऋङ्मन्त्रेषु 'शीर्षणि क्रतुम्'[4], 'शीर्षन्निन्द्रस्य क्रतवो'[5] इत्यादिषु शीर्षण्येव मस्तिष्के मनोव्यापारस्य क्रतोरवस्थानमुक्तम्।

पुरुषसूक्ते 'चन्द्रमा मनसो जातः'[6] इत्यत्र ब्रह्मपुरुषस्य विराड्रूपेण कल्पितस्य मनः चन्द्रमसो योनित्वेनाम्नातम्। अन्यत्र तु श्रुतिषु शास्त्रान्तरेषु चाध्यात्ममनस आधिदैविकरूपेणाधिष्ठातृदेवतारूपेण वा चन्द्रमस उल्लेखो दृश्यते। किमेतद् चन्द्रमसः स्वरूपं दृश्यमानं चन्द्रमण्डलमुत लोकान्तरं सूक्ष्मतत्त्वान्तरं वा तदद्यापि चिन्त्यमेव वर्तते। उपनिषदि तु बृहदारण्यके[7] एतद्दृश्यते यत् यदा मनः पिण्डात्माभिमानं स्वाभाविकपाप्मासंगरूपं मृत्युं च हित्वा प्राणात्मभावावलम्बनेन सर्वेषां हिताय तिष्ठति, तदैव सा देवता (प्राणदेवता) पाप्मानं मृत्युमपहत्य एतत् (मनः) मृत्युमतिवहति। तदैतन्मनः चन्द्रमा भवति, मृत्युमतिक्रान्तो भाति च।[7] एतेन मनसः पिण्डात्माभिमानत्यागेन निःस्वार्थतया सर्वात्मभावावलम्बने उत्कर्षविशेषरूपं चन्द्रमस्त्वं भवतीत्येतावदेव लभ्यते, न त्वधिकं किंचित् चन्द्रमसः स्वरूपं तत्त्वं वा। अथवा, आधिदैविकरूपत्वान्न तत्स्वरूपमयोगिनामस्माकं ज्ञेयं मनस्तत्त्व-निरूपणे चिन्तनीयं वा।

केन-कठ-प्रश्न-छान्दोग्य-बृहदारण्यकादिषु बहुत्र मनसः उल्लेखः स्वभाव-धर्मादिनिरूपणं च दृश्यते। सामवेदीयकेनोपनिषदि प्रथमश्लोके एव 'केनेषितं पतति प्रेषितं मनः' इत्यादौ स्पष्टतया आत्मभिन्नत्वेन मनसो वर्णनम्। तत्रात्मनः प्रेरकत्वं मनसश्च क्रियावत्त्वं गम्यते। पुनश्च 'न वाग् गच्छति न मनो',[8] 'यन्मनसा न मनुते येनाहुर्मनो मतम्'[9]—इत्यादौ आत्मनो मनोऽगम्यत्वं मनस-श्चात्मप्रकाश्यत्वं स्पष्टम्। तत्रैव पुनः अध्यात्मरूपवर्णने 'यदेतद्गच्छतीव च मनो'[10]—इत्यत्र गच्छतीवेति इवकारेणापि मनोऽगम्यत्वमेवात्मनः सूचयति। तत्र तत्रात्मनः निरुपाधिस्वरूपस्य मनोऽगम्यत्वकथनेऽपि कठोपनिषदि

4 Ibid 2.16.2.
5 Ibid 8.96.3.
6 Ibid 10.90.13.
7 Bṛ. Up. 1.3.16.
8 Kena. Up. 1.3.
9 Ibid 1.5.
10 Ibid 4.5.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



बृहदारण्यकादौ चात्मनो मनोबुद्धिगम्यत्वं स्पष्टतयाऽभिहितं—'दृश्यते त्वग्र्यया बुद्ध्या',[11] 'मनसैवानुद्रष्टव्यम्'[12] 'आत्मा वा अरे द्रष्टव्यः',[13] इत्यादौ। किमधिकम्, अन्तःकरणेनात्मसाक्षात्कार एवोपनिषत्सु निःश्रेयसहेतुतया समर्थ्यते। अतो मनोऽगम्यत्वश्रुतिरात्मनोऽशुद्धबुद्ध्यविषयत्वमेव कथयतीति विरोधपरिहारः। अथवा, चित्स्वरूपस्यात्मनो निखिलभासकत्वाद् भास्यत्वासम्भवात्तस्य प्रकाशाविषयत्वमगम्यत्वश्रुतेरर्थः, अज्ञाननाशार्थं बुद्धिवृत्तिव्याप्यत्वमेव बुद्धिगम्यत्वश्रुतेरित्येवमेव सूक्ष्मदर्शिनां केषांचित् विरोधपरिहार इत्येतत् सर्वं सुसमञ्जसम्।

यद्यपि बहुत्र मनःशब्दस्य बुद्धिपर्यायत्वेनैव उल्लेखस्तथापि कठोपनिषदि बुद्धिमनसोर्भिन्नत्वेन, बुद्धेः सारथिरूपेण नियन्तृतया मनसश्चेन्द्रियरूपाश्वनियमने प्रग्रहरूपेण करणतया निर्देशो[14] लभ्यते। तत्र मनसो युक्तत्वमयुक्तत्वं च (समाहितत्वासमाहितत्वरूपं) द्वैविध्यमुक्तमर्थानर्थप्राप्तिकारणम्। इन्द्रियाणामपि वश्यत्वावश्यत्वरूपं द्वैविध्यमभिहितम्। उपसंहारे तु तत्र 'मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः'[15] इत्याद्युक्त्या मनसो बुद्धिनिकृष्टतया निर्देशो विद्यते। आत्मा महानित्यनेन समष्टिभूता (हिरण्यगर्भ-) बुद्धिर्व्यष्टिबुद्धेरुत्कृष्टतयाऽभिहिता। प्रश्नोपनिषद्यपि 'मनश्च मन्तव्यं च, बुद्धिश्च बोध्यव्यं च'[16] इत्यादौ बुद्धिमनसो र्व्यापारभेदेन भिन्नतया निर्देशः। एवमन्येष्वपि बहुषु शास्त्रेषु बुद्धेर्भिन्नतया निकृष्टतया च मनसो निरूपणं विद्यते। सर्वथापि तत्रापि मनसोऽन्तःकरणत्वं स्वीकृतमेव।

एवं तत्तदुपनिषदि बुद्धेर्मनसश्चान्तःकरणत्वेन बोधमननादिव्यापारवत्त्वया आत्मसाक्षात्कारकरणत्वेन च निर्देशेऽपि, बृहदारण्यके एव मनस ज्ञानकारणेन्द्रियसंयोगाश्रयत्वेन स्पष्टतया निर्देशः—'अन्यत्रमना अभूवं नाश्रौषम्'[17]-त्यादौ। तत्रैव च बुद्धिमनसोरेकत्वाभिप्रायेणैव 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव'[18] इत्युक्तम्। कौषीत-

---

11 Kaṭha. Up. 1.3.12.
12 Bṛ. Up. 4.4.19.
13 Ibid 2.4.5 ; 4.5.6.
14 Kaṭha. Up. 1.3.3.
15 Ibid 1.3.10.
16 Pra. Up. 4.8.
17 Bṛ. Up. 1.5.3.
18 Ibid. 1.5.3.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by ... Equipment Heritage Foundation, Jalgaon



श्यामपि 'अन्यत्र मे मनोऽभूदित्याह नाहमेतं शब्दं प्राज्ञासिष'[19]मित्यादौ तदेवान्तःकरणत्वेन ज्ञानकारणत्वं स्पष्टम्। अपि च बृहदारण्यके प्रजापतेः सप्तान्नसर्जने—'त्रीण्यात्मनेऽकुरुतेति—मनो वाचं प्राणं तान्यात्मनेऽकुरुत'[20]-इत्युक्त्या वाचः प्राणस्य च सह मनसः सर्जनं श्रूयते। न हि प्राणमन्तरेण मनसः सद्भावो व्यापारो वा सम्भवति। न वा वाचमन्तरेणापि मनसो मननादिकं भवति शब्दानुविद्धत्वात् मननादीनाम्। तदुक्तं ऋग्वेदीयमन्त्रेऽपि —'वाङ् मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितम्'[21] इति।

यदपि कौषीतक्यां 'तस्य ह वा एतस्य प्राणस्य ब्रह्मणो मनो दूत'[22]मिति मनसो प्राणदूतत्वमुक्तं तत् प्राणार्थं मनसो बह्वर्थकारितया बोध्यम्।

### मनःस्वरूपविषये तार्किकमतम्

एवं विभिन्नदर्शनशास्त्रेषु शास्त्रान्तरेषु च मनसः स्वरूपे बहुशो विप्रतिपत्तावपि न तस्य सद्भावे कस्यचिदपि प्रेक्षावतो विवादः। तथा हि तार्किकाः सुखाद्यान्तरपदार्थसाक्षात्कारकरणत्वेन मनसः सद्भावमन्तरिन्द्रियत्वं च स्वीकुर्वन्ति। मनसोऽणुत्वेनातीन्द्रियत्वात् प्रत्यक्षविषयत्वासम्भवादनुमानमेव मनसोऽस्तित्वे प्रमाणम्। तथा हि—सुखादिसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात्, रूपादिसाक्षात्कारवदित्यनुमित्यैव इतरबाधसहकारेण मनसः सिद्धिः। घट-तद्रूपादिबाह्यविषयाणां चक्षुरादिभिरिन्द्रियैरेव साक्षात्कारसम्भवेऽपि सुखदुःखाद्यान्तरपदार्थानां तदसम्भवात् तदर्थमतिरिक्तमन्तरिन्द्रियं मनो द्रव्यं सिध्यतीति भावः। यद्यपि रघुनाथशिरोमणिपादानां मते मनसो नातिरिक्तद्रव्यत्वं तस्य भौतिकपरमाणुरूपत्वाद् भौतिकत्रसरेण्वात्मकत्वाद्वा,[23] तथापि करणत्वेन तस्य सद्भावे न तेषामपि काचिद् विप्रतिपत्तिः। उक्तं च—'मनोऽपि त्रसरेण्वात्मकं भूतमेव, अदृष्टविशेषस्य प्रतिबन्धकतया च न ज्ञानयौगपद्यमन्यथा तवापि रासनादिकाले स्पार्शनवारणासम्भवात्।'[24]

---

19 Kau. Up. 3.7.
20 Bṛ. Up. 1.5.3.
21 Ṛgveda-śānti (Ait. Up. 6.1)
22 Kau. Up. 2.1.
23 Padārthatattvasāra 6 ; p. 101 (Jayanarayan, Calcutta ed.)
24 Vaiśeṣikadarśana-vṛtti 10.2.9 p. 218 (Calcutta ed.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



न च देहस्येन्द्रियाणां वा मनस्त्वं सत्त्वेऽपि विषयविशेषेण देहेन्द्रियाणां सन्निकर्षे अन्यमनस्कत्वे ज्ञानादर्शनात्। श्रुतिरपि 'अन्यत्रमना अभूवं नादर्शं'[25] मित्यादिना मनसो देहेन्द्रियातिरिक्तत्वमुद्घाटयति। तार्किकमते मनसोऽणुपरिमाणत्वं युक्तिसिद्धम्। 'युगपद्ज्ञानानुपपत्तिर्मनसो लक्षण'[26]मिति गौतमीयसूत्रानुसारेण चाक्षुषरासनादिज्ञानानामयौगपद्यमेव तेषां मते मनसोऽस्तित्वे परमाणुपरिमाणत्वे च प्रमाणम्। वात्स्यायनभाष्ये च तत्रैवोक्तं—'युगपच्च खलु घ्राणादीनां गन्धादीनां च सन्निकर्षेषु सत्सु युगपज्ज्ञानानि नोत्पद्यन्ते, तेनानुमीयते अस्ति तत्तदिन्द्रियसंयोगि सहकारि निमित्तान्तरमव्यापि यस्यासन्निधेर्नोत्पद्यते ज्ञानं संनिधेश्चोत्पद्यते इति। मनःसंयोगानपेक्षस्य हीन्द्रियार्थसन्निकर्षस्य ज्ञानहेतुत्वे युगपदुत्पद्येरन् ज्ञानानीति।'[27] तस्य मनसो व्यापित्वे पुनः युगपज्ज्ञानेन्द्रियसंयोगाज् ज्ञानयौगपद्यमेव स्यादिति[28] तस्याणुत्वं सिध्यति। ज्ञानायौगपद्यादेव प्रतिशरीरमेकत्वम्, नित्यत्वं च। 'ज्ञानायौगपद्यादेकं मनः''[29] 'यथोक्तहेतुत्वाच्चाणु'[30] इत्यादिनि च गौतमीयन्यायसूत्राणि। 'मनस्त्वजातियोगि स्पर्शशून्यं क्रियाधिकरणं मन',[30a] इति मनसो लक्षणं शिवादित्येन कृतम्।

''आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिंगम्,'[31] 'प्रयत्नायौगपद्याज् ज्ञानायौगपद्याच्चैकम्,'[32] 'तदभावादणु मनः'[33] इत्यादीनि वैशेषिकसूत्राण्यपि मनसोऽनुमानसिद्धत्वं प्रतिशरीरमेकत्वमणुत्वं चाहुः। तत्र प्रशस्तपादभाष्ये च मनसः सद्भावे प्रमाणं मनसो गुणादिकं च सविस्तारमेवमुक्तं—'मनस्त्वयोगान्मनः। सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीनाम-

25 Bṛ. Up. 1.5.3.
26 Nyā. sū. 1.1.16.
27 Nyā. sū. bhā. 1.1.16.
28 Nyā. man. II. p. 68 (Chow.)
29 Nyā sū. 3.2.57.
30 Ibid. 3.2.60.
30a Sap. pad. 74 (Calcutta Sanskrit Series).
31 Vai. sū. 3.2.1.
32 Ibid. 3.2.2.
33 Ibid. 7.1.23.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



भूत्वोत्पत्तिदर्शनात् करणान्तरमनुमीयते श्रोत्राद्यव्यापारे स्मृत्युत्पत्ति-दर्शनाद्वाह्यन्द्रियैरगृहीतसुखादिग्राह्यान्तरभावाच्चान्तःकरणम्। तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः। प्रयत्नज्ञानायौग-पद्यवचनादणुपरिमाणम्। अपसर्पणोपसर्पणवचनात् संयोगविभागौ। मूर्त-त्वात् परत्वापरत्वे संस्कारश्च (वेगाख्यः)। अस्पर्शवत्त्वात् द्रव्यानारम्भ-कत्वम्। क्रियावत्त्वात् मूर्तत्वम्। साधारणविग्रहवत्त्वप्रसंगादज्ञत्वम्। करणभावात् पारार्थ्यम्, गुणवत्त्वाद् द्रव्यत्वम्। प्रयत्नादृष्टपरिग्रहवशादाशु-संचारि चेति।'[34] भाष्योक्तं मनसो विवरणन्तु प्रायशः स्पष्टार्थमेव। साधारणविग्रहवत्त्वप्रसंगादज्ञत्वमित्यस्य व्याख्यानमुक्तं व्योमशिवाचार्येण—'पूर्वं मनश्चैतन्यप्रतिषेधेऽपि पुनर्बाधकमाह—साधारणविग्रहवत्त्वप्रसंगादज्ञत्व-मिति। यदि हि चेतनं मनः स्याद् उभयोः साधारणं शरीरमुपभोग्यमिति विरुद्धाभिप्रायत्वात् भोगानुपपत्तिः स्या'[34a]दिति। प्रयत्नादृष्टपरिग्रहवशादा-शुसंचारि चेत्यस्य व्याख्यानमुक्तं कन्दलीकारेण—'इच्छाद्वेषपूर्वकेण च प्रयत्नेन परिगृहीतं स्थानात् स्थानान्तरमाशु संचरति, तथाऽदृष्टेन परिगृहीतं मरणाच्छरीरान्तरमाशु संचरतीति द्रष्टव्यम्।'[34b] याऽपि मनसो युगपदनेक-क्रियोपलब्धिः पिष्टकभक्षणादौ युगपद्रसगन्धस्पर्शादिग्रहणात् साऽपि अलात-चक्रदर्शनवदाशुसंचारात्[35] युगपत् शतपत्रभेदोपलब्धिवद्वा क्रमाग्रहणाद् भवति। अदृष्टवशाच्च मनसि क्रियोत्पत्तेस्तत्र तत्रेन्द्रियेषु मनसः संयोगः। अतएव सत्स्वपि नानेन्द्रियेषु विषयसन्निकृष्टेषु एकेनैव इन्द्रियेण मनसः संयोगाज् ज्ञानविशेषमुत्पद्यते नान्येनेन्द्रियेणादृष्टाभावाद्। स्वात्मन्यपि मनसोऽदृष्ट-विशेषजन्यसंयोगविशेषादेव स्वदेहावच्छेदेन सुखदुःखज्ञानेच्छाद्वेषप्रयत्ना विशेषगुणा उत्पद्यन्ते, आत्मान्तरेषु स्वमनसः संयोगसामान्यसत्त्वेऽपि तादृशा-दृष्टविशेषजन्यसंयोगविशेषासत्त्वात् न तत्र तेषां विशेषगुणानां सम्भवः। अतएव शरीरावच्छेदेनात्ममनःसंयोगविशेषस्यैव ज्ञानादिहेतुत्वमुच्यते।

---

34 Pra. bhā. p. 213-26 (Varanasi Sanskrit Visvavidyalaya)

34a Vyomavatī p. 427 (Chow.)

34b Nyā. kan. p. 226 (V. S. V.)

35 Nyā. man. II. p. 68 (Chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तच्च मनः करणत्वादेव न कर्ता, न वा ज्ञानेच्छाद्याश्रयः। मनसो ज्ञानाद्याश्रयत्वे तस्याणुत्वात् ज्ञान-सुख-दुःखादीनामाश्रयगतमहत्त्वाभावात् प्रत्यक्षमेव न स्यादिति ज्ञानादीनामात्मगुणत्वमेव न मनोधर्मत्वमिति न्यायवैशेषिकाणां राद्धान्तः। मनसो ज्ञानगुणत्वे च तस्य करणभावनिवृत्तिः स्यात्; यथैवोक्तं—'युगपज् ज्ञेयानुपलब्धेश्च न मनसः'[36] इति न्यायसूत्रेण। ज्ञानादीनामात्मविशेषगुणानां शरीरावच्छेदेनात्मनि जायमानत्वादव्याप्यवृत्तित्वं नामात्मन्येकदेशवृत्तित्वं[37] तथा योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नविशेषगुणनाश्यत्वात् द्विक्षणस्थायित्वरूपं क्षणिकत्वं[38] च तार्किकसम्मतम्। न च सांख्यानामिव बुद्धितत्त्वस्य वृत्ताख्यपरिणामविशेषो ज्ञानमपि तु 'बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्'[39] इति बुद्धिरेव ज्ञानमागन्तुकात्मगुणरूपम्। चैतन्यं च तदेव। चैतन्यगुणाश्रयत्वादेव जीवात्मनश्चेतनत्वं न चैतन्यस्वरूपत्वात्। आत्मगुणानां ज्ञानानां मनसैव करणेन मानसप्रत्यक्षमनुव्यवसायात्मकं भवति। तस्मान्नापि बुद्धिमनसोरभिन्नत्वं वेदान्तिनामिव।

मनस्तु प्रतिशरीरमेकमेव, तथापि प्रत्यात्मनिष्ठत्वादनन्तम्।[40] आत्मनामसंख्येयत्वान्मनसोऽपि असंख्यत्वमित्यर्थः। सामान्यगुणा एव संख्यापरिमाणपृथक्त्व-संयोग-विभाग-परत्वापरत्व-संस्कारा मनः-समवेताः।[41] संस्कारस्तु मनसो वेगाख्य एव, भावनाया आत्मसमवेतत्वात्। विशेषगुणाभावाच्च मनसो न भौतिकत्वम्। बहिरिन्द्रियाणान्तु भौतिकत्वाद्विशेषगुणवत्त्वम्। बहिरिन्द्रियाणां चक्षुरादीनां रूपरसादिनियतैकैकविषयग्रहणकरणत्वेऽपि अन्तरिन्द्रियस्य मनसः सुखदुःखाद्यान्तरपदार्थमात्रग्रहे एव करणत्वं[42] रूपादिबाह्यपदार्थसाक्षात्कारे तु मनसः कारणत्वमात्रं न तु करणत्वमिति दिक्।

## मनःस्वरूपविषये प्राभाकरमतम्

प्राभाकरमीमांसकैरपि तार्किकमतवदेव मनसोऽणुत्वमतिरिक्तद्रव्यत्वमात्म-

---

36 Nyā sū. 3.2.20.
37 Sap. pad. ṭikā-39 (C.S.S.).
38 Bhā. pa. p. 135 (Nirnayaśagar).
39 Nyā. sū. 1.1.15.
40 Sap. pad. 19 (C.S.S.)
41. Ibīd. 153 (C.S.S.)
42 Nyā. man. II. p. 67 (Chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by ... Equipment Heritage Foundation, Jalgaon



विशेषगुणसुखदुःखादिप्रत्यक्षे च करणत्वादन्तरिन्द्रियत्वमंगीकृतम्। उक्तं च शालिकनाथेन—'मनसोऽभ्युपगमे च सकलात्मगुणोदय एव प्रमाणम्। बुद्धि-सुखदुःखेच्छाद्वेषप्रयत्नादृष्टसंस्काराणां नवानामपि वैशेषिकगुणानां मनःसंयोगे-नैवोत्पत्ते'रिति[43]। 'सुखदुःखेच्छाद्वेषप्रयत्नास्तु मानसप्रत्यक्षवेद्या'[44] इति च। अपि तु आत्मविशेषगुणत्वेऽपि ज्ञानं स्वप्रकाशमेव, न तु तार्किकमतवदनुव्यवसाय-गम्यत्वान्मानसप्रत्यक्षविषयं भाट्टमतवद्विषयप्राकट्यगम्यं वा। ज्ञानमात्रस्यैव ज्ञातृ-ज्ञान-ज्ञेयरूपत्रिपुटीप्रकाशत्वमपि सिद्धम्। ज्ञानमात्रं प्रति सुखाद्यात्म-विशेषगुणं प्रति चात्ममनःसंयोगस्य हेतुत्वं तार्किकमतवदेव सम्मतम्। उक्तं च प्रकरणपंजिकायां—'सर्वाश्च प्रतीतयः स्वयं प्रत्यक्षाः प्रकाशन्ते। मेय-मातृप्रमाणानान्त्वेष प्रतीतिविशेषः। मेये मातरि च व्यतिरिक्ता प्रतीतिः साक्षात्कारवती, मितौ त्वव्यतिरिक्ता। इदमहं स्मरामि गृह्णामीति त्रितय-मेवावभासते। ...न तस्याः संविदन्तरं चकास्ति। न च सा नावभाति। तदनवभासे सर्वानवभासप्रसंगात्। ...तस्मादप्रकाशात्मकमेतद्द्वयमि-(माता मेयश्च)-त्यंगीक्रियते। प्रकाशस्य त्वप्रकाशमानस्य सत्तैव नांगीक्रियते इति।'[45] तार्किकमतवदेव मनसोऽणुपरिमाणत्वमपि प्राभाकराणां सम्मतम्। उक्तं च 'मनश्चान्तःशरीरं परमाणुपरिमाणम्। तत् खलु द्रव्यभूतं संयोगगुणभागि-तयेष्यते।'[46]

उक्तं च नन्दीश्वरेण प्राभाकरविजये—'इदानीं मनःसद्भावोऽणुपरिमाणत्वं च साध्यते। बुद्ध्यादिकं तावत् कार्यम्, तस्यात्मसमवायित्वे असमवायि-कारणत्वेन द्रव्यान्तरसंयोग एवास्थेयः। तथाहि—बुद्धिकार्यं स्वसमवायि-कारणद्रव्यान्तरसंयोगासमवायिकारणकं नित्यद्रव्यगतानित्यविशेषगुणत्वात् पार्थिवपरमाणुगतरूपादिवत्। तत् द्रव्यं मनःशब्दाभिधेयम्, तच्च नित्य-मित्यास्थेयम्, इतरथा तस्यापि कारणकल्पनाप्रसंगात्। नित्यं च द्रव्यमणुरूपं विभुरूपं वा भवति। तस्य च विभुत्वमयुक्तम्, संयोगाभावप्रसंगात्।'[47]

---

43 Pra. pañ. p. 330 (Banaras Hindu University)
44 Ibid p. 330 (B. H. U.)
45 Ibid p. 170 (B. H. U.)
46 Ibid. p. 332 (B. H. U.)
47 Prā. Vij. p. 30 (Sanskrit Sahitya parisad, Calcutta)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



## मनःस्वरूपविषये भाट्टमतम्

कुमारिलभट्टानुगामिनश्च पूर्वमीमांसकाः—

> 'मनसस्त्विन्द्रियत्वेन प्रत्यक्षा धीः सुखादिषु ।
> मनसा संप्रयुक्तो हि तानात्मा प्रतिपद्यते ॥'[48]

इत्यादिश्लोकवार्तिकानुसारेण सुखादिसाक्षात्कारकरणत्वेन मनसोऽन्तरिन्द्रियत्वं स्वीकुर्वन्त्येव । अपि तु विभुपरिमाणमस्पन्दं च मनः, नाणुपरिमाणं चञ्चलं वा । मनो विभु स्पर्शानर्हद्रव्यत्वात्, आत्मवदित्यनुमानेन सिद्धे विभुत्वे आकाशादिवदस्पन्दत्वादिकमपि सिद्धम् । मनसो विभुत्वे अनुपहितस्य तस्य गगनादिवदिन्द्रियत्वायोगादुपाधिर्वक्तव्य इति शरीरस्यैवोपाधित्वं स्वीक्रियते । तथैवोक्तं नारायणभट्टेन...'मनस्तु विभु तद्देहे च कार्यावह'मिति ।[49] नचैवं शरीरस्योपाधित्वे पादादिगताया वेदनायाः सर्वत्र देहे प्रतीतिप्रसंगः, मनसो बहिरिन्द्रियानुसारेणैव कार्यकरत्वस्वीकारात् । शरीरावच्छिन्नस्यैव मनस इन्द्रियत्वेऽपि रूपादिज्ञानेषु मनः चक्षुरादिपरतन्त्रं प्रवर्तते, अनुमानादिषु च लिङ्गसहायमिति सर्वमवदातम् । ननु संयोगस्यान्यतरकर्मजत्वादिनियमात् विभुत्वेनोभयोरेवात्ममनसोः कर्माभावात् संयोगजन्यस्य ज्ञानस्यानुदयप्रसंग इति चेन्न, उभयोरेव विभुत्वेन सुतरां संयोगोपपत्तेः । विभुद्वयसंयोगस्याजन्यत्वान्न कर्मजन्यत्वमिति स्फुटम् । विभूनामपि दिगाकाशादीनां प्राचीनाकाशः प्रतीचीनाकाश इति परस्पर-सम्बन्धस्यानुभूयमानत्वात् । प्रयोगश्च—आकाशः कालसंयोगी कालव्यतिरिक्तत्वे सति निरन्तरत्वाद् घटवदित्यादि । एवं च विभुत्वेऽपि मनसो नात्ममनःसंयोगस्यानुपपत्तिः ।

भाट्टानामपि ज्ञानस्यात्मविशेषगुणत्वमभिमतम् । तथाचोक्तं श्लोकवार्तिके—'विक्रिया ज्ञानरूपाऽस्य न नित्यत्वे विरोत्स्यते'[50] इति । अपि तु न तार्किकाणामिव ज्ञानस्य मानसप्रत्यक्षगम्यत्वम् । 'बुद्धिव्यतिरिक्तं सुखादिपञ्चकं मानसप्रत्यक्षगम्यम् । बुद्धिः पुनरर्थप्रकाशापरनामधेयप्राकट्यान्यथानुपपत्तिप्रसूतार्थापत्तिगम्या'[51] इत्युक्तं मानमेयोदये । प्राकट्यमर्थप्रकाशः ज्ञातता

---

48 Ślo. Vār. 4.83.  49 Mā. me. p. 9 (Adyar).

50. Ślo. Vār. 4.53.  51 Mā. me. p. 248 (Adyar).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by ... Trust. Equipment Heritage Foundation, Jalgaon



इत्येते पर्यायाः। विषयाहितज्ञातताया अन्यथानुपपत्त्या ज्ञानस्यानुभवः। आत्मनस्तु प्रत्यक्षं मनसा संयोगेन एव।

न च विभुत्वे मनसो दिगाकाशाद्यन्यतमत्वमेव स्यात्, किं द्रव्यान्तरत्वकल्पनेनेति वाच्यं, भट्टमते दिगाकाशादीनामपि प्रत्यक्षत्वाद् तदवगमे च मनसः करणभूतत्वात् तद्व्यतिरेकसिद्धिः, करणत्वादेव च कर्तृरूपात्मवैलक्षण्यसिद्धिरपीति दिक्।

मनःस्वरूपविषये जैनमतम्

जैनास्तु मनसः करणत्वेऽपि नेन्द्रियत्वमिति वदन्ति। इन्द्रियाणां नियतैकैकविशेषगुणग्राहित्वनियमात् मनसस्तु सर्वार्थग्राहकत्वादनिन्द्रियत्वम्। उक्तं च परीक्षामुखसूत्रे माणिक्यनन्दिना—'इन्द्रियानिन्द्रियनिमित्तं देशतः सांव्यवहारिकमिति।'[52] बहिरर्थप्रत्यक्षस्योभयनिमित्तत्वात् अनिन्द्रियनिमित्तं प्रत्यक्षं तु मनोजन्यं मानसप्रत्यक्षमेव। उक्तं चानन्तवीर्येण प्रमेयरत्नमालायाम् —'इन्द्रियं चक्षुरादि, अनिन्द्रियं मनः'[53] इति। इन्द्रियप्राणवत् मनसोऽपि द्रव्यभावभेदाद् द्वैविध्यम्। द्रव्यमनो हि द्रव्येन्द्रियवत् पुद्गलारब्धम्। भावमनस्तु अर्थग्रहणशक्तिव्यापाररूपम्। तथैवोक्तं प्रभाचन्द्रेण प्रमेयकमलमार्तण्डे— 'एवं मनोऽपि द्वेधा द्रष्टव्यमिति।'[54] उक्तं च भास्करनन्दिना तत्त्वार्थवृत्तौ— 'नेन्द्रियमनिन्द्रियम्। ...तेनेन्द्रियप्रतिषेधेनात्मनः करणमेव मनो गृह्यते। तदन्तःकरणं चोच्यते। तस्य बाह्येन्द्रियैर्ग्रहणाभावादन्तर्गतं करणमन्तः करणमिति व्युत्पत्तेरिति। ......मनोऽपि द्वेधा—भावमनो द्रव्यमनश्चेति। भावमनो लब्ध्युपयोगलक्षणं चेतपनर्यायः। ...द्रव्यमनश्च...गुणदोषविचारस्मरणादिप्रणिधानाभिमुखस्यात्मनोऽनुग्राहकाः पुद्गला वीर्यविशेषावर्जनसमर्था मनस्त्वेन परिणता इति कृत्वा पौद्गलिकम्। किं च, द्रव्यमनः पुद्गलकार्यं द्रव्यकरणत्वेन ज्ञानसाधनत्वाच्चक्षुरादिवदिति युक्तिबलाच्चास्य पौद्गलिकत्वसिद्धिः।'[55] पुद्गला-

52 Parī. mu. sū. 2. 5.

53 Pra. rat. mā. p. 71 (Chow.)

54 Pra. ka. mār. p. 230 (Nirnayasagar)

55 Tattvā. Vṛ. 1.14 ; 5.19.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



रूधद्रव्यमनस एव करणत्वेन व्यवहारः। तस्य पौद्गलिकत्वादेव मध्य-परिमाणवत्त्वमनित्वं च युक्तं सुखादिसंवेदनकारणत्वं च। तथाच प्रमेय-रत्नमालायां—'सुखादिज्ञानस्वरूपसंवेदनस्य मानसप्रत्यक्षत्वादिति'[56] 'स्मृत्यादि-संवेदनमपि मानसमेव'[57] इति च। सुखदुःखादिवदात्मापि अनिन्द्रियजन्य-मानसप्रत्यक्षविषयमेव। उक्तं हि माणिक्यनन्दिना—'घटमहमात्मना वेद्मीति कर्मवत् कर्तृकरणक्रियाप्रीते'[58]रिति कर्तुरात्मनोऽपि भवति प्रत्यक्षप्रतीति-र्मानसी। ज्ञानसुखादिकन्तु न ज्ञानान्तरग्राह्यमपि तु स्वसंवेदनमेव। उक्तं च प्रभाचन्द्रेण—'ज्ञानं तस्मात् स्वव्यवसायात्मकमित्यभ्युपगन्तव्यम्।'[59] सुखा-देरपि ज्ञानात्मकत्वात् स्वप्रकाशत्वमेव।[59a]

आत्मा स्वदेहपरिमाण एव। द्रव्यमनसो बन्धनरूपत्वान्मोक्षदशायां तदसत्त्वेऽपि भावमनसोऽवस्थानं तेषां सम्मतम्। ज्ञानन्तु स्वपराभासि आत्मधर्म एव; ज्ञानात्मनोरत्यन्तभेदाभेदौ स्याद्वादे निराकृतौ। उक्तं हि हरिभद्रेण 'ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो' इत्यादि, 'चैतन्यलक्षणो जीवः'[60] इति च।

## मनःस्वरूपविषये बौद्धमतम्

बौद्धास्तु सौत्रान्तिक - वैभाषिक - योगाचार - माध्यमिकभेदभिन्ना यद्यपि द्वादशायतनान्तर्गतं मनः बुद्धिव्यतिरिक्तत्वेनैव स्वीकुर्वन्ति, यथोक्तं बोधिचित्त-विवरणे—

'ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च।
मनोबुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः॥'[61]-इति,

उक्तं च शान्तरक्षितेनापि—'चक्षुराद्यतिरिक्तं हि मनोऽस्माभिरपीष्यते,'[62]—तथापि न विज्ञानातिरिक्तं किञ्चित् मनो नाम तत्त्वं तेषामभिमतम्। यथोक्तं

56 Pra. rat. mā. p. 73 (Chow.)
57 Ibid. p. 73 (Chow.)
58 Pari. mu. sū. 1.8.
59 Pra. ka. mār. p. 121 (N.S.)
59a Ibid. p. 121 (N.S.)
60 Sad. samu. p. 50 (Chow.)
61 Sar. dar. saṃ. Bauddha.
62 Tattva. saṃ. 631 ; p. 209 (Baroda).



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

g... Library Sourcegoth/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



—'षण्णां अनन्तरातीतं विज्ञानं यद्धि तन्मनः'[63] इति। उत्तरविज्ञानापेक्षया यदेवाव्यवहितं पूर्वविज्ञानं तदेव मन इत्यर्थः। उक्तं च शान्तरक्षितेनापि—'षण्णामनन्तरोद्भूतप्रत्ययो यो हि तन्मनः'[64] इति। लंकावतारसूत्रेऽपि—

'चित्तं प्रत्ययसम्बद्धं प्रवर्तति शरीरिणाम्।
प्रत्ययेभ्यो विनिर्मुक्तं न पश्यामि वदाम्यहम्॥'[65]

तस्य तु मनसो न नित्यत्वमपि तु क्षणिकत्वमेव। तथा च 'नित्ये तु मनसि प्राप्ताः प्रत्यया यौगपद्यतः'[66]—इत्यादिना तत्रैव मनसो नित्यत्वं निराकृतम्। 'अन्यथा नित्यकारणत्वे सत्यविकलकारणत्वात् क्रमोत्पत्तिर्विरुध्येत चेतसा'[67]मिति च टीकायामुक्तं कमलशीलेन।

बुद्धितत्त्वन्तु चित्तात्मकमान्तरसमुदायान्तर्गतमालयविज्ञान-प्रवृत्तिविज्ञान-भेदभिन्नं क्षणिकरूपं सर्वसौगतसम्प्रदायसिद्धम्। उक्तं हि—

'तत् स्यादालयविज्ञानं यद्भवेदहमास्पदम्।
तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेद्॥'[68]

उक्तं च लंकावतारसूत्रे—'एभिर्महामते चतुर्भिः कारणैरोघान्तरजलस्थानीया-दालयविज्ञानात् प्रवृत्तिविज्ञानतरङ्ग उत्पद्यते।—

आलयौघस्तथा नित्यं विषयपवनेरितः।
चित्रैस्तरङ्गविज्ञानैर्नृत्यमानः प्रवर्तते॥'[69]

विज्ञानस्य क्षणिकत्वेऽपि एकसन्तानवर्तिपूर्वविज्ञानस्योत्तरविज्ञानोत्पादकत्वं वासनासंक्रमात् स्मरणप्रत्यभिज्ञाद्युपपत्तिश्च सौगतमतसिद्धे। तथोक्तं तत्त्व-संग्रहेऽपि शान्तरक्षितेन—

'प्राग्भूतं भूतनिर्भासं ज्ञानन्तु जनयेत् परम्'[70]
तस्मात्तत्रादिविज्ञानं स्वोपादानबलोद्भवम्।
विज्ञानत्वादिहेतुभ्यः इदानीन्तनचित्तवत्॥'[71]

---

63 Abhi. ko. 1.17.
64 Tattva. saṃ. 631.
65 Laṅkā. sū. p. 271 (Kyoto)
66 Tattva. saṃ. 632.
67 Ibid. ṭīkā, 632.
68 Sar. dar. saṃ. Bauddha.
69 Laṅkā. sū. p. 44, 46 (Kyoto)
70 Tattva. saṃ. 1892.
71 Ibid. 1897.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



इत्यादिश्लोकैर्ज्ञानस्य बाह्यभूतादिसत्त्वं विनाप्युत्पत्तिः, विज्ञानसन्तानस्यानादित्वं च विज्ञानमात्रैकपदार्थवादिनां योगाचाराणां मतानुसारेण स्थापितम्।

विज्ञानानां सुखादीनां च स्वप्रकाशत्वमात्मसंवेदनरूपमेव, क्षणिकविज्ञानान्तरस्य क्षणिकपूर्वविज्ञानप्रकाशकत्वासम्भवात् विज्ञानातिरिक्तस्यात्मनो विज्ञानप्रकाशकस्यासत्त्वाच्च। तथैवोक्तं धर्मकीर्तिना—'सर्वं चित्तचैत्यानामात्मसंवेदनमिति।'[72]

वसुबन्धुनाऽपि 'मन आयतनं च तत्'[73] इत्यनेन मनस इन्द्रियत्वं तस्य ज्ञानायतनत्वेन स्वीकृतम्। इन्द्रियत्वेऽपि मनसः '(षण्णां) अनन्तरातीतं विज्ञानं यद्धि तन्मनः'[74] इति कारिकानुसारेण तु प्रत्येकं पूर्वविज्ञानमेवोत्तरविज्ञानापेक्षया मन इति न विज्ञानातिरिक्तं किंचित् मनो नामास्तीति तेषां मतम्। 'षष्ठाश्रयप्रसिद्ध्यर्थं'[75] इत्यनेन चक्षुर्विज्ञानादीनां पंचानां यथा चक्षुरादयः पंच आश्रयाः प्रसिद्धास्तथा षष्ठस्य मनोविज्ञानस्याश्रयप्रसिद्ध्यर्थं सप्तधातुवर्गे मनसो[76] ग्रहणम्। तत्रापि चक्षुरादीनां विषयाः समकालीना भवन्ति, षष्ठस्य मनोधातोर्विषयस्तु अतीतोऽपि भवतीत्युक्तं—'चरमस्याश्रयोऽतीतः पंचानां सहजश्च'[77] इति कारिकायाम्। तथा 'अनियतं मनः'[78] इत्यनेन यथा चक्षुरादि नियतविषयं न तथा मन इत्युक्तम्। पुनश्च 'पंचबाह्या द्विविज्ञेयाः'[79] इत्यनेन रूपरसादीनामपि बाह्यधातूनां मनोविज्ञेयत्वमुक्तम्। उक्तं च लंकावतारसूत्रे—

> 'चित्तं मनश्च विज्ञानं लक्षणार्थं प्रकल्पते।...
> चित्तेन चीयते कर्म मनसा च विचीयते।
> विज्ञानेन विजानाति दृश्यं कल्पेति पंचभिः॥'[80]

### मनःस्वरूपविषये सांख्यमतम्

सांख्यास्तु चित्तापरनामधेयाद् बुद्धिस्वरूपान्मनसो भिन्नत्वमाहुः।

---

72 Nyā, bin. p. 19 (chow.). 73 Abhi. Ko. 1. 16.
74 Ibid. 1. 17. 75 Ibid. 1. 17. 76 Ibid. 1. 16.
77 Ibid. 1. 44. 78 Ibid. 1. 43. 79 Ibid. 1. 48.
80 Laṅkā sū. p. 46 (Kyoto).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by Gangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रधानान्मूलकारणात् बुद्धिर्महत्तत्त्वम्, बुद्धेरहंकारः, सात्त्विकाद्‌ंकारादुत्पन्नमान्तरमेकादशकमिन्द्रियमेव मनः। 'अध्यवसायो बुद्धि'रिति[81] सांख्यसूत्रे प्रधानान्तःकरणस्य बुद्धेर्लक्षणम्। 'कर्मेन्द्रियबुद्धीन्द्रियैरान्तरमेकादशक'[82]मिति त्रैविध्यमिन्द्रियाणां दर्शितम्। तत्र च 'उभयात्मकं मनः'[83] इति सूत्रेण मनसः कर्मेन्द्रिय-ज्ञानेन्द्रियोभयात्मत्वं उभयेन्द्रियप्रवृत्त्यधिष्ठानादुक्तम्। बुद्धेरध्यवसायः, अहंकारस्याभिमानः, मनसः संकल्पविकल्पौ इति 'त्रयाणां स्वालक्षण्यम्'।[84] त्रयाणामेवान्तःकरणत्वम्। तत्र बुद्धेरेव मूलत्वात् 'तथाशेषसंस्काराधारत्वात्'[85] साक्षात् पुरुषार्थकारित्वाच्च 'बुद्धेः प्राधान्यम्'।[86] सुखदुःखादीनां धर्माधर्मादीनां च बुद्धिधर्मत्वमेव[87] न तु तार्किकादिमतवदात्मधर्मत्वम्।

बुद्धेः प्रकृतिजन्यत्वात् परिच्छिन्नत्वमनित्यत्वं च, मनसोऽपि तथैव बोध्यम्। 'न व्यापकत्वं मनसः करणत्वा'[88]दिति सूत्रम्। चक्षुरादिव्यापारेषु मनसः प्राधान्यं, मनोव्यापारे चाहंकारस्य, अहंकारव्यापारे च बुद्धेः प्राधान्यमिति बोध्यम्।[89]

इन्द्रियैस्तु चक्षुरादिभिरालोचनं नाम निर्विकल्पकवृत्तिविशेषो जायते, मनस्तु अयं घटः इत्यर्थाकारं संकल्पं सविकल्पात्मकं करोति, अहंकारस्तु 'ममेदमनुकूलं प्रतिकूलं'वेति अभिमन्यते, बुद्धिस्तु 'ममेदं ग्राह्य'मिति निश्चिनोतीति तेषां व्यापारभेदः। इदन्तु वाचस्पतिमिश्रमतम्। विज्ञानभिक्षुमतेन तु इन्द्रियेण निर्विकल्पकसविकल्पकरूपद्विविधमेव ज्ञानमालोचनं जायते।[90] मनसा तु संशयात्मकं गुणदोषविचारात्मकं वा ज्ञानं जायते इत्येवं व्यापारभेदः।

'न व्यापकत्वं मनसः करणत्वादिन्द्रियत्वाद्वा', 'न निर्भागत्वं तद्योगाद् घटवत्'[91] इत्यादिसूत्रैः प्रधानजन्यत्वेनानित्यत्वात् करणत्वाच्च बुद्धिमनसोर्न

---

81 Sāṃ. sū. 2. 18.
82 Ibid. 2. 19.
83 Ibid. 2. 26.
84 Ibid. 2. 30.
85 Ibid. 2. 42.
86 Ibid. 2. 47.
87 Ibid. 5. 25.
88 Ibid. 5. 69.
89 Sāṃ. pra. bhā. 2. 45.
90 Ibid. 2. 32.
91 Sāṃ. sū. 5. 69-71

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



विभुत्वमणुत्वं वेत्युक्तम्। किन्तु संकोचविकाशसमर्थमध्यपरिमाणवत्त्वमेव, वृत्तिकाले बुद्धेस्तत्तद्विषयाकारग्रहणेन विषयव्यापनात्। बुद्धेर्ज्ञानात्मिका वृत्तयः पंचतय्यः। 'प्रमाण-विपर्यय-विकल्प-निद्रास्मृतयः' प्रातंजलसूत्रोक्ता वृत्तयः सांख्यानामपि सम्मताः।[92] बुद्धेर्विषयाकारपरिणामात्मकवृत्तिरेव ज्ञानम्। आभिमानिकः पौरुषेयबोधः फलम्। ज्ञानं च साक्षिपुरुषग्राह्यमिति नानुव्यवसायगम्यं विषयप्राकट्येनार्थापत्तिगम्यं वा। सुखदुःखादयो बुद्धिधर्मा अपि बुद्धिवृत्तयः। ज्ञानकृत्याद्याश्रयत्वान्निष्क्रियपुरुषार्थकारित्वाच्चान्तःकरणत्वेऽपि बुद्धेरेव कर्तृत्वम्। उक्तं च सूत्रे—'समानकर्मयोगे बुद्धेः प्राधान्य'मिति।[93] ईश्वरकृष्णेनापि 'कृत्स्नं पुरुषार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति'[94] इत्युक्तम्। चैतन्यस्वरूपपुरुषसंयोगादचेतनापि बुद्धिश्चेतनावतीव प्रतिभाति। तदुक्तं—'तस्मात्तत्संयोगादचेतनं चेतनावदिव लिंगम्।'[95]

तथा च मनोबुद्ध्यहंकाराणामन्तःकरणानां जडत्वं परिच्छिन्नत्वमनित्यत्वं च सांख्यानामभिमतम्। तत्र मनसोऽन्तरिन्द्रियमात्रत्वं, बुद्धेस्तु परिणामित्वात् ज्ञान-सुख-दुःख-धर्माधर्म-संस्काराद्यशेषविशेषवत्त्वात् चिच्छायायोगाच्च कर्तृत्वादिकमपीति विशेषः। अपि च त्रिगुणात्मकप्रधानजन्यत्वात् बुद्धिरपि सत्त्व-रज-स्तमोगुणात्मिका। तत्र सत्त्वगुणो ज्ञानसुखाद्युपादानभूतो द्रव्यविशेषः, रज्जुवद्बन्धकत्वात् पुरुषार्थकारित्वाद् वा गुण इत्युच्यते। रजोगुणस्तु क्रियारागाद्युपादानभूतो द्रव्यविशेषः, तमोगुणो मोहजाड्याद्युपादानभूतो द्रव्यविशेषः। त्रिगुणात्मकत्वेऽपि सत्त्वप्रधानत्वाद्बुद्धिः सत्त्वमित्यपि व्यपदिश्यते। सर्वेषामेव महदादितत्त्वानां त्रिगुणात्मकत्वं कारणगुणान्वयक्रमादिति बोध्यम्। त्रिगुणात्मकत्वेन परिणामित्वात् विषयकारग्रहणं वृत्त्याख्यं बुद्धेरेव। सत्त्वप्रधानत्वेन चिच्छायायोगाच्च ज्ञातृत्वादिकं पूर्वमेवोक्तम्।

आयुर्वेदे तु चरकादौ यद्यपि प्रधानतः सांख्यमतानुसारेणैव चतुर्विंशतितत्त्वादिकं स्वीकृतं सांख्यवदेव मनोव्यतिरिक्ता निश्चयात्मिका बुद्धिरपि

---

92 Pāt. Yo. sū. 1. 8. ; Sāṃ. sū. 2. 33.

93 Sāṃ. sū. 2. 47.

94 Sāṃ- kā. 36.

95 Ibid. 20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by ... Sarayu Trust. Equipment Heritage Foundation, Jalgaon



स्वीकृता, तथापि मनसोऽणुत्वादिनिरूपणं वैशेषिकमतानुसारेण कृतम्। तथा चोक्तं चरके—

'पुनश्च धातुभेदेन चतुर्विंशतिकः स्मृतः।
मनो दशेन्द्रियाण्यर्थाः प्रकृतिश्चाष्टधातुकी॥
लक्षणं मनसो ज्ञानस्याभावो भाव एव वा।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षे न वर्तते॥
वैवृत्यान्मनसो ज्ञानं सान्निध्यात् तच्च वर्तते।
अणुत्वमथ चैकत्वं द्वौ गुणौ मनसः स्मृतौ॥...
इन्द्रियाभिग्रहः कर्म मनसः स्वस्य निग्रहः।
ऊहो विचारश्च ततः परं बुद्धिः प्रवर्तते॥'[96]

इन्द्रियाभिग्रह इन्द्रियाधिष्ठानं मनसः कर्म इत्यर्थः। उक्तं च चक्रपाणिना टीकायां—'अत्रोहः आलोचनज्ञानं निर्विकल्पकम्, विचारः संकल्पनं हेयोपादेयतया विकल्पनम्। ......ततः परं बुद्धिः प्रवर्तते इति ऊहविचारानन्तरं बुद्धिरध्यवसायं करोतीत्यर्थः।'[97] पुनश्चोक्तं चरके—

'इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते।
कल्प्यते मनसाप्यूर्ध्वं गुणतो दोषतो यथा॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका।
व्यवस्यति तथा वक्तुं कर्तुं वा बुद्धिपूर्वकम्॥'[98]

आयुर्वेदमतानुसारेण मनस्तत्त्वनिरूपणं अध्यायान्तरे विस्तारेण करिष्यते इत्यलमत्र विस्तारेण।

## मनःस्वरूपविषये पातंजलमतम्

पतंजलिमतानुसारिभिर्योगिभिरपि सांख्यवदेव बुद्धिमनसोः स्वरूप-निरूपणं कृतम्। सांख्ययोगौ पृथक्बालाः प्रवदन्ति न पण्डिता इति न्यायेन तयोः प्रायश ऐकमत्यमेव। किन्तु योगमते चित्तस्य (बुद्धेः) विभुत्वं स्वीकृतम्। तत्र तत्र विषयविशेषे चित्तस्य शरीरावच्छेदेन वृत्तिलाभस्तु अदृष्टवशादिति।

96 Caraka. 4. 1. 15-17, 19.
97 Caraka-ṭīkā 4. 1. 19.
98 Caraka 4.1.20-21.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



गगनादिविषयग्राहित्वं चित्तस्य गगनादिवद् व्यापित्वं विना न सम्भवतीति विभुत्वं तस्य युक्तम्। उक्तं च व्यासेन योगभाष्ये—'वृत्तिरेवास्य विभुनः संकोचविकाशिनीत्याचार्यः, तच्च धर्मादिनिमित्तापेक्षमिति।'[99]

उक्तं च विज्ञानभिक्षुणा—'धर्माधर्मवासनाश्रयतया प्रतिपुरुषमन्तकरणं नित्यम्।'[100] 'तच्च नाणु सम्भवति, योगिनां सर्वावच्छेदेन एकदा अखिलसाक्षात्कारसम्भवात्। नाप्यन्तकरणं मध्यपरिमाणं सम्भवति, प्रलये विनाशेनादृष्टाद्याधारताऽनुपपत्तेः। अतः परिशेषतोऽन्तःकरणं विभ्वेव सिध्यतीति।'[101]

नन्वन्तःकरणस्य नित्यत्वे महदाद्युत्पत्तिसूत्रानुपपत्तिरिति चेन्न, कार्यकारण-(नित्यानित्य-)रूपेणान्तःकरणद्वैतात् महदाद्युत्पत्तिर्नित्यत्वं चोपपद्येते इति विज्ञानभिक्षुकृतसमाधानम्।[102] मनसः कार्यत्वात् परिच्छिन्नत्वेऽपि गगनमण्डलवत् त्रैलोक्यव्यापित्वात् गगनादिव्यापित्वमेव मनोविभुत्वमित्येवं समाधानं वाचस्पतिमिश्रेणोक्तम्।[103]

पातंजलमते अन्तःकरणस्य बुद्धेः सांख्यमतवदेव त्रिगुणात्मकत्वं त्रिगुणात्मकत्वाच्च वृत्तिरूपेण परिणामित्वं, चिच्छायायोगाज्ज्ञातृत्वादिकं सर्वं बोध्यम्। एकादशेन्द्रियान्तर्गतं मनोऽपि इन्द्रियैरालोचनानन्तरमयं घट इत्याद्याकारं संकल्पनं करोति। बुद्धिस्तु हेयमुपादेयं वेति निश्चिनोतीति वाचस्पतिमतम्। विज्ञानभिक्षुमते इन्द्रियेणैव सविकल्पग्रहणमपि भवति, तदनन्तरं मनसा गुणदोषविचारणा, बुद्ध्या ह्यध्यवसायो निश्चयात्मिका।

## मनः-स्वरूपविषये रामानुजमतम्

रामानुजीयानां वेदान्तिनां मते एकमेवान्तःकरणं मनः, तच्चान्तरिन्द्रियं सांख्यमतवदेव सात्त्विकाहंकारोपादानकं[104] परिच्छिन्नं च। किन्तु न सांख्यमतवदुभयेन्द्रियमपि तु ज्ञानेन्द्रियमेव। ज्ञानद्वारैव कर्महेतुत्वान्न कर्मेन्द्रियम्। उक्तं च—'स्मृत्यादिकरणमिन्द्रियं मनः। तच्च हृदयदेशवृत्ति

---

99 Yo. sū. bhā. 4.10.
100 Yogasāra 4.
101 Ibid 4.
102 Ibid 4; Yo. vār. 4.10.
103 Tattva. vai. 4.10.
104 Br. sū. Rā. bhā. 4.2.3.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gangotri Gyaan Kosha... Trust. Equipment Heritage Foundation, Jalgaon



बुद्धयहंकारचित्तादिशब्दवाच्यं बन्धमोक्षहेतुभूतं च।'[105] एकस्यैव मनसो वृत्तिभेदाद् बुद्धिचित्तादिव्यपदेशभेदः। तथैवोक्तं श्रीभाष्ये—'अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्धयहंकारचित्तशब्दैर्व्यपदिश्येत।'[106] रामानुजमते स्मृतेरपि प्रमात्वेन स्मृत्यादिकरणत्वेनैव मनस इन्द्रियत्वम्।

एतन्मते आत्मनः स्वप्रकाशज्ञानरूपत्वं ज्ञानगुणाश्रयत्वं च। धर्मभूतज्ञानस्य व्याप्तिसम्भवादात्मन अणुत्वेऽपि न सर्वशरीरव्यापिस्पर्शाद्युपलब्ध्यनुपपत्तिः। आत्मधर्मभूतज्ञानं तु सविकारद्रव्यमिति तस्यैवावस्थाभेदा इच्छा-सुख-दुःखादिविकाराः स्मृति-संशय-विपर्ययादिविकाराश्च। तथा चाहुः—

'इच्छाद्वेषप्रयत्नादिशब्दैर्धीरभिधीयते।
अर्थभेदानुविद्धास्ते धीविशेषाः प्रकीर्तिताः॥'[107]

ज्ञानस्य द्रव्यत्वेऽपि प्रभावद् द्रव्यगुणोभयरूपेण व्यवहारः सम्भवति। धर्मभूतज्ञानस्यापि नित्यत्वात् विभुत्वेऽपि संकोचविकाशावस्थामादाय उत्पत्तिविनाशादिव्यवहार उपपद्यते।[108] सर्वं ज्ञानं स्वप्रकाशमेव। धर्मभूतज्ञानस्य स्वप्रकाशत्वं हि विषयप्रकाशनवेलायां ज्ञानान्तरं विनैव स्वाश्रयस्यात्मनः प्रकाशमानत्वम्;[109] धर्मिभूतज्ञानस्यात्मस्वरूपस्य स्वप्रकाशत्वन्तु चिद्रूपता एव, स्वस्मै प्रकाशमानत्वमिति भावः।[110] कामादीनां ज्ञानरूपत्वेऽपि ज्ञानस्य मनःसहकारित्वनियमात् श्रुतौ 'सर्वं मन एव' इति उपचारादुक्तम्। मनसस्तु इन्द्रियद्रव्यत्वात् ज्ञानेच्छादौ करणत्वमात्रत्वमिति श्रीभाष्यकृत्सिद्धान्तः।

## मनःस्वरूपविषये तन्त्रमतं शैवमतं च।

शाक्तदर्शने तु चिद्वपुष आत्मन एव स्वातन्त्र्यात् स्वप्ने इव कार्यसिद्धये परिकल्पितं करणं मन। जडशक्तिप्रधाना आत्मस्वरूपभूता चला चितिरेव मनो

105 Yat. mat. dīp. p. 37 (Ananda Asram).
106 Br. sū. Rā. bhā. 2.4.8.
107 Yat. mat. dīp. ṭikā p. 98 (A. A.)
108 Br. sū. Rā. bhā. p. 102 (Nirnayasagar).
109 Ibid p. 83 (N.S.).
110 Ibid p. 97, 99 (N.S.).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



भवति। स्फुर्त्या आवरणनाश एव चितेश्चलनम्। एतादृशमनोरूपत्वमेवात्मनो जडाद् विशेषः। तथैवोक्तं त्रिपुरारहस्ये—

'चिदात्मा केवलः स्वच्छः स्वाच्छन्द्यान्मनआदिकम्।
परिकल्प्य व्यवहरेत् दृश्यद्रष्ट्रादिभेदतः॥'

पुनश्च—

'तस्माद्राम! मनो नान्यदात्मैव मन उच्यते।
चला चितिर्मनो नाम्नी निश्चलात्मस्वरूपिणी॥
...आवृत्यभिहतिः स्फुर्त्या चलनं राम वै चितः।
आत्मनो हि मनः प्रोक्तं करणं ज्ञानकर्मणि।
मनो यद्यात्मनो न स्याद्विशिष्यते जडात् कथम्।'[111]

इत्यादिना मनसो ज्ञानकरणत्वं स्वीकृतम्।

चिदात्मस्वरूपस्य मनसः प्रकाशविमर्शरूपोऽवस्थाद्वयभेदश्चोक्तः—

'मनसस्तु द्विधावस्था प्रकाशामर्शभेदतः।
बहिरर्थेषु विश्रान्ति र्या प्रकाशः स उच्यते।
यस्तद्विचारः स्वस्मिन् वै स विमर्श उदाहृतः॥
प्रकाशो निर्विकल्पः स्याद्वस्तूनामविभेदतः।
विमर्शः शब्दसम्भेदाद्विभेदात् सविकल्पकः॥'[112]

एवं सविकल्पकनिर्विकल्पकभेदेन मनसो ज्ञानद्वैविध्यमेवोक्तम्। तथा वेद्यविनिर्मुक्तं मन एव शुद्धात्मतत्त्वमिति बोध्यम्। उक्तं च—

'तन्मनो वेद्यनिर्मुक्तं वित्तिरित्यभिधीयते।'[113]

काश्मीरीयशैवदर्शनेऽपि प्रायश एवमेव मनःस्वरूपमुक्तम्। चितिरेव स्वयं स्वरूपं गोपयित्वा यदा संकोचं गृह्णाति तदा संकुचितग्राहकरूपा अर्थग्रहणोन्मुखी सती चेत्येन नीलसुखादीना संकुचितैव चित्तं भवति। उक्तं च क्षेमराजेन—'चितिरेव चेतनपदादवरूढा चेत्यसंकोचिनी चित्तम्।'[114]

---

111 Tri. tan. 18. 70, 117, 47.

112 Ibid 16. 64-66.

113 Ibid 18.4.

114 Pratya. hr. 5.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Sri Sayyo Trust Equipment Heritage Foundation, Jalgaon



## मनःस्वरूपविषये अद्वैतवेदान्तमतम्

वृत्तिभेदेन मनोबुद्ध्यहंकारचित्तव्यपदेशभाजनमन्तःकरणमेव सुखदुःखबन्धमोक्षादिसर्वव्यवहारकारणं व्यवहारमात्रस्यैवान्तःकरणवृत्तिविशेषजन्यत्वादित्यद्वैतवेदान्तिनः प्राहुः। तच्चान्तःकरणं ज्ञानेच्छाद्याश्रयत्वेनाहमित्याकारेण साक्षिप्रत्यक्षसिद्धम्। अपि चान्तःकरणे अनभ्युपगम्यमाने चैतन्यस्वरूपस्यात्मन इन्द्रियद्वारैर्विषयोपलब्धिस्वीकारे विषयाणां नित्योपलब्धिः, विषयोपलब्ध्यस्वीकारे विषयाणां नित्यानुपलब्धिर्वा प्रसज्येत इति कादाचित्कविषयोपलब्धिव्यवस्थार्थमन्तःकरणमवश्यं स्वीकार्यम्। तस्यैव वृत्तिरूपपरिणामभेदाः संशय-निश्चय-विपर्ययादयः सुख-दुःखेच्छादयश्च,—'कामः संकल्पो विचिकित्सा ह्रीर्धीर्भीरित्येतत् सर्वं मन एव'[115] इति श्रुतेः। अत्र धीरिति ज्ञानाख्या बुद्धिवृत्तिरुक्ता। 'दृश्यते त्वग्र्यया बुद्ध्या'[116] 'मनसैवेदमाप्तव्य'[117]-मित्यादिश्रुतिषु बुद्धेरेव मनःशब्देन व्यपदेशान्न तत्त्वभेदः। अपि तु अध्यवसायाभिमानस्मरणसंकल्परूपवृत्तिभेदादेकस्यैवान्तःकरणस्य बुद्ध्यहंकारचित्तमनोरूप-व्यपदेशभेदः।

'तन्मनोऽकुरुत'[118] 'एतस्माज् जायते प्राणो मनः सर्वेन्द्रियाणि च'[119] इत्यादि श्रुत्या मनसोऽनित्यत्वं परिच्छिन्नत्वं च सिद्धम्। 'अन्नमयं हि सोम्य मनः'[120] इत्यादि श्रुत्या च तस्य भौतिकत्वं सूचितम्। 'अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषा'[121]दिति सूत्रमपि बुद्धिमनसो भौतिकत्वमाह। तथा हि सूक्ष्मेभ्योऽपंचीकृतपंचभूतसात्त्विकांशेभ्यो मिलितेभ्यः सत्त्वप्रधानमन्तःकरणं जायते इति वेदान्तमतम्। प्रकाशकत्वात् सत्त्वांशकार्यत्वं सर्वभूतविशेषगुणग्राहकत्वाच्चान्तःकरणस्य मिलितपंचसूक्ष्मभूतकार्यत्वमनुमितम्।

तस्य जन्यत्वेऽपि आमोक्षस्थायित्वं परमुक्तौ च कारणेन सहात्यन्तिकनाशः। सुषुप्तौ कारणाज्ञानरूपेणावस्थानं प्रबोधे तस्यैव ससंस्कारस्याविर्भावात्।

---

115 Bṛ. up. 1.5.3.
116 Kaṭha. Up. 1.3.12.
117 Ibid 2.1.11.
118 Bṛ. Up. 1.2.1.
119 Muṇḍ. Up. 2.1.3.
120 Chā. Up. 6.5.4.
121 Br. sū. 2.3.15.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मनस्त्विन्द्रियमेव ज्ञानकरणत्वात्। तथैवोक्तं भारतीतीर्थेन—'ज्ञेयान्येकादशाक्षाणि तत्तत्कार्यानुसारतः।'[122] आचार्योऽपि —'त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठा'[123]दिति सूत्रभाष्ये मनस इन्द्रियत्वमाह—'स्मृतौ त्वेकादशेन्द्रियाणीति मनोऽपीन्द्रियत्वेन श्रोत्रादिवत् संगृह्यते'[124] इत्यादिना। मनस इन्द्रियत्वं भामतीकारस्यापि सम्मतम्। विवरणाद्वैतब्रह्मसिद्धिवेदान्तपरिभाषाकारादिमते तु करणत्वेऽपि मनसो नेन्द्रियत्वम्, इन्द्रियत्वे अतीन्द्रियत्वादप्रत्यक्षत्वापत्तेः। सर्वथापि तस्यान्तःकरणत्वं सर्वैरेवाद्वैतिभिः स्वीकृतम्। यथोक्तं विद्यारण्येन—

'मनो दशेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम्।
तच्चान्तःकरणं बाह्येष्वस्वातन्त्र्याद् विनेन्द्रियैः॥
अक्षेष्वर्पितेष्वेतद् गुणदोषविचारकम्।
सत्त्वं रजस्तमश्चास्य गुणा विक्रियते हि तैः॥'[125]

तस्य च बहिरिन्द्रियप्रणाल्या विषयसम्बन्धाद्विषयाकारः परिणामो जायते। सत्त्वप्रधानत्वेन स्वच्छत्वाद् विषयाकारग्राहित्वमुपपद्यते। स एव परिणामो वृत्तिरित्युच्यते। तथैवोक्तं मधुसूदनेन—

'गृह्णाति विषयाकारं मनो विषययोगतः।
इति वेदान्तिभिः सांख्यैरपि सम्यक् निरूपितम्॥'[126]

स्वच्छत्वात् चिदाभासमपि गृह्णाति। चित्प्रतिबिम्बनादेव बुद्धेश्चेतनायमानता। बाह्येन्द्रियाणामेकैकशः व्यस्तेभ्य आकाशादिपंचसूक्ष्मभूतसात्त्विकांशेभ्य उत्पत्तेः प्रत्येकस्य शब्दस्पर्शाद्येकैकयोग्यविषयस्यैव ग्रहणसामर्थ्यम्। अन्तःकरणस्य तु मिलितपंचसूक्ष्मभूतोत्पन्नस्य रूपरसादिसर्वविषयावगाहित्वमिति बोध्यम्। अन्तःकरणस्य चित्भास्यत्वाज् जडत्वेऽपि, 'अन्नमयं हि सोम्य मनः'[127] इत्यादिश्रुत्या अन्नादिपरिपुष्टत्वश्रवणेऽपि, सूक्ष्मत्वाद् सत्त्वप्रधानत्वाच्च देहाद्यतिरिक्तत्वं स्फुटम्। तथा असांकर्येणासंख्येयसूक्ष्मसंस्काराश्रयत्वात्

---

122 Vai. Nyā. mā. 2.4.4.
123 Br. sū. 2.4.17.
124 Br. sū. Sā-bhā. 2.4.17.
125 Pañcadaśī 2. 12-13.
126 Bhak. ras. 1.20.
127 Chā. Up. 6.5.4.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Trust Equipment Heritage Foundation, Jalgaon



चिच्छायाग्राहित्वेन विषयप्रकाशकत्वयोगाच्च स्थूलदेहांशमस्तिष्काद् भिन्नत्वमप्यतिस्फुटम्। तस्माद् देहबाह्येन्द्रियाद्यतिरिक्तं हृद्गोलकस्थं मध्यपरिमाणं संकोचविकाशशीलं सूक्ष्मभौतिकं सत्त्वप्रधानं स्वच्छं जडमेवान्तःकरणं वेदान्तसिद्धमित्यद्वैतिनामुद्घोषः। तथैवोक्तं वेदान्तभाष्यकारेण शङ्करेण—'तच्चात्मन उपाधिभूतमन्तःकरणं मनो बुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र तत्राभिलप्यते। क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते, निश्चयादिवृत्तिकं बुद्धिरिति। तच्चैवम्भूतमन्तःकरणमवश्यमस्तीत्यभ्युपगन्तव्यम्। अन्यथा ह्यनभ्युपगम्यमाने तस्मिन् नित्योपलब्ध्यनुपलब्धिप्रसंगः स्यात्। आत्मेन्द्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नित्यमेवोपलब्धिः प्रसज्येत। अथ सत्यपि हेतुसमवधाने फलाभावस्ततोऽपि नित्यमेवानुपलब्धिः प्रसज्येत। न चैवं दृश्यते। ...तस्मात् यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः। तथा च श्रुति—अन्यत्र मना अभूवं नाश्रौषमिति, मनसा ह्येव पश्यति मनसा शृणोतीति च।'[128]

एतेन, यदाधुनिकैर्जडवादिमनस्तात्त्विकैरुच्यते—नास्ति मस्तिष्कव्यापाराणां व्यवहाराभिधेयानामतिरिक्तं मनो नाम किंचित् करणं कर्तृ वा तन्निराकृतं ज्ञातव्यम्।

अपि च मनोबुद्धिचित्ताहंकाररूपमन्तःकरणमेव ज्ञानसुखादिरूपेण परिणामि इत्यपि स्वीकार्यं ह्रीर्धीर्भीरित्येतत् सर्वं मन एव इति श्रुतेः।

उक्तं च विद्यारण्येन तार्किकपूर्वपक्षरूपेण पूर्वपक्षनिराकरणेन च विवरणप्रमेयसंग्रहे—'यच्च नैयायिका मन्यन्ते—अस्ति किंचिदिन्द्रियं मनो नाम अणुमानं सुखदुःखेच्छाज्ञानादिनिमित्तकारणम्। यद्येतन्न स्यात् तर्हि आत्मेन्द्रियविषयादिषु समवहितेष्वेव दृश्यमानं ज्ञानकादाचित्कत्वं न सिध्येत्। न त्वेतस्मान् मनसोऽतिरिक्तं मध्यमपरिमाणं सुखदुःखादिपरिणाम्यन्तःकरणं नामास्ति यस्यान्तःकरणस्य वृत्तिभेदादहंकारो वेदान्तिभिरयःपिण्डदर्पणोदकपात्रसदृशो वर्ण्यते। यथायःपिण्डेन स्वगतो ह्रस्वदीर्घवर्तुलत्वाद्याकारो वह्नौ आरोप्यते, दर्पणेन चैकमेव मुखं बिम्बप्रतिबिम्बरूपेण विभज्यते, उदकपात्रेण च चन्द्रप्रतिबिम्बे गमना-

128 Br. sū. Śā. bhā. 2.3.32.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



गमनादय आरोप्यन्ते तथैवाहंकारेण स्वगतकर्तृत्वादिकमात्मन्यारोप्यते, एक एव चात्मा जीवब्रह्मरूपेण विभज्यते, जीवे एव परलोकगमनादय आरोप्यन्ते। न च बुद्धिरेवान्तःकरणमिति वाच्यम्। आत्मगुणव्यतिरेकेण बुद्धेरभावात्। तस्मान्नास्ति वेदान्ताभिमतमन्तःकरणमिति। तदप्यसत्। बुद्धेर्गुणेनेत्यादिश्रुतिष्वनेकशोऽन्तःकरणस्य परिणामिणो ज्ञानक्रियाशक्तिरूपस्यात्मनि सर्वसंसारापादकस्य मनोबुद्धिशब्दवाच्यस्य प्रसिद्धत्वात्। नो चेदसंगस्यात्मनः संसारो न सिध्येत्। सति त्वन्तःकरणे तेनात्मनि मिथ्या संसार आरोप्यते जपाकुसुम इव स्फटिके मिथ्यालौहित्यम्।'[129]

—o—

129 Viv. pra. saṃ. p. 214 (Acyutagranthamala, Kashi).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Vinay Avasthi Sahib Bhuvan Vani Trust, Equipment Heritage Foundation, Jalgaon

( ३ )

## सात्म-संघातनिरूपणम्

मनसो धर्मादीनां व्यापाराणां च विस्तारेण निरूपणात् प्राक् यस्यां पट-भूमिकायां मनः सम्बद्धं तिष्ठति, यैश्च सहकारिभिः द्वारैर्वा तस्य वृत्ति-व्यापारादिकं जायते, ते सात्मदेहेन्द्रियादयोऽवश्यं निरूपणीयाः। तैरेव मिलित आत्मा संघातस्वामिरूपेण ज्ञाता भोक्तेति व्यक्तिरिति वा उच्यते। तस्य च संघातस्यान्तर्गतमेवान्तःकरणं मनः, यस्य संघातमध्ये प्राधान्यमात्मानं चेतनं चैतन्यस्वरूपं वा विहाय सर्ववादिसम्मतमेव। तत्र निर्गुणात्मवादीनां मते चैतन्यं प्रकाशस्वभावं विहाय सर्वमेव सुखदुःखादिकं बन्धमोक्षादिकं च मनस एवान्तःकरणस्य, तस्यैव कर्तृत्वाद् भोक्तृत्वाच्च। सगुणात्मवादीनां यद्यपि ज्ञानसुखदुःखबन्धमोक्षादिकं आत्मन एव कर्तृभोक्तृस्वरूपस्य, तथापि सर्वत्रैव कर्तृत्वभोक्तृवादौ आत्ममनःसंयोगस्य कारणत्वात्, आत्मसाक्षात्-कारे आत्मविशेषगुणसुखदुःखादिसाक्षात्कारे च मनस एव करणत्वाच्च, तेषामपि मतेषु मनसः संघाते करणरूपेण प्राधान्यमव्याहतमेव।

तथा चोक्तः कठोपनिषदि संघातान्तर्गतानां यथाक्रमोऽधमोत्तमभावः—

> 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
> मनसस्तु परा बुद्धि'रित्यादि।[1]

अत्र अर्था इतीन्द्रियोपादानभूतानि सूक्ष्मभूतानि विवक्षितानीति इन्द्रियेभ्यः परत्वम्। अथवा, इन्द्रियाणामाकर्षकत्वाद् विषयरूपार्थानां परत्वम्।

अपि चात्र मनोबुद्ध्योरधमोत्तमभावेन पृथक्कृत्य एवोपदेशो बोध्यव्यः। भगवद्गीतायां तु स्पष्टतरमुक्तम्—

> 'इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
> मनस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥'[2]

---

1 Kaṭha. Up. 1.3.10. 2 Gītā 3.42.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



यो बुद्धेः परतः स ( संघातस्वामी ) आत्मा इत्यर्थः। उक्तं च तत्रैव तस्य भोक्तृत्वमपि—

> 'श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
> अधिष्ठाय मनश्चायं विषयानुपसेवते ॥'[2a]

आयुर्वेदेऽपि रोगारोग्यादिनिर्णयोपयोगितया संघातनिरूपणं कृतम्। उक्तं च—'शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम्।'[3]
इत्यत्र चक्रपाणिना—'शरीरं पंचमहाभूतविकारात्मकमात्मनो भोगायतनम्। इन्द्रियाणि चक्षुरादीनि। सत्त्वं मनः, आत्मा ज्ञानप्रतिसन्धातैव, एषां सम्यगदृष्टयन्वितो योगः संयोगः।'[4] स एव धारि जीवितमित्यादिपर्यायैरुच्यते इत्यर्थः। पुनश्चोक्तं चरके—

> 'सत्त्वमात्मा शरीरं च त्रयमेतत् त्रिदण्डवत्।
> लोकस्तिष्ठति संयोगात्तत्र सर्वं प्रतिष्ठितम् ॥'[5] इति।

यथा त्रिदण्डानामन्यतमापाये कुम्भादिधारकत्वेन न तेषामवस्थानं तथा सत्त्वादीनामन्यतमापाये न लोकस्थितिरिति भावः।

## आत्मनिरूपणं चैतन्यनिरूपणं च।

मनआत्मवादिनं चार्वाकं चित्तात्मवादिनं बौद्धं च विहाय सर्वे वादिनोऽन्तःकरणादपि यस्याधिकतरं प्राधान्यं मन्यन्ते मन-आदीनां चैतन्यसंचारेण कर्तृत्वेन वा तस्य नियन्तृत्वात् स तु आत्मा एव संघातस्वामी। स्वरूपतः कर्तृत्वभोक्तृत्वादिकं तस्यैवात्मनः स्वीक्रियेत न वा चेतनत्वाद् देहेन्द्रियादीनामधिष्ठातृत्वं ज्ञातृत्वं प्रकाशकत्वं चाव्याहतमेवेति तस्य संघातस्वामित्वमनस्वीकार्यम्।[6] निर्गुणनिष्क्रियात्मवादिनां सांख्यपातंजलाद्वैतिनां मतेष्वपि व्यापाररहितत्वेऽप्यात्मनः सान्निध्यादेव देहेन्द्रियादिसंघातप्रवर्तकत्वं सिध्यति।[7] तस्मात् यद्यपि सांख्यादीनां मते संघातस्य परार्थत्वादसंहतः

---

2a Ibid 15.8.
3 Caraka-1.1.41.
4 Caraka-ṭīkā 1.1.41.
5 Ibid 1.1.45.
6 Bhāṣā-pari. p. 205 (Nirnayaśagar) ; Pā. yo. sū. 4.18.
7 Bṛ. sū. Śā. bhā. 2.2.2-3 ; Kena-Up. 1.1.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



परः पुरुष एवात्मा तथापि प्रतिबिम्बनेन संघाताभिमानित्वात् संघाताभिसम्बन्धात् कथंचित् संघातान्तर्गत एव पुरुष आत्मा ।

उपनिषत्सु च सर्वत्रैवात्मा प्राधान्येन सर्वनियतृत्वेन च गीयते। तथा हि—केनोपनिषदि ह्यात्मा सर्वेन्द्रियमनःप्रेरकत्वेन सर्वेन्द्रियाद्यतीतत्वेन चोच्यते। तथा सर्वेन्द्रियजन्यवृत्तिप्रकाशकत्वन च तेषामात्मत्वेन् वर्ण्यते। यथोक्तम्—'केनेषितं पतति प्रेषितं मनः, केन प्राणः प्रथमः प्रैति युक्तः।

केनेषितां वाचमिमां वदन्ति, चक्षुश्रोत्रं क उ देवो युनक्ति ॥'

पुनश्च—'श्रोत्रस्य श्रोत्रं मनसो मनो यत्'इत्यादि।

'अन्यदेव तद्विदितादथो अविदितादधि'[8]—इत्यादिना त्वात्मनः सर्वथाऽविषयत्वमुक्तम्। तथा—

'यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते ॥'[9]

इत्यादिना आत्मनो मनोऽगम्यत्वं मनःप्रकाशकत्वमनिदंरूपत्वं ब्रह्मत्वं चाम्नातम्। यद्यपि केनोपपदि आत्मन इन्द्रियाद्यविषयत्वमिन्द्रियादिवृत्तिप्रकाशकत्वं चैव प्रधानत उक्तम्, तथापि तु 'केनेषितं', 'केन युक्तः', 'क उ युनक्ति'—इत्यादिनाऽऽत्मनो देहेन्द्रियादिसंघातप्रेरकत्वं स्वीकृतमेव।

कठोपनिषदि तु 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्'[10] 'सदा जनानां हृदये सन्निविष्टः'[11] इत्यानिना आत्मनो हृदयस्थानं निर्दिश्य बहुभिः श्लोकैरात्मनः संघातान्तर्गतत्वं संघातप्रेरकत्वमिन्द्रियादिद्वारैर्ज्ञातृत्वं भोक्तृत्वं च वर्णितम्। तथा हि—

'आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥'[12]

इत्यत्र रथस्थानीयशरीरस्य बुद्धिसारथिविशिष्टस्य आत्मा रथित्वेन कल्पितः। अनेनात्मन एव रथित्वात् शेषित्वेन प्राधान्यं विवक्षितम्। अन्येषां पारार्थ्याद-

8 Kenopaniṣad 1. 1-3.
9 Ibid 1.5.
10 Kaṭha-Up. 1.2.12.
11 Ibid 2.3,17.
12 Ibid 1.3.3.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्राधान्येऽपि बुद्धेरन्तःकरणस्य सारथित्वकल्पनया आत्मार्थत्वेऽपि अन्येभ्यः करणवर्गेभ्यः प्राधान्यमेव सूचितम्। बुद्धेरधमत्वेन कल्पितस्य संकल्पविकल्पात्मकस्य मनस बाह्येन्द्रिरूपाश्वनियामकप्रग्रहरूपत्व-(संयमनरश्मिरूपत्व-) मुक्तम्। तथाचोक्तं—

'इन्द्रियाणि हयानाहु र्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥'[12a]

इति, भोक्तृत्वं चात्रात्मनः स्पष्टमुक्तम्। अपि चात्मनः संघाताभिसम्बन्धो निविड एवोक्तः। यथोक्तम्—

'येन रूपं रसं गन्धं शब्दान् स्पर्शश्च मैथुनान्।
एतेनैव विजानाति किमत्र परिशिष्यते॥'[13]

जाग्रत् स्वप्नाद्यवस्थात्रयमपि स्वत आरोपेण वा कथंचिदात्मन एव। तदुक्तं— 'स्वप्नान्तं च जागरितान्तं चोभौ येनानुपश्यति'[14] इति। 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः'[15] इति पुरुष एव स्वप्नद्रष्टा। बृहदारण्यके च—'एवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च।'[16]

मरणानन्तरं शरीरान्तरलाभाय गमनमपि संघातसम्बद्धस्यात्मन एव बोध्यव्यम्। तदुक्तं—

'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्॥'[17]

सर्वत्रैवोपनिषदि हृद्देशे आत्मनोऽवस्थानं श्रूयते। तथा च छान्दोग्ये— 'एष म आत्मा अन्तर्हृदये' इति, 'स वा एष आत्मा हृदी'ति च।[18] प्रश्नेऽपि— 'हृदि ह्येष आत्मे'ति।[19] श्वेताश्वतरेऽपि कठवदेव दृश्यते—'सदा जनानां हृदये सन्निविष्टः'[20] इति। ननु श्रुतिस्मृतिषु आत्मनो विभुत्वकीर्तनात् कथं

12a Ibid 1.3.4.
13 Ibid 2.1.3.
14 Ibid 2.1.4.
15 Ibid 2.2.8
16 Bṛ. Up. 4.3.18.
17 Kaṭha-up. 2.2.7.
18 Chā. Up. 3.14.3. ; 8.3.3.
19 Praś. Up. 3.6.
20 Śvetā. up. 3.13.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Trust. Equipment Heritage Foundation, Jalgaon



तस्य हृदये अवस्थानं युज्यते इति चेन्न, हृदये आत्मनो विशेषेणाभिव्यक्ति-सम्भवात्, हृदयदेशे ध्यानादिना तस्य बुद्धिसाक्षित्वेनोपलब्धिदर्शनात्, बुद्धेरन्तःकरणस्य हृदयदेशे अवस्थानाद् हृदि विशेषतोऽवस्थानमुक्तं सर्वगतस्याप्यात्मनः। 'यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश'.[21] 'आकाशवत् सर्वगतं सुसूक्ष्मम्'[22] इत्यादिनाऽऽत्मनः सर्वव्यापित्वनिश्चयात्। आत्मनः सर्वव्यापित्वं तु न्याय-वैशेषिक-सांख्य-पातंजल-मीमांसकाद्वैतवेदान्तिनां सर्वेषामेव सम्मतम्। जैनमते आत्मनो देहपरिमाणवत्त्वं वैष्णवमते चाणुपरिमाणत्वं देहबुद्ध्याद्युपाधिपरिच्छेदजनितविभ्रान्तिनिमित्तमिति परेषां प्रतिभाति। परन्तु, सर्वव्यापित्वेऽप्यात्मनो हृद्यन्तर्वर्तित्वनिर्देशात् देहावच्छेदेनैवात्मनः कर्तृत्वभोक्तृत्वनियन्तृत्वादिकं सर्वं बोध्यम्।

अस्यैवात्मनोऽर्थायैव मनःप्राणादीनां संघाते उत्पत्तिरागमनं वा श्रूयते। तदुक्तं—'तन्मनोऽकुरुत आत्मन्वी स्या'मिति।[23] 'आत्मन एष प्राणो जायते... मनःकृतेनायात्यस्मिञ्छरीरे'।[24] बृहदारण्यके च—'त्रीण्यात्मनेऽकुरुते'ति।[25]

आत्मनः कर्तृत्वात् स्वामित्वाद्वा करणानां सर्वे धर्मा व्यापाराश्च आत्मन्येव श्रूयन्ते। यथा—'स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः···धर्ममयोऽधर्ममयः'[26] इत्यादि। आत्मनो मनोनियन्तृत्वेनान्तर्यामित्वमपि स्पष्टमुक्तम्—'यो मनसि तिष्ठन् मनसोऽन्तरो यं मनो न वेद यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः।'[27] सदाऽपरोक्षत्वं सर्वान्तरत्वं चात्मन उक्तं तत्रैव—'यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व'[28]इति।

आत्मन एव सर्वकर्तृत्वभोक्तृत्वधर्मव्यापारनिर्देशेऽपि वस्तुत आत्मनोऽसंगत्वं भोक्तृत्वधर्मादीनां च बुद्ध्युपाधिकृतत्वमपि स्पष्टमेवोक्तम्। तदुक्तं—'हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव

---

21 Chā. Up. 8.1.3.
22 Śāṇḍ. Up. 2.1.3.
23 Bṛ. Up. 1.2.1.
24 Praś. Up. 3.3.
25 Bṛ. Up. 1.5.3.
26 Ibid 4.4.5.
27 Ibid 3.7.20.
28 Ibid 3.4.1,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



लेलायतीव।'[29] बुद्धेः समानः सन् जाग्रत्स्वप्नयोरात्मा संचरतीत्यर्थः। 'ध्यायतीव' 'लेलायतीव' इत्यादिना न तु वस्तुतो ध्यायति लेलायति वेत्युक्तम्।

'हृद्यन्तर्ज्योतिः', 'अत्रायं पुरुषः स्वयं ज्योति'रित्यादिना आत्मनः स्वप्रकाशत्वमुक्तम्। तच्च सर्वावभासकत्वादनन्याधीनप्रकाशत्वमेव बोध्यम्। रामानुजादीनां मते आत्मनः स्वप्रकाशत्वं स्वस्मै स्वेन प्रकाशमानत्वम्।

स चात्मा सर्वान्तरत्वात् परानन्दरूपत्वाच्च प्रियतमो भवति। तदुक्तं—'तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा'[30] इत्यादि। माण्डुक्योपनिषदि ह्ययमात्मा चतुष्पादवत्त्वेन वर्णितः। पादत्रयं तावत् जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयमेवात्मनो यथाक्रमं स्थूलभोक्तृत्वेन सूक्ष्मभोक्तृत्वेनानन्दभोक्तृत्वेन चोक्तम्। चतुर्थपादस्तु मुमुक्षुभिर्ज्ञेयमव्यवहार्यमात्मस्वरूपं प्रपंचोपशमं शान्तं शिवमद्वैतमुक्तम्।[31]

मुण्डकेऽपि तदेव शुद्धमात्मरूपं पुनः कथंचित् संघातनियन्तृत्वेन स्पष्टतयोक्तम्—

'मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय।
तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति॥'[32]

एवं देहेन्द्रियमनोबुद्धिव्यतिरिक्त आत्मा सगुणः कर्तृभोक्तृरूपो वा आरोपितकर्तृत्वभोक्तृत्व-चैतन्यस्वरूपो वा अवश्यं स्वीकरणीयः। आत्मवादिनां दर्शनेष्वपि आत्मनः संघातमध्ये प्राधान्यं संघातनियन्तृत्वं संघातस्वामित्वं वा सर्वथा स्वीकृतम्। तथा च तेषु सांख्य-पातंजलाद्वैतवेदान्तिनां निर्गुणात्मवादिनां मतेषु स्वरूपत आत्मनो भोक्तृत्वप्रवर्तकत्वाद्यसम्भवेऽपि बुद्ध्युपाधिवशादाभिमानिकभोक्तृत्वादियोगादेवात्मनः संघातसम्बन्धः संघातप्रवर्तकत्वं च सिध्यति। यदुक्तं—'आत्मानं रथिनं विद्धि', 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इत्यादौ। सगुणात्मवादिनान्तु नैयायिक-वैशेषिक-मीमांसक-जैन-रामानुजीयादीनां मतेषु स्वरूपत एवात्मनः कर्तृत्वभोक्तृत्वा-

---

29 Ibid 4.3.7.

30 Ibid 1.4.8.

31 Māṇḍ. Up. 1. 2-7.

32 Muṇḍ. Up. 2.2.7.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



दिन्नत्वात् संघातस्वामित्व-प्रवर्तकत्वादिकमंजसा सिद्धम्। क्रमेण तेषां मतानि प्रदर्श्यन्ते।

वैशेषिकदर्शने—'इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः'[32a]—इत्यादिसूत्रैरिन्द्रियार्थानां रूपादीनां यः साक्षात्कारस्तदाश्रयत्वेनात्मनः सद्भावः प्रतिपादितः। इन्द्रियार्थप्रसिद्धिः रूपादिसाक्षात्कारः, इन्द्रियेभ्यः अर्थेभ्यश्च अर्थान्तरस्य आत्मनामकद्रव्यस्य हेतुः साधिकेत्यर्थः।

प्रशस्तपादभाष्येऽपि सूक्ष्मत्वादात्मनोऽप्रत्यक्षत्वमुक्त्वा तस्य करणकर्तृत्वेनानुमेयत्वमभिहितम्। तथा ज्ञानसमवायिकारणत्वेन सुखदुःखादिगुणाश्रयत्वेन चात्मनोऽनुमेयत्वमुक्तम्। शरीरसमवेतप्रवृत्तिरूपचेष्टादर्शनेन च शरीरस्याधिष्ठाता प्रयत्नवान् आत्मा परशरीरे अनुमीयते। तदुक्तं—'आत्मत्वाभिसम्बन्धादात्मा। तस्य सौक्ष्मादप्रत्यक्षत्वेऽपि सति करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते। वास्यादीनां करणानां कर्तृप्रयोज्यत्वदर्शनात्, शब्दादिषु प्रसिद्ध्या च प्रसाधकोऽनुमीयते। न शरीरेन्द्रियमनसामज्ञत्वात्। न शरीरस्य चैतन्यं घटादिवद्भूतकार्यत्वात्, मृते चासम्भवात्। नेन्द्रियाणां करणत्वात्, उपहतेषु विषयासान्निध्ये चानुस्मृतिदर्शनात्। नापि मनसः, करणान्तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसंगात्, स्वयं करणत्वाच्च। परिशेषादात्मकार्यत्वात् तेनात्मा समधिगम्यते। शरीरसमवायिनीभ्यां च हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्ति-निवृत्तिभ्यां रथकर्मणा सारथिवत् प्रयत्नवान् विग्रहस्याधिष्ठाताऽनुमीयते, प्राणादिभिश्च।......सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते। तस्य गुणा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्वसंयोगविभागाः।'[33] अत्रात्मनश्चतुर्दश गुणा निर्दिष्टाः। तेषु बुद्ध्यादिसंस्कारान्ता नव विशेषगुणाः; बुद्ध्यादि-प्रयत्नान्ता आत्मनोऽधिगमे लिंगरूपा बोध्यव्याः।

उक्तं च श्रीधरेण भाष्यव्याख्याने न्यायकन्दल्यां—'शब्दादिषु विषयेषु

---

32a Vaiśeṣika-sū. 3.1.2.

33 Pra. bhā. p. 167-75; 199 (Varanasi Sanskrit Viśvavidyālaya)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रसिद्धिर्ज्ञानं तत्रापि प्रसाधको ज्ञाताऽनुमीयते। ज्ञानं क्वचिदाश्रितं क्रियात्वात् छिदिक्रियावत्, यत्रैदमाश्रितं स आत्मा।'[34]

पुनश्चोक्तं तत्रैव—'ज्ञानं तावत् कार्यत्वात् कस्यचित् समवायिकारणस्य कार्यम्; शरीरेन्द्रियमनसां च तदाश्रयत्वं प्रतिषिद्धम्। न चान्येषु वक्ष्यमानन्यायेन ज्ञानकारणत्वं प्रति शक्तिरस्ति। अतः परिशेषादात्मकार्यं ज्ञानम्। आत्मकार्यत्वात् तेन ज्ञानेनात्मा समधिगम्यते इत्युपसंहारः।'[35]

तथा च वैशेषिकमते चैतन्यन्तु ज्ञानरूपमेवागन्तुक आत्मविशेषगुणः, न आत्मनः स्वरूपम्।

गौतमीयन्यायदर्शनेऽपि प्रमेयनिरूपणे प्रथमत एवात्मोल्लेखपूर्वकमात्मशेषत्वेनैव शरीरेन्द्रियार्थबुद्धिमनःप्रभृतीनि संघातरूपाणि प्रवृत्तिदोषादीनि च प्रमेयान्तराणि निरूपितानि। तदुक्तं—'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्।'[36] उक्तं च वात्स्यायनेन सूत्रभाष्ये—'तत्रात्मा सर्वस्य द्रष्टा, सर्वस्य भोक्ता, सर्वज्ञः (क्रमशः सर्वं जानातीत्यर्थः), सर्वानुभावकः। तस्य भोगायतनं शरीरम्। भोगसाधनानीन्द्रियाणि। भोक्तव्या इन्द्रियार्थाः। भोगो बुद्धिः। सर्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्वविषयमन्तःकरणं मनः इत्यादि।'[37]

एतन्मते आत्मन एवाशेषान्तरविशेषगुणाश्रयत्वात् 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिंग'मिति।[38] आत्मविशेषगुणानां च निरूपणमग्रे विस्तारेण भविष्यति। अत्र तु आत्मनः संघातस्वामिनः संघातान्तर्गतप्राणमनःदेहेन्द्रियाणां च यथाक्रमं निरूपणं क्रियते। प्रेत्यभावश्चात्मन उक्तः सूत्रेण—'आत्मनित्यत्वे प्रेत्यभावसिद्धिः।'[39] भाष्ये च—'नित्योऽयमात्मा प्रैति, पूर्वशरीरं जहाति म्रियते इति, प्रेत्य च—पूर्वशरीरं हित्वा, भवति जायते—शरीरान्तरमुपादत्ते'[40] इति प्रेत्यभावो व्याख्यातः।

---

34 Nyā. Kan. p. 169 (V.S.V)

35 Ibid. p. 175 (V. S. V.).

36 Nyā. sū. 1.1.9.

37 Nyā. sū. bhā. 1.1.9.

38 Nyā. sū. 1.1.10.

39 Ibid. 4.1. 10.

40 Nyā. sū. bhā. 4.1.10.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



नव्या अपि नैयायिकाः—'आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ।'[41] —इत्यादिना आत्मन इन्द्रियादिसंघातप्रवर्तकत्वमुद्घोषितवन्तः । उक्तश्च मुक्तावल्यां तत्रैव—'इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः'[42] इत्यर्थः। पुनश्चोक्तं—'वास्यादीनां छिदादिकरणानां कर्तारमन्तरेण फलानुपधानं दृष्टम्, एवं चक्षुरादीनां ज्ञानकरणानामपि फलोपधानं कर्तारमन्तरेण नोपपद्यते इत्यतिरिक्तः कर्ता कल्प्यते इति ।'[43]

अयमेवात्मा धर्माधर्माश्रयः, अहं-पदस्यालम्बनम् ; ज्ञानसुखदुःखादिविशेषगुणाश्रयतया स्वशरीरे अहं सुखीत्याद्याकारेण मानसप्रत्यक्षविषयो विभुश्च । परशरीरे अयमात्मा चेष्टादिदर्शनादनुमेयः, यथा रथगतिदर्शनेन सारथिरनुमीयते ।[44]

तस्मान्न्यायमतेऽपि चैतन्यमात्मविशेषगुण एव शरीरावच्छेदेनात्मनि जायमानोऽनुव्यवसायरूपेण ज्ञानान्तरेण गृह्यते । ज्ञानन्तु द्विक्षणमात्रस्थायि, क्वचित् त्रिक्षणस्थायि वेति वेदितव्यम् ।

मीमांसकमतेऽपि आत्मा सगुण एव कर्ता भोक्ता च । भट्टमते आत्मनो जडबोधरूपस्य जाड्यांशे सुखदुःखादिविकारित्वं चैतन्यांशे च ज्ञातृत्वमपि सुसंगतम् । न चात्मानमहं जानामीत्यत्र कर्मकर्तृविरोधः, जडद्रव्यरूपेण कर्मत्वात्, चैतन्यरूपेण च ज्ञातृत्वात् । तदुक्तं माधवसरस्वत्या—'आत्मा तु द्रव्यबोधरूपः । तस्य परिणामो बुद्धिः । तया स प्रत्यक्षीक्रियते ।'[45] अतो मानसप्रत्यक्षगम्य एवात्मा । एतन्मते चैतन्यमात्मस्वरूपमात्मगुणश्च ज्ञानरूपः । अथवा, भट्टमतेऽपि तार्किकप्राभाकरादिमतवत् ज्ञानाधिकरणमेवात्मेति चैतन्यं ज्ञानरूपमात्मविशेषगुण एव ।

प्राभाकरमते तु वैशेषिकमते इव आत्मा ज्ञानसुखादिगुणाश्रयोऽपि अप्रकाशात्मकोऽपि प्रतिज्ञानं कर्तृतया विषयवत् प्रकाश्यते ।

---

41 Bhāṣā-pati. p. 205 (N.S.).

42 Siddhānta-muk. p. 205 (N.S.). 43 Ibid. p. 209 (N.S.).

44 Ibid. p. 230-31 (N.S.)

45 Sar. dar. Kau. p. 95 (Tribandrum)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तदुक्तं—

'बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः।
नानाभूतः प्रतिक्षेत्रमर्थवित्तिषु भासते ॥'[46]

ज्ञानं तु स्वप्रकाशमेव; तदुक्तं—'प्रकाशस्य त्वप्रकाशमानस्य सत्तैव नांगीक्रियते।'[47] 'सोऽयमात्मा भोक्ता, भोगायतनं शरीरम्, भोगसाधनानीन्द्रियाणि, भोग्याः सुखादय आन्तराः, बाह्याश्च पृथिव्यादयः, भुक्तिश्च वेदनेति पंचसु विधासु तत्त्वं परिसमाप्यते।'[48] न्यायवैशेषिकाभ्यां विशेषोऽप्युक्तः—'केचित्तु मानसं प्रत्यक्षं सुखादिष्विवात्मनि प्रमाणमिति। तदयुक्तमिति प्राभाकरवराः। न ह्येकस्य कर्तृत्वं कर्मत्वं च सापेक्षमुपपद्यते। एवं च विषयवित्तिगोचरत्वादात्मनो विषयवेदनोपायोपरमे स्वापादिस्वप्रकाशो युक्त एव पुरुषस्य'[49] इति। 'न च प्रेमास्पदतया आत्मन आनन्दरूपतासिद्धिः, आत्मनि प्रेमासिद्धेः। शरीरोपघाते हि दुःखोदयात् तदुपघातपरिहारार्थं सर्वे प्रार्थयन्ते इत्यात्मनि प्रेमाभिमानः।'[50]—इत्यादिना वेदान्तसम्मता आत्मन आनन्दरूपता नांगीकृता प्राभाकरैरिति दिक्। एतन्मतेऽपि चैतन्यं ज्ञानरूपमात्मविशेषगुण एवेति।

बौद्धमते तु स्थायिन आत्मनोऽनभ्युपगमात् क्षणिकविज्ञानधारैवाहमहमित्याकारा आलयविज्ञानाख्या आत्मा, तस्यैव ज्ञातृत्वभोक्तृत्वकर्तृत्वादिमत्त्वात्। तस्य प्रतिक्षणविनाशित्वेऽपि सदृशोत्पत्त्या संस्कारादृष्टादिमत्त्वमुपपन्नम्। तेनैव स्मरणप्रत्यभिज्ञाद्युपपत्तिः, कर्तृत्वभोक्तृत्वाद्युपपत्तिश्च। तस्यामेव विज्ञानधारायां संस्काराद्युपेतं पूर्वविज्ञानमुत्तरविज्ञानापेक्षया मन इत्युच्यते इत्युक्तमेव। चैतन्यमपि स्वसंवेद्यं क्षणिकविज्ञानमेव।

जैनैरपि कर्तृभोक्तृरूपेणात्मस्वरूपमभ्युपगतं नित्यं चैतन्यगुणकं च। तथैवोक्तं हरिभद्रेण—'ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो जीवश्चैतन्यलक्षणः'[51] इत्यादि। किन्तु देहपरिमाण एवात्मा न विभुरणुर्वा। न च परपरिकल्पितो विभुरात्मा तैरभ्युपगम्यते। तदुक्तं प्रभाचन्द्रेण—'तद्धि सर्वगतत्वादिधर्मोपेतं

---

46 Pra- pañ. p. 151 (Chow.)

47 Ibid. p. 56 (Chow.)

48 Ibid. p. 151 (Chow.)

49 Ibid. p. 151 ; 153 (Chow.)

50 Ibid. p. 153 (Chow.)

51 Sad. dar. samu. p. 50 (Chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



परैरभ्युपेयते। न चास्य तदुपेतत्वमुपपद्यते, प्रत्यक्षविरोधात्। प्रत्यक्षेण ह्यात्मा 'सुख्यहं, दुःख्यहं, घटादिकमहं वेद्मि' इत्यहमिकया स्वदेहे एव सुखादिस्वभावतया प्रतीयते, न देहान्तरे परसम्बन्धिनि, नाप्यन्तराले। इतरथा सर्वतः तथा प्रतीतिरिति सर्वदर्शित्वं भोजनादिव्यवहारसंकरश्च स्यात्।'[52] तस्मान्मध्यपरिमाणस्यात्मनः क्रियावेगादिरपि सम्भवति। यथोक्तं— 'वेगाख्यस्तु संस्कारो न केवलं पृथिव्यादावेवास्ति, आत्मन्यप्यस्य सम्भवात्, तस्यापि सक्रियत्वेन प्रसाधितत्वादिति।'[53] सुखदुःखादयोऽप्यात्मगुणा ज्ञानवत् स्वप्रकाशा एव। धर्माधर्मौ तु नात्मगुणौ तयोरचेतनपुद्गल-(द्रव्य) रूपत्वात्। तदुक्तं प्रभाचन्द्रेण—'न धर्माधर्मौ आत्मगुणौ अचेतनत्वाच्छब्दादिवत्। न सुखादिना व्यभिचारः, अत्र (सुखादौ) हेतोरवर्तनात्, तद्विरुद्धेन स्वसंवेदनलक्षणचैतन्येनास्याव्याप्तत्वासाधनात्। नाप्यसिद्धता (उक्ताचेतनत्वहेतोः), अचेतनौ तौ स्वग्रहणविधुरत्वात् पटादिवत्। न च बुद्ध्याऽस्य व्यभिचारः, अस्याः स्वग्रहणात्मकत्वप्रसाधनात्।'[54]

तथा च जैनमते चैतन्यं ज्ञानरूपमेवात्मलक्षणत्वेन सदातन आत्मधर्मः।

सांख्य-पातंजलयोरात्मनो निर्गुणस्यापि भोक्तृत्वादिकं संघातस्वामित्वं च प्रतिबिम्बन्यायेनाभिमानिकसम्बन्धवशादुपपन्नम्। कर्तृत्वमपि सन्निधिमात्रात् प्रवर्तकत्वात् निष्क्रियस्यापि पुरुषस्योपपद्यते। तदुक्तं सांख्यसूत्रे—'द्रष्टृत्वादिरात्मनः, करणत्वमिन्द्रियाणाम्।'[55] उक्तं च भाष्ये विज्ञानभिक्षुणा— 'द्रष्टृत्वादिपंचकं वक्तृत्वादिपंचकं संकल्पयितृत्वं चात्मनः पुरुषस्य, दर्शनादिवृत्तौ करणत्वं त्विन्द्रियाणामित्यर्थः।......कर्तृत्वं चात्र कारकचक्रप्रयोक्तृत्वं करणत्वं क्रियाहेतुव्यापारवत्त्वं, तत्साधकतमं वा कुठारादिवत्। यस्तु शास्त्रेषु पुरुषे कर्तृत्वं निषिध्यते तदनुकूलकृतिमत्त्वं तत्तत्क्रियावत्त्वं वा। तथा चोक्तम्—

'अत आत्मनि कर्तृत्वमकर्तृत्वं च संस्थितम्।
निरिच्छत्वादकर्ताऽसौ कर्ता सन्निधिमात्रतः॥'[55a] इति।

---

52 Pra. ka. mār. p. 570 (Nirnayasagar)
53 Ibid. p, 598 (N.S.)
54 Ibid p. 572 (N.S.)
55 Sā. sū. 2.29.
55a Sā. pra. bhā. 2.29.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सांख्यपातंजलमतयोश्चैतन्यमात्मस्वरूपमेव नित्यं निर्लेपं निर्गुणं विभु च। बुद्धिवृत्तौ चैतन्यप्रतिविम्बनात् परस्परप्रतिविम्बनाद्वा वृत्तिरूपं ज्ञानं जायते।

पातंजलेऽपि-'द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः,'[56] 'स्व-स्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः',[57] 'चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदन'[58]मित्यादिसूत्रेषु शुद्धस्य दृशिमात्ररूपस्यापि पुरुषस्य बुद्धिवृत्तिप्रतिविम्बितत्वेन तदाकारापत्त्या बौद्धप्रत्ययग्राहकत्वं ज्ञातृत्वं वा सिध्यतीत्यभिहितम्। उक्तं च व्यासभाष्ये -'अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रामति प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति, तस्याश्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञान-वृत्तिराख्यायते इति।'[59]

वाचस्पतिमते बुद्धावेव पुरुषस्य चितेः प्रतिविम्बितत्वेन चेतनायमानाया बुद्धिवृत्तेरनुकारमात्रेण पुरुषस्य ज्ञातृत्वम्। विज्ञानभिक्षुमते तु विषयोपरक्ताया बुद्धिवृत्तेरपि पुरुषे प्रतिविम्बितत्वेन विषयाकारापत्त्या विषयग्राहकत्वं पुरुषस्य सम्भवतीति परस्परप्रतिविम्बनमेव युक्तम्।[60]

अद्वैतवेदान्तमतेऽपि ज्ञातृत्वभोक्तृत्वादिकमात्मनोऽतात्त्विकमेवाध्यास - जन्यम्। नित्यशुद्धमुक्तोऽप्यात्माऽध्यासवशादेव देहादिसंघाताभिमानित्वादन्तःकरणोपाधिकृतकर्तृत्वभोक्तृत्वादिकं भजते। अन्तःकरणाद्युपाधिभेदाज्जीवानां भेदेऽपि न स्वरूपेणात्मा भिन्नः, किन्तु एक एव। उक्तं च—

'एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा वहुधा चैव दृश्यते जलचद्रवत्॥'[61] इति।

अपि च बुद्धिप्रतिविम्बितचिदाभास एवोपाधिबुद्धिपक्षपातित्वात् संसारं लभते, प्रमाता कर्ता च भवति।

---

56 Pāt. Yo. sū. 2.20.
57 Ibid. 2.23.
58 Ibid. 4.21.
59 Yo. sū. bhā. 4.21.
60 Yo. Vār. 1.7.; sā. pra. bhā. 1.99.
61 Brahmabindu-Up. 11.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri Digital Preservation / Development Heritage Foundation, Jalgaon



उक्तं च—

'पृथक् पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनाम्।
कल्प्यन्ते जीवनामानो बहुधा संसरन्त्यमी ॥'[62]

तत्साक्षित्वेनावस्थित चिदात्मा कूटवत् निर्विकारस्तिष्ठतीति कूटस्थशब्देनाभिधीयते। घटादीनां प्रमातृचिदाभासग्राह्यत्वेऽप्यन्तःकरणस्य ज्ञानसुखदुःखाद्यन्तःकरणधर्माणामज्ञान तत्कार्यप्रातिभासिकरजतादीनां च साक्षिग्राह्यत्वमेव। तथा कालाकाशयोरपि साक्षिभास्यत्वं ज्ञेयम्। कालस्य प्रत्यक्षादिसर्वप्रत्ययग्राह्यत्वमित्यपि केचित्। साक्षिणो निर्विकारत्वेऽपि सुख-दुःखाद्यनुसन्धानव्यवस्थोपपत्तेरन्तःकरणादिभेदात् साक्षिभेदोऽभ्युपगमनीयः। अत एवोक्तम्—'तत्र जीवो नामान्तःकरणावच्छिन्नं चैतनम्। तत्साक्षी त्वन्तःकरणोपहितं चैतन्यम्।...अयं च जीवसाक्षी प्रत्यात्मं नाना। एकत्वे मैत्रावगते चैत्रस्याप्यनुसन्धानप्रसंगः।'[63]

अद्वैतमतेऽपि चैतन्यमात्मस्वरूपमेवाद्वितीयमखण्डमनंशं विभु स्वप्रकाशं नित्यं बुद्धिवृत्तौ प्रतिबिम्बनात् ज्ञानरूपं भवति। तस्य स्वप्रकाशत्वं त्वनन्याधीनप्रकाशत्वमवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वमिति भावः।

रामानुजीयानां मते तु आत्मा जीवो नित्योऽपि न विभुः। अणुत्वे सति चेतनत्वमेव तन्मते जीवविशेषलक्षणम्। प्रत्यक्त्व-चेतनत्वात्मत्वकर्तृत्वादिकमपि तस्य परमात्मसाधारणधर्माः। तत्र प्रत्यक्त्वं स्वस्मै भासमानत्वमिति चिद्रूपत्वमेव। चेतनत्वं ज्ञानाश्रत्वम्। एवमाधेयत्व-विधेयत्व-( नियाम्यत्व- ) पराधीनत्व-परतन्त्रत्वादिकमपि जीवात्मलक्षणं बोध्यम्।[64] आत्मनोऽणुपरिमाणत्वेऽपि तस्य धर्मभूतज्ञानस्य व्याप्तेर्नानेकविषययुगपदनुभवानुपपत्तिः। स चात्मा प्रतिशरीरं भिन्नः स्वप्रकाशश्च। अणुचिद्रूपात्मा स्वरूपतः सुखी, परन्तु अनादिकर्मरूपाविद्याकृताचित्संसर्गवशात् संसारं शोकादिकं च लभते। 'अयं च कर्ता भोक्ता शरीरी शरीरं च भवति। प्रकृत्यपेक्षया

62 Pancadasī 6.7.

63 Vedā. pari. p. 46, 48. (Chow.)

64 Yat. mat. dīp. p. 67 (Ananda Asram).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



शरीरी, ईश्वरापेक्षया शरीरम्।'[65] स चात्मा देहेन्द्रियंमनप्राणादिभ्यो विलक्षणः। उक्तं च—'मनसा जानामीति मनसो ज्ञानकरणत्वप्रतीतेः, मम प्राणा इति व्यतिरेकोक्तेः, जानाम्यहमिति ज्ञानाच्च मनःप्राणज्ञानेभ्यो व्यावृत्त इति।'[66]

रामानुजमते चैतन्यस्यात्मस्वरूपत्वेऽपि धर्मभूतज्ञानरूपत्वमपि। तत्र आत्म-स्वरूपं चैतन्यं स्वस्मै स्वप्रकाशं स्वसंवेद्यमिति भावः। ज्ञानरूपं चेतन्यं तु स्वसत्तया एव आत्मने प्रकाशमानमिति स्वप्रकाशमुच्यते।

चार्वाकादिमते तु चैतन्यं जन्यमेव देहसमवेतमिन्द्रियसमवेतं वा। क्षित्यादिचतुर्भूतमेलनजं मदशक्तिवद् भौतिकमेव चैतन्यम्, तद्विशिष्टदेह एव आत्मा। तदुक्तं—

'चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते।
किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्॥
... ... ...
अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः।
देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः।'[67]

तत्र केचिद् देहं केचिदिन्द्रियं केचिन्मन एव वा आत्मानं मन्यन्ते चार्वाका उत्तरोत्तरसूक्ष्मदर्शिनः। सर्वथापि भौतिक एवात्मा, चैतन्यमपि भौतिकमेव।

तेषां खण्डनं तु न्याय-वैशेषिक-जैन-मीमांसक-सांख्यपातंजल-वेदान्तिभिः सर्वैरेव कृतमिति ग्रन्थविस्तारभयान्नोल्लिख्यते। सामान्यतस्त्वेतदुच्यते यत् मदशक्तिस्तु कारणद्रव्येषु किण्वादिषु भौतिकपरमाणुषु वाऽनुमातुं शक्यते कार्ये तद्दर्शनात्। भूतेषु तत्परमाणुषु वा चैतन्यशक्ति र्न कैश्चिन्न चार्वाकै-र्वा स्वीक्रीयते येन तत्कार्ये देहे इन्द्रिये मनसि वा चैतन्यं समवेयात्।[68] अतो तर्कासहा एषा भूतमेलनजचैतन्यकल्पना।

---

65 Ibid. p. 72 (A. A ) 66 Ibid. p. 68-69 (A. A.)
67 Sarva. dar. saṃ. Cārvāka.
68 Pra. pañ, p. 326 (Banaras Hindu University).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

आयुर्वेदे यद्यपि सांख्यवन्निर्गुण आत्मा पुरुषः क्वचित् क्वचित् प्रतिपादितः,[69] तथापि चिकित्साधिकृतः संघाताभिमानी संसारी पुरुषोऽपि निरूपितः। तथा चोक्तं सुश्रुते-टीकायां डल्हनाचार्येण—'आयुर्वेदशास्त्रेषु-सर्वगताः क्षेत्रज्ञा नित्याश्च तिर्यग्योनिमानुषदेवेषु संचरन्ति धर्माधर्मनिमित्तं त एतेऽनुमानग्राह्याः परमसूक्ष्माश्चेतनावन्तः शाश्वता लोहितरेतसः सन्निपातेषु अभिव्यज्यन्ते यतोऽभिहितं पंचमहाभूतशरीरिसमवायः पुरुष इति। स एव कर्मपुरुषश्चिकित्साधिकृतः। तस्य सुखदुःखे इच्छाद्वेषौ प्रयत्नः प्राणापानोन्मेष-निमेषौ बुद्धिर्मनःसंकल्पो विचारणा स्मृतिर्विज्ञानमध्यवसायो विषयोपलब्धिश्च गुणाः।'[70] उक्तं च चरके—'खादयश्चेतनाषष्ठा धातवः पुरुषःस्मृतः।'—इत्यादौ चक्रपाणिटीकायां—'चेतनाषष्ठा इत्यत्रैव चेतनाशब्देन चेतनाधारः समनस्क आत्मा गृह्यते।...अयं च वैशेषिकदर्शनपरिगृहीतश्चिकित्साशास्त्रविषयः पुरुषः, अयमेव पंचमहाभूतशरीरिसमवायः पुरुषः इत्यनेन सुश्रुतेनाप्युक्तः।'[71]

—·—

69 Caraka 1.1.55.
70 Suśruta-ṭīkā, śā. 1.
71 Caraka-ṭīkā (Chakrapāṇi) 4.1. 14.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## आत्मान्तःकरणसम्बन्धनिरूपणम्

अन्तःकरणस्य स्वरूपं मनोबुद्धिचित्ताहंकारभेदेन मनोमात्ररूपेण वा पूर्वमेव सविस्तारं निरूपितम्। अत्र आत्मनोऽन्तःकरणेन कीदृशः सम्बन्धः स मतभेदेन संक्षेपतो निरूप्यते। तत्र तत्र मतभेदेन सम्बन्धानां प्रायश उक्तत्वेऽपि पुनरेकत्राकलय्योच्यन्ते।

तार्किकादिमते कर्तुरात्मन कृतिज्ञानसुखादिधर्मवत्त्वे अदृष्टजन्य आत्ममनःसंयोगविशेष एव कारणम्। तथा च कर्तृत्वमपि तस्यादृष्टजन्य आगन्तुकधर्मविशेष एव। ज्ञानचिकीर्षाकृतिमत्त्वमेव कर्तृत्वम्। आत्मनो विभुत्वात् सर्वमनःसंयोगसामान्यवत्त्वेऽपि स्वादृष्टवशादेवाणुपरिमाणेन स्वमनसा संयोगविशेष एव संसारहेतुत्वेन ज्ञानसुखादिहेतुत्वेन च विद्यते इति नैयायिक-वैशेषिक-प्राभाकराणां सिद्धान्तः। भाट्टमते मनसोऽपि विभुत्वात् विभुद्वयसंयोग एवानादितस्तत्तददृष्टसहकारेण ज्ञानादिहेतुः।

सांख्यपातञ्जलमतयोश्चित्स्वरूपस्याप्यात्मनोऽन्तःकरणे बुद्धौ प्रतिबिम्बनेनाभिमानिकसम्बन्धवशादेव ज्ञातृत्वभोक्तृत्वादिकं सर्वं सम्भवति। बुद्धेः परिणामित्वात् तस्याः कर्तृत्वभोक्तृत्वादिकं तात्त्विकमेव। असङ्गस्य पुरुषस्य त्वात्मनस्तत्सर्वमाभिमानिकत्वादतात्त्विकम्। अन्तःकरणे बुद्धौ पुरुषस्य चितः प्रतिबिम्बनमेव चिदचिद्ग्रन्थिरित्युच्यते।

जैनमते तु मध्यपरिमाणस्यात्मनो नित्यस्य भाव-मनसा संयोगो नित्य एव। मोक्षदशायामपि भावमनसा चेतनपर्यायेण स सम्बन्धस्तिष्ठत्येव। पौद्गलिकेन द्रव्यमनसा संयोगस्तु कर्मजन्यः संसारहेतुः सुखदुःखसाक्षात्कारहेतुश्च। कर्मनाशे तस्य संयोगस्यापि नाशो भवतीति न द्रव्यमनःसंयोगो, तदभावाच्च न जन्यसुखदुःखादिविकारो मोक्षदशायाम्।

बौद्धमते तु क्षणिकविज्ञानातिरिक्तस्यात्मनो मनसश्चानभ्युपगमादालयविज्ञानमेवात्मा, प्रवृत्तिविज्ञानानां पूर्वविज्ञानमेवोत्तरविज्ञानापेक्षया मन इति आलयविज्ञानस्यात्मनः नीलपीतादिबाह्यविषयसम्पर्काद् वासनावशाद्वा पूर्वोत्तरविज्ञानरूपेणोत्पत्तेः कार्यकारणभावरूप एव आत्ममनसोः सम्बन्धः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Heritage Foundation, Jalgaon



रामानुजीयमते अणुपरिमाणस्यात्मनो धर्मभूतज्ञानस्य व्यापित्वेन युगपद्-नेकविषयकज्ञानमपि सम्भवत्येव। अणुरेवात्मा आहंकारिकेन मनसा मध्य-परिमाणेन संयुज्यते इत्यात्ममनःसंयोगवशादेव ज्ञानमुत्पद्यते। आत्मनः कर्तृत्वभोक्तृत्वस्वभाववत्त्वेऽपि जन्यज्ञानादिकमदृष्टजन्यं मनःसंयोगं विना न सिध्यति। तथा चोक्तं यतीन्द्रमतदीपिकायाम्—'ग्रहणप्रकारस्तु आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन इति।'[1]

अद्वैतमते तु बुद्ध्या अन्तःकरणेन वा आत्मनः सम्बन्ध आध्यासिक एव। बुद्धौ चिदात्मनः प्रतिबिम्बनादयःपिण्डवत् तादात्म्याध्यासात् चेतनायमाना बुद्धिः बुद्धिस्थचिदाभासो वा साधिष्ठानः कर्ता भोक्ता इति व्यपदिश्यते। इन्द्रियद्वारैश्च मनसः (बुद्धेः) प्रत्यक्षादिस्थले बहिर्गमनं भवति विषयदेशेषु। तदा विषयाकारेण परिणतायां बुद्धौ चिदाभासव्याप्त्या विषयस्फुरणं साक्षिणा च बुद्धिवृत्ते र्ज्ञानस्य ग्रहणं भवतीति वेदान्तसिद्धान्तः। तस्मादन्तः-करणस्य साक्षिणि अध्यस्तत्वात् साक्षिभास्यत्वाच्चाध्यासिकतादात्म्य-मेवात्मान्तःकरणयो र्विषयविषयिणोः सम्बन्धः।

भोक्त्रात्मनाऽपि चिदाभासेनान्तःकरणस्य सम्बन्ध आभिमानिकस्ता-दात्म्यमेव, बुद्ध्या सह प्रतिबिम्बितचिदाभासस्याभेदाभिमानादिति दिक्।

—·—

1 Yat. mat. dīp. P. 5. (Ānanda Asram).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



## प्राण-निरूपणम्

यद्यपि॰ मनस्तत्त्वनिरूपणे प्राणस्य निरूपणं न साक्षात् सम्बद्धं तथापि प्राणस्य देहेन्द्रियादिविधारकत्वात् देहेन्द्रियादिक्रियासम्पादकत्वाच्च करण-वर्गेषु प्राधान्यमवधार्यते । उक्तञ्च प्रश्नोपनिषदि—'अहमेवैतत् पञ्चधा आत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति ।'[1] प्राणस्यानित्यत्वमपि उत्पत्ति-श्रुते र्ज्ञायते, यथा—'आत्मन एष प्राणो जायते...मनःकृतेनायात्यस्मिञ्छरीरे'[2], 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च'[3] इत्यादि । सर्वेन्द्रियेभ्यः प्राणस्य श्रेष्ठत्वं श्रुतिरेवाह—'अथ ह प्राण उच्चिक्रमिषन् स यथा सुहयः पड्वीशशङ्कून् संखिदेदेवमितरान् प्राणान् समखिदत्, तं हाभिसमेत्योचुर्भगवन्नेधि त्वं नः श्रेष्ठोऽसि मोत्क्रमीरिति ।'[4]

प्राणस्य प्राणापानसमानव्यानोदानभेदेन पञ्चधा प्रविभागोऽपि श्रौत एव ।[5] 'आपोमयः प्राणः' इत्यादौ प्राणस्याद्भिः पुष्टिकथनेन प्राणस्य भौतिकत्व-मपि सूचितं भवति । उक्तञ्च—'आपः पीतास्त्रेधा विधीयन्ते तासां... योऽणिष्ठः स प्राणः', 'अपां सोम्य पीयमाणानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति'[6] इत्यादि । तथा वृक्षादिस्थावराणामपि प्राणवत्त्वं जीवत्वञ्च श्रुतिसिद्धम् । तथाहि—

> 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
> स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥'[7]

इत्यादौ जीवानां कर्मानुसारेण स्थाणु-(वृक्षादि-) देहप्राप्तिरपि पठिता । तत्र च प्राणसम्पर्कः भग्नक्षतसंरोहादिनाऽनुमीयते । उक्तं च विश्वनाथेन मुक्तावल्याम्—'( वृक्षे ) आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् । भग्नक्षत-संरोहणादिना तदुन्नयनात् ॥'[8]

---

1 Pra. Up. 2.3.
2 Ibid. 3.3.
3 Muṇḍ. Up. 2.1.3.
4 Chā. Up. 5.1.12.
5 Pra. Up. 2.3 ; 3.5.
6 Chā. Up. 6.5.1 ; 6.5.2 ; 6.6.3.
7 Katha. Up. 2.2.7.
8 Sid. Muk. p. 159 (N.S.).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Print Equipment Heritage Foundation, Jalgaon



जीवस्य जीवत्वं प्राणधारणादेव, जीवतेः प्राणधारणार्थत्वात्। सुषुप्त्यादौ यदा मनोबुद्ध्यादिर्विलीनस्तिष्ठति तदाऽपि प्राण एवासुप्तो जागर्ति। प्राणस्य सद्भावे एव मनसः सद्भावो दृश्यते। अतएव श्रुतौ क्वचित् क्वचित् प्राणस्य मनसः परत्वेनोल्लेखो दृश्यते—'मनः प्राणे'[9] इत्यादौ।

उपनिषन्मतानुसारेणाद्वैतवेदान्तिनोऽपि प्राणस्य भौतिकत्वं तथा पञ्च-सूक्ष्मभूतराजसांशकार्यत्वं च प्राहुः। उक्तं च विद्यारण्येन—

'रजोऽंशैः पञ्चभिस्तेषां क्रमात् कर्मेन्द्रियाणि च।
तैः सर्वैः सहितैः प्राणो वृत्तिभेदात् स पञ्चधा॥'[10]

क्रियाशक्तिप्रधानत्वात् प्राणस्य रजोऽंशकार्यत्वमनुमितम्। अतएव ग्राहकत्वादनुमितसत्त्वप्राधान्यवत्त्वान्मनस एव उत्कर्षो दृश्यते तैत्तिरीये प्राण-मयं प्रकृत्य 'अन्योऽन्तर आत्मा मनोमयः' इत्यत्र मनोमयस्यान्तरत्वाभिधाने। सर्वथापि, प्राणमनसोः सहभावित्वमेव सर्वत्र दृश्यते। अतोऽद्वैतमते सूक्ष्मभूत-कार्यं तत्त्वान्तरमेव प्राणः। यथा मनसो मिलितपञ्चसूक्ष्मभूतसत्त्वांश-कार्यत्वात् व्यस्तपञ्चसूक्ष्मभूतकार्यंबाह्येन्द्रियविषयाः सर्वे मनसा गृह्यन्ते, एवं मिलितपञ्चसूक्ष्मभूतरजःकार्यत्वात् प्राणोऽपि व्यस्तपञ्चसूक्ष्मभूतरजोऽंश-कार्यकर्मेन्द्रियाणां प्रवर्तको भवति। यत्तु शास्त्रेषु अनेकत्र प्राणो वायुत्वेन वर्ण्यते तत् प्राणक्रियाणां वायुक्रियासहभावित्वेन बोध्यम्। न तु तार्किकादि-मतेष्विव वायुरेव प्राणः, श्रुतिविरोधात्। 'एतस्माज् जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिराप'[11] इत्यादि सृष्टिवाक्ये वायुप्राणयोः पृथगभिधानात्। एतेन नैयायिक-वैशेषिक-मीमांसक-रामानुजीयादीनां शरीरान्तःसञ्चारिवायुविशेषः प्राण इति मतमपास्तं ज्ञेयम्।

रामानुजमते प्राणस्य भौतिकत्वमेव। यद्यप्यिन्द्रियाणामाहङ्कारिकत्वाद-भौतिकत्वं तथापि प्राणो वायुविशेष एव। उक्तञ्च—'तत्र शरीरधारणादि-हेतुर्वायुविशेषः प्राणसंज्ञकः पञ्चप्रकारः, प्राणापानव्यानोदानसमानभेदात्। हृदि प्राणः, गुदेऽपानः, सर्वशरीरगो व्यानः, कण्ठे उदानः, नाभिदेशे समान इति नियमः। जंगमेष्विव स्थावरेषु प्राणसम्बन्धस्तुल्य एव इति।'[12]

9 Chā. Up. 6.8.6. 10 Pañcadaśī 1. 21-22.
11 Muṇḍ. up. 2.1.3. 12 Yat. mat. dīp. p. 41 (Ānanda Asram).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उक्तञ्च श्रीभाष्ये रामानुजेन—'न वायुमात्रम्, न च तत्क्रियेत्युच्यते... सः प्राणः स वायुः—इति तु वायुरेवावस्थान्तरमापन्नः प्राणः, न तेजःप्रभृतिवत् तत्त्वान्तरमिति ज्ञापनार्थम्।'[12a]

तार्किकानां नैयायिक-वैशेषिकाणां मते शरीरान्तःसञ्चारी वायुरेव प्राणः। उक्तञ्च प्रशस्तपादेन—'प्राणोऽन्तःशरीरे रस-मल-धातूनां प्रेरणादिहेतुरेकः सन् क्रियाभेदादपानादिसंज्ञां लभते।'[13] उक्तञ्च श्रीधरेण—'...अन्तः शरीरे यो वायुर्वर्तते स प्राण इत्युच्यते। तस्यार्थक्रियां कथयति—रसमलधातूनां प्रेरणादिहेतुरिति। रस इति भुक्तवतामाहारेषु पाकजोत्पत्तिक्रमेणोत्पन्नस्य द्रव्यविशेषस्य ग्रहणम्। ...ननु पञ्च वायवः शारीराः श्रूयन्ते? तत्राह—क्रियाभेदादिति। मूत्रपुरीषयोरधोनयनादपानः, रसस्य गर्भनाडीवितननात् व्यानः, अन्नपानादेरूर्ध्वं नयनादुदानः, मुखनासिकाभ्यां निष्क्रमणात् प्राणः, आहारेषु पाकार्थमुदर्यस्य वह्नेः समं नयनात् समान इति न वास्तवमेतेषां पञ्चत्वम्, अपि तु कल्पितम्।'[14]

उक्तञ्च विश्वनाथेन—'प्राणादिस्तु महावायुपर्यन्तो विषयो मत इति।'[15] प्राणादिमहावायवः सर्वे वायवीयविषया इत्यर्थः। उक्तञ्च मुक्तावल्याम्—'प्राणस्त्वेक एव हृदादिनानास्थानवशान्मुखनिर्गमनादिनानाक्रियाभेदाच्च नाना संज्ञां लभते।'[16] उक्तं चान्नंभट्टेन—'शरीरान्तःसञ्चारी वायुः प्राण इति।'[17]

सांख्यमते तु 'सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च'[18] इति सूत्रेण सर्वकरणानां या साधारणवृत्तिः स्पन्दात्मिका सैव प्राणः, न तु वायुविशेष

---

12a Bṛ. sū. Rā. bhā. 2.4.8.

13 Pra. bhā. p. 120 (Varanasi Sanskrit Viśvavidyalaya).

14 Nyā. Kan. p. 120-121 (V.S.V.).

15 Bhā. pari. p. 189 (N.S.).

16 Sid. muk. p. 188 (N.S.).

17 Tark. Saṃ. p. 11 (Harikrishna, Benaras).

18 Sāṃ. sū. 2. 31.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Heritage Foundation, Jalgaon



इत्युक्तम्। उक्तञ्च भाष्ये—'न वायुक्रिये पृथगुपदेशादिति वेदान्तसूत्रेण[19] प्राणस्य वायुत्व-वायुपरिणामत्वयोः स्फुटं प्रतिषेधात्।'[20]

श्रुति-स्मृति-दर्शनेषु यद्यपि सर्वशरीरमेव प्राणापानादिरूपेण प्राणव्याप्त-मुक्तं तथापि चरके दश प्राणायतनानि विशेषत उक्तानि दृश्यन्ते। तदुक्तं—'दश प्राणायतनानि, तद्यथा—मूर्धा कण्ठो हृदयं नाभिर्गुदो वस्तिरोजः शुक्रं शोणितं मांसमिति।'[21]

जैनमते—'मोक्षे हि द्रव्यप्राणानामेवाभावः, भावप्राणास्तु नैष्कामिका-वस्थायामपि सन्त्येव—

ज्ञानादयस्तु भावप्राणा मुक्तोऽपि जीवति स तर्हि।
तस्माज्जीवत्वं हि नित्यं सर्वस्य जीवस्य॥'[22] इत्युक्तम्।

—·—

19 Br. sū. 2.4.2.
20 Sāṃ. pra. bhā. 2.31.
21 Caraka 4.7.9.
22 Ṣaḍ. dar. sam. p. 55 (Chow.).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## इन्द्रिय-निरूपणम्

इन्द्रस्येदमिति व्युत्पत्त्या इन्द्रस्य संघातेश्वरस्य कर्तुः करणमिन्द्रियम्।[1] कर्तुरात्मनः बुद्धेर्वा ज्ञानादिकरणत्वेनैवेन्द्रियाणि कल्प्यन्ते। उक्तञ्च—'न च केवलादात्ममनः-सन्निकर्षादेव रूपाद्यवगमः, अन्धादीनामभावादिति चक्षुरादि-बहिरिन्द्रियाण्यङ्गीक्रियन्ते। पञ्चधा च बाह्यरूपाद्युपलम्भलक्षणकार्यव्यवस्था-नात् पञ्च चक्षुरादीनि कल्प्यन्ते। एवंप्रभृतीणि षडिन्द्रियाणि यस्मिन्नाय-तन्ते तदिन्द्रियायतनं शरीरम्।'[2] यद्यप्येषा प्राभाकराणामुक्तिस्तथाप्येतत् सर्वेषामेव नैयायिक-वैशेषिक-मीमांसक-सांख्य-वेदान्तिप्रभृतीनां प्रायशः सम्मतमेव। अधिकन्तु पञ्च कर्मेन्द्रियाणि वचनादानादिक्रियासाधनानि वाक्पाणिपादपायूपस्थाख्यानि सांख्य-वेदान्तिप्रभृतिभिरङ्गीकृतानि। आयु-र्वेदेऽपि दशेन्द्रियाणि बुद्धीन्द्रिय-कर्मेन्द्रियभेदेनोक्तानि।[3] जैनमतेऽपि दशे-न्द्रियाणि, न एकादशेति। सांख्य-पातञ्जल-रामानुजादिमतेषु एकादशत्वेऽपि न भौतिकत्वमिन्द्रियाणामपि त्वाहङ्कारिकत्वमेव। पुरुषस्य भोगापवर्गार्थम-हङ्कारादेवेन्द्रियाणि जायन्ते, (एकोऽहं) 'बहु स्या'मिति श्रुतेः।[4]

उपनिषदि पञ्चज्ञानेन्द्रियाणां मनसश्चान्तःकरणरूपेणोल्लेखो दृश्यते। तथाचोक्तं बृहदारण्यके—'दशेमे पुरुषे प्राणा आत्मैकादश' इति।[5] अत्रात्म-शब्देनान्तःकरणमुक्तमिति स्पष्टम्। ग्रहातिग्रहनिरूपणे च तत्रैव पञ्चज्ञाने-न्द्रियाणां मनसो वागघस्ताभ्यां चोपलक्षणरूपेण पञ्चकर्मेन्द्रियाणां सव्यापार उल्लेखो विद्यते। तत्रेन्द्रियाणां ग्राहकत्वाद् ग्रहरूपेण, रूपरसादिविषयाणां प्रबलरूपेणेन्द्रियाकर्षकत्वादतिग्रहरूपेण वर्णनं दृश्यते। तथाचोक्तम्—'चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति।...त्वग् वै ग्रहः स स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान् वेदयते'[6] इत्यादि।

---

1 Sām. pra. bhā. 2.19.
2 Pra. pañ. p. 150 (Chow.).
3 Caraka 4.7.7 ; 4.1.5.
4 Chā. up. 6.2.3.
5 Bṛ. up. 3.9.4.
6 Bṛ. up. 3.2. 2-9.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

...aya Trust Equipment Heritage Foundation, Jalgaon



तार्किकमते तु पञ्चैवेन्द्रियाणि रूपादिपञ्चविषयग्राहकाणि। तथाहि—'घ्राण-रसन-चक्षुस्त्वक्-श्रोत्राणीन्द्रियाणि भूतेभ्यः'[7] इति गौतमीयसूत्रस्य भाष्ये उक्तं वात्स्यायनेन—'जिघ्रत्यनेनेति घ्राणं गन्धं गृह्णातीति। रसयत्यनेनेति रसनं रसं गृह्णातीति। चष्टेऽनेनेति चक्षुः रूपं पश्यतीति।...त्वक्-स्थानमिन्द्रियं त्वक् तदुपचारः स्थानादिति। शृणोत्यनेनेति श्रोत्रं शब्दं गृह्णातीति। एवं समाख्यानिर्वचनसामर्थ्यात् बोध्यं स्वविषयग्रहणलक्षणानीन्द्रियाणीति। भूतेभ्य इति नानाप्रकृतीनामेषां सतां विषयनियमः, नैकप्रकृतीनाम्। सति च विषयनियमे स्वविषयग्रहणलक्षणत्वं भवतीति।'[8] एवमिन्द्रियाणां नानाभूतप्रकृतिकत्वमप्युक्तम्। उक्तञ्च भाष्ये—'कथं पुनर्ज्ञायते भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनि? इति (आह सूत्रेण) भूतगुणविशेषोपलब्धेस्तादात्म्यम्॥ दृष्टो हि वाय्वादीनां भूतानां गुणविशेषाभिव्यक्तिनियमः; वायुः स्पर्शव्यञ्जकः, आपो रसव्यञ्जिकाः, तेजो रूपव्यञ्जकम्, पार्थिवं किञ्चिद्द्रव्यं कस्यचित् द्रव्यस्य गन्धव्यञ्जकम्। अस्ति चायमिन्द्रियाणां भूतगुणविशेषोपलब्धिनियमः, तेन भूतगुणविशेषोपलब्धेर्मन्यामहे भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति।'[9]

केचित्तु एकमेवेन्द्रियं सर्वशरीरव्यापि त्वगाख्यं तेनैव रूपरसादिविषयग्रहणोपपत्तेरधिकेन्द्रियकल्पना निरर्थिकेति वदन्ति। तदुक्तं विश्वनाथेन 'त्वगव्यतिरेकात्' इति सूत्रस्य व्याख्याने—'सर्वेष्विन्द्रियप्रदेशेष्वव्यतिरेकात् सत्वात् त्वगेवैकमिन्द्रियमस्तु।'[10] उक्तञ्च भाष्ये वात्स्यायनेन—'यया सर्वेन्द्रियस्थानानि व्याप्तानि, यस्याञ्च सत्यां विषयग्रहणं भवति सा त्वगेकमिन्द्रियमिति।'[11]

आशङ्कितमेतदिन्द्रियैकत्वं गौतमेन बहुभिः सूत्रैर्वात्स्यायनेन च भाष्ये खण्डितम्। 'नेन्द्रियान्तरार्थानुपलब्धेः', 'त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धिः', 'व्याहतत्वादहेतुः', 'न युगपदर्थानुपलब्धेः' 'विप्रतिषेधाच्च न त्वगेका'[12] इत्यादिसूत्रेषु खण्डनयुक्तयोऽभिहिताः। तथा हि—त्वगिन्द्रियेण

---

7 Nyā. sū. 1.1.12.

8 Nyā. sū. bhā. 1.1.12.

9 Ibid 3.1.63.

10 Nyā. sū. vṛ. 3.1.52.

11 Nyā. sū. bhā. 3.1.52.

12 Nyā. sū. 3.1.53-57.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



स्पर्शे गृह्यमाणे इन्द्रियान्तरार्था रूपादयो न गृह्यन्ते अन्धादिभिः, इन्द्रियैकत्वे स्पर्शवद् रूपादयोऽपि गृह्येरन् अन्धादिभिः, न च गृह्यन्ते, तस्मान्नैकमिन्द्रियं त्वक्। ननु, यथा त्वचो चक्षुर्गतावयवविशेष एव सन्निहितं धूमस्पर्शं गृह्णाति, नान्यो देहगतत्वगवयवः, तथा चक्षुर्गतत्वगवयवविशेष एव रूपादिग्राहकः, तेषामुपघातादेव रूपादयो न गृह्यन्तेऽन्धादिभिरिति चेदेतदपि वक्तुं न शक्यते। एकमेवेन्द्रियं त्वगित्युक्त्वा पुनर्विभिन्नविषयग्राहकत्वेन तस्या अवयवभेदकल्पने पूर्वो वाद उत्तरेण वादेन व्याहन्यते। रूपादिनानाविषयग्राहकनानात्वगवयवकल्पने प्रकारान्तरेण नानेन्द्रियकल्पनमेव। त्वगव्यतिरेकश्च त्वचा सर्वेन्द्रियाधिष्ठानव्याप्ति र्न त्वच इन्द्रियैकत्वे प्रयोजिका पृथिव्यादीनामपि तथात्वापत्तेः। अपि च, इन्द्रियैकत्वे तेन मनःसंयोगे सति, तदिन्द्रियस्य सर्वार्थसन्निकृष्टत्वात् युगपन्नानाविषयग्रहणानि स्युः। अपि च, स्पर्शेन्द्रियस्य त्वचः प्राप्यकारित्वदर्शनात् दूरादप्राप्तानि रूपाणि न गृह्णीयात्, अप्राप्यकारित्वे स्पर्शादिष्वप्येवं प्रसङ्गः स्यादिति विप्रतिषेधान्न त्वगेकमिन्द्रियमिति।[13]

एवमेकेन्द्रियवादखण्डनपूर्वकं बाह्येन्द्रियाणां पञ्चत्वं सयुक्तिकं प्रतिष्ठापितं गौतमेन वात्स्यायनेन च। तदुक्तम्—'इन्द्रियार्थपञ्चत्वात्'[14] पञ्चत्वम्, इन्द्रियार्थानां रूपादीनाम्, इन्द्रियप्रयोजनानां वा रूपादिग्रहणानां पञ्चत्वादिन्द्रियाणां पञ्चत्वमित्यर्थः। उक्तञ्च वात्स्यायनेन—'स्पर्शनेनेन्द्रियेण स्पर्शग्रहणे सति न तेनैव रूपं गृह्यते, इति रूपग्रहणप्रयोजनं चक्षुरनुमीयते।··· एवमिन्द्रियप्रयोजनस्यानितरेतरसाधनसाध्यत्वात् पञ्चैवेन्द्रियाणि।'[15] अपि च 'बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः'[16] पञ्चत्वमिन्द्रियाणामवधारणीयम्। बुद्धिलक्षणपञ्चत्वात्, अधिष्ठानपञ्चत्वात्, गतिपञ्चत्वात् (गतिभेदात्), आकृतिपञ्चत्वात्, जातिपञ्चत्वाच्च पञ्चत्वमिन्द्रियाणामित्यर्थः। बुद्धिलक्षणानां रूपादिग्रहणानां पञ्चत्वात् पञ्चैवेन्द्रियाणीत्यर्थः। अथवा, बुद्धेश्चाक्षुषादेर्यल्लक्षणं चाक्षुषत्वादि, तत्पञ्चत्वेन तदवच्छिन्नकरणानामपि

13 Nyā. sū. bhā. 3.1.53-57.
14 Nyā. sū. 3.1.58.
15 Nyā. sū. bhā. 3.1.58.
16 Nyā. sū. 3.1.62.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

... Equipment Heritage Foundation, Jalgaon



पञ्चत्वमित्यर्थः। अधिष्ठानानामिन्द्रियस्थानानां गोलकानां कृष्णसार-कर्णविवरादीनां पञ्चत्वादिन्द्रियपञ्चत्वम्। अथवा, अधिष्ठानानां रूपादिविषयाणां पञ्चत्वादिन्द्रियपञ्चत्वमित्यर्थः। तथा गतिभेदादपीन्द्रियभेदः। चक्षुर्बहिर्निःसृत्य रूपाधिकरणानि द्रव्याणि व्याप्नोति। त्वग्रसनघ्राणानि स्वस्थानस्थितान्येव स्पर्शादिविषयान् तदाश्रयोपसर्पणात् गृह्णन्ति। , श्रोत्रं तु तरङ्गन्यायेन स्वप्रत्यासन्नं शब्दं गृह्णातीति गतिभेदादिन्द्रियनानात्वमित्यर्थः। आकृतिः परिमाणम्, गोलकादीनां संस्थानविशेषो वा तत्पञ्चत्वादिन्द्रियपञ्चत्वम्। जातिरिति योनिः, पञ्चैवेन्द्रिययोनयः पृथिव्यादीनि भूतानि, तस्मात् प्रकृतिपञ्चत्वादपि पञ्चत्वमिन्द्रियाणामिति भावः।[17]

अपि चेन्द्रियाणां पृथिव्यादिभूतप्रकृतिकत्वेऽपि न तेषु गन्धादिगुणा उद्भूताः। तस्मादनुद्भूतत्वात् नायनरश्मिगतं रूपं तदाश्रयश्च नायनरश्मिः प्रत्यक्षतो नोपलभ्यते। एवमनुद्भूतस्पर्शोऽपि नायनरश्मिगतोऽप्रत्यक्ष एव।[18] ननु कथं चक्षुरादिषु रूपादिकमनुद्भूतम्, कथं नोद्भूतमित्यत आह—'कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः'[19]—धर्माधर्मरूपादृष्टविशेषाधीन एवेन्द्रियाणां व्यूहो रचनाविशेषः पुरुषाणामुपभोगसाधनमित्यर्थः।

यत्तु सांख्यादिभिरिन्द्रियाणामाहंकारिकत्वादभौतिकत्वमुक्तं तन्न युक्तिसिद्धम्; नाभौतिकं प्रतिघातधर्मकं दृष्टम्। यश्चेन्द्रियाणां द्रव्यविशेषे आवरणरूपप्रतिघातो दृष्टः, स भौतिकधर्मो न भूतानि व्यभिचरति। ननु काचाभ्रादौ चक्षुषोऽप्रतिघातादभौतिकं चक्षुरिति प्राप्तमिति चेन्न, अप्रतिघातस्तु अभौतिकत्वव्यभिचारी, भौतिकाभौतिकयोः समानत्वात्। भौतिकानामपि प्रदीपरश्मीनां काचाभ्राद्यन्तरितप्रकाशादप्रतिघातो दृश्यते[20] इति भौतिकत्वमेवेन्द्रियाणाम्।

कृष्णसारे चक्षुर्गोलके सति घटादिप्रत्यक्षभावात्, असति चाभावाद् गोलकानामेवेन्द्रियत्वमिति बौद्धानां मतम्। तत्तु न्यायवैशेषिकसांख्य-

17 Nyā. sū. bhā.; Nyā. sū. vṛ. 3.1.62.

18 Nyā. sū. bhā. 3.1.36.

19 Nyā. sū. 3.1.37.

20 Nyā. sū. bhā. 3.1.38.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पातञ्जलमीमांसावेदान्तादीनां कस्यापि न सम्मतम्। तथाचोक्तं गौतमेन सूत्रे—'कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः'[21] इति। उक्तञ्च तद्भाष्ये—'कृष्णसारं भौतिकं, तस्मिन्ननुपहते रूपोपलब्धिः, उपहते चानुपलब्धिरिति। व्यतिरिच्य कृष्णसारमवस्थितस्य विषयस्योपलम्भः, न कृष्णसारप्राप्तस्य ; न चाप्राप्यकारित्वमिन्द्रियाणाम्। तदिदमभौतिकत्वे विभुत्वात् सम्भवति। एवमुभयधर्मोपलब्धेः संशयः।'[22] महदणुग्रहणाद् विभुत्वमभौतिकत्वञ्च सिध्यतीति प्राप्ते—'रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम्', 'अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः'[23] इत्यादिसूत्रैर्युक्तिभिरिन्द्रियाणां गोलकातिरिक्तत्वं भौतिकत्वमविभुत्वञ्च निर्णीतम्।

उक्तञ्च जयन्तभट्टेन—'ननु च गोलके चिकित्सादिप्रयोगाद् गोलकगुणदोषानुवर्तित्वाच्च विषयोपलब्धेर्गोलकमेव चक्षुः स्यात्, अनुपलभ्यमानं च तेजः कथमिन्द्रियमुच्यते, कथं च तेजसा वेगवताऽपि सहसैव विस्फारिते चक्षुषि योजनशतसहस्रव्यवहितसितकरतरणितारकादि ग्रहीतुं शक्येत,...तेजःपक्षे च काचाभ्रकपटवालस्फटिकान्तरितपदार्थोपलब्धिः कथं समर्थ्येत तत्प्रतिबद्धं हि तेजः कथं प्रतिष्ठेतेति तद्वरं शक्तिविशेषयुक्तं गोलकमेव (साधो!) चक्षुरभ्युपगच्छेति। उच्यते...प्राप्यकारि हि कारकं दृष्टम्, कृष्णसारपक्षे च कुतः प्राप्यकारित्वम्? शक्तिरपि कल्प्यमाना निराश्रया न परिकल्पनीयैवेति तदाश्रयचिन्तायां न गोलकमात्रमाश्रयोक्तेराश्रयो भवेत्।'[24] पुनश्चोक्तम्—'अतएव सर्वेन्द्रियाणां प्राप्यकारित्वं पश्यद्भिः शास्त्रज्ञैरिन्द्रियार्थसन्निकर्षः षट्प्रकारो व्याख्यातः, प्राप्यकारिता च न गोलकस्योपपद्यते तदप्राप्तस्य पर्वतादेर्ग्रहणात् तत्प्राप्तस्य च प्रत्युताञ्जनशलाकादेरग्रहणादगोलकं चक्षुः,—

चिकित्सादिप्रयोगस्तु गोलके यः प्रवर्तते।
सोऽयमाधारसंस्कार आधेयस्योपकारकः॥'[25]

इन्द्रियाणां प्राप्यकारित्वमग्रे विस्तारेण निरूपयिष्यते।

---

21 Nyā. sū. 3.1.30. 22 Nyā. sū. bhā. 3.1.30.
23 Nyā. sū. 3.1.32 ; 3.1.38. 24 Nyā. mañ. II. p. 49 (Chow.).
25 Ibid II. p. 51 (Chow.). ślo. vār. 4.45.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Equipment Heritage Foundation, Jalgaon



वैशेषिकदर्शनेऽपि 'तत् पुनः पृथिव्यादिकार्यद्रव्यं त्रिविधं शरीरेन्द्रिय-विषयभेदात्'[26] 'भूयस्त्वाद् गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः'[27] 'तथापस्तेजो वायुश्च रसरूपस्पर्शाविशेषात्'[28]—इत्यादिसूत्रैः पृथिव्यप्तेजोवायूनां भूतानां यथाक्रमं घ्राण-रसन-चक्षु-स्त्वगिन्द्रियकारणत्वमुक्तम्। श्रोत्रं तु कर्ण-विवरवर्त्याकाशमेव।

'शरीराश्रयं ज्ञातुरपरोक्षप्रतीतिसाधनं द्रव्यमिन्द्रिय'[29]मिति लक्षणं कृतं कन्दलीकारेण। शङ्करमिश्रेण कणादरहस्ये वैशेषिकसम्मतमिन्द्रियलक्षणमुक्तम्—'स्मृत्यजनक-ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम्। शब्देत्तरोद्भूतविशेष-गुणानाश्रयत्वे सदि ज्ञानकारणमनःसंयोगाश्रयत्वं वेति।'[30] आत्मन्यतिव्याप्ति-वारणार्थं 'स्मृत्यजनके'ति। सत्यन्तदलमपि द्वितीयलक्षणे तदर्थमेव।

प्रशस्तपादेनापीन्द्रियनिरूपणे—'अक्षाणीन्द्रियाणि घ्राण-रसन-चक्षु-स्त्वक्-श्रोत्र-मनांसि षट्'[31] इत्युक्त्वा गन्धव्यञ्जकस्य घ्राणेन्द्रियस्य पार्थिवत्वमुक्तम्—'इन्द्रियं गन्धव्यञ्जकं सर्वप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राण'[32]मित्यादिना। उक्तञ्च श्रीधरेण टीकायाम्—'सर्वप्राणिनां गन्धव्यञ्जकं गन्धो-पलम्भकं यदिन्द्रियं तत्पार्थिवावयवैरारब्धम्।... जलादिभिरनभिभूतैरप्रतिहत-सामर्थ्यैरवयवैरदृष्टवशादितरविलक्षणमारब्धमेतत्, अतो विशिष्टोत्पादादिद-मेव गन्धाभिव्यक्तिसमर्थम्, नान्यदित्यर्थः। घ्राणमिति तस्य संज्ञा। आत्मा जिघ्रति गन्धमुपादत्तेऽनेनेति कृत्वा तत्सद्भावे गन्धोपलब्धिरेव प्रमाणम्, क्रियायाः करणसाध्यत्वात्, चक्षुरादिव्यापारे च तस्या अनुत्पादात्। पार्थिवत्वेऽपि रूपादिषु मध्ये गन्धस्यैवाभिव्यञ्जकत्वं प्रमाणम्, कुङ्कुमगन्धा-भिव्यञ्जकघृतवत्। यथा घृतं स्वगन्धसहितमेव कुङ्कुमगन्धमभिव्यनक्ति, तथा घ्राणमपि स्वगन्धसहितमेवेन्द्रियम्, अतो न स्वगन्धस्य ग्राहकम्, तेनैव तस्या-ग्रहणात्। यथा घ्राणस्य तथा रसन-चक्षु-स्त्वगिन्द्रियाणामपि वक्ष्यमाणेन

26 Vai. sū. 4.2.1. 27 Ibid 8.2.5.
28 Ibid 8.2.6. 29 Nyā. Kan. p. 82. (V.S.V.).
30 Kaṇāda-rahasya. p. 89 (chow.).
31 Pra. bhā. p. 442. (V.S.V.). 32 Ibid p. 87 (V.S.V.).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



दृष्टान्तबलेन रूपरसस्पर्शसहकृतानामेवेन्द्रियत्वानुमानान्न स्वगुणग्रहणम्। श्रोत्रन्तु न शब्दगुणमिन्द्रियम्, अतस्तेनैव शब्दोपलम्भः।'[33]

यद्यपि रूपादिस्वविषयग्रहणलक्षणमेव प्रत्येकमिन्द्रियाणामित्युक्तं—यथा रूपग्राहकमिन्द्रियं चक्षुरित्यादि, तथापि इन्द्रियसामान्यलक्षणं नोक्तमिति व्योमशिवाचार्येण प्रशस्तपादभाष्यस्य व्योमवतीटीकायां तल्लक्षणमप्युक्तम्। यथा हि—'तथेन्द्रियाणां नानात्वात् तद्व्यापि सामान्यलक्षणमर्थाल्लभ्यते एव—करणत्वातीन्द्रियित्व-द्रव्यत्व-नियताधिष्ठानवृत्तित्वे सत्यपरोक्षज्ञानजनकत्वादिति (...त्वमिति)। अपरोक्षज्ञानजनकत्वं कर्तुरात्मनः सम्भवतीति तन्निरासाय करणत्वग्रहणम्। अनतीन्द्रियस्य प्रदीपादेः करणत्वे सत्यपरोक्षज्ञानजनकत्वं दृष्टमिति तन्निराकरणार्थमतीन्द्रियपदम्। तथेन्द्रियार्थसन्निकर्षः करणत्वातीन्द्रियत्वे सत्यपरोक्षज्ञानजनक इति द्रव्यपदम्। तथा दिक्कालयोः सर्वोत्पत्तिमतां निमित्तत्वात् करणत्वातीन्द्रियत्वद्रव्यत्वे सत्यपरोक्षजनकत्वमस्तीति नियताधिष्ठानवृत्तित्वपदम्। दिक्कालयोस्तु व्यापकत्वेन सकलकार्यजनकत्वेन नियताधिष्ठानासम्भवात्।...अत इन्द्रियमितरस्माद्भिद्यते करणत्वातीन्द्रियत्व-द्रव्यत्व-नियताधिष्ठानवृत्तित्वे सत्यपरोक्षज्ञानजनकत्वात्।...सामान्यलक्षणलक्षितस्य समानजातीयाद्भेदमाह—इन्द्रियं घ्राणम् इन्द्रियसामान्यलक्षणलक्षितत्वे सति गन्धव्यञ्जकत्वादितरेभ्यो भिद्यते।...यच्च गन्धोपलब्धिसम्पादकं कारणं तत् घ्राणं तच्च पार्थिवम्, रूपादिषु मध्ये नियमेन गन्धव्यञ्जकत्वात्। यद् यद्रूपादिषु मध्ये नियमेन गन्धव्यञ्जकं तत्तत् पार्थिवं दृष्टं यथा कस्तूरिकाद्रव्यम्। तथा च घ्राणं रूपादिषु मध्ये नियमेन गन्धप्रकाशकं तस्मात् पार्थिवमिति।'[34]

नव्यनैयायिकैरपि तथैवाभिहितम्। उक्तञ्च विश्वनाथेन—'शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वमिति।'[35] आत्मनोऽपि ज्ञानकारणमनःसंयोगाश्रयत्वात् तद्वारणार्थं सत्यन्तदलम्। श्रोत्रस्याकाशरूपस्योद्भूतविशेषगुणाश्रयत्वात् तत्राव्याप्तिवारणार्थं शब्देतरेति।

33 Nyā. kan. p. 87-88 (V,S.V.) ; Nyā. sū. 3.1.72-75.

34 Vyomavatī p. 232-33 (chow.). 35 Sid. muk. p. 258 (NS)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

...pment Heritage Foundation, Jalgaon



तादृशसंयोगाश्रयत्वं बाह्येन्द्रियाणां मनसश्चेति बोध्यम्। उक्तञ्च तेनैव—'घ्राणेन्द्रियं पार्थिवं परकीयरूपाद्यव्यञ्जकत्वे सति गन्धस्यैवाभिव्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्।'[36] पुनश्च—'रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत्।'[37] ततस्तैजसत्वं चक्षुषः—'चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्।'[38] पुनर्वायवीयत्वं त्वचः—त्वक् वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात्, अङ्गसङ्गिसलिलशैत्याभिव्यञ्जक-व्यजनपवनवत्।'[39] तथा श्रोत्रेन्द्रियस्याकाशत्वम्—'आकाशः एकः सन्नप्युपाधेः कर्णशष्कुलीभेदाद् भिन्नं श्रोत्रात्मकं भवतीति।'[40] मनस्तु अन्तरिन्द्रियमिति प्रसिद्धमभौतिकमणुपरिमाणं नित्यञ्च। यदुक्तं सांख्यैः—'वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः'[41] तन्न सम्यक्, तथा सति कण्ठादीनामपि कर्मेन्द्रियत्वं स्यात्।[42] इन्द्रियानेकत्वमिन्द्रियव्यवस्था चोक्तं श्लोकवार्तिके मीमांसकमतानुसारेण—

'क्वचिच्च सङ्करान्नाक्षमेकमित्यवसीयते।
दार्ढ्यदौर्बल्यभेदेन व्यवस्थाऽपि यतः क्वचित्॥'

न क्वचिद् धर्मिणि त्वक्चक्षुषोः सङ्करो दृष्ट इत्येकमेवाक्षं युक्तमित्यर्थः। पुनश्चोक्तं तत्रैव—

'यथा हि मनसः सार्धं रूपादौ चक्षुरादिना।
प्रवृत्तिः सुखदुःखादौ केवलस्यैव गम्यते॥
श्रोत्रादेरुपघातेऽपि शब्दादिस्मृतिदर्शनात्।
वर्तमानस्य चाज्ञानाद् व्यवस्था सम्प्रतीयते॥
एकं यदि भवेदक्षं सर्वं गृह्येत वा न वा।
कल्प्यते शक्तिभेदश्चेच्छक्तिरेवेन्द्रियं भवेत्।
शृणुयाद् बधिरः शब्दं सङ्करे चक्षुरादिना।
मनसो वा स्वतन्त्रत्वे वर्तमानार्थबुद्धिषु॥

36 Ibid p. 161 (NS).
37 Ibid p. 172-73. (NS)
38 Ibid p. 176 (NS)
39 Ibid p. 188 (NS)
40 Ibid p. 194.
41 Sā. kā. 26.
42 Nyā. mañ. II, p. 54 (chow.).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तस्मात् पञ्चभिरप्यक्षैर्बोधः सत्तागुणत्वयोः ।
द्रव्यमूर्तौ पुनर्द्वाभ्यां रूपादावेकशः स्थितिः ॥'[43]

इतीन्द्रियपञ्चत्वं द्रव्याणां मूर्तानां दर्शनस्पर्शनेन्द्रियग्राह्यत्वं रूपादीनाञ्च चक्षुराद्येकैकेन्द्रियग्राह्यत्वमुक्तम् ।

इन्द्रियाणामगोलकत्वञ्चोक्तं तत्रैव—

'चिकित्सादिप्रयोगश्च योऽधिष्ठाने प्रयुज्यते ।
सोऽपि तस्यैव संस्कार आधेयस्योपकारकः ॥'[44]

सांख्यमते तु पञ्चकर्मेन्द्रियान्तर्भावेण एकादशविधत्वमिन्द्रियाणामुक्तम् । एतानि सर्वाण्याहंकारित्वादभौतिकानि । 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च'[45] इत्यत्रोत्पत्तिश्रवणात् मनसोऽपि न नित्यत्वम् । मनसः सर्वेन्द्रियाणाञ्च पृथग्व्यपदेशेऽपि 'मनःषष्ठेन्द्रियाणीति'[46] गीतावाक्येन मनस इन्द्रियत्वे निश्चिते श्रुतिवाक्ये सर्वेन्द्रियाणीत्यस्य दश बाह्येन्द्रियाणीत्यर्थः । तथा हि सांख्यसूत्राणि—'कर्मेन्द्रियबुद्धीन्द्रियैरान्तरमेकादशकम्'[47] 'आहङ्कारिकत्वश्रुते र्न भौतिकानि,'[48] 'तदुत्पत्तिश्रुते र्विनाशदर्शनाच्च'[49] इत्यादीनि । उक्तञ्च—'दृष्टृत्वादिरात्मनः करणत्वमिन्द्रियाणामिति ।'[50] उक्तञ्च भाष्ये विज्ञानभिक्षुणा—'…करणत्वं चात्र क्रियाहेतुव्यापारवत्त्वं तत् साधकतमत्वं वा कुठारादिवत्, अत्र दर्शनादिरूपासु चक्षुरादिद्वारकवृत्तिष्वेव इन्द्रियाणां करणत्ववचनात् ।'[51]

'उभयात्मकं मनः'[52] इतिसूत्रेण मनसः ज्ञानेन्द्रियत्वं कर्मेन्द्रियत्वञ्चाभिहितम् । बाह्यज्ञानेन्द्रियाणां पञ्चानां शब्दादिषु विषयेष्वालोचनज्ञानं निर्विकल्पकं प्रथमं जायते, ततः तदुत्तरं धर्मजात्यादिभिर्वस्तु ज्ञायते । तथा च

---

43 Ślo. vār. 4. 159-164, 170.
44 Ibid. p. 4.45.
45 Muṇḍ. Up. 2.1.3.
46 Gītā 15.7.
47 Sā. sū. 2.19.
48 Ibid 2.20.
49 Ibid 2.22.
50 Ibid 2.29.
51 Sā. sū. bhā. 2.29.
52 Sā. sū. 2.26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

... Trust Equipment Heritage Foundation, Jalgaon



निर्विकल्पकसविकल्पकरूपं द्विविधमप्यैन्द्रियकं ज्ञानमालोचनसंज्ञमिति विज्ञान-भिक्षूणां मतम्। तदुक्तं—

'शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।''

'अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम्।

परं पुनस्तथा वस्तु धर्मैर्जात्यादिभिस्तथा॥'[53] इति।

'निर्विकल्पकं ज्ञानमेवालोचनमिन्द्रियजन्यं च भवति, सविकल्पकन्तु मनोमात्र-जन्यमिति श्लोकार्थमाह'[54] वाचस्पतिमिश्राः।

इन्द्रियाणां वृत्तयः पर्यायक्रमेण युगपच्च सम्भवन्ति। तदुक्तं—'क्रमशोऽक्रमशश्चेन्द्रियवृत्तिरिति।'[54a] 'सामग्रीसमवधाने सति अनेकैरपीन्द्रियैरेक-दैकवृत्त्युपादाने बाधकं नास्तीति भावः।'[55] एतत्तु तार्किकाणां विरुद्धम्, तन्मते मनसोऽणुत्वान्नैकदा नानेन्द्रियसम्बन्धः सम्भवति।

सांख्यमतेऽपि—'शक्तिभेदेऽपि भेदसिद्धौ नैकत्वम्'[56] इन्द्रियाणां सम्भवति। अपि त्वेकादशैवेन्द्रियाणि। भगवद्गीतायामप्येकादशत्वमेवेन्द्रियाणामुक्तम्—'इन्द्रियाणि दशैकञ्च'[57] इत्यादौ।

पातञ्जलमते त्विन्द्रियाणां सर्वगतत्वमभ्युपगतम्। सर्वत्र ज्ञानकार्यदर्शनात् शरीरोपाधिकृतगमनादिदर्शनाच्चाकाशवत्[58] व्यापकानीन्द्रियाणि। सांख्य-सूत्रे तु एतन्मतस्य खण्डनमुक्तं 'न व्यापकत्वं मनसः करणत्वात्...'[59]इत्यत्र। वेदान्तिभिर्खण्डनमग्रे वक्ष्यते।

रामानुजीयमतेऽपि सात्त्विकाहङ्कारोपादानकानीन्द्रियाणि एकादश एव। 'सात्त्विकाहङ्कारोपादानकं द्रव्यमिन्द्रियमतीन्द्रियमितीन्द्रियलक्षणम्।'[60] किन्तु मनो ज्ञानेन्द्रियमेव, न सांख्यमत इव कर्मेन्द्रियमपि। अस्य ज्ञानद्वारैव कर्म-

---

53 Sā. sū. bhā. 2.32.
54 Ibid 2.32.
54a Sā. sū. 2.32.
55 Sā. sū. bhā. 2.32.
56 Sā. sū. 2.24.
57 Gītā 13.5.
58 Viv. pra. saṃ. p. 620-21 (Acyuta-granthamālā)
59 Sāṃ. sū. 5.69.
60 Yat. mat. dīp. p. 37 (Ananda Asram)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



हेतुत्वात् न कर्मेन्द्रियत्वम्। तावतैव मनसः कर्मेन्द्रियत्वे चक्षुरादेरपि कर्मेन्द्रियत्वं स्यादिति भावः। उक्तञ्च श्रीनिवासदासेन—'इन्द्रियं द्विविधम्—ज्ञानेन्द्रियं कर्मेन्द्रियं च। ज्ञानप्रसरणशक्तमिन्द्रियं ज्ञानेन्द्रियम्। तत् षोढा—मनश्श्रोत्रचक्षुर्घ्राणरसनात्वग्भेदात्। स्मृत्यादिकरणमिन्द्रियं मनः। शब्दादिपञ्चके शब्दमात्रग्रहणशक्तमिन्द्रियं श्रोत्रम्। तन्मनुष्यादीनां कर्णशष्कुल्यवच्छिन्नप्रदेशवृत्ति। द्विजिह्वानां (सर्पाणां) नयनवृत्ति। एवं रूपमात्रग्रहणशक्तमिन्द्रियं चक्षुः। तत् सर्वेषां नयनवृत्ति। गन्धमात्रग्रहणशक्तमिन्द्रियं घ्राणम्। नासाग्रवृत्ति। रसमात्रग्रहणशक्तमिन्द्रियं रसनेन्द्रियम्। जिह्वाग्रवर्ति। स्पर्शमात्रग्रहणशक्तमिन्द्रियं त्वगिन्द्रियम्, सर्वशरीरवृत्ति। नखदन्तकेशादिषु प्राणमान्द्यतारतम्यात् स्पर्शानुपलम्भः। श्रोत्रादीन्द्रियाणां भौतिकत्वप्रतिपादनं भूताप्यायितत्वेनौपचारिकम्। एतेषां विषयसम्बन्धः क्वचित् संयोगः क्वचित् संयुक्ताश्रयणमिति वृद्धसम्प्रदायः।'[61]

एवम्—'उच्चारणादिष्वन्यतमक्रियाशक्तत्वं कर्मेन्द्रियसामान्यलक्षणम्। तच्च वाक्पाणिपादपायूपस्थभेदात् पञ्चधाऽवस्थितम्। ...एतानीन्द्रियाण्यणूनि (परिच्छिन्नानीत्यर्थः)। परकायप्रवेशे लोकान्तरगमनादिषु च जीवेन सह गमनमिन्द्रियाणाम्।* मुक्तिदशायामप्राकृतदेशगमनासम्भवादिहैव यावत् प्रलयं स्थितिः।'[62]

श्रीभाष्यकारेण रामानुजेनाप्युक्तं सूत्रभाष्ये—'विज्ञानसाधनत्वादिन्द्रियाणि विज्ञानमुच्यते'[63]इत्यादि। पुनश्च—'इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः (गीता १३।५)—इत्यादिभिर्हि चक्षुरादिषु समनस्केष्वेवेन्द्रियशब्दो व्यपदिश्यते। एतस्माज्जायते प्राण मनः सर्वेन्द्रियाणि च (मुण्डक—२।१।३) इत्यादिषु इन्द्रियेभ्यः प्राणस्य पृथक् श्रवणात् प्राणव्यतिरिक्तानामेवेन्द्रियत्वमवगम्यते। मनसः पृथक् श्रवणेऽपि तस्यान्यत्रेन्द्रियान्तर्भाव उक्तः—मनः षष्ठेन्द्रियाणीति।'[64] 'हस्तादयस्तु स्थितेऽतो

61 Ibid. p. 37-38. (A. A.)

* 'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति।' Br. up. 4.4.2.

62 Ibid p. 38-39 (A. A.)

63 Br. sū. Rā. bhā. 2.3.16. 64 Ibid 2.4.15-16.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Trust Equipment Heritage Foundation, Jalgaon



नैवमिति सूत्रभाष्ये चोक्तं—'न सप्तैवेन्द्रियाणि, अपि त्वेकादश; हस्तादीनामपि शरीरे स्थिते जीवे तस्य भोगोपकरणत्वात्; कार्यभेदाच्च।'[65] एवमाहङ्कारिकत्वात् रामानुजमते अभौतिकानीन्द्रियाणि।[66]

जैनास्तु पञ्चेन्द्रियाणीति वदन्ति न षट्, एकादश वा। तानि च 'स्पर्शन-रसनघ्राणचक्षुःश्रोत्राणि।'[67] उक्तञ्च टीकायां भास्करनन्दिना—'अत्रोपयोग-प्रकरणादुपयोगसाधनानां ग्रहणम्, न क्रियासाधनानां वाक्पाणिपादपायूप-स्थानाम्। तथा तादृशानां ग्रहणे पृथिव्यादीनामपीन्द्रियत्वप्रसङ्गात्। ततः पञ्चेन्द्रियाणि भवन्ति न हीनाधिकानीति स्थितम्।'[68] प्रतिनियतविषयत्वादि-न्द्रियानां भेद इति तद्विषयप्रदर्शनार्थमाह—'स्पर्श-रस-गन्ध-वर्ण-शब्दास्त-दर्थाः।'[69] इन्द्रियाणां नियतैकैकविषयग्राहित्वनियमात्, मनसश्च सर्वार्थ-ग्राहित्वादनिन्द्रियं मनः। अनिन्द्रियत्वेऽपि आत्मनो ज्ञानादिकरणमेव मनः।

'इन्द्रस्यात्मनः कर्ममलीमसस्य सूक्ष्मस्य च लिङ्गमर्थोपलम्भे सहकारि-कारणं ज्ञापकं वा यत्तदिन्द्रियम्। इन्द्रेण नाम कर्मणा वा जन्यमिन्द्रिय'[70]-मिति व्याख्यानं कृतमिन्द्रियशब्दस्य भास्करनन्दिना।

तत्र—'वनस्पत्यान्तानामेकमि'[71]न्द्रियं ज्ञेयं स्पर्शनरूपम्। 'क्रिमि-पिपीलिका-भ्रमर-मनुष्यादीनामेकैकवृद्धानि'[72] इति क्रिमिप्रकाराणामधिकृतं स्पर्शनं रसना-धिकमिति ते द्वीन्द्रियाः। पिपीलिकादीनां स्पर्शनरसने घ्राणाधिके इति ते त्रीन्द्रियाः। भ्रमरादीनां स्पर्शन-रसन-घ्राणानि चक्षुरधिकानीति ते चतु-रिन्द्रियाः। मनुष्यादीनां स्पर्शन-रसन-घ्राण-चक्षूंषि श्रोत्राधिकानीति ते पञ्चेन्द्रिया इत्येवं विभिन्नप्राणिनामिन्द्रियाणां संख्यान्यूनाधिक्यं बोध्यम्।[73]

इन्द्रियाणां पुनः प्रकारान्तरेण द्वैविध्यं भवति। द्रव्येन्द्रियं भावेन्द्रियञ्चेति। पुद्गलद्रव्यरूपमिन्द्रियं द्रव्येन्द्रियम्। तत् पुनर्द्विविधम्। निर्वृत्ति-

65 Ibid 2.4.5.
66 Ibid 4.2.3.
67 Tat. sū. 2.19.
68 Tat. vṛ. 2.15.
69 Tat. sū. 2.20.
70 Tat. vṛ. 1.14.
71 Tat. sū. 2.22.
72 Ibid 2.23.
73 Tat. vṛ. 2.23.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



रूपमुपकरणरूपञ्चेति। कर्मणा निर्वर्त्यते इति निर्वृत्तिः। निर्वृत्तिरूपद्रव्ये-न्द्रियमपि बाह्याभ्यन्तरभेदाद् द्विविधम्। बाह्या निर्वृत्तिश्चक्षुरादिषु मसुरिकादिरूपा। आभ्यन्तरा निर्वृत्तिरात्मप्रदेशसंश्लिष्टसूक्ष्मपुदगलसंस्थानरूपा। उभयविधनिर्वृत्तिद्वारेणैवात्मनोऽर्थोपलम्भः सम्भवति।

उपकरणरूपद्रव्येन्द्रियमपि बाह्याभ्यन्तरभेदाद्विविधम्। तत्र बाह्यमुपकरणमक्षिपत्रपक्ष्मद्वयादि। आभ्यन्तरमुपकरणं कृष्णशुक्लमण्डलादि।[74]

भावेन्द्रियं त्वात्मनोऽर्थोपलम्भशक्त्यर्थग्रहणव्यापाररूपम्। ज्ञानावरणक्षयोपशमे सत्यात्मनोऽर्थोपलम्भशक्तिर्लब्धीरित्युच्यते। तस्यैवात्मनोर्थग्रहणव्यापार उपयोग उच्यते। तौ चेतनात्मकौ लब्ध्युपयोगौ भावेन्द्रियं भवतः।[75] 'तत्र भावेन्द्रियमेव मुख्यं प्रमाणं स्वार्थप्रमितौ साधकतमत्वात्, द्रव्येन्द्रियस्योपचारत एव प्रामाण्योपगमात्।'[76]

उक्तञ्च प्रभाचन्द्रेण प्रमेयकमलमार्तण्डे—'तत्रेन्द्रियं द्रव्यभावेन्द्रियभेदाद्द्वेधा। तत्र द्रव्येन्द्रियं गोलकादिपरिणामविशेषपरिणतरूप-रस-गन्ध-स्पर्शवत् पुद्गलात्मकम्। ...भावेन्द्रियं तु लब्ध्युपयोगात्मकम्। तत्रावरणक्षयोपशमप्राप्तिरूपार्थग्रहणशक्तिर्लब्धिः, तदभावे सतोऽप्यर्थस्याप्रकाशनात्, अन्यथाऽतिप्रसङ्गः। उपयोगस्तु रूपादिविषयग्रहणव्यापारः, विषयान्तरासक्ते चेतसि सन्निहितस्यापि विषयस्याग्रहणात् तस्य सिद्धिः। एवं मनोऽपि द्वेधा द्रष्टव्यम्।'[77]

अपि च नेन्द्रियाणां प्रतिनियतभूतकार्यत्वं व्यवतिष्ठते प्रमाणाभावात्। प्रतिनियतेन्द्रिययोग्यपुद्गलारब्धत्वं तु द्रव्येन्द्रियाणां प्रतिनियतभावेन्द्रियोपकरणभूतत्वान्यथानुपपत्तेर्घटते'[78] इत्युक्तं प्रभाचन्द्रेण।

आयुर्वेदमते त्विन्द्रियाणि दश एव। तथोक्तं चरके—'पञ्च बुद्धीन्द्रियाणि तद्यथा—स्पर्शनं रसनं घ्राणं दर्शनं श्रोत्रमिति। पञ्च कर्मेन्द्रियाणि, तद्यथा—हस्तौ पादौ पायुरुपस्थो जिह्वा (वाक्) चेति।'[79] इन्द्रियाणि चेन्द्रियाधिष्ठान-

---

74 Ibid 2.16-17.
75 Ibid 2.18
76 Ibid 2.18.
77 Pra. ka. mār. 2.5.
78 Ibid 2.5. p. 231 (chow.).
79 Caraka 1.8.7.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

... Equipment Heritage Foundation, Jalgaon



रूपगोलकातिरिक्तान्येव। तदुक्तं—'पञ्चेन्द्रियाधिष्ठानानि, तद् यथा—त्वग् जिह्वा नासिकाऽक्षिणी कर्णौ च।'[80] उक्तञ्च—'मनःपुरःसराणि चेन्द्रियाण्यर्थ-संग्रहणसमर्थानि भवन्तीति।'[81] अत्र मनःपुरःसराणीत्यस्य मनोऽधिष्ठितानी-त्यर्थः।

आयुर्वेदमते पञ्चज्ञानेन्द्रियाणि प्रत्येकं पाञ्चभौतिकान्येव। तदुक्तं चक्रपाणिना—'पञ्चेन्द्रियद्रव्याणि खं वायुर्ज्योतिरापो भूरिति'[82] चरकवाक्यस्य टीकायां—'इन्द्रियाणां प्राधान्येनारम्भकं द्रव्यमिन्द्रियद्रव्यम्।'[83] पुनश्चोक्तं चरके—'तत्रानुमानगम्यानां पञ्चमहाभूतविकारसमुदायात्मकानामपि सतामि-न्द्रियाणां तेजश्चक्षुषि, खं श्रोत्रे, घ्राणे क्षितिः, आपो रसने, स्पर्शनेऽनिलो विशेषेणोपपद्यते।' उक्तञ्च चक्रपाणिना टीकायां—'सम्प्रति वैद्यकसिद्धान्तेन पाञ्चभौतिकानामपि चक्षुरादीनां यथा तैजसत्वादिव्यपदेशो भवतीति तत्राह...। विशेषेणाधिकत्वेन। एतदुक्तं भवति—पाञ्चभौतिकत्वेऽपि तेजोऽधिकत्वाच्चक्षु-स्तैजसं व्यपदिश्यते।'[84] अतएव यदिन्द्रियं विशेषेण यद्भूतात्मकं तद्भूतनिज-विशेषगुणमेव तदिन्द्रियं गृह्णाति, यथा—घ्राणेन्द्रियं गन्धमिति। तदुक्तं—'तत्र यद्यदात्मकमिन्द्रियं विशेषात् तत्तदात्मकमेवार्थमनुगृह्णाति तत्-स्वभावत्वाद् विभुत्वाच्च (समर्थत्वाच्च)।'[85] सुश्रुतेऽप्युक्तम्—

'इन्द्रियेणेन्द्रियार्थन्तु स्वं स्वं गृह्णाति मानवः।
नियतं तुल्ययोनित्वान्नान्येनान्यमिति स्थितिः॥'[86]

उक्तञ्च डह्लनाचार्येण तत्रैव टीकायां—'इन्द्रियाणामिन्द्रियार्थानाञ्च पाञ्च-भौतिकत्वेऽपि यस्य भूतस्य यत्र यत्रेन्द्रिये आधिक्यं तेन तेनेन्द्रियेण तस्य तस्यैव गुणाः शब्दादयो गृह्यन्ते इत्यर्थः।'

आयुर्वेदो हि अंशतः सांख्यमतमंशतश्च वैशेषिकमतमनुसरति। अत एव चाक्षुषादिप्रत्यक्षस्थले वैशेषिकवदेवात्ममनःसंयोगस्य, इन्द्रियमनःसंयोगस्य

80 Ibid 1.8.7.
81 Ibid 1.8.8.
82 Ibid 1.8.8.
83 Caraka-ṭīkā 1.8.8.
84 Ibid 1.8.13.
85 Caraka 1.8.14.
86 Suśruta-śārīra 1.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



च हेतुत्वमभ्युपगच्छति। उक्तञ्च—'तेन चक्षुर्बुद्ध्यादौ (चाक्षुषप्रत्यक्षे) आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन।'[87] पुनश्च चरके—

'इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते।
कल्प्यते मनसाप्यूर्ध्वं गुणतो दोषतो यथा॥'[88] इति।

मनसा गुणदोषकल्पनं तु सांख्यमतेनैवाभिहितमिति बोध्यम्।

बौद्धमते इन्द्रियाणि रूपस्कन्धेऽन्तर्भूतानि। उक्तञ्च—'रूपं पञ्चेन्द्रियाण्यर्थाः'[89] इत्यादि। चक्षुरादीनि पञ्चेन्द्रियाणि, मनश्चेन्द्रियमेव। तत्र पञ्चेन्द्रियाणां विषयाः समकालीना (वर्तमानाः) भवन्ति; मनसस्तु अतीतो विषयः। एकेनापि चक्षुषा दर्शनं भवति, द्वाभ्यां शुद्धतरम्। त्रिभिर्घ्राण-रसन-त्वग्भिः प्राप्तानामेव ग्रहणं भवति। अक्षिमनःश्रोत्राणि त्वप्राप्तार्थविषयाणि। तदुक्तं—

'उभाभ्यामेव चक्षुर्भ्यां दर्शनात्।
अप्राप्तार्थान्यक्षिमनःश्रोत्राणि त्रयमन्यथा॥'[90]

शाङ्करवेदान्तमते तु एकादश एवेन्द्रियाणि सूक्ष्मभौतिकानि न त्वधिकन्यूनसंख्यकानि। उक्तश्चाचार्येण ब्रह्मसूत्रभाष्ये—'तथा चोदाहृता श्रुतिः—दशेमे पुरुषे प्राणा आत्मैकादश इति।[91] आत्मशब्देन चात्रान्तःकरणं परिगृह्यते, करणाधिकारात्।......न त्वेकादशेभ्यः कार्यजातेभ्योऽधिकं कार्यजातमस्ति यदर्थमधिकं करणं कल्प्येत। शब्द-स्पर्श-रूप-रस-गन्धविषयाः पञ्च बुद्धिभेदास्तदर्थानि पञ्चबुद्धीन्द्रियाणि। वचनादानविहरणोत्सर्गानन्दाः पञ्च कर्मभेदास्तदर्थानि च पञ्च कर्मेन्द्रियाणि।'[92]

ज्ञानेन्द्रियाणि पञ्च पञ्चसूक्ष्मभूतानां व्यस्तेभ्यः सात्त्विकांशेभ्यो जायन्ते। प्रकाशकत्वादेव तेषां सात्त्विकांशकार्यत्वं बोध्यम्। सात्त्विकाकाशकार्यत्वादेव श्रोत्रस्याकाशविशेषगुणशब्दग्राहकत्वमुपपद्यते। तथा सात्त्विकवायुकार्यत्वात् त्वगिन्द्रियेण वायावेव प्रथमाभिव्यक्तविशेषगुणः स्पर्शो गृह्यते। तथा सात्त्विकतेजउत्पन्नत्वेन चक्षुषा तेजस्येव प्रथमाभिव्यक्तविशेषगुणो रूपं

---

87 Caraka-ṭikā 1.8.11.
88 Caraka 4.1.20.
89 Abhi. Ko. 1.14.
90 Ibid. 1.43.
91 Bṛ. up. 3.9.4.
92 Br. sū. Śā. bhā. 2.4.6.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Trust. Equipment Heritage Foundation, Jalgaon



गृह्यते। एवं सात्त्विकसूक्ष्मजलोत्पन्नत्वाद् रसनया जले एव प्रथमाभिव्यक्त-विशेषगुणो रसो गृह्यते। तथा सात्त्विकक्षित्युत्पन्नत्वाद् घ्राणेन क्षितावेव प्रथमाभिव्यक्तविशेषगुणो गन्धो गृह्यते। मिलितपञ्चसूक्ष्मभूतसात्त्विकांशेभ्य उत्पन्नेनान्तःकरणेन तु मिलितभूतकार्यत्वात् सर्वे विशेषगुणाः सर्वे अर्था गृह्यन्ते इति विशेषः।

तस्मात् नेन्द्रियाणि सांख्यादिमत इवाहङ्कारिकाणि, न वा तार्किकादिमत इव अतीन्द्रियत्वेऽपि स्थूलभौतिकानि; न वा सौगतमत इव गोलकरूपाणि, भाट्टमत इव गोलकशक्तिरूपाणि वा; अपि तु अपञ्चीकृतसूक्ष्मभौतिकान्येव। तदुक्तम्—

'...वियत्पवनतेजोऽम्बुभुवो भूतानि जज्ञिरे॥
सत्त्वांशैः पञ्चभिस्तेषां क्रमाद्धीन्द्रियपञ्चकम्।
श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते॥
तैरन्तकरणं सर्वैर्वृत्तिभेदेन तद्द्विधा।
मनो विमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका॥
रजोऽशैः पञ्चभिस्तेषां क्रमात् कर्मेन्द्रियाणि तु।
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे॥'[९३]

उक्तञ्च विद्यारण्येन विवरणप्रमेयसंग्रहे—'ननु कानि पुनरिन्द्रियाणि येषां भोक्तृत्वं निराक्रियते। तत्र गोलकमात्राणीति सुगताः। तच्छक्तय इति मीमांसकाः। तद्व्यतिरिक्तानि द्रव्यान्तराणीत्यन्ये सर्वे वादिनः।'

'न तावत् गोलकमात्रत्वं युक्तम्। कर्णशष्कुल्यादिविरहिणामपि सर्पादीनां शब्दाद्युपलब्धिसद्भावात्। वृक्षाणाञ्च सर्वगोलकरहितानां विषयोपलम्भ-सत्त्वाद्।...अतएव न गोलकशक्तित्वमिन्द्रियाणाम्। अथ शक्तिमद्द्रव्यान्तर-कल्पनात् (वरं) प्रतिपन्नस्थानेषु शक्तिमात्रकल्पने लाघवं मन्यते, तर्हि अत्यन्त-लाघवादात्मन एव क्रमकारि सर्वविज्ञानसामर्थ्यं कल्प्यतां किमिन्द्रियैः। न च सर्वगतस्यात्मनो गोलकप्रदेशेष्वेव ज्ञानपरिणामोऽनुपपन्नः, त्वया तस्यैव शरीरप्रदेशमात्रे ज्ञानपरिणामाङ्गीकारात्। एवञ्चानिन्द्रियेष्वपि गोलकप्रदेशेषु ज्ञानान्वयव्यतिरेकौ शरीरद्रव्यान्यथासिद्धौ। ततो न मीमांसकमतमुपपन्नम्।'

93 Pañcādaśī 1,18-21.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



'सन्तु तर्हि द्रव्यान्तराणीन्द्रियाणि, तानि च गोलकविशेषसम्बन्धाच्चक्षुरादिशब्दवाच्यानीति। तदप्ययुक्तम्। तेषु प्रमाणाभावात्। विमता रूपाद्युपलब्धयः करणपूर्विकाः कर्तृव्यापारत्वात्, छिदिक्रियावदिति चेन्न। अनैकान्तिकत्वात्। करणप्रेरणलक्षणे कर्तृव्यापारे करणान्तराभावात्, अन्यथाऽनवस्थानात्।... न च मनोवत् साक्षिवेद्यानीन्द्रियाणि, रूपादिज्ञानाख्यं लिङ्गमनपेक्ष्य साक्षिमात्रेण चक्षुरादीनां प्रतिपत्तेरभावात्। तस्मान्न सन्त्येवेन्द्रियाणि।'

'अत्रोच्यते—गोलकव्यतिरिक्तानीन्द्रियाण्यागमादेवावगम्यन्ते। न हि तत्संस्काररहितास्तानि जानन्ति, किन्तु गोलकान्येव। यत्तु तेषामिन्द्रियाणामहंकारकार्यत्वं सांख्यैरुच्यते तत्र किमध्यात्माहङ्कारः कारणं किंवा कृत्स्नकार्यव्यापिनी काचिदहङ्काराख्या प्रकृतिः। उभयत्रापि नास्ति किमपि प्रमाणम्।'...

'यच्च शुष्कतार्किकैः भौतिकत्वमिन्द्रियाणामुक्तं तदप्ययुक्तम्। तैर्मानस्य वक्तुमशक्यत्वात्।...( तेषामनुमानानां ) शब्दस्यैवाभिव्यञ्जके श्रोत्रे शब्दगुणवदाकाशानारब्धेऽनैकान्तिकत्वात्, कर्णशष्कुल्यवच्छिन्नाकाशमात्रस्य त्वया श्रोत्रत्वाभ्युपगमात्।... रूपादिचतुष्टयाभिव्यञ्जकस्य मनसो भूतचतुष्टयारभ्यत्वस्य सुसाध्यत्वात्।...तस्मान्न शुष्कतर्कादिन्द्रियाणां भौतिकत्वसिद्धिः किन्तु आगमादेव।'

'तानि पुनरिन्द्रियाणि सर्वगतानीति योगाः प्रतिपेदिरे। तदपि मानहीनम्। आत्मेन्द्रियमनांसि सर्वगतानि सर्वत्र दृष्टकार्यत्वादाकाशवत्, दृश्यते हि ज्ञानकार्यं सर्वत्रेति चेत्, न, सर्वत्रेत्यनेन कृत्स्नजगद्विवक्षायामसिद्धिप्रसङ्गात्। यत्र शरीरं तत्र सर्वत्रेति विवक्षायां शरीरे एवानैकान्तिकत्वम्। दृश्यते हि यत्र शरीरं तत्र सर्वत्र शरीरकार्यम्। न च शरीरस्य सर्वगतत्वमस्ति। अथेन्द्रियाणि सर्वगतानि परोपाधिगमनकत्वादाकाशवत्। यथाकाशस्य गमनं घटाद्युपाधिकं तथेन्द्रियाणां शरीरोपाधिकं गमनमिति चेन्न। शरीरावयवेष्वनैकान्तिकत्वात्। प्राणोपाधिकं हि तेषां चलनम्। किञ्चेन्द्रियाणां सर्वगतत्वे युगपत् सर्वविषयोपलब्धिः स्यात्। शरीरे एव वृत्तिलाभान्नायं दोष इति चेत्, तर्हि बहिरिन्द्रियकल्पना न प्रयोजनवती। तस्मादसर्वगतानीन्द्रियाणि।'[94]

—o—

94 Viv. pra. saṃ p. 613-621 (Acyutagranthamālā, Kāśī).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Trust Equipment Heritage Foundation, Jalgaon

## इन्द्रियाणां प्राप्यकारित्वनिरूपणम्

दूरदेशस्थितविषयग्राहित्वात् काचाभ्रपटलस्फटिकान्तरितविषयाणां चक्षुषोपलब्धेश्चाप्राप्यकारिणी चक्षुश्श्रोत्रे इति बौद्धमतम्। घ्राणेन्द्रियमपि यदा दूरतो फुल्लमल्लिकादिसौरभमुपलभते न तत्र मल्लिकादिना द्रव्येण तस्य सन्निकर्ष इति घ्राणेन्द्रियमप्यप्राप्यकार्येवेति केचित्। सर्वथापि चक्षुःश्रोत्रमनसामप्राप्तार्थग्राहित्वं प्रसिद्धमेव। प्राप्तार्थग्राहित्वे चक्षुषा प्राप्तमञ्जनादिकमपि गृह्येत, अतिदूरस्थचन्द्रार्कग्रहादिकं चक्षुष उन्मीलनमात्रं न गृह्येत। तदुक्तं वसुबन्धुना—'अप्राप्तार्थान्यक्षिमनःश्रोत्राणि त्रयमन्यथा'[1] इति। त्रयं त्वग्रसनघ्राणानि तु प्राप्तार्थग्राहकाण्येवेत्यर्थः। तथा जैना अपि चक्षुर्मनसोरप्राप्यकारित्वमिति वदन्ति। उक्तञ्च भास्करनन्दिना 'न चक्षुरनिन्द्रियाभ्या'मिति तत्त्वार्थसूत्रस्य टीकायां—'चक्षुर्मनसी प्राप्यकारिणी करणत्वाद् दात्रादिवदिति चेन्न, मन्त्रादिना हेतोर्व्यभिचारात्। मन्त्रादेरप्राप्यकारित्वेऽपि करणत्वदर्शनात्। यथा मन्त्रेण भुजङ्गमाकर्षति ; ...किञ्चाप्राप्यकारि चक्षुः स्पष्टम्। यदि प्राप्यकारि स्यात् त्वगिन्द्रियवत्तदा स्पृष्टमञ्जनं गृह्णीयान्न च गृह्णाति। मनोवत् तस्मादप्राप्यकारीत्येवावसीयते।'[2]

अनूदितञ्चेदं बौद्धमतं पूर्वपक्षरूपेण गौतमीयन्यायसूत्रे—'अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेरिति।'[3] तन्मतखण्डनञ्चोक्तं तत्रैव—'न, कुड्यान्तरितानुपलब्धेरप्रतिषेधः'[4] इत्यादौ। 'अप्राप्यकारित्वे सतीन्द्रियाणां कुड्यान्तरितस्यानुपलब्धिर्न स्यात्'[5] इति सूत्रार्थः। उक्तञ्च वात्स्यायनेन—'न च काचोऽभ्रपटलं वा नयनरश्मिं विष्टभ्नाति, सोऽप्रतिहन्यमानः सन्निकृष्यते इति। ...आदित्यरश्मिः कुम्भादिषु न प्रतिहन्यते, अविघातात् कुम्भस्थमुदकं तपति,...भर्जनकपालादिस्थञ्च द्रव्यमाग्नेयेन तेजसा दह्यते, तत्राविघातात् प्राप्तिः, प्राप्तौ तु दाहः, नाप्राप्यकारि तेजः इति।'[6] तथा भौतिकमपि चाक्षुषं

1 Abhi. Ko. 1.43.
2 Tat. sū. vṛ. 1,19.
3 Nyā. sū. 3.1.44.
4 Ibid 3.1.45.
5 Nyā. sū. bhā. 3.1.45.
6. Ibid 3.1.46-47.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तेजः काचादिभिरप्रतिहन्यमानः सन्निकर्षेण प्राप्तमेवार्थं गृह्णातीति नेन्द्रियाणां प्राप्यकारित्वे काचिदनुपपत्तिः ।

जयन्तभट्टेनाप्युक्तम्—'अतएव सर्वेन्द्रियाणां प्राप्यकारित्वं पश्यद्भिः शास्त्रज्ञैरिन्द्रियार्थसन्निकर्षः षट्प्रकारो व्याख्यातः, प्राप्यकारिता च न गोलकस्योपपद्यते तदप्राप्तस्य पर्वतादेर्ग्रहणात्, तत्प्राप्तस्य च प्रत्युताञ्जनशलाकादेरग्रहणादगोलकं चक्षुः ।...इत्थं भौतिकेन्द्रियवादेऽपि प्राप्यकारित्वसिद्धेर्न कापिलकथितमाहङ्कारिकत्वमिन्द्रियाणामुपपद्यते ।'[7]

वैशेषिकमतानुसारेण प्रशस्तपादेन पृथिव्यादीनां पञ्चभूतानामिन्द्रियस्वभावत्वं बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्वञ्चोक्तम् । तत्राह श्रीधरो न्यायकन्दल्याम्—'न भूतस्वभावानीन्द्रियाणि अप्राप्यकारित्वात् ; प्राप्यकारित्वं हि भौतिको धर्मो यथा प्रदीपस्येति केचित् । तदयुक्तम् । व्यवहितानुपलब्धेः ; यदीन्द्रियमप्राप्यकारि कुड्यादिव्यवहितमप्यर्थं गृह्णीयादप्राप्तेरविशेषात् । योग्यताभावाद् व्यवहितार्थाग्रहणमिति चेत्, न, इन्द्रियस्य तावद् योग्यता विषयग्रहणसामर्थ्यमस्त्येव तदानीमव्यवहितार्थग्रहणात्, विषयस्यापि योग्यता महत्त्वानेकद्रव्यवत्त्वरूपविशेषाद्यात्मिका व्यवधानेऽपि न निवृत्तैव, आर्जवावस्थानमपि तदवस्थमेव ।...तथा सति सुलभमेतदनुमानम्—प्राप्तप्रकाशकं चक्षुः, व्यवहितार्थाप्रकाशकत्वात् प्रदीपवत्, बाह्येन्द्रियत्वात् त्वगिन्द्रियवत् । नन्वेवं विप्रकृष्टार्थग्रहणं कुतः ? रश्म्यर्थसन्निकर्षादनुद्भूतरूपस्पर्शा नायना रश्मयो दूरे गत्वा सन्तमर्थं गृह्णन्ति ; अतएव महदणुप्रकाशकत्वात् किमिन्द्रियस्य भौतिकत्वं न सिध्यति ? प्रदीपस्येव रश्मिद्वारेण तदुपपत्तेः ।'[8]

प्राभाकरेण शालिकनाथेनापि प्राप्यकारित्वमेव निर्णीतम् ; यथोक्तं—'ननु प्राप्यकारिणि नायने तेजसि काचाभ्रपटलतिमिरान्तरितेषु कथमुपलब्धिः ? तैर्नयनरश्मेरप्रतिघातात् । ये पुनरप्राप्यकारि चक्षुराहुस्तेषां व्यवहितविप्रकृष्टार्थग्रहणं दुर्निवारम् । सन्निधाने इव विप्रकर्षेऽपि स्फुटतरमणीयांसोऽप्यर्था गृह्येरन् । प्राप्यग्रहणे तु तेजोऽवयवानामप्रचुरतया युक्तमस्फुटदर्शनं दवीयसाम्, क्षोदिष्ठानामदर्शनम् ।'[9]

---

7 Nyā. man. II. p. 51-52 (Chow.)  8 Nyā. Kan. p. 60-62 (V.S.V.).
9 Pra. pañ. p. 131 (Benares Hindu University).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Trust, Equipment Heritage Foundation, Jalgaon



भट्टैरपि श्लोकवार्तिके इन्द्रियाणां प्राप्यकारित्वमेव सौगतपूर्वपक्षनिरासपूर्वकं स्वीकृतम् :—

'ततश्चाप्राप्यकारित्वाद् यद् बौद्धैः श्रोत्रचक्षुषोः ।
लक्षणाव्याप्तिसिद्ध्यर्थं संयोगो नेति कीर्त्यते ॥
प्राप्यग्रहणपक्षेऽपि सान्तरग्रहणं किल ।
अधिष्ठानाधिकश्चार्थो न गृह्येत त्वगादिवत् ॥
व्यापारमात्रवाचित्वादविरुद्धं तदत्र नः ।
यदि वाऽर्थार्जवस्थानं सम्प्रयोगोऽत्र वर्ण्यते ॥
...तयोश्च प्राप्यकारित्वमिन्द्रियत्वात् त्वगादिवत् ।
केचित् तयोः शरीराच्च बहिर्वृत्तिं प्रचक्षते ॥'[10]

उक्तं च सुचरितमिश्रेण टीकायां—'यदि चक्षुश्रोत्रे विषयं प्राप्य गृह्णीतः, यदिदं दूरे शब्दो दूरेऽर्थ इति सान्तरग्रहणं यच्च सुमहतां महीमहीधरादीनामधिष्ठानाधिकपरिमाणानां ग्रहणं तत्किलोभयमपि न स्यात् प्राप्यकारिषु त्वगादिष्वदर्शना'[11]दिति बौद्धानां पूर्वपक्षः। परिहारस्तु—न भट्टैः प्रत्यक्षलक्षणे इन्द्रियसम्प्रयोगशब्देन प्राप्तिः संयोगो वा विवक्षितः, अपि तु इन्द्रियाणां व्यापारमार्जवावस्थानं वा। प्राप्त्यर्थत्वेऽपि इन्द्रियाणां सर्वेषामेव प्राप्यकारित्वात् संयोगरूपेन्द्रियसम्प्रयोगस्यापि सत्त्वान्न कश्चिद् दोषः। उक्तञ्च—

'अधिष्ठानाधिकं तेन गृह्यते यत्र यादृशम् ।
पार्थवं वृत्तिभागे स्यात् दूरेऽपि ग्रहणं तथा ॥'[12]

यादृशं पृथुत्वं नायनवृत्तेरग्रभागे स्यात् तादृशमधिष्ठानाधिकं गृह्यते इत्यर्थः।

अद्वैतवेदान्तिभिरपि भट्टतार्किकादिवत् प्राप्यकारित्वमेवेन्द्रियाणामङ्गीकृतम्। सूक्ष्मभौतिकत्वेऽपि चक्षुःश्रोत्रयोरपि त्वग्घ्राणरसनवत् प्राप्यकारित्वमेवानुमेयम्। तथाचोक्तं विद्यारण्येन—'यत्तु तान्यप्राप्यकारीणीति सुगताः कल्पयन्ति तदयुक्तम्। तत्र किं चक्षुश्रोत्रयोरेवाप्राप्यकारित्वमुतेतरेषामपि। न तावदितरेषाम्, दूरत एव स्पर्श-रस-गन्धोपलब्धिप्रसङ्गात्। नापि प्रथमः।

10 Ślo. vār. 4.40-42, 44. 11 Śl. vār. ṭīkā. 4.41.
12 Śl. vār. 4.48.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



विमते चक्षुःश्रोत्रे प्राप्यकारिणी बाह्येन्द्रियत्वाद् घ्राणादिवत्। तेजसस्त्वतिदूरशीघ्रगमनदर्शनादुन्मीलनमात्रेण चक्षुषो ध्रुवादिप्राप्तिरविरुद्धा इति।"[13]

प्राप्यकारित्वेऽपि वीचितरङ्गन्यायेनागतस्य श्रोत्रसमवेतस्य शब्दस्यैव ग्रहणमिति तार्किकमतम्। वेदान्तिनां तु परिच्छिन्नस्य सूक्ष्मभूतकार्यस्य श्रोत्रस्यैव शब्ददेशे गमनेन विषयप्राप्त्या शब्दग्रहणमिति विशेषः। तदुक्तं विवरणप्रमेयसंग्रहे—'शब्दस्य च वीचिसन्तानवत्परम्परया श्रोत्रसमवायः प्राप्तिरिति यत्तार्किकैरुच्यते, तदसत्। तथा सतीह श्रोत्रे शब्द इति प्रतीयेत, प्रतीयते तु 'तत्र शब्द' इति। तस्माद् यथानुभवं श्रोत्रस्यैव तत्र गमनं कल्पनीयम्। तदेवं भौतिकानि परिच्छिन्नानि प्राप्यकारिणीन्द्रियाणि सन्तीति सिद्धम्।"[14]

———०———

13 Viv. pra. saṃ. p. 621-22 (Acyutagranthamālā, Kāśī)

14 Ibid. p. 622-23 (A.G.M.).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Library Trust. Equipment Heritage Foundation, Jalgaon

# शरीरनिरूपणम्

यस्मिन् संघातनियन्ता आत्मा करणश्च मनोऽधितिष्ठतस्तत्शरीरमवश्यमेव निरूपणीयम्। उक्तञ्च कठोपनिषदि—

'आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥'[1] इति।

रथिन आत्मनः शरीरं रथरूपत्वेन वर्णितम्। क्वचिच्च शरीरे हृदये ब्रह्मणो विशेषतोऽधिष्ठानात् शरीरं ब्रह्मपुरत्वेनाभिहितम्।[2] क्वचिद्वा सोपानारोहण-न्यायेन सर्वान्तरतममात्मानं दिदर्शयिषुः प्रथमसोपानरूपेण लोकसिद्धानुवा-देन च शरीरमेवात्मानमाह श्रुतिः। यथा—'स वा एष पुरुषोऽन्नरसमयः'[3] इति। कठोपनिषदि पुनरुक्तम्—'पुरमेकादशद्वारमजस्यावक्रचेतसः' इति। सप्त शीर्षण्यानि द्वाराणि मलमूत्रद्वारनाभिब्रह्मरन्ध्रैः सह एकादश इत्यर्थः।

शरीरवर्णनं हि एवं दृश्यते गर्भोपनिषदि—

पञ्चात्मकं पञ्चसु वर्तमानं षडाश्रयं षड्गुणयोगयुक्तम्।
तत्सप्तधातु त्रिमलं द्वियोनि चतुर्विधमाहारमयं शरीरम्॥'[4]

पाञ्चभौतिकं षड्रसयुक्तं रसशोणितमांसमेदास्थिमज्जाशुक्रसप्तधातुविशिष्टं वायुपित्तकफत्रिमलं स्त्रीपुरुषोत्पन्नं चर्व्यचोष्यलेह्यपेयचतुर्विधाहारपुष्टं शरीर-मित्यर्थः। गर्भे उत्पत्तिप्रकारश्च श्रूयते[5]—'...एकरात्रोषितं कलिलं भवति, सप्तरात्रोषितं बुद्बुदं भवति, अर्धमासाभ्यन्तरेण पिण्डो भवति, मासाभ्यन्त-रेण कठिनो भवति, मासद्वयेन शिरः सम्पद्यते, मासत्रयेण पादप्रदेशो भवति। अथ चतुर्थे मासेऽङ्गुल्यजठरकटिप्रदेशो भवति...षष्ठे मासे मुखनासिकाक्षिश्रो-त्राणि भवन्ति। सप्तमे मासे जीवेन (विज्ञानमयकोशेन ?) संयुक्तो भवति। अष्टमे मासे सर्वसम्पूर्णो भवति। पितूरेतोऽतिरिक्तात् पुरुषो मातूरेतोऽतिरिक्तात्

---

1 Kaṭha-up. 1,3.3.
2 Chā. up. 8.1.1.
3 Tai. up. 2.1.1.
4 Garbhopaniṣad 1.1.
5 Ibid 1.3-4.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



स्त्रियो भवन्ति। ...व्याकुलितमनसोऽन्धाः, खञ्जाः, कुब्जाः, वामना भवन्ति। ...अथ मात्राऽशितपीतनाडीसूत्रगतेन प्राण आप्यायते। अथ नवमे मासि सर्वलक्षणसंपूर्णो भवति, पूर्वजातीः स्मरति...। अथ जन्तुः योनिद्वारि संप्राप्तो यन्त्रेणापीड्यमानो महता दुःखेन जातमात्रस्तु वैष्णवेन वायुना संस्पृश्य तदा न स्मरति जन्ममरणं न च कर्म शुभाशुभम्।' उक्तञ्च सुश्रुते—'चतुर्थे सर्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरो भवति, गर्भहृदयप्रव्यक्तभावाच्चेतनाधातुरभिव्यक्तो भवति; कस्मात्, तत्स्थानत्वात् ..पञ्चमे मनः प्रतिबुद्धतरं भवति। षष्ठे बुद्धिः।'[6]

'चेष्टेन्द्रियार्थाश्रयः शरीर'[7]मिति न्यायसूत्रे शरीरस्य लक्षणत्रयं विवक्षितम्। तथा हि—चेष्टाश्रयत्वमिन्द्रियाश्रयत्वमर्थाश्रयत्वञ्चेति लक्षणत्रयम्। अर्थाश्रयत्वमत्र सुखदुःखाश्रयत्वं बोध्यम्। उक्तं च वात्स्यायनेन—'ईप्सितं जिहासितं वाऽर्थमधिकृत्येप्साजिहासाप्रयुक्तस्य तदुपायानुष्ठानलक्षणा समीहा चेष्टा, सा यत्र वर्तते तच्छरीरम्। कथमिन्द्रियाश्रयः? यस्यानुग्रहेणानुगृहीतानि, उपघाते चोपहतानि स्वविषयेषु साध्वसाधुषु च वर्तन्ते स (देहः) एषामाश्रयः, तत् शरीरम्। कथमर्थाश्रयः? यस्मिन्नायतने इन्द्रियार्थसन्निकर्षाद्युत्पन्नयोः सुखदुःखयोः प्रतिसंवेदनं प्रवर्तते स एषाम् (अर्थानाम्) आश्रयः।'[8] सुखदुःखभोगायतनं शरीरमित्यर्थः।

मनुष्यादिशरीराणां पार्थिवत्वञ्चोक्तं सूत्रेण—'पार्थिवं गुणान्तरोपलब्धेः इति।'[9] पार्थिवं पृथिवीसमवायिकारणकमित्यर्थः। गुणान्तराणां गन्धनीलादिरूप काठिन्यादीनामुपलब्धेरित्यर्थः। उक्तञ्च तत्रैव भाष्ये—'न त्विदमवादिभिरसम्पृक्तया पृथिव्या आरब्धं चेष्टेन्द्रियार्थाश्रयभावेन कल्पते, इत्यतः पञ्चानां भूतानां संयोगे सति शरीरं भवति।..... आप्यतैजसवायव्यानि लोकान्तरे शरीराणि, तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र इति। स्थाल्यादिद्रव्यनिष्पत्तावपि निःसंशया नावादिसंयोगमन्तरेण निष्पत्ति'[10]रिति भूतान्तरसंयोगो न निषिध्यते। अतएव मतान्तराभिधानाय सूत्रत्रयोल्लेखपूर्वकमुक्तं वात्स्याय-

6 Suśruta-sā. 3.
7 Nyā. sū. 1.1.11.
8 Nyā. bhā. 1.1.11.
9 Nyā. sū. 3.1.28.
10 Nyā. bhā. 3.1.28.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

...Trust. Equipment Heritage Foundation, Jalgaon



नेन तत्रैव भाष्ये—'पार्थिवाप्यतैजसं तद्गुणोपलब्धेः। निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम्। गन्ध-क्लेद-पाक-व्यूहावकाशदानेभ्यः पाञ्चभौतिकम्। ते इमे सन्दिग्धा हेतव इत्युपेक्षितवान् सूत्रकारः। कथं सन्दिग्धाः? सति च प्रकृतिविकृतिभावे भूतानां धर्मोपलब्धिः, असति च संयोगाप्रतिषेधात् सन्निहितानामिति, यथा स्थाल्यामुदकतेजोवाय्वाकाशादीनामिति। तदिदमनेकभूतप्रकृतिशरीरमगन्धमरसमरूपमस्पर्शञ्च (भूतानां परस्परोपमर्दकत्वेन) प्रकृत्यनुविधानात् स्यात्। न त्विदमित्थम्भूतं तस्मात् पार्थिवं गुणान्तरोपलब्धेः।'[11]

उक्तञ्च विश्वनाथेन उक्तात्रिसूत्रवृत्तौ—'मतान्तराभिधानाय त्रिसूत्री। तद्गुणानां पृथिव्यप्तेजोगुणानां गन्धस्नेहोष्णस्पर्शानाम् उपलब्धेः। एतावता त्रिभौतिकत्वे सिद्धे निःश्वासादितश्चातुर्भौतिकत्वम्। ...व्यूहो निःश्वासादिः, अवकाशदानं छिद्रम्। एतानि मतानि सूत्रकृता तुच्छत्वान्न दूषितानि। तथा हि—एकस्मिन् शरीरे पृथिवीत्वादिनानाजातेः सङ्करापत्तेरसम्भवात्, न धा नानोपादानकत्वं विजातीयानामनारम्भकत्वात्; तथात्वे जलाद्यारब्धस्य न पृथिवीत्वं, व्यभिचारात्। न वा चित्रद्रव्यं गन्धवत्त्वविरोधात्। गन्धादीनामानाशमनपायाच्च पार्थिवत्वमित्युक्तप्रायम्।'[12]

'श्रुतिप्रामाण्याच्चे'[13]ति सूत्रेणापि मानुषादिशरीराणां पार्थिवत्वं सिद्धम्। 'सूर्यन्ते चक्षुर्गच्छतात् इत्यत्र मन्त्रे पृथिवीन्ते शरीरमिति श्रूयते तदिदं प्रकृतौ विकारस्य प्रलयाभिधानमिति।'[14]

उक्तञ्च जयन्तभट्टेन—'तत्र शरीरत्वमेव तावत् प्रथमं शरीरस्य लक्षणं तेन हि समानासमानजातीयेभ्यस्तद् व्यवच्छिद्यते; तस्मिन् सत्यपि चेष्टेन्द्रियार्थाश्रयत्वं यदस्य लक्षणमुच्यते तत् तेन रूपेणात्मनो भोगायतनं शरीरमिति ज्ञापयितुम्; चेष्टेन्द्रियार्थाश्रयतया हि शरीरमात्मनो भोगायतनं भवति। ...हिताहितप्राप्तिपरिहारयोग्यव्यापाराधिकरणं शरीरमुच्यते न चेष्टामात्राधिष्ठानम्।...इन्द्रियाश्रयत्वं तु कथम्? भौतिकानि हीन्द्रियाणि स्वावयवाश्रितानि घ्राणनयनस्पर्शनरसनानि, श्रोत्रमनसी तु नित्यद्रव्यत्वादनाश्रिते

11 Ibid 3.1.28.
12 Nyā. sū. Vis. vṛ. 3.1.28.
13 Nyā. sū. 3.1.29.
14 Nyā. sū. bhā. 3.1.29.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



एवेति कथमिन्द्रियाश्रयता शरीरस्येति? उच्यते, नात्राधाराधेयभाव आश्रयार्थः किन्तु तदनुग्राह्यत्वात् तदाश्रितानीन्द्रियाण्युच्यन्ते। ...अर्थानां तु रूपरसगन्धादीनां केषाञ्चिदाश्रयः शरीरं भवत्येव तत्समवायिनां न तु तावता किञ्चिद् भोगायतनत्वोपयोगि रूपं शरीरस्याभिहितं भवति। लक्षणमपि तदतिव्यापकं भवति रूपरसादिसमवायस्य वृक्षादावपि भावात्, तस्मात् तदर्थाश्रयत्वमीदृशमत्र विवक्षितं यद् एते चरवनितादिशरीरवर्तिनः…रूपरसादयोऽर्था रमणीयतामादधाना रागवृद्धिहेतवो भवन्ति भोक्तुरात्मनः शरीरे सति न शरीररहितस्येत्यर्थानां भोगसाधनभावादाश्रयः शरीरम्।"[15]

वैशेषिकदर्शनेऽपि—'तत् पुनः पृथिव्यादिकार्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञक"[16]मित्यत्र सूत्रे मनुष्यादिशरीरस्य पार्थिवत्वमुक्त्वा तत्र युक्तिरपि प्रदर्शिता 'प्रत्यक्षाप्रत्यक्षाणां संयोगस्याप्रत्यक्षत्वात् पञ्चात्मकं न विद्यते इति।"[17] पञ्चात्मकं शरीरं न विद्यते, प्रत्यक्षाप्रत्यक्षभूतानां संयोगस्याप्रत्यक्षत्वात् तदारब्धस्याप्यप्रत्यक्षापत्तेरित्यर्थः। 'गुणान्तराप्रादुर्भावात् न त्र्यात्मक"[18]मिति सूत्रेऽपि शरीरस्य त्र्यात्मकत्वं पृथिव्यप्तेजोरूपत्वं निराक्रियते। गुणान्तरस्य स्नेहस्य चित्ररूपस्य चित्रस्पर्शस्य चानुत्पत्ते र्न त्र्यात्मकत्वमिति भावः। ननु तर्हि कथं शरीरे क्लेदपाकादीनामनुभव इत्यत आह—'अणुसंयोगस्त्वप्रतिसिद्धः' इति। अणूनां पार्थिवजलीयतैजसानां परस्परं संयोगस्तु न प्रतिषिद्धः। तथाच मानुषादिशरीराणां जलाद्युपष्टम्भकत्वस्वीकारात् क्लेदपाकादीनां दृष्टानां नासङ्गतिरित्यर्थः। न केवलं मानुषादिशरीरमेव न पाञ्चभौतिकमपि तु किञ्चिदपि द्रव्यं पञ्चात्मकं न सम्भवतीत्युक्तं—'द्रव्येषु पञ्चात्मकत्वं प्रतिषिद्धमिति।"[19] तथाच तार्किकमते शरीरादिकं किञ्चिदपि द्रव्यं न पञ्चभूतप्रकृतिकं किन्तु एकैकभूतप्रकृतिकान्येव सर्वाणि शरीराणीन्द्रियाणि चेति भावः। 'तत्र शरीरं द्विविधं योनिजमयोनिजञ्चे'[20]ति सूत्रे

15 Nyā. mañ. II. p. 85-86 (Chow.)

16 Vai. sū. 4.2.1.

17 Ibid 4.2.2.

18 Ibid 4.3.3.

19 Ibid 8.2.4.

20 Ibid 4.2.5.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

...Trust, Equipment Heritage Foundation, Jalgaon



जरायुजाण्डजानां योनिजं सप्तर्षिप्रभृतीनां मानसं शरीरमयोनिजञ्चोक्तम्। उक्तञ्च प्रशस्तपादेन—'तत्रायोनिजमनपेक्ष्य शुक्रशोणितं देवर्षीणां शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते। क्षुद्रजन्तुनां यातनाशरीराणि अधर्मविशेषसहितेभ्योऽणुभ्यो जायन्ते।'[21] उक्तञ्च कन्दलीकारेण—'भोक्तर्भोगायतनं शरीरम् ···पितुः शुक्रं मातुः शोणितं तयोः सन्निपातानन्तरं जठरानलसम्बन्धाच्छुक्रशोणितारम्भकेषु परमाणुषु पूर्वरूपादिविनाशे सति समानगुणान्तरोत्पत्तौ द्व्यणुकादिक्रमेण कललशरीरोत्पत्तिस्तत्रान्तःकरणप्रवेशो न तु शुक्रशोणितावस्थायां शरीराश्रयत्वान्मनसः। तत्र मातुराहाररसो मात्रया संक्रमति अदृष्टवशात् इति।'[22]

सांख्य-पातञ्जलमतयोरपि शरीरस्य पाञ्चभौतिकत्वव्यवहारेऽपि उपादानत्वेन पाञ्चभौतिकत्वं न स्वीकृतम्। तथैवोक्तं सूत्रे—'न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगादिति।'[23] उक्तञ्च विज्ञानभिक्षुणा—'बहूनां भिन्नजातीयाणां चोपादानत्वं घटपटादिस्थले न दृष्टमिति सजातीयमेवोपादानम्। इतरच्च भूतचतुष्टयमुपष्टम्भकमित्याशयेन पाञ्चभौतिकत्वव्यवहारः। एकोपादानकत्वेऽपि पृथिव्येवोपादानं सर्वशरीरस्येति।'[24] एतन्मते स्थूलसूक्ष्मभेदेन द्विविधं शरीरं प्रसिद्धमेव। तदुक्तं सूत्रे—'मातापितृजं स्थूलं प्रायशः, इतरन्न तथा इति।'[25] 'स्थूलं मातापितृजं प्रायशो बाहुल्येन, अयोनिजस्यापि स्थूलशरीरस्य स्मरणात्; इतरच्च सूक्ष्मशरीरं न तथा, न मातापितृजम्, सर्गाद्युत्पन्नत्वात्।'[26] स्थूलदेहावच्छेदेन सूक्ष्मशरीरस्यैव सुखदुःखभोगो भवति, न स्थूलदेहस्य। 'मृतशरीरे सुखदुःखाभावस्य सर्वसम्मतत्वात्।'[27]

सूक्ष्मशरीरन्तूक्तं सूत्रे—सप्तदशैकं लिङ्गम्'[28] इति। एकादशेन्द्रियाणि पञ्चतन्मात्राणि बुद्धिश्चेति सप्तदश लिङ्गशरीरं बोध्यम्। तच्च सर्गादौ समष्टिरूपमेकमेव भवतीत्यर्थः। अत्र च लिङ्गदेहे बुद्धेरेव प्राधान्येन लिङ्गदेहस्य भोग

---

21 Pra. bhā. p. 82 (V.S.V.)
22 Nya. kan. p. 82 (V.S.V.).
23 Sā. sū. 5.102.
24 Sā. sū. bhā. 5.102.
25 Sā. sū. 3.7.
26 Sā. sū. bhā. 3.7.
27 Ibid 3.8.
28 Sā. sū. 3.9.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



इत्युक्तम्। अतो भोगायतनत्वात् तस्यैव मुख्यं शरीरत्वम्, तदाश्रयतया च स्थूलशरीरस्येति बोध्यम्।

अपरमपि शरीरमातिवाहिकं नाम सांख्यशास्त्रे निरूपितमिति विज्ञानभिक्षुमतम्। आश्रयतया तल्लिङ्गशरीरमतिवाहयतीत्यातिवाहिकमुच्यते। तदुक्तं सूत्रे—'न स्थूलमिति नियम आतिवाहिकस्यापि विद्यमानत्वात्।'[29] व्याख्यातञ्च विज्ञानभिक्षुणा—'आतिवाहिकस्याप्रत्यक्षतया सूक्ष्मस्य भौतिकस्य शरीरान्तरस्यापि सत्त्वादित्यर्थः। लोकाल्लोकान्तरं लिङ्गदेहमतिवाहयतीत्यातिवाहिकम्। भूताश्रयतां विना चित्रादिवद् गमनाभावस्य प्रागेवोक्तत्वात्। आतिवाहिकशरीरे च प्रमाणम्—

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा।
सदा जनानां हृदये संनिविष्टः॥
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद् यमः॥ इति श्रुतिस्मृती।'[30]

उक्तञ्च तेनैवान्यत्र—'तल्लिङ्गशरीरं तद्दतेऽधिष्ठानं विना स्वातन्त्र्यान्न तिष्ठति। यथा छाया निराधारा न तिष्ठति, यथा वा चित्रमित्यर्थः। तथाच स्थूलदेहं त्यक्त्वा लोकान्तरगमनाय लिङ्गदेहस्याधारभूतं शरीरान्तरं सिध्यतीति भावः।'[31] उक्तञ्च ईश्वरकृष्णेन कारिकायां—

'चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया।
तद्वद् विना विशेषै र्न तिष्ठति निराश्रयं लिङ्गम्॥'[32]

अद्वैतवेदान्तमते स्थूलशरीरस्य स्थूलभूतजन्यत्वात् स्थूलभूतानां प्रत्येकस्य छान्दोग्यश्रुतिविवक्षितपञ्चीकरणन्यायेन[33] पञ्चभूतमेलनजन्यत्वात् स्थूलभौतिकस्य पाञ्चभौतिकत्वमपरिहार्यम्। अपि च प्रत्यक्षत्वादपि शरीरं स्थूलपाञ्चभौतिकम्। उक्तञ्च विद्यारण्येन—'तथा हि शरीरं तावत् पञ्चभूतसंघातरूपम्, पञ्चभूतात्मके तात। शरीरे पञ्चतां गते—इत्यादिशास्त्रात्। यत्तु नैयायिको मन्यते—भूलोकवासिनां शरीरं पार्थिमेव; तत्र क्लेदनोपलब्धि-

29 Ibid 5. 103.
30 Sā. sū. bhā. 5. 103.
31 Ibid 3.12.
32 Sā. kā. 41.
33 Chā. up. 6.3.4.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



वैस्त्रादाविव भूतान्तरोपष्टम्भात्। तदसत्। शोषणादिना जलाद्यपगमेऽपि यथा वस्त्रादिस्वरूपस्य नापचयस्तथा क्लेदन-पाचन-व्यूहनावकाशानामपगमेऽपि शरीरस्यापचयाभावप्रसङ्गात्।'

'यच्च वैशेषिकैरुच्यते—पञ्चभूतात्मकत्वे शरीरस्याप्रत्यक्षताप्रसङ्गः, वाय्याकाशयोरप्रत्यक्षतया प्रत्यक्षाप्रत्यक्षवृत्तित्वात्, तदप्ययुक्तम्। तथा सति सर्वावयविनामप्रत्यक्षत्वापातात्, प्रत्यक्षाप्रत्यक्षावयववृत्तित्वात्। न हि सूक्ष्माः परभागस्थिताश्चावयविनोऽवयवाः प्रत्यक्षीकर्तुं शक्यन्ते। तस्माद् भूतसंघातः शरीरम्।'[34]

वेदान्तमते स्थूलसूक्ष्मकारणभेदेन शरीरत्रयमभिहितम्। तत्र पितृमातृजं स्थूलशरीरं पाञ्चभौतिकम्। सूक्ष्मशरीरं तु लिङ्गाख्यं ज्ञानेन्द्रिय-कर्मेन्द्रिय-प्राण-मनोबुद्धिरूपावयवयुक्तं संस्कारादृष्टाद्याश्रयोऽपञ्चीकृतसूक्ष्मपञ्चभूतजन्यम्। इन्द्रियाणां व्यस्तपञ्चसूक्ष्मभूतसात्त्विकांशकार्यत्वं बुद्धिमनसोरन्तःकरणस्य समस्ततत्कार्यत्वञ्च पूर्वमुक्तमेव। कारणशरीरन्तु व्यष्ट्यज्ञानरूपमविद्याख्यं कारणावस्थसंस्काररूपबीजाधारं सुषुप्तावस्थत्वादानन्दमयञ्च। इदमेव कारणशरीरं सुषुप्तिप्रलयादिकाले बुद्ध्यादेर्विलीनत्वेऽप्यदृष्टसंस्काराद्याश्रयत्वेनानुवर्तते इति न जागरणादौ पुनस्तेषां संस्कारादीनां कार्योत्पत्त्यनुपपत्तिः। अत एवाह श्रुतिरपि— त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद् यद् भवन्ति तदाभवन्ति इति।'[35]

इदं सूक्ष्मकारणशरीरद्वयमेव मनोविद्यायां प्रधानतया आलोचनीयम्। अनयोः स्मृतिजनकसंस्काराद्याश्रयतया रागद्वेषादिजनकसंस्काराश्रयतया सूक्ष्मशरीरमेव पाश्चात्यानां फ्रयेड्प्रभृतिमनोवैज्ञानिकानां प्रिकन्सास्-साब्कन्सासाख्ययोर्मनःस्तरयोस्तुल्यं भवति। कारणशरीरञ्च संस्कारादृष्टादिबीजभूताज्ञानरूपतया तेषामान्कन्सासाख्यमनःस्तरेण तुलनीयं भवति। अनयोः विस्तारेणालोचनं तु परिच्छेदान्तरे भविष्यति।

प्राभाकरमतेऽपि—'षडिन्द्रियाणि यस्मिन्नायतन्ते तदिन्द्रियायतनं शरीरं

34 Viv. prā. saṃ. p. 605-607 (A.G.M. Kaśi).

35 Chā. up. 6.9.3.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



जरायुजाण्डजसंस्वेदजभेदभिन्नं त्रिविधम्। उद्भिज्जं शरीरं न भवत्येव, इन्द्रियायतनत्वे प्रमाणाभावात्।'[36] अस्मत्शरीराणाञ्च पार्थिवत्वमेव। पाञ्चभौतिकत्वव्यवहारस्तु भूतान्तराणामुपष्टम्भकतया बोध्यम्।

भाट्टमते वृक्षादेरपि शरीरत्वादुद्भिज्जमपि शरीरमिति चातुर्विध्यम्। तदुक्तं नारायणभट्टेन प्राभाकरमतानुवादानन्तरं—'तदयुक्तं श्रुतिस्मृतिविरोधात्। न चेन्द्रियायतनत्वे प्रमाणाभावादुद्भिज्जानामशरीरत्वमिति वाच्यम्। आमिषादिसदसद्भावनिबन्धनपुष्टिह्रासादिदर्शनेन दाहच्छेदादिभिरितरशरीरवदेव वैगुण्यावाप्तिदर्शनेन च सुखदुःखानुभवे सिद्धे तेनैवेन्द्रियकल्पनोपपत्तेः। न ह्यनिन्द्रियाणां सुखदुःखानुभवः सम्भवति'[37] इति। अस्मदादीनां शरीरं पार्थिमेव। तथाचोक्तं भट्टनारायणेन—'तत्र गन्धवती पृथिवी। सा पुन र्धराधरमहीरुहादिरूपा।...शरीरघ्राणेन्द्रियरूपा च। तत्रात्मभोगायतनं शरीरम्। तत्तु जरायुजाण्डजस्वेदजोद्भिज्जभेदेन चतुर्विधम्। तत्र जरायुजं मनुष्यादिशरीरमिति।'[38]

रामानुजीयमतेऽपि अस्मदादीनां स्थूलशरीरं पाञ्चभौतिकमेव। प्रकृतिमहदहंकाराणामपि शरीरोपादानत्वम्। तदुक्तं—'पञ्चभूतानि प्रकृतिमहदहंकाराश्च शरीरोपादानानि।'[39] उक्तञ्च—'शरीरं नाम चेतनं प्रति आधेयत्वविधेयत्वशेषत्वनियमैरपृथक्सिद्धो द्रव्यविशेष इत्येकं लक्षणम्। नियमेन यदाधेयं नियमेन यद्विधेयं नियमेन यच्छेषमिति लक्षणत्रयं वा योज्यम्।'[40] अत्राधेयत्वमाश्रितत्वम्, विधेयत्वं नियाम्यत्वम्, शेषत्वमङ्गत्वम्, अपृथक्सिद्धत्वं यावत्सत्त्वमसम्बन्धानर्हत्वमित्यर्थो बोध्यः। एतन्मते यथा पाञ्चभौतिकस्य जीवं प्रति शरीरत्वं तदाश्रितत्वात् तन्नियाम्यत्वाच्च, तथा जीवस्यापि ईश्वराश्रितत्वात् तन्नियाम्यत्वाच्च ईश्वरं प्रति शरीरत्वं सिद्धम्।

जैनमते—'शीर्यन्ते इति शरीराणि'[41] औदारिक-वैक्रियिकाहारक-तैजस-

---

36 Pra. pañ. p. 150 (Chow.).

37 Mā. me. p. 152-54 (Adyar).

38 Mā. me. p. 151 (Adyar).

39 Yat. mat. dīp. p. 44 (A.A.).

40 Ibid p. 44-45 (A.A.).

41 Tat. sū. vṛ. 2.36.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust: Equipment Heritage Foundation, Jalgaon



कार्मणानि पञ्चविधानि। तत्र स्थूलशरीरमेवौदारिकम्। वैक्रियिकादि-शरीराणि तु उत्तरोत्तरं सूक्ष्मसूक्ष्मतराणि। गर्भसम्मूर्छनोपपादभेदेन जन्म च त्रिविधमभिहितम्। तत्र—'गर्भसम्मूर्छनजमाद्य'[42]मिति सूत्रेणाद्यमौदारिक-शरीरमस्मादादीनां गर्भात् सम्मूर्छनाद्वा जातं ज्ञातव्यम्। 'स्वकृतकर्म-विशेषादात्मनः शरीरत्वेन पुद्गलानां समन्तान्मूर्छनं घटनं सम्मूर्छनम्।'[43] उक्तञ्च सूत्रे—'शरीरवाङ्मनःप्राणापानाः पुद्गलाना'[44]मिति शरीरस्य पौद्गलि-कत्वम्। स्पर्शरसगन्धवर्णवन्तः पुद्गलाः अणुस्कन्धभेदेन द्विविधा उक्ताः।[45] स्कन्धाश्च द्व्यणुकादिकार्यभेदाः। स्पर्शरसगन्धवर्णवन्तोऽणव एव। तत् कार्यरूपाः स्कन्धाः, तद्भेदाः पृथिव्यप्तेजोवायवः प्रसिद्धाः। तस्माज् जैनमते पौद्गलं चातुर्भौतिकं स्थूलशरीरमिति सिद्धम्। तदुक्तं—'शरीरं तावत् पुद्गल-कार्यं स्पर्शादिमत्त्वाद् घटादिवदिति।'[46]

——०——

42 Tat. sū. 2.45.

43 Tat. sū. vṛ. 2.31.

44 Ibid 5.29.

45 Ibid 4.23,25.

46 Ibid 5.19.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## नाडीचक्रादिनिरूपणम्

उपनिषद्यपि शरीरस्था बहवो नाड्यः श्रूयन्ते यासु प्रणालीषु प्राणस्य मनसश्च प्रचारा वायुपित्तादीनाञ्चोर्ध्वाधः सञ्चारा भवन्ति। तासु काश्चित् सूक्ष्माः काश्चित् सूक्ष्मतराः काश्चिच्च सूक्ष्मतमा भवन्ति, काश्चित् प्रधानाः काश्चिदप्रधानाः। नाडीनामुपयोगाश्च विभिन्ना एव भवन्ति। यथोक्तं छान्दोग्ये—

'शतं चैका च हृदयस्य नाड्य-
स्तासां मूर्धानमभिनिःसृतैका।
तयोर्ध्वमायन्नमृतत्वमेति
विष्वङ्ङन्या उत्क्रमणे भवन्ति॥'[1]

एका मेरुदण्डस्यान्तःस्था सुषुम्णानाडी मूर्धापर्यन्तमूर्ध्वं प्रसृता, तया नाड्या ऊर्ध्वं गच्छन् प्रयाणकाले प्राणेन सह जीवो ब्रह्मलोकाख्यममृतत्वमेति ; अन्या नाड्य: नानागतयः सत्य उत्क्रमणाय एव केवलं भवन्तीत्यर्थः। एष तु प्रयाणकालीनोपयोगोऽभिहितः। उक्ताश्च छान्दोग्ये नाडीनां पित्तरसरक्तादि-धारणात् तत्तत्वर्णानुरूपपिङ्गलशुक्लपीतलोहितादिरूपवत्त्वं रश्मिद्वारेणादित्यस्य नाडीभिर्योग आदित्यस्यैव तत्तद्वर्णरूपेणावस्थानञ्च। यथोक्तं—'अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः।......एवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः।'[2]

अत्र नाडीनामेकाधिकशतं प्रधाना नाड्य एवेति बोध्यम्। तासां नाडीनामेकैकस्यां पुनः द्वासप्ततिसहस्राण्यप्रधानाः प्रतिशाखानाड्यो विद्यन्ते। तासु व्यानरूपेण प्राणश्चरति। तदुक्तं प्रश्ने—'हृदि ह्येष आत्मा। अत्रैत-

1 Chā. up. 8.6.6.

2 Chā. up. 8.6, 1-2.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



देकशतं नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखा-नाडीसहस्राणि भवन्त्यासु व्यानश्चरति।'[3]

बृहदारण्यकेऽपि ता द्वासप्ततिसहस्राणि नाड्यो हिताख्याः पठिता याभिर्गत्वा जीवः पुरीतति नाड्यां शेते सुषुप्तिकाले। तदुक्तं—'अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते··।'[4] तासु हिता-नाडीष्वेव सहस्रधा भिन्नः केश इवातिसूक्ष्मासु शुक्लनीलपीतलोहितादिवर्ण-रसादिपूर्णासु स्वप्नदर्शनं भवति मनउपाधिकस्य जीवस्य। तदुक्तं बृहदारण्यके —'ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव'[5] इत्यादि। गर्भोपनिषदि च 'स्नायुशतं सप्तशिराशतानि'[6] इति शतं स्नायवः सप्तशतानि च शिरा उल्लिखिताः।

एवं सर्वत्रैवोपनिषदि हृदयमेव नाडीनां केन्द्रतया मूलमभिहितम्। यत्तु चरकसुश्रुताद्यायुर्वेदग्रन्थे नाभिरेव शिरानां मूलमित्यहितं'[7] तन्नाडी-शिराणां भेदप्रयुक्तं न वेति चिन्त्यम्। हृदयन्तु चेतनाऽधिष्ठानत्वेन आयु-र्वेदेऽपि स्वीकृतम्। यथोक्तं—'हृदयं विशेषेण चेतनास्थानम्।'[8] 'हृदयं चेतनाधिष्ठानमेकम् इति च।'[9]

आयुर्वेदे तु नाडीनां स्पष्टतरं विवरणं लभ्यते। तत्र धमनीशिरास्रोतो-भेदेन नाडीनां सूक्ष्मभेदोऽप्यभिहितः। तथाचोक्तं सुश्रुते—'चतुर्विंशति-र्धमन्यो नाभिप्रभवा अभिहिताः। तत्र केचिदाहुः—शिराधमनीस्रोतसामविभागः शिराविकारा एव धमन्यः स्रोतांसि च। तन्न सम्यक्। अन्या एव हि धमन्यः स्रोतांसि च सि(शि)राभ्यः। कस्मात्? व्यञ्जनान्यत्वात्, मूलसन्नियमात् कर्मवैशेष्यावगमाच्च।'[10] एवं धमन्यः प्रधानतश्चतुर्विंशति उक्ताः। स्रोतांसि

---

3 Pra. up. 3.6.
4 Bṛ. up. 2.1.19.
5 Ibid 4.3.20.
6 Gar. up. 1.5.
7 Suśru. sā. 7.9.
8 Ibid. 4.
9 Caraka 4.7.
10 Suśru. sā. 9.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



चोक्तानि चरके—'स्रोतांसि खलु परिणाममापद्यमानानां धातूनामभिवाहीनि भवन्त्ययनार्थे। वात्तपित्तश्लेष्मणां पुनः सर्वशरीरचराणां सर्वाणि स्रोतांसि अयनभूतानीति।'[11] शिराविस्तारश्चाग्रे वक्ष्यते।

तथा मनोवहनाडीनां मनोवहस्रोतसाञ्चोल्लेखो विद्यते। यथोक्तं चरके—

'मनोवहानां पूर्णत्वाद्दोषैरतिवलैस्त्रिभिः।
स्रोतसां दारुणान् स्वप्नान् काले पश्यसि दारुणे॥'[12]

उक्तञ्च चक्रपाणिना टीकायां—'यथैतत् स्वप्नदर्शनं भवति तदाह—मनोवहानामित्यादि। मनोवहानि स्रोतांसि यद्यपि पृथङ्नोक्तानि तथापि मनसः केवलमेवेदं शरीरमयनभूतमित्यभिधानात् सर्वशरीरस्रोतांसि गृह्यन्ते। विशेषेण तु हृदयाश्रितत्वान्मनसस्तदाश्रिता दश धमन्यो मनोवहा अभिधीयन्ते।'[13] तस्माज्ज्ञायते—हृदयाश्रिता दश धमनीविशेषा एव मनोवहा नाड्य इत्यभिधीयन्त इति। सर्वशरीरे एव मनसः प्रचारात् सर्वशरीरस्रोतांसि मनोवहस्रोतांसीत्युच्यते। उक्तञ्चान्यत्र चरके उन्मादहेतुनिरूपणे—'व्याधिवेगसमुद्भ्रामितोपहतमनसां वा कामक्रोधलोभहर्षभयशोकचिन्तोद्वेगादिभिः पुनरभिघाताभ्याहतानां वा मनस्युपहते बुद्धौ च प्रचलितायामभ्युदीर्णा दोषाः प्रकुपिता हृदयमुपसृत्य मनोवहानि स्रोतांसि आवृत्य जनयन्ति उन्मादम्। उन्मादं पुनः मनोबुद्धिसंज्ञाज्ञानस्मृतिभक्तिशीलचेष्टाहारविभ्रमं ( विभ्रंशं ) विद्यात्।'[14]

उक्तञ्च शङ्करमिश्रेणोपस्कारे—'यद्यपीन्द्रियं मनो न साक्षात् प्रयत्नविषयस्तथापि मनोवहनाडीगोचरेण प्रयत्नेन मनसि कर्मोत्पत्तिर्द्रष्टव्या। नाड्यास्तु त्वगिन्द्रियग्राह्यत्वमङ्गीकर्तव्यम्, अन्यथा प्राणवहनाडीगोचरेण प्रयत्नेनाशितपीताद्यभ्यवहरणमपि न सम्भवेत्। …तत्तन्द्रियप्रदेशेन मनःसंयोगमन्तरेण सुखदुःखे न स्यातामेव यदि मनसि कर्म न भवे'[15]दिति। अत्रापि वैशेषिकदर्शने मनोवहनाडीनां प्राणवहनाडीनाञ्चोल्लेखो दृश्यते। उक्तञ्च तेनैव कणादरहस्ये—'तदेतत् ( मनः ) बुभुत्सापणिधानाभ्यामदृष्टेन वा सञ्चार्यते।

11 Caraka 3.5.
12 Ibid 5.5.40.
13 Caraka-ṭikā 5.5.40.
14 Caraka 2.7 3.
15 Vaiśeṣika-tikā (upaskāra) 5.2.14-15.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मनोवहनाड्याः प्रत्यक्षतया बुभुत्साजनितेन प्रयत्नेन तत्र क्रियोत्पद्यते। क्रियया च नाड्यां वेगो वेगे च सति स्पर्शवद्वेगवन्नाडीसंयोगादभिहतं नुन्नं वा मनोऽभिमतविषयग्राहिणेन्द्रियेण सम्बध्यते। न च मनोवहनाडी-गोचरप्रयत्नानुपपत्तिः, जलपानादौ तत्तन्नाडीगोचरप्रयत्नाभ्युपगमात्। ...तदेतन्नाडीगोचरप्रत्यक्षतामन्तरेण कथमुपपाद्यताम्, अदृष्टसहकृतेन त्वगिन्द्रियेनैव प्रत्यक्षत्वसम्भवात्। तदेतत् (मनः) सर्वज्ञानजनकम्।'[16]

एवमायुर्वेदे रूपरसगन्धस्पर्शशब्दवहानामपि नाडीनां वर्णनं लभ्यते। तथाचोक्तं—'तासाञ्च नाभिप्रभवाणां धमनीनामूर्ध्वगा दश, दश चाधो-गामिन्यश्चतस्त्रस्तिर्यग्गाः। ऊर्ध्वगाः शब्दस्पर्शरूपरसगन्ध-प्रश्वासोच्छ्वास-जृम्भित-क्षुद्ध-सित-कथित-रुदितादीन् विशेषानभिवहन्त्यः शरीरं धारयन्ति। ...शब्दरूपरसगन्धानष्टाभिर्गृह्णीते।'[17] पुनश्चोक्तं तत्रैव सुश्रुते—'तिर्यग्-गानान्तु चतसृणां धमनीनां एकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते तास्त्वसंख्येयाः।'[18] एवं धमनीनां विभागा व्यापाराश्च संक्षेपतो ज्ञायन्ते। एतेषु मनोवहनाडीनां शब्दस्पर्शरूपरसगन्धवह-नाडीनां च निरूपणं 'मनोविद्यायां' विशेषतयोपयोगि भवति, तैरेव नाडीभिः नानाविधव्यापारे मनसः सञ्चारात् शब्दस्पर्शरूपादिप्रत्यक्षे च तैरेव नाडीभिः चेतनास्थाने हृदये (आज्ञाचक्रे वा) रूपादीनां वहनात्।

शिराणाञ्च विस्तारः सुश्रुते वर्णितः। यथा—'व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः शिराः'[19] इति। पुनश्चोक्तं—'सप्त शिराशतानि भवन्ति, याभिरिदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्यादिभिरुप-स्निह्यते, अनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः। द्रुमपत्रसेवनीनामिव तासां प्रतानाः। तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्ध्वमधस्तिर्यक् च।...तासां मूलशिराश्चत्वारिंशत्। तासां वातवाहिन्यो दश, पित्तवाहिन्यो दश, कफवाहिन्यो दश, दश रक्तवाहिन्यः।'[20] अत्र शिराणामुपयोगः, सप्तशतानां शिराणां चत्वारिंशतः प्राधान्यं तेषां व्यापाराश्च स्पष्टतयाऽभिहिताः।

16 Kaṇāda-rahasya, p. 43 (chowkhamba).

17 Suśru. śā. 9. 18 Ibid 9.

19 Ibid 7. 20 Ibid 7.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



शाण्डिल्योपनिषदि चतुर्दश सूक्ष्मा विशेषतो योगिभिर्ज्ञेया नाड्यः पठ्यन्ते। ताश्च नाड्यः कुण्डलिनीमाश्रिताः। तथाचोक्तं—'नाभेस्तिर्यगधोर्ध्वं कुण्डलिनीस्थानम्। अष्टप्रकृतिरूपाष्टधा कुण्डलीकृता कुण्डलिनीशक्तिर्भवति।... हृदयाकाशे महोज्ज्वला ज्ञानरूपा भवति। मध्यस्थकुण्डलिनीमाश्रित्य मुख्या नाड्यश्चतुर्दश भवन्ति। इडा, पिङ्गला, सुषुम्णा, सरस्वती, वारुणी, पूषा ( पुष्पा ? ), हस्तिजिह्वा, यशस्विनी, विश्वोदरी, कुहूः, शङ्खिनी, पयस्विनी, अलम्बुसा, गान्धारीति नाड्यश्चतुर्दश भवन्ति।' तासां चतुर्दशनाडीनामवस्थानविवरणञ्च प्रदत्तम्। यथा—'तत्र सुषुम्णा विश्वधारिणी मोक्षमार्गेति चाचक्षते। गुदस्य पृष्ठभागे वीणादण्डमाश्रिता मूर्धपर्यन्तं ब्रह्मरन्ध्रे विज्ञेया व्यक्ता सूक्ष्मा वैष्णवी भवति। सुषुम्णायाः सव्यभागे इडा तिष्ठति। दक्षिणभागे पिङ्गला।...सुषुम्णा कालभोक्त्री भवति। सुषुम्णापृष्ठपार्श्वयोः सरस्वतीकुहू भवतः। ...पूषासरस्वतीमध्ये पयस्विनी भवति। ...कन्दमध्ये ( पायुमूले ) अलम्बुसा भवति। सुषुम्णापूर्वभागे मेढ्रान्तं कुहूर्भवति। कुण्डलिन्या अधश्चोर्ध्वं वारुणी सर्वगामिनी भवति। यशस्विनी सौम्या च पादाङ्गुष्ठान्तमिष्यते। पिङ्गला चोर्ध्वगा याम्यनासान्तं भवति। पिङ्गलायाः पृष्ठतो याम्यनेत्रान्तं ( दक्षिण ) पूषा भवति। ...आ-सव्यकर्णान्तमूर्ध्वगा शङ्खिनी भवति। इडापृष्ठभागात् सव्यनेत्रान्तगा गान्धारी भवति। पायुमूलादधोर्ध्वगाऽलम्बुसा भवति। एतासु चतुर्दशसु नाडीष्वन्या नाड्यः सम्भवन्ति।तास्वन्यास्तास्वन्या भवन्तीति विज्ञेयाः। यथाश्वत्थादिपत्रं शिराभिर्व्याप्तमेवं शरीरं नाडीभिर्व्याप्तम्।'[21] अत्रास्पष्टत्वेऽपि नाडीनामवस्थितिर्कथञ्चिदवधारणीया।

दामोदरकृतसङ्गीतरत्नाकरेऽपि एता एव नाड्य ईषद्भिन्ननामभिः पठिताः। पूषास्थाने पुष्पा, वारुणीस्थाने वारणा विश्वोदरीस्थाने विश्वोदरा नाडी पठिता।[22] तथा योगार्णवेऽपि एता नाड्यः पठिताः। तथा शिवसंहितायामपि; यथा—

सार्धलक्षत्रया नाड्यः सन्ति देहान्तरे नृणाम्।
प्रधानभूता नाड्यस्तु तासु मुख्याश्चतुर्दश॥

---

21 Sāṇḍilyopaniṣad.

22 Saṅgītaratnākāra-Svarādhyāya-piṇḍotpattiprakarṇa ślo. 144-156.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सुषुम्णेडा पिङ्गला च गान्धारी हस्तिजिह्विका ।
कुहूः सरस्वती पूषा शङ्खिनी च पयस्विनी ॥
वारुण्यलम्बुषा चैव विश्वोदरी यशस्विनी ।
एतासु तिस्रो मुख्याः स्युः पिङ्गलेडासुषुम्णिकाः ॥
तिसृष्वेका सुषुम्णैव मुख्या सा योगिवल्लभा ।
अन्यास्तदाश्रयं कृत्वा नाड्यः सन्ति हि देहिनाम् ॥
सर्वाश्चाधोमुखा नाड्यः पद्मतन्तुनिभाः स्थिताः ।
पृष्ठवंशं समासृत्य सोमसूर्याग्निरूपिणी ॥
तासां मध्ये गता नाडी चित्रा सा मम वल्लभा ।
ब्रह्मरन्ध्रञ्च तत्रैव सूक्ष्मात् सूक्ष्मतरं गतम् ॥
पञ्चवर्णोज्ज्वला शुद्धा सुषुम्णामध्यचारिणी ।
देहस्योपाधिरूपा सा सुषुम्णामध्यरूपिणी ॥
दिव्यमार्गमिदं प्रोक्तममृतानन्दकारकम् ।
ध्यानमात्रेण योगीन्द्रो दुरितौघं विनाशयेत् ॥
...इडापिङ्गलयो र्मध्ये सुषुम्णा या भवेत् खलु ।
षट्स्थानेषु च षट्शक्तिं षट्पद्मं योगिनो विदुः ॥'[222]

एताश्च सर्वा नाड्यो योगिभिर्ध्येया योगिचित्तगम्याश्चेति बोधम् । अन्याऽपि सन्ति नाड्यः स्थूलतरा भोगावहाः । तदुक्तम्—

'अन्या यास्त्वपरा नाड्यो मूलाधारात् समुत्थिताः ।
रसना-मेढ्र-वृषण-पादाङ्गुष्ठञ्च श्रोत्रकम् ।
कुक्षिकक्षाङ्गुष्ठकर्णं सर्वाङ्गं पायुकुक्षिकम् ।
लब्ध्वा ता वै निवर्तन्ते यथादेशसमुद्भवाः ॥
एताभ्य एव नाडीभ्यः शाखोपशाखतः क्रमात् ।
सार्धलक्षत्रयं जातं यथाभागव्यवस्थितम् ॥
एता भोगावहा नाड्यो वायुसञ्चाररक्षकाः ।
ओतप्रोताभिसंव्याप्य तिष्ठन्त्यस्मिन् कलेवरे ॥

222 Sivasaṃhitā 2.13-20, 27.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



…इत्थं प्रकल्पिते देहे जीवो वसति सर्वगः।
अनादिवासनामालाऽलङ्कृतः कर्मशृङ्खलः॥[22b]

तथा तन्त्रशास्त्रेऽपि षट्चक्रनिरूपणादौ मेरुदण्डाभ्यन्तरस्थितानि बहूनि चक्राणि पद्माकाराणि तत्संलग्नाः काश्चिन्नाड्यश्च वर्णितानि। यथोक्तं—

'मेरोर्बाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे, मध्ये नाडी सुषुम्णा त्रितयगुणमयी चन्द्रसूर्याग्निरूपा।…वज्राख्या मेढ्रदेशाच्छिरसि परिगता मध्यमस्या ज्वलन्ती॥'[23] उक्तश्च टीकायां षट्चक्रविवरणे—'त्रिगुणमयीति त्रितयं गुणं सुषुम्णा वज्रा चित्रिणीति रूपभेदेन त्रिसूत्ररूपं तदात्मिकेत्यर्थः।…यद्वा, त्रितयगुणाः सत्त्वरजस्तमोगुणा यस्यां तन्मयीत्यर्थः। ततश्च चित्रिणी सत्त्वगुणमयी, वज्रा रजोगुणमयी, सुषुम्णा तमोगुणमयीत्यर्थः।'[24] शशिमिहिरशिरे हि नाडीद्वयमिडा-पिङ्गलाख्यमेव। सुषुम्णा च त्रितयात्मिकाऽभिहिता। तासु चित्रिणीं प्रधानां वर्णयति— तन्मध्ये चित्रिणी सा प्रणवविलसिता योगिनां योगगम्या लूता-तन्तुमेया…तन्मध्ये ब्रह्मनाड़ी…॥'[25] उक्तं च टीकायां—'ब्रह्मणो नाडीति व्युत्पत्त्या ब्रह्मनाडी ब्रह्मपदवी शब्दब्रह्मरूपायाः कुण्डलिन्याः परमशिवसन्निधि-गमनपथरूपचित्रिणीनाड्यन्तर्गतशून्यभाग इति यावत्। न तु चित्रिणीमध्ये नाड्यन्तरमस्तीति निष्कर्षः।'[26] ततो मूलाधारपद्मं (चक्रं) वर्णयति—'अथा-धारपद्मं सुषुम्णास्यलग्नं'[27]मित्यादिना। एवं सुषुम्णायामुपर्युपरि स्थितानि स्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्यपद्मानि निरूप्याज्ञाचक्रे मनसः स्थिति-माह— एतत् पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धम्'[28] इत्यादिना। अन्ते च षट्चक्रातीतं सहस्रारपद्ममुपवर्ण्य सहस्रदलकर्णिकायां परमशिवस्थिति-माह—'इह स्थाने देवः परमशिवसमाख्यानसिद्धः प्रसिद्धः'[29] इत्यादि।

एवं नाड्यश्चक्राणि च संक्षेपतो निरूपितानि। मनस्तत्त्वनिरूपणे अलमति-विस्तारेण नाडीचक्रादिनिरूपणस्य।

——०——

22b Ibid 2.29-31, 37.
23 Saṭ. cak. 1.
24 Saṭ. cak. ṭīkā 1.
25 Saṭ. cak. 2.
26 Saṭ. cak. ṭīkā. 2.
27 Saṭ. cak. 4.
28 Ibid 33.
29 Ibid 42.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



## मनोधर्मपरिणामादीनां सामान्यतो निरूपणम्

येषां सांख्यपातंजलवेदान्तिनां मते आत्मा निर्गुणः परिणामरहितश्च तेषां मते सर्वे आन्तरधर्माः परिणामा व्यापाराश्च ज्ञानसुखादयो मनसोऽन्तःकरणस्यैव। अतस्ते मनोधर्मत्वेन मनोवृत्तिरूपेण वोल्लिख्यन्ते। ये तु नैयायिक-वैशेषिक-मीमांसक-जैनादय आत्मानमेव कर्तारं सगुणं च मन्यन्ते ते सर्वानान्तरधर्मानात्मन एव गुणरूपेण धर्मरूपेण वा स्वीकुर्वन्ति। बौद्धास्तु तान् धर्मपरिणामान् विज्ञानस्यैवाकारविशेषतया मन्यन्ते। एवं सर्वत्र बोध्यम्।

अपि च ये तार्किकादय आन्तरधर्मान् ज्ञानसुखादीनात्मन एव गुणतया मन्यन्ते तेषामपि मते ज्ञानसुखादीनामात्ममनःसंयोगजन्यत्वं प्रायशः मनःकरणकप्रत्यक्षविषयत्वं चेति ध्येयम्। स चात्ममनःसंयोगविशेषोऽदृष्टजन्य इति ज्ञेयम्।

वेदे हि यजुर्मन्त्रे[1] मनस एव संकल्पकर्तृत्व ज्ञातृत्व कर्तृत्वादिका धर्माः स्पष्टतया श्रूयन्ते। 'यत् प्रज्ञानमुत चेतो धृतिश्चे'त्यत्र[2] च प्रज्ञान-धृत्यादिका मनसो विभिन्नवृत्तिरूपेण श्रूयन्ते। तथा मनसोऽविशेषेण भूत-वर्तमान-भविष्यद्-ग्राहित्वसामर्थ्यमुक्तमर्थात् स्मृत्यनुमित्यादिवृत्तयोऽपि सूचिताः।

उपनिषदि यद्यपि बहुत्रात्मन एव कर्तृत्वं ज्ञातृत्वं च वर्ण्यते इति प्रतीयते, तथापि तत् सर्वमन्तःकरणरूपोपाधियोगेनैवेति स्पष्टमवगम्यते। बृहदारण्यके स्पष्टमेवोक्तं—'मनसा ह्येव पश्यति मनसा शृणोति', 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृति ह्रीर्धीर्भीरित्येतत् सर्वं मन एव' इति, 'स समान सन्···ध्यायतीव लेलायतीव'[3] इतिच। तत्र कामः स्त्रीव्यतिकरा-(सम्पर्का-)भिलाषादि, संकल्पः प्रत्युपस्थितविषयविकल्पनं शुक्लनीलादिभेदेन, विचिकित्सा संशयज्ञानम्, श्रद्धा- अदृष्टार्थेषु कर्मसु आस्तिक्यबुद्धिर्देवतादिषु

---

1, 2 Suklayaju. 34. 1.3. 3 Bṛ. up. 1.5.3; 4.3.7.
4 Bṛ. up. Saṅkarabhāṣya, 1.5.3. 5 Bṛ. up. 1.5.9.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



च, अश्रद्धा तद्विपरीता बुद्धिः, धृतिः—धारणं देहाद्यवसादे उत्तम्भनम्, ह्रीः लज्जा, धीः प्रज्ञा, भीः भयम्,—इत्येतत् सर्वं मन एव मनसोऽन्तःकरणस्य रूपाण्येतानि इति भाष्ये[6] व्याख्यानमुक्तम्। तत्रैव पुनः 'यत् किंच विजिज्ञास्यं मनसस्तद्रूप'-मित्युक्त्वा संशयादिपूर्वकं ज्ञानं सर्वं मनसोऽन्तःकरणस्यैवेति निर्णीतम्।

अत्रेदमनुधावनीयं यत्—यद्यपि श्रुतिशिरसि सांख्यवेदान्तादिदर्शनेषु च बुद्धेरन्तःकरणस्यैव ज्ञातृत्वं कर्तृत्वं च स्वीकृतं तथापि स्वात्मचैतन्यस्य बुद्धौ प्रतिबिम्बनेनैवान्तःकरणस्य ज्ञातृत्वकर्तृत्वादिकं सुखादुःखादिकं च सर्वं सिध्यति नान्यथा, जडस्यान्तःकरणस्य स्वतः ज्ञातृत्वाद्ययोगात्। उक्तं च—'अन्तःस्थेन हि चैतन्यज्योतिषाऽवभासितस्य मनसो मननसामर्थ्यम्'[6] इत्यादि।

ऐतरेयोपनिषदि सर्वकरणव्यापारेण उपलब्धुरात्मनो निश्चयार्थमुक्तं—'येन वा पश्यति येन वा शृणोति...येन वा स्वादु चास्वादु च विजानाति तदेतद्धृदयं मनश्चैतत्'[7]। यस्मादन्तःकरणेनैव सर्वेन्द्रियाणां विषया गृह्यन्ते सर्वेन्द्रियाणि व्यापार्यन्ते च तस्मादिन्द्रियाण्यन्तःकरणस्यैव विभिन्नरूपत्वेन विभाव्यन्ते। उक्तं च भाष्ये—'मनश्चैतदेकमनेकधा। एतेनान्तःकरणेनैकेन चक्षुर्भूतेन रूपं पश्यति श्रोत्रभूतेन शृणोति···वाग्भूतेन वदति···स्वेनैव विकल्पनारूपेण मनसा विकल्पयति हृदयरूपेणाध्यवस्यति। तस्मात् सर्वकरणविषयव्यापारकमेकमिदं करणं सर्वोपलब्ध्यर्थमुपलब्धुः।'[8]

तत्रैव अन्तःकरणोपाधिस्थस्योपलब्धुः प्रज्ञानरूपस्य ब्रह्मण उपलब्ध्यर्था या अन्तःकरणवृत्तयो बाह्यान्तर्वर्तिविषयविषयास्ता[9] एवमैतरेये पठिताः—'संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मनीषा जुतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति'[10]। एता विभिन्ना अन्तःकरणवृत्तयो मनोधर्मा वा शांकरभाष्ये व्याख्याता—'संज्ञानं संज्ञप्तिश्चेतनभावः। आज्ञानमाज्ञप्तिरीश्वरभावः। विज्ञानं कलादिपरिज्ञानम्। प्रज्ञानं प्रज्ञप्तिः प्रज्ञता ('तत्कालिकप्रतिभेत्यर्थ'[11]।)

---

6 Kenop. bhāṣya, 1.5.

7 Ai. up. 3. 1-2.

8 Ai. up. bhāṣya 3. 1-2

9 Ibid 3.2.

10 Ai. up. 3.2

11 Ai. up. bhāṣya, Ānandagiritīkā 3.2



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मेधा ग्रन्थधारणसामर्थ्यम्। दृष्टिरिन्द्रियद्वारा सर्वविषयोपलब्धिः। धृतिर्धारणमवसन्नानां शरीरेन्द्रियाणां ययोत्तम्भनं भवति। मतिर्मननम्। मनीषा तत्र स्वातन्त्र्यम्। जुतिश्चेतसो रुजादिदुःखित्वभावः। स्मृतिः स्मरणम्। संकल्पः शुक्लकृष्णादिभावेन संकल्पनं रूपादीनाम्। क्रतुरध्यवसायः। असुः प्राणनादिजीवनक्रियानिमिता वृत्तिः ('जीवनप्रयत्न इत्यर्थः'[12])। कामो सन्निहितविषयाकांक्षा तृष्णा। वशः स्त्रीव्यतिकरा- (सम्पर्का-) द्यभिलाष"[13] इति। यद्यप्यत्र मनोधर्मा वृत्तयो वा न दर्शनशास्त्रेष्विव सुसम्बद्धरूपेणाभिहितास्तथापि प्रसिद्धा बहवोऽन्तःकरणवृत्तयोऽत्रैव परिपठिता दृश्यन्ते।

प्रश्नोपनिषदि चान्तकरणं मनोबुद्ध्यहंकारचित्तरूपेण चतुर्धा विभज्य तेषां मननबोधनाहंकरणचेतनरूपवृत्तिभेदेन मन्तव्यादिविषयभेदः प्रदर्शितः।[14]

अद्वैतवेदान्तिनामुपनिषत्प्रसिद्धा अन्तःकरणवृत्तयः सर्वा एवाभिमताः। अपि च यद्यपि ज्ञानादि-संस्कारान्ता[15]ये आत्मविशेषगुणास्तार्किकैः स्वीकृतास्ते अद्वैतिभिरप्यन्तःकरणधर्मत्वेन स्वीक्रियन्ते, तथापि वृत्तित्वं मुख्यतः ज्ञानात्मकानामेव व्यपदिश्यते इति ध्येयम्।

सांख्य-पातंजलमतयोर्यद्यपि सुखदुःखादयोऽपि चित्तवृत्तिरेव तथापि बन्धनमोक्षहेतुत्वेन प्राधान्यात् मुख्यतया ज्ञानात्मकवृत्तय एव क्लिष्टाक्लिष्टभेदेनोक्ता 'वृत्तयः पंचतय्यः क्लिष्टाक्लिष्टाः', 'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः' इति सूत्रयोः। 'प्रत्यक्षानुमानागमाः प्रमाणानि', 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्', 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः', 'अभावप्रत्ययालम्बना वृत्तिर्निद्रा', 'अनुभूतविषयासम्प्रमोषः स्मृतिः'[16] इत्यादि सूत्रेषु च तेषां वृत्तीनां लक्षणानि कृतानि। क्लेशनिरूपणावसरे च रागद्वेषादीनाम्, सुखदुःखानां च तत्र तत्र निरूपणं कृतम्। उक्तं च 'अन्तःकरणधर्मत्वं धर्मादीनाम्'[17] इत्यत्र

---

12 Ibid 3.2
13 Ai. up. bhāṣya 3.2
14 Praśnop. 4.8
15 Sap. pad. 153 (Calcutta Sanskrit Series)
16 Pāt. yo. sū. 1, 5-11
17 Sā. sū. 5.25

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सांख्यसूत्रे 'आदिशब्देन वैशेषिकोक्ताः सर्वं आत्मविशेषगुणा गृह्यन्ते'[18] इति। तस्मात् वैशेषिकप्रसिद्धाः सर्वे आत्मगुणा ज्ञानसुखदुःखेच्छाद्वेषधर्माधर्मसंस्काराः सांख्ययोगयोरपि अन्तःकरणवृत्तिरूपेणाभिमताः।

बौद्धैरपि मनस्तत्त्वप्रधानेषु अभिधम्मात्थसंगह-विशुद्धिमाग्गप्रभृतिषु ग्रन्थेषु बहवश्चित्तधर्मा चेतसिकाख्याः प्रदर्शिताः। धर्मकीर्तिनाऽपि आत्मसंवेदनरूपप्रत्यक्षनिरूपणे चित्तचैत्तानामुल्लेखेन विज्ञानभेदानां सुखदुःखादीनां चोल्लेखः कृतः।[19] तद्व्याख्याने उक्तं धर्मोत्तरेण—'चित्तमर्थमात्रग्राहि। चैत्ता विशेषावस्थाग्राहिणः सुखादयः।'[20] तत्रोक्ता इन्द्रियज्ञान-मनोविज्ञान-योगिज्ञानादिका अपि प्रत्यक्षभेदा एव चित्तवृत्तिस्थानीयाः। वस्तुतो बौद्धप्रक्रियायां पंचस्कन्धेषु रूपस्कन्धं विहाय सर्वे स्कन्धा विज्ञान-वेदना-संज्ञा-संस्कारसंज्ञका अन्तःकरणवृत्तिस्थानीया एव। यथोक्तं—'वेदनानुभवः संज्ञा निमित्तोद्ग्रहणात्मिका।'[21] इत्यादि। सुखदुःखादीनामुपभोग एव वेदनास्कन्धः, निमित्तानां नीलपीत-दीर्घह्रस्व-पुरुषस्त्री-शत्रुमित्रप्रभृतीनामुद्ग्रहणं मनसि धारणमेव संज्ञास्कन्धस्य स्वरूपमित्यर्थः। पुनश्च—'संस्कारस्कन्धश्चतुर्भ्योऽन्ये संस्काराः'।[22] उक्तेभ्यश्चतुर्भ्यः स्कन्धेभ्यो व्यतिरिक्ताः संस्काराः संस्कारस्कन्ध इत्यर्थः।

जैना अपि तत्प्रक्रियानुसारेण पुद्गलपर्याय-चेतनपर्यायभेदेन इन्द्रियमनःप्रभृतीनां द्विविधत्वमुक्त्वा जीवस्य च चेतनालक्षणत्वमभिधाय आत्मधर्मत्वेनैव बहून् ज्ञानात्मकान्तरधर्मान् स्वीकुर्वन्ति सुखदुःखादिव्यतिरिक्तान्। सामान्यतः परोक्षप्रत्यक्षभेदेन ज्ञानद्वैविध्येऽपि 'मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम्', 'मतिः स्मृतिः संज्ञा चिन्ताभिनिबोध इत्यनर्थान्तरम्'[23] इत्यादि सूत्रेषु ज्ञानानां नानाविधत्वं दर्शयन्ति। तत्र पंचभिरिन्द्रियैर्मनसा च यथास्वमर्थान् मनुते पुरुषो यया सा मतिः। मननमात्रं वा मतिः। निरूप्यमानं यदेव श्रूयते ज्ञायते येन (ज्ञानेन) तदेव श्रुतम्। अवच्छिन्नविषयो ज्ञान-

---

18 Sā. pra. bhā. 5. 25
19 Nyā. bin. p. 19 (chow.)
20 Ibid-ṭīkā p. 19 (chow.)
21 Abhi. ko. 1.14
22 Ibid 1. 15
23 Tat. sū. 1.9, 13.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



विशेषोऽवधिः। परकीयमनोगतार्थस्य पर्ययणं समन्ताद्बोधनं मनःपर्ययः। तपःप्रसूतं यदसहायं सकलावरणक्षयोद्भूतं ज्ञानं तत् केवलमित्याख्यायते।[24] मतिज्ञानेन च व्यावहारिकप्रत्यक्षेण सह ऊहानुमानप्रत्यभिज्ञास्मृत्यादीनामपि संग्रह इति बोध्यम्। अन्येषां च रागद्वेषलोभदुःखप्रभृतीनामान्तरधर्माणां व्रतनिरूपणावसरे[25] उल्लेखो व्याख्यानं च दृश्यते।

वैशेषिकैरात्मविशेषगुणत्वेन ये गुणा आविष्कृतास्ते प्रायशः सर्वैषामेव आत्मधर्मत्वेन वा अन्तःकरणधर्मत्वेन वा अभिमताः। वैशेषिका हि ज्ञान-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माधर्म-संस्कारान् आत्मविशेषगुणत्वेन मन्यन्ते।[26] ते धर्मा आत्मधर्मत्वेन बुद्धिधर्मत्वेन वा सर्वैरेव स्वीक्रियन्ते। एतेषामपि धर्माधर्मसंस्काराणां जीवनयोनिप्रयत्नस्य च साक्षात्कारायोग्यत्वादतीन्द्रियत्वेन परिच्छेदान्तरे निरूपणं करिष्यते। अत्र तु ज्ञानसुखदुःखादयो[27] ये धर्मा वृत्तयो वा साक्षात्कारयोग्यास्ते निरूप्यन्ते। तत्रापि ज्ञानात्मकवृत्तीनामेव प्राधान्यात् ज्ञानमेवादौ निरूप्यते।

रामानुजमते वैशेषिकाभिमतानामात्मगुणज्ञानसुखादीनां स्वीकारेऽपि न तेषां ज्ञानातिरिक्तात्मगुणत्वेन स्वीकारः। तथोक्तं हि—'बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां षण्णां ज्ञानविततिरूपत्वेन ज्ञानान्तर्भावस्योक्तत्वात्। धर्माधर्मयोरपीश्वरप्रीत्यप्रीतिरूपत्वेनेश्वरज्ञानेऽन्तर्भावात्। भावनाख्यसंस्कारस्य ज्ञानविशेषरूपत्वात्।'[28] 'अतो बुद्धिरेवोपाधिभेदाद् सुखदुःखेच्छाद्वेषप्रयत्नरूपा, सुखादिजनकतया ज्ञानातिरेके प्रमाणाभावात्। इच्छामि द्वेष्मि इति व्यवहारस्य स्मरामीतिवज्ज्ञानविशेषेणैवोपपत्तेः।'[29]

तथा बौद्धा अपि तान् गुणान् विज्ञानस्यैव आकारभेदान् मन्वाना आहुः—

'तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः।
तत् सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजम्॥ इति,

---

24 Tat. vṛ, 1.9.

25 Tat. sū. 7.1-10.

26 Sap. pad. 153 (C.S.S.).

27 Nyā. sū. 1.1.10,

28 Yat. mat. dīp. p. 98 (A.A).

29 Ibid p. 59 (A.A,).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तस्माज् ज्ञानरूपाः सुखादयः तदभिन्नहेतुजत्वादिति।'[30] एतदसहमानास्ता-र्किकाः सयुक्तिकं ब्रुवते—'संविदो विषयानुभवस्वभावतयैव प्रतिभासात्, ज्ञानमेव विषयग्रहणरूपं प्रकाशते, न सुखं दुःखं वा। अन्य एवायं ग्राह्यैकस्वभाव आन्तरो धर्मः सुखदुःखादिरिति।

अपि च ज्ञानमिच्छन्ति न सर्वं ज्ञानपूर्वकम्।
सुखदुःखादि सर्वं तु विषयज्ञानपूर्वकम्॥
विषयानुभवोत्पाद्या यत्रापि न सुखादयः।
तत्रापि तेषामुत्पत्तौ कारणं विषयस्मृतिः॥'[31]

सर्वथापि ज्ञानस्य सर्वैरेव सर्वव्यवहारहेतुत्वेन प्रधानतया स्वीकृतत्वात् तदेवादौ निरूप्यते।

——o——

30 Nyā. mañ. part I. p. 70 (Chow.)

31 Ibid part I. p. 70-72 (Chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( ५ )

## ज्ञानात्मकमनोवृत्तिनिरूपणम्

अन्तःकरणधर्मानां वृत्तीनां वा सामान्यतस्त्रिधा विभागः—(१) ज्ञानात्मकधर्माः, (२) भावात्मकधर्मास्तथा (३) प्रयत्नात्मकधर्माश्च। तत्र ज्ञानात्मकानामेव प्राधान्यात् ते आदौ निरूप्यन्ते। तत्रापि ज्ञानसामान्यस्य प्रथमं बोधनीयत्वात् तदेवादौ निरूप्यते।

यद्यपि मनःस्वरूपनिरूपणेऽपरिहार्यतया ज्ञाननिरूपणं सामान्यतः किंचित् किंचित् कृतं तथापि ज्ञानरूपमनोवृत्तीनां ( मतान्तरेण ज्ञानरूपात्मधर्माणां ) निरूपणमिदानीं विशेषतः क्रियते।

### ज्ञानसामान्यनिरूपणम्

न्यायवैशेषिकमतयोः प्रत्यात्मनियतमेकं मनो विद्यते नित्यमणुपरिमाणं च। अदृष्टविशेषवशात् प्रत्यात्मना मनःसंयोगविशेषे जाते जीवने सति[1] पुनरदृष्टविशेषवशादेव मन केनचिदिन्द्रियेण संयुज्यते, इन्द्रियं विषयेणेत्येवं क्रमेणात्मनि विषयविषयकं ज्ञानमात्मविशेषगुणरूपं जायते इति तार्किकाणां ज्ञानोत्पत्तिप्रक्रिया। भाट्ट-प्राभाकर-जैन-रामानुजीयानां प्रायश एवमेम सामान्यतो ज्ञानोत्पत्तिः सम्मता।

न्यायसूत्रे हि 'बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तर'[2]मिति ज्ञानलक्षणमुक्तम्। प्रशस्तपादभाष्ये च बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्याया[3] इति तदेवोक्तम्। शिवादित्येन तु 'बुद्धित्वसामान्यवती आत्माश्रयप्रकाशो बुद्धि'[4]रिति ज्ञानलक्षणमुक्तम्। 'अर्थप्रकाशो बुद्धि'[5]रिति माधवसरस्वत्या वैशेषिकसम्मतज्ञानलक्षणमुक्तम्। केशवमिश्रेणापि[6] तदेव लक्षणमुक्तम्। 'सर्वव्यवहारहेतुर्गुणो

1 Nyā. mañ. p. 69 (Chow.)
2 Nyā. sū. 1.1.15.
3 Pra. bhā. p. 410 (V.S.V.)
4 Sap. pad. 86 (C.S.S.)
5 Sar. dar. Kau. p. 32 (Trivandrum)
6 Tarkabhāṣā p. 188 (Chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



बुद्धिर्ज्ञान'मिति तु नव्याः। आहारविहारादय ये सर्वे व्यवहारास्तेषाम-साधाराणकारणं ज्ञानमेवेत्यर्थः।

तच्च ज्ञानं न्यायवैशेषिकमते क्षणिकं नाम द्विक्षणस्थायि[8], आत्मविशेष-गुणानां ज्ञानसुखादीनां स्वोत्तरोत्पन्नविशेषगुणनाश्यत्वात्। आत्मनः सर्व-व्यापित्वेऽपि तद्विशेषगुणानां ज्ञानसुखदुःखादीनामव्याप्यवृत्तित्वमिति देहा-वच्छेदेनात्मन्येकदेशवृत्तित्वम्।[9] स्मृतिरपि ज्ञानं स्वोत्पत्त्यर्थं त्वङ्मनःसंयोगं चर्ममनःसंयोगं वाऽपेक्षते इति सुषुप्तौ पुरीतति नाड्यां प्रविष्टस्य मनसस्ता-दृशसंयोगाभावान्न किंचिदपि ज्ञानं सम्भवति।[10] सविकल्पकज्ञानमात्रं चानु-व्यवसायात्मकेन मानसप्रत्यक्षेण ज्ञायते। उक्तं च—'बुद्धिसुखदुःखेच्छाद्वेष-प्रयत्नास्त्वन्तःकरणग्राह्या इति,'[11] यथा घटज्ञानवानहमिति, घटमहं जानामीति वा। अपि तु 'सर्वं च ज्ञानं निराकारमेव। न तु ज्ञाने अर्थेन स्वस्याकारो जन्यते साकारज्ञानवादनिराकरणात्। ...सर्वं ज्ञानमर्थनिरूप्यम्, अर्थप्रति-बद्धस्यैव तस्य मनसा निरूपणात्। घटज्ञानवानहम् इत्येतन्मात्रं गम्यते न तु ज्ञानवानहम् इत्येतावन्मात्रं ज्ञायते।'[12]

सांख्य-योग-शांकराणां मतेषु स्वादृष्टविशेषवशाद् विषयेणेन्द्रियद्वाराऽन्तः-करणसंयोगे जाते सत्त्वप्रधानत्वात् स्वच्छस्यान्तःकरणस्य बुद्धे विषयाकारा वृत्ति र्जायते, आत्मचैतन्यप्रतिविम्बविशिष्टा सैव ज्ञानमिति बुद्धिपरिणामत्व-मेव ज्ञानस्य, न त्वात्मगुणत्वम्। वृत्तेर्विषयाकारत्वाद् विषयपरिच्छेदकत्वेऽपि विषयस्फुरणमात्मचैतन्येन बुद्धिप्रतिविम्बितचिदाभासेन वेति विज्ञेयम्। तच्च ज्ञानं बौद्धस्येव क्षणिकं तार्किकस्येव द्विक्षणस्थायि वेति न नियमः। अपि तु यावदेका विषयकारा वृत्तिर्जायते तावत् स्थायीति विरोधिवृत्त्युत्पत्ति-पर्यन्तं ज्ञानस्य स्थायित्वं स्वीक्रियते।[13] ज्ञानरूपवृत्तीनां तु सदैव साक्षि-चैतन्यभास्यत्वं तेषामभिमतम्।[14]

---

7 Tark. saṃ. p. 44 (Chow.).

8 Bhāṣā. pari. p. 135 (N.S.).   9 Ibid. p. 135 (N.S.).

10 Sid. mūktā. p. 246 (N.S.).   11 Pra. bhā. p. 132 (V.S.V.).

12 Tark. bhā. p. 190-91 ( Chow.).

13 Vedā. pari. p. 11-12 (chow.).   14 Pāt. yo. sū. 4,18,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अद्वैतमते मुख्यं ज्ञानं प्रकाशस्वभावं चैतन्यमेव। तथापि चैतन्याभिव्यक्तवृत्तिभिरेवाज्ञाननाशात् विषयाकारग्रहणाच्च वृत्तिज्ञानमेवास्माकं प्रधानत आलोचनविषयं मनोविद्याशास्त्रे। वृत्तिज्ञानानां ज्ञानान्तरं विनैव साक्षिभास्यत्वमभितम्। अद्वैतवेदान्तिनां मते वृत्तिप्रतिफलितचैतन्येन चिदाभासेन वा विषयस्फुरणमेव (प्रमाण-) फलमुच्यते। सांख्ययोगयोस्तु 'प्रमाता चेतनः शुद्धः'[15] 'द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः, स च पुरुषो बुद्धेः प्रतिसंवेदी'[16] इत्यादिना प्रमाणफलस्य बोधस्य पुरुषनिष्ठत्वमुक्तमिति विशेषः।

रामानुजमते स्वसंवेद्यचैतन्यरूपस्यात्मनो धर्मभूतमेव ज्ञानमचिद्जडरूपं विषयप्रकाशनवेलायां ज्ञानान्तरं विनैव स्वाश्रयायात्मने प्रकाशमानम्।[17] एतदेव तन्मते धर्मभूतज्ञानस्य स्वप्रकाशत्वम्। कस्यचिद् विषयस्य प्रकाशकत्वमेव तस्य ज्ञानत्वम्। अतएव 'अर्थप्रकाशो बुद्धि'रिति तल्लक्षणम्।[18] 'स्वयंप्रकाशाचेतनद्रव्यत्वे सति विषयित्वमिति वा।'[19] आत्मगुणभूतज्ञानस्यापि द्रव्यत्वं प्रभावदेकस्यैव द्रव्यत्वगुणत्वयो विरोधाभावात्। तच्च धर्मभूतज्ञानं जीवानामीश्वरस्य च नित्यं विभु च। ज्ञानस्य विभुत्वेऽपि बद्धजीवानां कर्मावेष्टनेन तेषां संकोचितत्वात् परिच्छिन्नत्वं नित्यत्वेऽपि संकोचविकाशवशादुत्पत्तिविनाशशालित्वं च प्रतीयते।[20]

यथोक्तं—

'बद्धेषु तत्तिरोभूतं मुक्तेषु प्राक्तिरोहितम्।<br>
संकोचनविकासाभ्यां नाशोत्पत्तिविपाकभाक्॥<br>
संकोच इन्द्रियद्वारा ज्ञानं संकोच्यते यदि।<br>
विकाश इन्द्रियद्वारा ज्ञानप्रसरणाद् भवेत॥'[21]

पंचीकरणप्रक्रियानुसारेण सर्वेषु प्राकृतेषु वस्तुषु सर्वभूतांशा विद्यन्ते। अतः शुक्तौ रजतज्ञानमपि तत्र रजतांशानां सत्त्वात् यथार्थमेव। भ्रमत्वव्यवहारस्तु

15 Sā. pra. bhā. 1.87.  16 Yo. sū. bhā. 2.20.

17 Bṛ. sū. Rā. bhā. p. 83 (Nirnayasagar)

18 Yat. mat. dīp. p. 56 (A.A.)  19 Ibid. 56 (A.A.)

20 Ibid p. 56 ; Tattvatraya p. 29 (chow.)

21 Vedā. kā. 7.2-3.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



विषयव्यवहारबाधात्। अतएव यथार्थं सर्वविज्ञानमिति यामुनभाषितम्। धारावाहिकज्ञानन्तु एकमेव न नाना।

अनुभूतिः प्रमाणमिति वदतां प्राभाकराणामपि ज्ञानस्य तार्किकमतवदात्मगुणत्वेऽपि सर्वे प्रत्यया यथार्थाः प्रत्ययत्वात् घटादिप्रत्ययवदित्यनुमानेन सर्वज्ञानानां यथार्थत्वमभिमतमित्येतत् सर्वं भ्रमनिरूपणे स्फुटीभविष्यति। अपि च तन्मते ज्ञानं स्वप्रकाशं विषयं स्वाश्रयमात्मानं स्वं च प्रकाशयतीति। उक्तं च शालिकनाथेन—'सर्वाश्च प्रतीतयः स्वयंप्रत्यक्षाः प्रकाशन्ते।...... इदमहं स्मरामि गृह्णामीति त्रितयमेवावभासते।' नन्दीश्वरेणापि—'तस्मादर्थज्ञानं स्वयंप्रकाशमेवाभ्युपगतन्तव्यम्।'[22]

भाट्टमीमांसकमते तु बोधाबोधात्मकस्यात्मनो ज्ञानगुणकत्वेऽपि, न ज्ञानस्य तार्किकमतवदनुव्यवसायगम्यत्वं, न वा सांख्यवेदान्तमतवत् साक्षिभास्यत्वं प्राभाकरमतवद्वा स्वप्रकाशत्वमपि तु अर्थाहितज्ञातताख्यप्राकट्यान्यथानुपपत्तिगम्यत्वमेव।[23] यदा ज्ञानेन विषयप्रकाशो भवति तदा विषये आहितेन ज्ञाततारूपेण प्राकट्येन—एतद्विषयप्राकट्यं ज्ञानं विनाऽनुपपन्नमित्यर्थापत्त्या ज्ञानमवगम्यते।

बौद्धमते 'विज्ञानं प्रतिविज्ञप्ति'[24]रित्युक्तम्। विषयं विषयं प्रति उपलब्धिरेव विज्ञानम्। तच्च विषयप्रदर्शकम्। विज्ञानं हि विषयं प्रदर्शयदेव पुरुषं प्रवर्तयति। उक्तं च—'न ज्ञानं जनयदर्थं प्रापयति। अपि त्वर्थे पुरुषं प्रवर्तयत् प्रापयत्यर्थम्। प्रवर्तकत्वमपि प्रवृत्तिविषयप्रदर्शकत्वमेव। न हि पुरुषं हठात् प्रवर्तयितुं शक्नोति विज्ञान'[25]मित्यादि। तच्च विज्ञानं योगाचारमते पुनर्द्विविधमालयविज्ञानं प्रवृत्तिविज्ञानं चेति पूर्वमुक्तमेव। सर्वमेव विज्ञानं क्षणिकं स्वसंवेदनं च, क्षणिकविज्ञानस्य क्षणान्तरवर्तिविज्ञानान्तरेण ग्रहीतुमशक्यत्वाद् विज्ञानग्राहकस्य स्थायिन आत्मनोऽनभ्युपगमाच्च। चैत्रविज्ञानसन्ततेः मैत्रविज्ञानसन्ततिभेदात् सुखदुःखबन्धमोक्षादिव्यवस्था।

---

22 Prā. pañ. p. 170 (B.H.U.) ; Prā. vij. p. 34 (S.S.P.)

23 Mā. me. p. 248 (Adyar). 24 Abhi. Ko. 1.16.

25 Nyā. bin. ṭīkā. p. 5. (chow.).



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



जैनदर्शने 'जानाति ज्ञायतेऽनेन ज्ञातिर्वा ज्ञान'[26]मिति ज्ञानस्य स्वरूपमुक्त्वा सम्यग्ज्ञानस्यैव मोक्षहेतुत्वात् तद्वर्णने यत्न आस्थितः। सर्वथापि अर्थस्य परिच्छित्तिरेव ज्ञानस्वरूपमिति स्वीकृतम्। 'चेतनालक्षणो जीवः। चेतना च ज्ञानाद्यात्मिका'[27] इत्युक्त्या च ज्ञानस्य स्वाभाविकात्मधर्मत्वमेवोक्तम्। तथा 'ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो'[28] इत्यत्र च जैनमते धर्मधर्मिणोर्भेदाभेदस्य स्वीकृतत्वात् ज्ञानस्यात्मधर्मत्वमेव स्पष्टमुक्तम्।

जैनमते सामान्यतः ज्ञानस्य प्रत्यक्षपरोक्षभेदाद्द्वैविध्येऽपि 'मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञान'[29]मिति तत्त्वार्थसूत्रे जैनमतसिद्धज्ञानप्रकारा उक्ताः। तत्र मननमात्रं मतिः, शृणोति जानाति इति श्रुतं शब्दजन्यज्ञानम्, अवच्छिन्नविषयो ज्ञानविशेषोऽवधिज्ञानम्, परकीयमनोगतार्थज्ञानं मनःपर्ययः, यदसहायं सकलावरणक्षयोद्भूतं ज्ञानं तत्केवलमिति तेषां संक्षिप्तव्याख्यानं ज्ञातव्यम्। 'स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाण'मित्युक्त्या धारावाहिकभिन्नस्य सविकल्पकानुभवस्यैव प्रमाणत्वं तन्मते अभिप्रेतम्।[30] न तु ज्ञानकारणस्य प्रमाणत्वम्। तदुक्तं भास्करनन्दिना—'सामान्यविशेषात्मकवस्तुपरिच्छेदकं प्रमाणम्। तद्द्वेधा—प्रत्यक्षपरोक्षभेदात् इति।'[31] 'यत्...स्वार्थव्यवसायात्मकं सम्यग्ज्ञानं तदेव प्रमाणं भवति। तद्विपरीतस्य सन्निकर्षादेः प्रमाणत्वायोगाद् घटादिवत्। द्रव्येन्द्रियप्रदीपालोकादीनामप्युपचारात् प्रामाण्याभ्युपगमात्'[32] इति च।

सांव्यवहारिक-पारमार्थिकभेदेन इन्द्रियकातीन्द्रियकभेदेन च प्रत्यक्षाणां भेदो जैनमतप्रसिद्धः। सर्वमेव ज्ञानं स्वपराभासि, विज्ञानस्य प्रदीपवत् स्वपरप्रकाशस्वभावत्वात्।[33] 'घटमहमात्मना वेद्मीति', 'कर्मवत्कर्तृकरणक्रियाप्रतीते'[34]रित्यादावपि तदेवोक्तम्।

---

26 Tat. vṛ. 1.1.
27 Ibid 1.4.
28 Saḍ. samu. p. 50 (chow.).
29 Tat. sū. 1.9.
30 Parī. mu. sū. 1.1 ; Pra. rat. mā. 1.1.
31 Tat. vṛ. 1.6.
32 Ibid 1.10.
33 Nyāyāvatāra 1 ; Pra. Ka. mār. p. 86 (N.S.).
34 Pari. mu. sū. 1.8-9.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



शाक्ततन्त्रे तु शुद्धचित्स्वरूपस्यात्मनः या चलावस्था सैव मन उच्यते इत्युक्तमेव। तस्यैव मनसोऽवस्थाद्वयभेदो ज्ञानरूपः प्रकाशामर्शसंज्ञकः। तत्र प्रकाशो निर्विकल्पकज्ञानम्, विमर्शः सविकल्पकज्ञानम्। तदुक्तं—

'मनसस्तु द्विधाऽवस्था प्रकाशामर्शभेदतः।
वहिरर्थेषु विश्रान्ति र्या प्रकाशः स उच्यते।
यस्तद्विचारः स्वस्मिन् वै स विमर्श उदाहृतः॥
प्रकाशो निर्विकल्पः स्याद्वस्तूनामविभेदतः।
विमर्शः शब्दसम्भेदाद् विभेदात् सविकल्पकः॥'[35]

इत्यादि। स्वस्मिन् अन्तः यः 'अयमीदृश' इति शब्दसम्भेदात्मा अर्थविचारः स विमर्शः सविकल्पकज्ञानमित्यर्थः। तदेवोक्तं—

'अयमेवंविध इति वस्तुदर्शनमूलकः।
शब्दसम्भिन्नरूपोऽसौ विचारात्मावभासनः॥'[36]

पुनश्च—

'आत्मनो हि मनः प्रोक्तं करणं ज्ञानकर्मणि॥'[37]
'...तत्रावरणमुखत्वात् प्रमाणं मन उच्यते॥'[38]
'...मनोव्यापार एष स्यात् स्फुर्त्याऽपहतिरावृतेः॥'[39]

इत्यादि। आवरणात्मकजडशक्तिप्राधान्येन प्रमाणं ज्ञानकरणं मनः, स्पुर्त्या तस्या आवृतेरावरणशक्तेरपहतिरभिभव एव मनोव्यापार इत्यर्थः। एतदेव हि चितेश्चलनं यत् स्फुर्त्या आवरणाभिभवः, तदेव ज्ञानमिति संक्षेपः।

——०——

35 Tri. ra. tan. 16.64-67.
36 Ibid 16.68.
37 Ibid 18.47.
38 Ibid 18.109.
39 Ibid 18.116.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# अनुभवनिरूपणम्

तच्च ज्ञानं सामान्यतो द्विविधम् अनुभवरूपं स्मृतिरूपं च।[1] स्मृतिभिन्नं ज्ञानमनुभव इति प्रायशः सर्वेषामैकमत्यमेव। स्मृतिस्तु इन्द्रियाजन्यत्वे सति संस्कारजन्यं ज्ञानमिति सविस्तारमग्रे निरूपयिष्यते। अनुभवो द्विविधः— यथार्थोऽयथार्थश्च। प्राभाकर-रामानुजीयानां यथा सर्वेऽनुभवा यथार्थास्त-दुक्तमेव। तार्किकमते यथार्थानुभव एव प्रमेत्युच्यते। स च यथार्थानु-भवस्तद्वति तत्प्रकारक इति[2] तार्किकमतमन्येषामपि प्रायशोऽविरुद्धम्। ज्ञानस्य अनुभवत्वे विषयस्याभिनवत्वं प्रयोजकमिति प्रायशः सर्वेषामेव मतम्। तदुक्तं—

'आन्तरोऽभिनवोऽन्यो वा विमर्श इति कीर्तितः।
तत्र योऽभिनवाभासः स प्रोक्तोऽनुभवात्मकः॥
अन्यः स्मृत्यनुसन्धानात्मकः संस्कारसम्भवः॥'[3]

अतएव प्रायशः सर्वैरेव वादिभिः प्रमालक्षणे अनधिगतत्वं विषयविशेषणं प्रदत्तम्। तेषां मते स्मृतेः पूर्वाधिगतविषयविषयकत्वेन नानुभवत्वं न वा प्रमात्वम्। यथोक्तं सांख्यसूत्रे—'असन्निकृष्टार्थपरिच्छित्तिः प्रमा इति।'[4] असन्निकृष्ट इत्यस्य प्रमातरि अनारूढः अनधिगत इत्यर्थः। उक्तं च बौद्ध-मतेन धर्मोत्तरेण—'अविसंवादकं ज्ञानं सम्यग्ज्ञानमिति। अत एवानधिगत-विषयं प्रमाणम्। ततोऽधिगतविषयमप्रमाणम् इति च।'[5] जैनमतेऽपि 'स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाण'[6]मित्युक्त्या अनधिगतत्वमर्थविशेषणं प्रमाणलक्षणेऽभिहितम्।

मीमांसकैरपि अबाधितासन्दिग्धानधिगतार्थविषयकज्ञानस्य प्रमात्वं स्वीकृतम्। तदुक्तं—

---

1 Tark. bhā. p. 188 (chow.)  2 Tark. saṃ. p. (chow.)
3 Tri. ra. tan. 16.69-70.  4 Sā. sū. 1.87.
5 Nyā. bin. ṭikā. p. 4.6. (Chow.)
6 Pari. mu. sū. 1.1.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



'तस्माद् दृढं यदुत्पन्नं न विसंवादमृच्छति ।
ज्ञानान्तरेण विज्ञानं तत् प्रमाणं प्रतीयताम् ॥'[7]

तत्र दृढमिति सन्देहनिरासः। उत्पन्नमित्यनुवादस्मृतिनिरासः। ज्ञानान्तरेण न विसंवादमृच्छतीत्यनेनाबाधितत्वमुदितम्। एवम्भूतं विज्ञानं प्रमाणं प्रमेत्यर्थः। उक्तं च भट्टनारायणेन—'प्रमा चाज्ञाततत्त्वार्थज्ञानमेवात्र।'[7a] प्राभाकरमतेऽप्युक्तं शालिकनाथेन—'तत्र बुद्धिः स्वसंवेदनसिद्धा प्रमितिस्मृतिरूपा' इति; 'अनुभूतिः प्रमाणं सा स्मृतेरन्या, स्मृतिः पुनः पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते'[7b] इति च।

प्रकारान्तरेणापि प्रमालक्षणमाहुः—'प्रमितिर्गुणदोषमाध्यस्थ्यदर्शनमिति।'[8] 'तत्र गुणदर्शनमुपादेयत्वज्ञानम्, दोषदर्शनं हेयत्वज्ञानम्, माध्यस्थ्यदर्शनं न हेयं नोपादेयमिति ज्ञानं प्रमितिः, पदार्थस्वरूपबोधे सति उपकारादिस्मरणात्।'[9] स्मृतिनिरूपणमग्रे विस्तारेण करिष्यते। अत्र तु अनुभवनिरूपणार्थं सामान्यतः कृतम्।

'भावनाऽसाधारणकारणज्ञानं स्मृतिः', 'अस्मृतिरूपं ज्ञानमनुभवः' तत्त्वानुभवः प्रमा ( अतत्त्वज्ञानमप्रमा )'[10] इत्यादि लक्षणानि शिवादित्येनाप्युक्तानि।

'यथावस्थितव्यवहारानुगुणज्ञानं प्रमा'[11] इति रामानुजीयानां लक्षणम्। तन्मते स्मृतेरपि प्रमात्वमग्रे स्थापयिष्यते। अनुभवस्य स्मृतिभिन्नत्वं तु स्वीकृतमेव।

जैनमतेऽपि यद्यपि स्मृतेरपि प्रामाण्यं स्वीकृतं तथापि स्मृत्यनुभवयोः पार्थक्यं तैरपि स्वीकृतमेव। स्मृतेः संस्कारजन्यत्वादनुभवात्तस्या भेदः।[12]

—o—

7 Ślo. vār. 2.80. 7a Mā. me. p. 2 (Adyar).
7b Pra. pañ. p. 149; 127 (B.H.U.).
8 Pra. bhā. p. 475 (V.S.V.). 9 Nyā. kan. p. 475 (V.S.V.).
10 Sap. pad. 121-22 (C.S.S.). 11 Yat. mat. dīp. p. 3 (A.A.).
12 Pari. mu. sū. 3.3.

Sai 73-158
CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## यथार्थानुभवभेदनिरूपणम्

यथार्थानुभवस्य प्रमाया लक्षणमुक्तम्। तस्य प्रकारभेदे सन्ति विप्रतिपत्तयः। स च यथार्थानुभव एक एव प्रत्यक्ष इति चार्वाकमतम्। वैशेषिकबौद्धमतयो र्यथार्थानुभवो द्विविधः प्रत्यक्षानुमितिरूपः। वैशेषिकसूत्रे प्रशस्तपादभाष्ये च विद्याऽविद्याभेदेन ज्ञानस्य द्विविधत्वमुक्त्वा[1] भाष्ये पुनर्विद्याया यथार्थानुभवरूपस्य चतुर्विधत्वक्तम्। तदुक्तं—'विद्यापि प्रत्यक्ष-लैंगिक-स्मृत्यार्षलक्षणा।'[2] तत्र स्मृते र्यथार्थत्वेन विद्यात्वेऽपि न प्रमात्वं, तथा ऋषिभिरपरिगणनात्। आर्षज्ञानस्यालौकिकत्वात् लौकिकप्रमा द्विविध एव। उक्तं च श्रीधरेण—'प्रत्यक्षानुमानव्यतिरेकेण प्रमाणान्तराभावा'दिति।[2a] न्यायबिन्दावपि टीकायां 'अविसंवादकं ज्ञानं सम्यग्ज्ञान'[3] मिति यथार्थानुभवमुक्त्वा 'द्विविधं सम्यग्ज्ञानं, प्रत्यक्षमनुमानं च'[4] इत्युक्तम्। शिवादित्येनापि वैशेषिकमतानुसारेण प्रमाद्वैविध्यमुक्तम्, यथा—'अज्ञायमानकरणजन्यतत्त्वानुभवः प्रत्यक्षप्रमा। ज्ञायमानकरणजन्यतत्त्वानुभवोऽनुमितिप्रमा इति।'[5] तत्राज्ञायमानकरणानीन्द्रियाणि, ज्ञायमानकरणानि लिङ्गादीनीत्यर्थः। प्रत्यक्षानुमितिशाब्दबोधास्त्रिविधा इति सांख्य-पातंजल-रामानुजीयानां मतम्।'[5a]

जैनमते सामान्यतः प्रत्यक्षपरोक्षभेदेन प्रमाद्वैविध्यस्य कथनेऽपि, वस्तुतो मतिश्रुतावधिमनःपर्ययकेवलानां मत्यन्तर्गतस्मृतिप्रत्यभिज्ञानोहानामपि प्रामाण्यस्वीकारात् यथार्थानुभवस्य बहुविधत्वम्।[6] तन्मते ज्ञानमेव प्रमाणं न त्विन्द्रियादि, तस्यैव हिताहितप्राप्तिपरिहारसामर्थ्यात्। 'हिताहितप्राप्तिपरिहारसमर्थं हि प्रमाणं ततो ज्ञानमेव तत्'[7] इत्युक्तं माणिक्यनन्दिना।

न्यायमते 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'इति सूत्रेण प्रमाणचातुर्विध्येन प्रमाया अपि चातुर्विध्यं सूचितम्। प्रत्यक्षादीनां विवरणन्तु परिच्छेदान्तरे वक्ष्यते।

---

1 Vai. sū. 9.2.11-12.
2 Pra. bhā. p. 441 (V.S.V.)
2a Nyā. kan. 424 (V.S.V.)
3 Nyā. bin. ṭikā. p. 4 (chow.)
4 Nyā. bin. p. 10 (Chow.)
5 Sap. pad. 122 (C.S.S)
5a Yat. mat.. dīp. p. 2 (A.A.)
6 Tat. sū. 1.9-12.
7 Pari. mu. sū. 1.2.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अर्थापत्तिसहितास्ते पंच इति प्राभाकरमतम्। अन्यथानुपपत्तिबलादर्थस्य कल्पनमेवार्थापत्तिः। यथा—दिवाऽभुञ्जानस्य देवदत्तस्य पीनत्वं रात्रिभोजनं विनाऽनुपपन्नमिति तस्य रात्रिभोजनं कल्प्यते।

प्रत्यक्षानुमित्युपमितिशाब्दबोधार्थापत्त्यनुपलब्धय इति भाट्ट-वेदान्तिनोर्मतम्। भाट्टा अद्वैतिनश्च अभावापरोक्षमनुपलब्धिप्रमाणजन्यं मन्यन्ते, न त्विन्द्रियजन्यम्।

प्रमासंख्यानुसारेणैव प्रभाकरणानि प्रमाणानि तैस्तैः स्वीकृतानि। यथोक्तं—

'चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ
भासर्वज्ञश्च सांख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति।
प्राहुः प्राभाकराः पंचकमपि च वयं तेऽपि वेदान्तविज्ञाः
षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात्॥'[8]

'प्रमाणं वृत्तिरेव नः'—इतीन्द्रियादिजनितान्तःकरणवृत्तय एव प्रमाणानि'[9] नेन्द्रियादय इति सांख्य-पातंजलयोर्मतम्। इन्द्रियादीनां प्रमाणत्वमुपचरितम्। ज्ञानस्यैव प्रमाणत्वं न तत्करणस्येति बौद्ध-जैनयोरैकमत्यम्।

बौद्धमते प्रत्यक्षानुमानयोः प्रमाणत्वेऽपि स्वलक्षणविषयकं निर्विकल्पकप्रत्यक्षमेव परमार्थवस्तुग्राहित्वादभ्रान्तम्। अनुमानस्य नामजात्यादिविषयत्वाद् भ्रान्तत्वेऽपि नियतविषयप्रदर्शकत्वात् स्वलक्षणप्रापकत्वाच्च प्रामाण्यम्। यथोक्तं—'यथा च प्रत्यक्षं प्रतिभासमानं नियतमर्थं दर्शयति, अनुमानं च लिंगसम्बद्धं नियतमर्थं दर्शयति। अत एते नियतार्थस्य प्रदर्शके। तेन ते प्रमाणे, नान्यद् विज्ञानम्। प्राप्तुं शक्यमर्थमादर्शयत् प्रापकम्। प्रापकत्वाच्च प्रमाणम्।'[10]

रामानुजमते स्मृतेः प्रामाण्येऽपि तस्य मूलप्रत्यक्षेऽन्तर्भावात् प्रमाणानि प्रत्यक्षानुमानशब्दाख्यानि त्रीण्येव।[11] प्रत्यक्षं चार्वाचीनानर्वाचीनभेदेनापि द्विविधमिति विशेषः।[12] स च प्रत्यक्षपरिच्छेदे सविस्तारमालोचयिष्यते।

प्रत्यक्षानुमित्यादियथार्थानुभवनिरूपणे बहुवक्तव्यसद्भावात् ते परिच्छेदान्तरे सविस्तारं निरूपयिष्येते, अत्र सामान्यत उल्लेखमात्रं कृतमिति।

——०——

8 Mā. me. p. 8 (Adyar).
9 Sā. pra. bhā. 1.99.
10 Nyā. bin. ṭīkā. p. 6 (Chow.)
11 Yat. mat. dīp. p. 4 (A.A.)
12 Ibid p. 6 (A.A.).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## अयथार्थानुभवनिरूपणम्

यथार्थानुभवभेदाः प्रदर्शिताः। इदानीमयथार्थानुभवस्तद्भेदाश्च निरूप्यन्ते।

'अतत्त्वज्ञानमप्रमा'[1]इति अयथार्थानुभवस्यैव लक्षणम्। वैशेषिकसूत्रे तु 'तद्दुष्टज्ञान'[2]मिति( अविद्या-)लक्षणं कृतम्। 'अयथार्थस्त्वर्थव्यभिचार्यप्रमाणज'[3] इति केशवमिश्रेणोक्तम्।.

तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थ[3a] इति तु नव्याः। सर्पत्वाभाववति ( रज्जौ ) सर्पत्वप्रकारकानुभवः अयं सर्प इत्यनुभवोऽयथार्थानुभवः। स एव अप्रमा इत्युच्यते। संशयाहार्ययोरपि तादृशत्वादयथार्थत्वम्।

अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यपि तल्लक्षणमेव वेदान्तभाष्यकारैः कृतम्। अन्यच्च 'स्मृतिरूपः परत्र पूर्वदृष्टावभास' इति।[4]

यथा च प्राभाकर-रामानुजीयानां मतयोर्ज्ञानस्यायथार्थत्वमेव न सम्भवति तत् पूर्वमेवोक्तम्।

सांख्यपातंजलयोः विपर्यय एवाप्रमा, संशयादीनां पृथगनुल्लेखात्। 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठ'[5]मिति तल्लक्षणमपि कृतम्। संशयादीनां विपर्ययेऽन्तर्भावः।

वैशेषिकभाष्यकारेण प्रशस्तपादेन तु सामान्यतो ज्ञानस्य द्विविधत्वमुक्त्वा अविद्याया अयथार्थानुभवरूपायाश्चतुर्विधत्वमुक्तम्। यथोक्तं—'तत्राविद्या चतुर्विधा संशयविपर्ययानध्यवसायस्वप्नलक्षणा। संशयस्तावत्—प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनादुभयविशेषानुस्मरणादधर्माच्च किंस्विदित्युभयालम्बी विमर्शः संशयः। स च द्विविधः—अन्तर्बहिश्च।...विपर्ययोऽपि प्रत्यक्षानुमानविषय एव भवति। प्रत्यक्षविषये तावत्—प्रसिद्धानेकविशेषयोः पित्तकफानिलोपहतेन्द्रियस्यायथार्थालोचनादसन्निहितविषयज्ञानजसंस्कारापेक्षा-

---

1 Sap. pad. 122 (C.S.S.)
2 Vai. sū. 9.2.11.
3 Tark. bhā. p. 189 (Chow.)
3a Tark. saṃ. p. 47 (chow.)
4 Br. sū. Śa. bhā. 1.1.1.
5 Pāt. yo. sū. 1.8.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



दात्ममनसोः संयोगादधर्माच्चातस्मिन् तदिति प्रत्ययो विपर्ययः। यथा गवि अश्व इति। अनध्यवसायोऽपि...प्रत्यक्षविषये तावत्—प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा व्यासंगादर्थित्वाद्वा किमित्यालोचनमात्रमनध्यवसायः। यथा वाहीकस्य पनसादिष्वनध्यवसायो भवति।...उपरतेन्द्रियग्रामस्य प्रलीनमनस्कस्येन्द्रियद्वारेणैव यदनुभवनं मानसं तत् स्वप्नज्ञानमित्यादि।'[6]

शिवादित्यमते त्वयथार्थानुभवो द्विविधः। यथाह—'अनवधारणज्ञानं संशयः। अवधारणरूपातत्त्वज्ञानं विपर्ययः'[7] इति। प्रकारान्तराणां द्वययोरेवान्तर्भावात्। ऊहानध्यवसायानां संशये एवान्तर्भावः। तथाहि—'उत्कटैककोटिकसंशय ऊहः। अनालिंगितोभयकोट्यनवधारणज्ञानमनध्यवसायः'[8] इत्यादि। पुनश्च—'तर्कस्वप्नौ संशयविपर्ययावेव'[9] इति आहार्यज्ञानरूपस्य तर्कस्यापि संशयेऽन्तर्भाव उक्तः। स्वप्नस्य तु विपर्ययेऽन्तर्भावः। उक्तं च श्रीधरेण—'अन्ये तु संशयप्रभेद एव तर्कोऽनवधारणात्मकत्वादित्याहुः।'[9a] यद्यपि वैशेषिकानुसारिभिः शिवादित्यादिभिः तर्कस्य संशयेऽन्तर्भाव उक्तस्तथापि नैयायिकैस्तस्य पृथक् परिगणनं कृतम्। तदुक्तं—'अत्र कश्चिदाह — तर्कः संशय एवान्तर्भवतीति, तन्न। एककोटिविषयत्वात् तर्कस्य।'[10]

नव्यन्यायमते तु संशयविपर्ययतर्कभेदादयथार्थानुभवस्त्रिविधः।[11] :तर्कस्येच्छाप्रयोज्यविपरीतज्ञानरूपत्वादाहार्यत्वम्। तस्यायथार्थत्वेऽपीच्छाप्रयोज्यत्वाद् विसंवादिप्रवृत्त्यजनकत्वात् प्रमाणानुग्राहकत्वाच्च विपर्ययाद्भेदः। तन्मते ऊहस्यानुमाने, अनध्यवसायस्य संशये, स्वप्नस्य स्मृतौ विपर्यये वा, योगाभिमतविकल्पस्याहार्यभ्रमेऽन्तर्भावात्त्रिविध एवायथार्थानुभवः।

भट्टमीमांसकैरपि त्रिविधोऽयथार्थानुभवः स्वीकृतः। तथा हि उक्तम्—'अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः।'[12]

---

6 Pra. bhā. p. 411-36 (V.S.V.)

7 Sap. pad. 122 (C.S.S.)

8 Ibid 140 (C.S.S.).

9 Ibid 136 (C.S.S.)

9a Nyā. kan. p. 419 (V.S.V.)

10 Tark. bhā. p. 202 (Chow.)

11 Tark. sam. p. 122 (Chow.)

12 Ślo. Vār. 2.54



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



कैश्चित्तु नव्यनैयायिकैर्द्वैविध्यमप्युक्तम्। यथोक्तं—

'तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।
तत्प्रपंचो विपर्यासः संशयोऽपि प्रकीर्तितः।'[13]

सांख्यपातंजलयोरतिरिक्तं विकल्पज्ञानं यदुक्तं तदपि अयथार्थानुभव एव। तस्याप्याहार्यज्ञानत्वात् विसंवादिप्रवृत्त्यजनकत्वाद् बाधज्ञानेऽपि पण्डितानामपि व्यवहारविषयत्वाच्च विपर्ययाद्भेदः। अनिरुद्धेन विकल्पज्ञानस्य मिथ्याज्ञाने एव अन्तर्भावः कृतः।[14]

रामानुजमते यद्यपि पंचीकरणद्वारा सर्वपदार्थानां सर्वात्मकत्वात् सर्वविज्ञानानां यथार्थत्वं कथंचित् स्थापितं तथापि विषयव्यवहारबाधात् संशयविपर्ययादिकं तेषामप्यभिमतम्। यथा ह्युक्तं—'यथावस्थितपदेन संशयान्यथाज्ञान-विपरीतज्ञानव्यावृत्तिः। धर्मिग्रहणे मिथो विरुद्धानेकविशेषस्मरणं संशयः।.. अन्यथाज्ञानं नाम धर्मविपर्यासः। विपरीतज्ञानं नाम धर्मिविपर्यासः, यथा वस्तुनो वस्त्वन्तरज्ञानम्।'[15]

जैनमतेऽपि 'मतिश्रुतावधयो विपर्ययश्चे'[16]ति सूत्रस्य टीकायामुक्तं—'तत इमे मतिश्रुतावधयो विपर्ययश्च सम्यक् चेति समुदायार्थः।...मिथ्यादृष्टौ जीवे मिथ्यादर्शनेन सहचरितं ज्ञानं संशयविपर्ययानध्यवसायात्मकत्वेन मिथ्या भवति।'[17] अनेन तन्मते अयथार्थज्ञानानां संशयविपर्ययानध्यवसायभेदेन त्रैविध्यमुक्तम्।

बौद्धमतेऽपि विपर्ययसंशयभेदेनायथार्थानुभवानां द्वैविध्यं स्वीकृतम्। यथोक्तं धर्मोत्तरेण—'आभ्यां प्रमाणाभ्यामन्येन च ज्ञानेन प्रदर्शितोऽर्थः कश्चिदत्यन्तविपर्यस्तः, यथा मरीचिकासु जलम्। कश्चिदनियतो भावाभावयोः, यथा संशयार्थः।'[18]

अयथार्थानुभवः तद्भेदकथनपूर्वकं सामान्यतो निरूपितः। इदानीं तेषां प्रत्येकं विशेषतो निरूप्यते।

———o———

13 Bhā. pari p. 476 (Nirnayasagar) 14 Sā. sū. vṛ. 5.52
15 Yat. mat. dīp. p. 3.4 ; Vedanta-kārikāvalī 1.16-17
16 Tat. sū. 1.31 17 Tat. vṛ. 1.31
18 Nyā, bin. ṭikā- p. 6 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## संशयनिरूपणम्

'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय'[1] इति गौतमीयसूत्रम्। एकस्मिन् धर्मिणि विमर्शो विरुद्धभावाभावप्रकारकज्ञानं संशय इत्यर्थः। संशयस्य कारणमुखेन विशेषलक्षणानि प्रदर्श्यन्ते—समानेत्यादि। साधारणधर्मदर्शनात्, असाधारणधर्मदर्शनात्, विरुद्धकोटिद्वयोपस्थापकशब्दात्, प्रामाण्यसंशयाच्च जायते संशयः, विशेषदर्शनं चापेक्षते निवर्तकत्वेनेति निर्गलितार्थः।[2] जयन्तभट्टेन तु सूत्रस्थपदानामन्यथा व्याख्यानं कृतम्। तथाहि—'समानो धर्मः परिणाहादिः तस्य...... तुल्यरूपावगतिविपयीकृतत्वात् समानत्वमुच्यते, तस्योपलब्धिरुपपत्तिः...इति सर्वथा समानधर्मोपलब्धेः संशय इत्युक्तं भवति। ......कारणान्तरमुच्यते—उपलब्ध्यनुपलब्ध्यव्यवस्थात इति, अनेन विशेषाग्रहणमुच्यते......इदन्तयाऽनिदन्तया वा तत्रोपलब्धि र्न व्यवतिष्ठते, अनुपलब्धिर्वेति। ......कारणान्तरमुच्यते—विशेषापेक्ष इति, विशेषस्मृत्यपेक्ष इत्यर्थः।'[3]

अत्र च संशयलक्षणे वादिनां मीमांसक-वेदान्ति-जैन-बौद्ध-सांख्य-योगिनां प्रायश ऐकमत्यमेव। तथा चोक्तं माणिक्यनन्दिना—'संशयादयः प्रमाणाभासाः स्वविपयोपदर्शकत्वाभावा'दिति। प्रमेयरत्नमालायां च 'तत्र संशय उभयकोटिस्पर्शी स्थाणु र्वा पुरुषो वेति परामर्शः।'[3a]

रामानुजीयानां यद्यपि सर्वं ज्ञानं यथार्थं तथापि विपयव्यवहारबाधात् प्रमाभिन्नत्वेन तैः संशयस्य लक्षणं कृतम्—'धर्मिग्रहणे मिथो विरुद्धानेकविशेषस्मरणं संशय'[4] इत्युक्तमेव। किन्तु संशयस्यापि यथार्थत्वात् तत्र ज्ञानद्वयं

1 Nyā. sū. 1.1.23
2 Nyā. sū. vṛ. 1.1.23
3 Nyā. mañ. ii. p. 119 (chow.)
3a Pari. mu. sū. ṭikā (pra. rat. mā.) 6.2
4 Yat. mat. dīp. p.3 (A.A.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



वाच्यम्। पुरोवर्तिवस्तुभानमनुभवः प्रत्यक्षात्मक एव। स्थाणुपुरुषभाणं तु स्मरणं पूर्वानुभवात्मकम्। तथा च द्वयोरपि यथार्थत्वं निर्विवादमेव।

बौद्धमतेऽपि अनियतार्थः संशयः स्वीकृतः। तथा चोक्तं—'आभ्यां प्रमाणाभ्यामन्येन च ज्ञानेन प्रदर्शितोऽर्थः......कश्चिदनियतो भावाभावयोः, यथा संशयार्थः। न च भावाभावाभ्यां युक्तोऽर्थो जगत्यस्ति।'[5]

वैशेषिकदर्शने—'सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः'[6] इति संशयलक्षणं कृतम्। साधारणधर्मस्य प्रत्यक्षज्ञानाद् विशेषस्यैककोटि-व्याप्यस्याज्ञानात् कोटिद्वयस्य स्मृतेः संशयो भवतीत्यर्थः। प्रशस्तपाद-भाष्यानुसारेण संशयलक्षणं तु तत् व्याख्यानरूपं—'प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनादुभयविशेषानुस्मरणादधर्माच्च किं स्विदित्युभयालम्बी विमर्शः संशय' इत्युक्तम्। तस्य च विभाग उक्तः—'स च द्विविधः—अन्तर्बहिश्च। अन्तस्तावदादेशिकस्य सम्यङ् मिथ्या चोद्दिश्य पुरादिशतस्त्रिषु कालेषु संशयो भवति किन्तु सम्यङ् मिथ्या वेति। बहिर्द्विविधः—प्रत्यक्षविषये चाप्रत्यक्ष-विषये च। तत्राप्रत्यक्षविषये तावत् साधारणलिंगदर्शनादुभयविशेषानु-स्मरणादधर्माच्च संशयो भवति। यथाऽटव्यां विषाणमात्रदर्शनात्—गौर्गवयो वेति। प्रत्यक्षविषयेऽपि स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यदर्शनात्। वक्रादि-विशेषानुपलब्धितः स्थाणुत्वादिसामान्यविशेषानभिव्यक्तावुभयविशेषानुस्मरणा-दुभयत्राकृष्यमाणस्यात्मनः प्रत्ययो दोलायते किन्नु खल्वयं स्थाणु स्यात् पुरुषो वेति।'[7]

नव्या अपि नैयायिकाः स्वमतानुसारेण गौतमसूत्रं व्याख्याय कथयन्ति—

'स संशयो मति र्या स्यादेकत्र भावाभावयोः।
साधारणादिधर्मस्य ज्ञानं संशयकारणम्॥'[8]

तस्य व्याख्यानं सिद्धान्तमुक्तावल्यामुक्तं—'एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः। उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम्।

5 Nyā. bin. tīkā. p. 6 (chow.)
6 Vai. sū. 2.2.17  7 Pra. bhā. p. 412-14 (V S.V.)
8 Bhā. pari. p. 477 (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



यथा—उच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्थाणु र्न वेति सन्दिग्धे। एवमसाधारणधर्मज्ञानं कारणम्। यथा—शब्दत्वस्य नित्यानित्यव्यावृत्तत्वं गृहीत्वा शब्दो नित्यो न वेति सन्दिग्धे। विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणम्, शब्दव्याप्तिज्ञानादीनां निश्चयमात्र-जनकत्वस्वभावात्। किन्तु शब्देन कोटिद्वयज्ञानं जन्यते, संशयस्तु मानस एवेति। एवं ज्ञाने प्रामाण्यसंशयाद्विषयसंशय इति। एवं व्याप्यसंशया-दपि व्यापकसंशय इत्यादिकं बोध्यम्।'[9]

एतदनुसारेण गौतमसूत्रं व्याख्यायोक्तं दिनकरभट्टेनापि—'उपलब्धिः प्रामाण्यम्, अनुपलब्धिः प्रामाण्यविरोधिभ्रमत्वं तयोरव्यवस्थातश्च संशयः। एवं प्रामाण्यसंशयजन्यो भ्रमत्वसंशयजन्यश्च विषयसंशयः।...विशेषापेक्षो विमर्श इति तु लक्षणम्। एकधर्मिकभावाभावप्रकारकत्वरूपविशेषवान् विमर्शो ज्ञानमिति तदर्थः।'[10]

संशयस्तु द्विकोटिक एव। यथा—स्थाणुर्नवेति स्थाणुत्व-स्थाणुत्वाभाव-कोटिकः, अथवा स्थाणुर्वा पुरुषो वेति स्थाणुत्व-पुरुषत्वकोटिकः। अन्येषां मते द्विकोटिकसंशयाप्रसिद्धेः—स्थाणु र्वा पुरुषो वेति संशयश्चतुष्कोटिकः स्थाणुत्व-स्थाणुत्वाभाव-पुरुषत्व-पुरुत्वाभावकोटिक इत्यर्थः।[11]

अद्वैतमतेऽपि—'एकस्मिन् धर्मिणि प्रतिभासमानविरुद्धनानाकोटिकज्ञानं संशयः, एकस्मिन् धर्मिणि स्वाकारविरुद्धधर्मद्वयवैशिष्ट्यावगाहिज्ञानाविरुद्धज्ञानं (वा)संशयः। स च प्रमाणनिश्चयान्निवर्तते।'[12] अत्र चैककोटिकसंशयस्यापि स्वीकारार्थं द्वितीयलक्षणमिति बोध्यम्।

सांख्यमतेन चोक्तं युक्तिदीपिकाकारेण—'सामान्याभिधानं संशयः। तद् यथा—महदादि तच्च कार्यं प्रकृतिविरूपं सरूपञ्च—इत्युक्ते संशयो भवति केन धर्मेण कार्यं प्रकृतिविरूपं केन वा सरूपमिति।'[12a]

---

9 Sid. muk. p. 476-78 (N.S.)

10 Sid. muk. Dinakarī. p. 478-79 (N.S.)

11 Nyāyabodhinī. p. 78 (Benares Harikrisna series).

12 Tattvānu. p. 268 (Asiatic Society).

12a Yuktidīpikā p. 5 (Calcutta Sanskrit Series).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



यद्यप्यनवधारणात्मकत्वात् तदभाववति तत्प्रकारकत्वाच्च संशयोऽयथार्थ एव, तथापि तत्त्वज्ञाने संशयस्य प्रवर्तकत्वात् तस्य ज्ञानं निःश्रेयसाधिगमाय अपेक्षितमुक्तम्।[13] उक्तं च न्यायभाष्ये—'तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते, किन्तर्हि? संशयितेऽर्थे। यथोक्तं—विमृश्य पक्षप्रतिपक्षाभ्यामर्थनिर्णय इति। विमर्शः संशयः।......स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः'[14] इत्यादि।

बौद्धा अप्याहुः—'उक्तेषु त्वप्रमाणकेष्वप्यभिधेयादिषु संशय उत्पद्यते संशयाच्च प्रवर्तन्ते। अर्थसंशयोऽपि हि प्रवृत्त्यंगं प्रेक्षावताम्।'[15]

——o——

SRI AUROBINDO LIBRARY PONDICHERRY (India)

13 Nyā. sū. 1.1.1 14 Nyā. bhā. 1.1.1
15 Nyā. bin. ṭīkā. p. 4 (Chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## विपर्ययनिरूपणम्

वैशेषिकसूत्रे—'इन्द्रियदोषात् संस्कारदोषाच्चाविद्या' इति 'तद्दुष्टं ज्ञानम्'[1] इति च कारणनिरूपणसहितं विपर्ययलक्षणमेव कृतम्। 'अवधारणरूपातत्त्वज्ञानं विपर्ययः'[2] इति विपर्ययलक्षणमुक्तं शिवादित्येन। प्रशस्तपादेन तु विपर्ययस्य विषयविभागेन तस्य कारणोल्लेखपूर्वकं लक्षणमुक्तं—'विपर्ययोऽपि प्रत्यक्षानुमानविषय एव भवति। प्रत्यक्षविषये तावत्—प्रसिद्धानेकविशेषयोः पित्तकफानिलोपहतेन्द्रियस्यायथार्थालोचनादसन्निहितविषयज्ञानजसंस्कारापेक्षादात्ममनसोः संयोगादधर्माच्चातस्मिन् तदिति प्रत्ययो विपर्ययः। यथा गव्येव अश्व इति।'[3] अत्र अतस्मिन् तदिति प्रत्यय इत्येव विपर्ययस्य लक्षणमुक्तम्। दोषोपहतेन्द्रियस्य अयथार्थालोचनात् संस्कारापेक्षात् आत्मनःसंयोगात् अधर्माच्चेत्यादिना विपर्ययस्य कारणान्युक्तानि। पुनश्चाह—'असत्यपि प्रत्यक्षे प्रत्यक्षाभिमानो भवति, यथा व्यपगतघनपटलमचलजलनिधिसदृशमम्बरम्, अंजनचूर्णश्यामं शार्वरं तम इति। अनुमानविषयेऽपि वाष्पादिभिर्धूमाभिमतैर्वह्न्यनुमानम्, गवयदर्शनाच्च(गवयविषाणदर्शनात्—इति न्यायकन्दली) गौरिति।' तत्रैव विपर्ययस्य दृष्टान्तान्तराण्याहुः प्रशस्तपादाः—'शरीरेन्द्रियमनःस्वात्माभिमानः, कृतकेषु नित्यत्वदर्शनम्, कारणवैकल्ये कार्योत्पत्तिज्ञानम्, हितमुपदिशत्स्वहितज्ञान'मित्यादि।[4]

पातंजलयोगसूत्रे 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्'[5] इत्यत्र विपर्ययलक्षणे वाचस्पतिनोक्तं—'यज्ज्ञानप्रतिभासि रूपं तद्रूपाप्रतिष्ठमेवातद्रूपप्रतिष्ठम्। अतः संशयोऽपि संगृहीतः। एतावांस्तु विशेषः—तत्राज्ञानारूढतैवाप्रतिष्ठता, द्विचन्द्रादेस्तु बाधज्ञानेन।...मिथ्याज्ञानमिति—अनेन हि सर्वजनीनानुभवप्रसिद्ध बाधः उक्तः, स चास्ति विपर्यये, न तु विकल्पे, तेन व्यवहारात्।'[6] विज्ञानभिक्षुणाऽपि संशयस्यात्रैवान्तर्भाव उक्तस्तस्य सूत्रे

---

1 Vai. sū. 9.2.10-11.
2 Sap. pad. 122 (C.S.S.)
3 Pra. bhā. p. 423 (V.S.V.)
4 Ibid. p. 426-27 (V.S.V.)
5 Pāt. yo. sū. 1.8.
6 Tat. vai. 1.8.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पृथग्वृत्तिरूपेणानुल्लेखात्। उक्तं च—'अत्र च शास्त्रे अन्यथाख्यातिः सिद्धान्तो न तु सांख्यवदविवेकमात्रम्। अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येत्यागामिसूत्रात्। वैशेशिकाच्चात्रायं विशेषो यद्बाह्यरजतादेर्नारोपः किन्त्वान्तरस्यैव।'[7]

सांख्यास्त्वाहुः—'विपर्ययस्त्वस्माकं विवेकाग्रह एव। अन्यथाख्यातेर्निरास्यत्वात्।'[8] सूत्रमपि—'नान्यथाख्यातिः स्ववचोव्याघातात्'[9] इत्यख्यातिरेव सांख्याभिमता। 'सदसत्ख्याति र्बाधाबाधात्'[9] इति सूत्राद् सदसत्ख्यातिरेव सांख्यसिद्धान्त इति केषांचित् मतम्।

केशवमिश्रेण नव्यनैयायिकमतानुसारिणोक्तं—'विपर्ययस्तु अतस्मिंस्तद्ग्रहः, भ्रम इति यावत्।'[10] तदभाववति तत्प्रकारकं ज्ञानमवधारणरूमेव भ्रम इत्यर्थः।

जैनमतेऽपि—'विपर्ययः पुनरतस्मिंस्तदिति विकल्प'[11] इत्युक्त्या कथंचिदन्यथाख्यातिरेवायाति।

ननु प्रत्यक्षे विषयसत्तानियमात् प्रत्यक्षभ्रमे कथं रज्ज्वादौ सर्पत्वस्य भानम्, विपर्ययकाले तस्यासन्निहितत्वादिति चेन्न। ज्ञानलक्षणालौकिकसन्निकर्षबलेन देशान्तरीयरजतत्वस्यैव तत्र ज्ञाने भानमिति तार्किकाः। एषैवान्यथाख्यातिरित्युच्यते।

भाट्टा अपि तार्किकवदन्यथाख्यातिवादिन एव। प्राभाकरमते तु भ्रमव्यवहारे ज्ञानद्वयं पुरोवर्तिनः शुक्त्यादेर्प्रत्यक्षात्मकं रजतस्य तु च स्मरणं न तु प्रत्यक्षेण भानम्। ग्रहणस्मरणरूपयोर्ज्ञानयोर्विषययोश्च विवेकाग्रहनिबन्धनो भ्रमस्तु नायथार्थः।

बौद्धानां विज्ञानवादिमते ज्ञानाकारस्यैवान्तरस्य रजतत्वस्य पुरोवर्तितया कल्पिते (शुक्त्यादौ) आरोप आत्मख्यातिरूपः। शून्यवादिमते त्वत्यन्तासत एव रजतत्वादेर्भानं संवृतिकृतमसत्ख्यातिरूपम्।

---

7 Yo. Vār. 1.8.

8 Sā. pra. bhā. 2.33

9 Sā. sū. 5.56.

10 Tark. bhā. p. 189 (chow.).

11 Pra. rat. mā. 6.2.

12 Bṛ. sū. Rā. bhā. p. 161 ; 163 (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



रामानुजादिमते विपरीतख्यातिः, यथार्थं सर्वविज्ञानमित्यादिरीत्या सत्ख्याति र्वा समर्थिता ।[12] शुक्तौ पंचीकरणन्यायेन रजतांशस्यापि सद्भावेन शुक्तिरजतज्ञानं यथार्थमेव, दोषवशात्तु शुक्त्यंशप्राकट्याग्रहात् रजतार्थिनः प्रवृत्ति र्भ्रम इति सत्ख्यातिवादाख्यं रामानुजमतमुक्तम् ।

वल्लभाचार्यमते तु बुद्धिनिर्माणरजतस्यैव पुरोवर्तिनि भानादन्यथाख्यातिरेव ।

सादृश्यदर्शनसमुद्बोधितरजतसंस्कारसहकृतेन इन्द्रियादिदोषेणाज्ञानस्यैव परिणामविशेषरूपस्यानिर्वचनीयस्य रजतत्वादेर्भानमित्यद्वैतवेदान्तिनामनिर्वचनीयख्यातिः । पूर्वं रजतादेस्तत्राभावेन सम्बन्धायोगात् न विषयसम्बन्धादन्तःकरणपरिणामः सम्भवति, अपि तु अज्ञानस्यैव रजताद्याकारेण तदाकारज्ञानाकारेण च परिणाम इति दिक् ।

एते ख्यातिवादाः परिच्छेदान्तरे विस्तारेणालोचयिष्यन्ते ।

सर्वथापि विशेषदर्शनेनाधिष्ठानसाक्षात्कारे सति निवर्तते भ्रम इति बोध्यम् । तिक्तो गुडः पीतः शंख इत्यादि सोपाधिकभ्रमस्थले अधिष्ठानशंखसाक्षात्कारेऽपि पित्तादिदोषाविगमे न निवर्तते भ्रमः । दोषविगमे श्वेतत्वरूपविशेषदर्शनेन तु निवर्तते इति भावः ।

अद्वैतवेदान्तमते सत्यानृते मिथुनीकृत्य सत्ये अधिष्ठाने अनिर्वचनीयस्याध्यास एव विपर्ययः । स च द्विविधः—अर्थाध्यासो ज्ञानाध्यासश्च ।[13] अर्थाध्यासो यथा—रज्ज्वां सर्प इति । ज्ञानाध्यासो यथा—रज्ज्वां सर्पज्ञानम् । प्रथम आरोपितोऽर्थः, द्वितीयस्तु अर्थस्य आरोप इति भेदः । अविद्यापरिणामत्वादुभयमेवानिर्वचनीयम् । प्रकारान्तरेणापि द्विविधः—धर्मिविपर्ययो धर्मविपर्ययश्च ।[14] प्रथमो यथा—रज्ज्वां सर्पज्ञानम्, द्वितीयो यथा—अहं वधिर इत्यादावात्मनि वाधिर्यज्ञानम् । उक्तं च 'स्मृतिरूपः परत्र पूर्वदृष्टाव-

12 Br. sū. Rā. bhā. p. 161, 163 (N.S.)

13 Viv.pra.saṃ. (vide) p. 91 (A.G.M.); Tattvānu.p. 227-29 (A.S.)

14 Bhāmatī 1.1.1



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



भास' इति भाष्यकृदुक्तलक्षणव्याख्यानावसरे विद्यारण्येन—यदा ज्ञानविशिष्टो-ऽर्थ एवाध्यासस्तदा-स्मर्यमानसदृशोऽन्यात्मनाऽवभासमानोऽन्योऽर्थोऽध्यासः—इत्येवं लक्षणपरतया वाक्यं योजितम्, यदा पुनरर्थविशिष्टं ज्ञानमेवाध्यास-स्तदा—स्मृतिसमानोऽन्यस्यान्यात्मनाऽवभासोऽध्यास—इत्येवं लक्षणपरतयाऽपि तदेव वाक्यं योजयितुं शक्यते।[15]

उक्तं च महादेवसरस्वत्या तत्त्वानुसन्धाने—'विसंवाद्ययथार्थनिश्चयः। सोऽपि द्विविधः—सोपाधिको निरुपाधिकश्चेति।...सोपाधिको द्विविधः—बाह्य आभ्यन्तरश्चेति। लोहितस्फटिक इत्यादि बाह्यः।...कर्तृत्वादिभ्रम आन्तरः। स्वप्नोऽप्याभ्यन्तरः सोपाधिकभ्रम एव, न तु स्मृतिः।'[16]

भ्रमस्वप्नादीनां पृथक्परिच्छेदे विस्तारेणालोचनीयत्वादत्र संक्षेपतो दिक्-प्रदर्शनम्।

——०——

15 Viv. pra. sāṃ. (vide) p. 91 (A.G.M.)

16 Tattvānu. p. 288-90 (A.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## तर्कनिरूपणम्

नैयायिकैरयथार्थानुभवनिरूपणे तर्कस्य विपर्ययात् पृथक् परिगणनं निरूपणं च कृतम्, तस्याहार्यज्ञानरूपत्वात् प्रमाणानुग्राहकत्वाच्च। आहार्यज्ञानं हि—वह्नि र्न स्यात् तदा धूमोऽपि न स्यादिति। प्रमाणानुग्राहकत्वं च व्यभिचारशंकानिवर्तकत्वेन। यथोक्तम्—

'व्यभिचारस्याग्रहो सहचारग्रहस्तथा।
हेतुर्व्याप्तिग्रहे, तर्कः क्वचिच्छंकानिवर्तकः॥'[1]

उक्तं च सिद्धान्तमुक्तावल्यां—'यत्र तु भूयोदर्शनादपि शंका नापैति तत्र विपक्षे बाधकस्तर्कोऽप्यपेक्षितः। तथाहि—वह्निविरहिण्यपि धुमः स्यादिति यद्याशंका भवति तदा सा वह्निधूमयोः कार्य-कारणभावस्य प्रतिसन्धानान्निवर्तते—यद्ययं वह्निमान् न स्यात् तदा धूमवान् न स्यात्, कारणं विना कार्यानुत्पत्तेः।…यत्र तु स्वत एव शंका नावतरति तत्र न तर्कापेक्षाऽपीति तदिदमुक्तं—तर्कः क्वचिच्छंका निवर्तक इति।'[2]

केशवमिश्रेणाप्युक्तं—'स ( अयथार्थः ) त्रिविधः—संशयस्तर्को विपर्ययश्च।'[3] तल्लक्षणमप्युक्तं—'तर्कोऽनिष्टप्रसंगः। स च सिद्धव्याप्तिकयोर्धर्मयोर्व्याप्यांगीकारेण अनिष्टव्यापकप्रसंजनरूपः। यथा—यद्यत्र घटोऽभविष्यत् तर्हि भूतलमिवाद्राक्ष्यतेति। स चायं तर्कः प्रमाणानामनुग्राहकः।'[4] अन्नंभट्टेनापि तथैवायथार्थानुभवस्य त्रिविधत्वमुक्तं तर्कान्तभावेन।[5] अन्यच्च—'तर्के व्याप्यस्य व्यापकस्य च बाधनिश्चयः कारणम्, अन्यथा बाधनिश्चयाभावे इष्टापत्तिदोषेण तर्कानुत्पत्तेरिति।'[6]

गौतमेनापि न्यायसूत्रे तर्कस्तत्त्वज्ञानविषयषोडशपदार्थानां मध्ये परिगणितः। तर्कस्य सामान्यतः प्रमेयपदार्थान्तर्गतत्वेऽपि माहात्म्यविशेषात्

1 Bhā. pari. p. 489 (N.S.)
2 Sid. mūk. p. 490 (N.S.)
3 Tark. bhā. p. 189 (Chow)
4 Ibid p. 201
5 Tark. saṃ. p. 78 ( Banares Harikrishna Series)
6 Nyāyabodhinī, p. 79 (B.H.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पृथगुल्लेख इति वात्स्यायनेनोक्तम्। यथा—'एतस्मिंस्तर्क विषये—कर्मनिमित्तं जन्मेति—प्रमाणानि वर्तमानानि तर्केणानुगृह्यन्ते; तत्त्वज्ञानविषयस्य विभागात् तत्त्वज्ञानाय कल्प्यते तर्क इति। सोऽयमित्थम्भूतस्तर्कः प्रमाणसहितो वादे साधनायोपालम्भाय वाऽर्थस्य भवतीत्येवमर्थं पृथगुच्यते प्रमेयान्तर्भूतोऽपीति।'[7] तत्रैव चोक्तं—'तर्को न प्रमाणसंगृहीतः, न प्रमाणान्तरम्, प्रमाणानामनुग्राहकस्तत्त्वज्ञानाय कल्प्यते। ...एवमविज्ञातेऽर्थे कारणोपपत्त्या ऊहः प्रवर्तते इत्यादि।'[7a]

तर्कस्य लक्षणमप्युक्तं—'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः।'[7b] वात्स्यायनेन चास्य विस्तृतं व्याख्यानं कृतम्। यथा—'अविज्ञायमानतत्त्वेऽर्थे जिज्ञासा तावद् जायते - जानीयेममर्थमिति। अथ जिज्ञासितस्य वस्तुनो व्याहतौ धर्मौ विभागेन विमृशति, किंस्विदित्थम्? आहोस्विन्नेत्थम्? इति विमृश्यमानयोर्धर्मयोरेकं कारणोपपत्त्याऽनुजानाति, सम्भवत्यस्मिन् कारणं प्रमाणं हेतुरिति। कारणोपपत्त्या स्यादेवमेतन्नेतरदिति। ...विमृश्यमानेऽविज्ञाततत्त्वेऽर्थे यस्य धर्मस्याभ्यनुज्ञाकारणमुपपद्यते तमनुजानाति। ...यत्र कारणमनुपपद्यमानं पश्यति तन्नानुजानाति। सोऽयमेवंलक्षण ऊहस्तर्क इत्युच्यते।

कथं पुनरयं तत्त्वज्ञानार्थः, न तत्त्वज्ञानमेव? अनवधारणात्। अनुजानात्ययमेकतरं धर्मं कारणोपपत्त्या, न त्ववधारयति, न व्यवस्यति, न निश्चिनोति एवमेवेदमिति।'[8] तादृशनिश्चये तु स निर्णयपदार्थ एव भवति, न तर्क इति बोध्यम्। संशयानन्तरं निर्णयाच्च पूर्वमन्तरा जायमान ऊह एव तर्कः।

अस्यैव सूत्रस्य निष्कृष्टार्थमाह विश्वनाथो नव्यनैयायिकरीत्या—'अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति प्रयोजनकथनम्। कारणं व्याप्यम्, तस्योपपत्तिरारोपस्तस्मात्, ऊह आरोप अर्थात् व्यापकस्य। तथा च व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्याहार्यारोपाद् य व्यापकस्याहार्यारोपः स तर्कः।'[9]

---

7 Nyā. sū. bhā. 1.1.1
7a Ibid 1.1.1
7b Nyā. sū. 1.1.40
8 Nyā. sū. bhā. 1.1.40
9 Nyā. sū. vṛ, 1.1.40

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



यथा—वह्न्यभावस्य व्यापको धूमाभावः, तस्य व्यापकस्याभाववत्त्वेन धुमवत्त्वेन निर्णीते पर्वतादौ व्याप्यस्य वह्न्यभावस्याहार्यारोपात्—यदि वह्निर्न स्यादित्याकारात्, व्यापकस्य धूमाभावस्याहार्यारोपः—तर्हि धूमोऽपि न स्यादित्याकारः—स एव तर्क इत्यर्थः। पुनश्चाह विश्वनाथः—'तर्कः किं स्वत एव निर्णायकः परम्परया वा? इत्यत आह—कारणेति। कारणस्य व्याप्तिज्ञानादेरुपपादनद्वारेत्यर्थः। तथा धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यात्—इत्यनेन व्यभिचारशंकानिरासे निरंकुशेन व्याप्तिज्ञानेनानुमितिरिति। ···स चायं पंचविधः, आत्माश्रयान्योन्याश्रयचक्रकानवस्थातदन्यबाधितार्थप्रसंगभेदात्।'[10] तत्रात्माश्रयादिघटितस्तर्कः प्रसिद्ध एव। 'तदन्यबाधितार्थप्रसंगस्तु—धूमो यदि वह्निव्यभिचारी स्यात्, वह्निजन्यो न स्यादित्यादि। प्रथमोपस्थितत्वोत्सर्ग-विनिगमनाविरह-लाघव-गौरवादिकन्तु प्रसंगानात्मकत्वान्न तर्कः, किन्तु प्रमाणसहकारित्वरूपसाधर्म्यात् तथा व्यवहार इति संक्षेपः।'[11]

केचित्तु तर्कस्य स्वीकारेऽपि तस्यानवधारणरूपत्वात् संशयेऽन्तर्भावमाहुः। तथा चोक्तं शिवादित्येन—'अनिष्टव्यापकप्रसंजनं तर्कः।'[12] 'तर्कस्वप्नौ संशयविपर्ययावेव।'[13] उक्तं च सप्तपदार्थीटीकायां माधवसरस्वत्या—'तर्कस्तावत् संशय एव, यद्यनग्निस्तर्हिनिर्धूम इत्यत्र यद्यालिंगितत्वेनाग्निमत्त्वे धूमवत्त्वं सम्भवतीत्यपि प्रतीयते, अतोऽस्तित्वनास्तित्वकोटिद्वयविषयत्वस्य स्पष्टत्वात्।'[14] उक्तं च तेनैवान्यत्र—'व्याप्यारोपे व्यापकारोपस्तर्कः।...स च स्वातन्त्र्येणार्थानिश्चायकत्वात् संशय एव। प्रमाणानुग्राहकश्च भवति।'[15]

वैशेषिकदर्शने यद्यपि तर्कस्याविद्यायां पृथक् परिगणनं न कृतं तथापि (श्रीधरमते) तेषां तर्कः स्वीकृत एव। अतएव सूत्रे भाष्ये च (प्रशस्तपादकृते) तर्कस्यानुल्लेखेऽपि न्यायकन्दल्यां श्रीधरेणोक्तं—'नन्वविद्या चतुर्विधेति परिसंख्यानानुपपत्तिः, ऊहस्य तर्कज्ञानस्यापि सम्भवात्। अनुभूयते

---

10 Ibid 1.1.40

11 Ibid 1.1.40

12 Sap. pad. 136 (C.S.S.)

13 Ibid 28 (C.S.S.)

14 Sap. pad. ṭikā 28 (C.S.S.)

15 Sar. dar. kau. p. 33 (Trivandrum)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



ह्यन्तरा संशयं निर्णयं च तर्कः। तथा हि—उत्पत्तिधर्मक आत्मेत्येके। अनुत्पत्तिधर्मक इत्यपरे। ततो......संशये विचारात्मकस्तर्कः प्रवर्तते। ...अनुत्पत्तिधर्मके तु ज्ञातरि स्यातां संसारापवर्गावित्यनुत्पत्तिधर्मकेनानेन भवितव्यमिति। किमस्य सम्भावनाप्रत्ययस्य प्रयोजनम्? तत्त्वज्ञानमेव; ...इति विषयविवेचनद्वारेण प्रमाणानुग्राहकतया तर्कस्तत्त्वज्ञानाय घटते,...। यदि पुनरेवं तर्को नेष्यते परस्यानिष्टापादनरूपः प्रसंगोऽपि नाभ्युपगन्तव्यः स्यात्। स हि तर्कादनतिरिच्यमानात्मा, अस्ति च वैशेषिकानामपि प्रसंगः।'[16] एवं प्रसंगाभ्युपगमादेव तर्कोऽपि वैशेषिकाणां प्रकारान्तरेण स्वीकृत एवेति श्रीधरमतम्।

वस्तुतस्तु पृथगुल्लेखो न वा विपक्षे बाधकप्रसंजनरूपस्तर्कः सर्वेषामेवाभिप्रेतः। तस्य च संशयोत्तरविचाररूपत्वान्मनोवृत्तिनिरूपणे निरूपणं सुसंगतमेव।

अद्वैतिभिरपि श्रुत्यादिप्रमाणानुग्राहकत्वेन तर्कोऽपेक्षितः। उक्तं च—'अयं सर्वोऽपि संशयो मननेन तर्कात्मकेन निवर्तते। तर्को नामानिष्टप्रसंगः। व्याप्यारोपेण व्यापकोपादानमिति यावत्। ...यदि परमात्मा जीवभिन्नः स्यात् तर्हि घटादिवदनात्मत्वेनानित्य एव स्यात्। यद्यानन्दो न स्यात् तर्हि कोऽपि न व्याम्रियेतेत्यादिव्याप्यारोपेण व्यापकप्रसंजनरूपास्तर्काः श्रुत्युक्ता द्रष्टव्याः।'[17]

——०——

16 Nyā. kan. p. 415-16 (V.S.V.)

17 Tattvānu. p. 279-86 (A.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## अनध्यवसायनिरूपणम्

वैशेषिकमते अविद्याख्यस्यायथार्थानुभवस्य संशय-विपर्ययानध्यवसाय-स्वप्नभेदेन चातुर्विध्याद् अनध्यवसायोऽपि निरूप्यते। तथा हि—'अनालिंगितोभयकोट्यनवधारणज्ञानमनध्यवसाय'[1] इति शिवादित्येन लक्षणं कृतम्। आलिंगितोभयकोटित्वात् संशयस्य संशयादस्य भेदः। उक्तं च माधवसरस्वत्या—'अनध्यवसायस्तु किंसंज्ञकोऽयमिति संज्ञाविशेषजिज्ञासारूपः। न चायं संशय एव, कोटिद्वयापरामर्शात्'[2] इति वैशेषिकमतमेव।

उक्तं च प्रशस्तपादेन—'अनध्यवसायोऽपि प्रत्यक्षानुमानविषये एव संजायते। तत्र प्रत्यक्षविषये तावत् प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा व्यासंगाद् अर्थित्वाद्वा किमित्यालोचनमात्रमनध्यवसायः। यथा वाहीकस्य पनसादिष्वनध्यवसायो भवति। तत्र सत्ता-द्रव्यत्व-पृथिवीत्व-रूपवत्त्वादिशाखाद्यपेक्षोऽध्यवसायो भवति। पनसत्वमपि पनसेष्वनुवृत्तमाम्रादिभ्यो व्यावृत्तं प्रत्यक्षमेव, केवलं तूपदेशाभावाद् विशेषसंज्ञाप्रतिपत्तिर्न भवति। अनुमानविषयेऽपि—नारिकेलद्वीपवासिनः सास्नामात्रदर्शनात् को नु खल्वयं प्राणी स्यादित्यनध्यवसायो भवति इत्यादि।'[3]

न्यायकन्दलीकारश्च तद्व्याख्यानमाह—'येऽर्थाः पूर्वं ज्ञातास्तेषु व्यासंगादन्यत्रासक्तचित्तत्वाद् विशेषप्रतीत्यर्थित्वाद् वा किमित्यालोचनमात्रम्। गते प्रसिद्धे राजनि कोऽप्यनेन पथा गत इति ज्ञानमात्रमनवधारितविशेषमनध्यवसायः। अप्रसिद्धेष्वपरिज्ञानादेवानध्यवसायो यथा वाहीकस्य पनसादिष्वनध्यवसायो भवति।'[4] पुनश्च—नन्वयं संशय एवानवधारणात्मकत्वात्; न, कारणभेदात् स्वरूपभेदाच्च। किं च, उभयविशेषानुस्मरणात् संशयो न त्वनध्यवसायः, प्रतीतिविशेषविषयत्वेनाप्यस्य सम्भवात्। तथाऽनवस्थितोभय-

---

1 Sap. pad. 140 (C.S.S.)

2 Sar. dar. kau. p. 39 (Trivandrum)

3 Pra. bhā. p. 434-35 (V.S.V.)

4 Nyā. kan. p. 434-35 (V S.V.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



कोटिसंस्पर्शी संशयो न त्वयमिति भेदः। विद्या त्वयं न भवति व्यवहारानंगत्वादिति।'[5]

नव्यमते त्वनध्यवसायस्यायथार्थज्ञाने न पृथक्तया परिगणनं कृतं तस्य कथंचित् संशये एवान्तर्भावसम्भवात्। तथाचोक्तं माधवसरस्वत्यैव सप्तपदार्थीटीकायां—'ननु तथापि वाह्यालीप्रदेशे पुरुषेणानेन भवितव्यमित्यूहज्ञानम्, किंसंज्ञकोऽयमित्यनध्यवसायज्ञानम्। अनयोः कुतो नोद्देश इत्यत आह—ऊहेति। अन्तर्भाव इति शेषः। ऊहे पुरुषेण भवितव्यमित्यत्र न भवितव्यमित्यपि कोटिः स्फुरतीति संशयत्वं व्यक्तमेव। किंसंज्ञकोऽयं इत्यत्रापि चूतः पनसो वेति विकल्पस्फुरणादनध्यवसायोऽपि संशय एवेत्यर्थः।'[6]

मिथ्याज्ञानविशेषत्वेनानध्यवसायो जैनानामपि सम्मतः। उक्तं च—'मिथ्यादर्शनेन सहचरितं ज्ञानं संशयविपर्ययानध्यवसायात्मकत्वेन मिथ्या भवति।'[7]

रामानुजमते तु पुरः किंसंज्ञकोऽयं वृक्ष इत्यनध्यवसायो ज्ञानं संशय उक्तः।'[8] तस्यापि प्रत्यक्षेऽन्तर्भावः।

—·—o—·—

5 Ibid p. 436-37

6 Sap. pad. ṭīkā 31 (C.S.S.)

7 Tat. vṛ. 1.31

8 Yat. mat. dīp. p. 8 (A.A.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## ऊहनिरूपणम्

जैनमते ऊहस्य प्रामाण्यमुक्तम्। महानसादौ वह्निधूमयोः सामानाधिकरण्यदर्शनेन सकलवह्निधूमविषयकं यद् व्याप्तिज्ञानं जायते तदूह एव। तथा चोक्तं भास्करनन्दिना—'चिन्तनं चिन्ता। देशान्तरे कालान्तरे च यावान् कश्चिद्धूमः स सर्वोऽप्यग्निजन्मा अनग्निजन्मा वा न भवतीति व्याप्तिग्रहणमूहाख्यं सम्यग्ज्ञानं कथ्यते'[1] इत्यादि। उक्तं च माणिक्यनन्दिना—'उपलम्भानुपलम्भनिमित्तं व्याप्तिज्ञानमूहः।'[2] तद्व्याख्यानं च प्रमेयकमलमार्तण्डे—'उपलम्भानुपलम्भौ साध्यसाधनयोर्यथाक्षयोपशमं सकृत् पुनः पुनर्वा दृढतरं निश्चयानिश्चयौ, न भूयोदर्शनादर्शने। तेनातीन्द्रियसाध्यसाधनयोरागमानुमाननिश्चयानिश्चयहेतुकसम्बन्धबोधस्यापि संग्रहान्नाव्याप्तिः। यथा—अस्त्यस्य प्राणिनो धर्मविशेषो विशिष्टसुखादिसद्भावान्यथानुपपत्तेरित्यादौ। ···तौ (निश्चयानिश्चयौ) निमित्तं यस्य व्याप्तिज्ञानस्य तत्तथोक्तम्। व्याप्तिः साध्यसाधनयोरविनाभावः, तस्य ज्ञानमूहः।'[3]

ऊहस्य तादृशं स्वरूपं प्रामाण्यं च नैयायिकवैशेषिकादिभिर्न स्वीक्रियते। तथाचोक्तं शिवादित्येन—'उत्कटैककोटिकसंशय ऊहः इति।'[4] उक्तं च माधवसरस्वत्या सर्वदर्शनकौमुद्यां—'ऊहतर्कौ संशय एवान्तर्भूतौ। यथा वीथ्यां पुरुषेणानेन भवितव्यमित्यूहः। स चानवधारणरूपत्वात् संशय एव।'[5]

रामानुजमते संशयस्यापि प्रत्यक्षेऽन्तर्भूतत्वात्, ऊहस्य च उत्कटैककोटिकसम्भावनारूपत्वात् ऊहस्यापि प्रत्यक्षेऽन्तर्भावः। तन्मते प्रत्यक्षभ्रमादीनामपि यथार्थत्वात् ऊहस्यापि यथार्थत्वमक्षुण्णमेव। तथाचोक्तं—'प्रायः पुरुषेणानेन भवितव्यमेतदूहः। पुरः किंसंज्ञकोऽयं वृक्ष इत्यनध्यवसायो ज्ञानं संशय उक्तः। एतयोरपि प्रत्यक्षेऽन्तर्भावः।'[6]

—o—

1 Tattvā. vṛ. 1.13
2 Pari. mu. sū. 3.11
3 Pra. ka. mār. 3.11
4 Sap. pad. 140 (C.S.S.)
5 Sar. dar. saṃ. p. 32-33 (Trivandrum)
6 Yat. mat. dīp. p. 8 (A.A.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## विकल्पनिरूपणम्

पातंजलयोगसूत्रे—'प्रमाण-विपर्यय-विकल्प निद्रा-स्मृतयः'[1] इति चित्त-वृत्तीनां पञ्चविधत्वकथनात् विकल्पोऽपि विपर्ययवत् तद्भिन्नोऽन्तःकरणवृत्ति-विशेष इति पातंजलसिद्धान्तः। तल्लक्षणं चोक्तं—'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः इति।'[2] उक्तं च व्यासभाष्ये—'स न प्रमाणोपारोही, न विपर्ययोपारोही च, वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्यनिवन्धनो व्यवहारो दृश्यते—तद् यथा चैतन्यं पुरुषस्य स्वरूपमिति, यदा चितिरेव पुरुषस्तदा किमत्र केन व्यपदिश्यते ? ...तस्माद् विकल्पितः स धर्मस्तेन चास्ति व्यवहार इति।'[3] एवं च विकल्पस्य प्रमाणविपर्ययविलक्षणत्वात् पृथग्वृत्तिरूपेण कथनम्।

उक्तं च योगवार्तिके—'माहात्म्यं याथार्थ्यम्, तथा च यथार्थशब्देन यथार्थज्ञानेन च यादृशो व्यवहारो भवति शब्दज्ञानरूपस्तादृश एव व्यवहारो विकल्पादपि दृश्यते विवेकिनामपीत्यर्थः। विपर्ययस्तु नैवम्, वाधोत्तरमिदं रजतमिति शब्दप्रत्यययोरभावादिति।'[4] पुनश्चोक्तं—'एवं खपुष्प-शशशृंग-प्रत्यया अपि विकल्पमध्ये प्रवेशनीयाः, खपुष्पं नास्तीति प्रत्ययानुरोधेन तादृशप्रत्ययसिद्धेः।'[5]

विपर्ययातिरिक्तपृथग्वृत्तिरूपेणानङ्गीकारेऽपि वस्तुशून्यस्तादृशो विकल्पः सर्वेषामेवाभिमतः। तार्किका अपि शशशृंगमप्रसिद्धमित्यादिव्यवहारानुरोधेन तादृशप्रत्ययं आहार्यशाब्दभ्रमरूपं स्वीकुर्वन्ति। स च प्रत्ययः शशीयत्वाभाववति शृङ्गे शशीयत्वप्रकारकत्वाद् विपर्यय एव। व्यवहारार्थमिच्छाप्रयोज्यत्वाच्चाहार्यज्ञानरूपः। उक्तं च वार्तिके—विकल्पप्रत्ययास्तु वैशेषिकैराहार्यज्ञानविशेषतया एष्टव्या एव, विशेषस्तु तैर्मिथ्याज्ञानमध्ये प्रवेश्यन्ते, अस्माभिस्तु ...पृथङ्निर्दिश्यन्त इति।'[6]

संशयात्मकविकल्पस्तु सांख्यसूत्रवृत्तिकारादिभिः विपर्ययमध्ये प्रवेशितः। उक्तं च—'विकल्प उभयस्पृक्ज्ञानम्।'[7] उभयस्पृक्ज्ञानं हि अयथार्थरूपत्वाद् विपर्यय एव। तन्मते संशयस्यापि विपर्ययत्वात्। कल्पनारूपविकल्पोऽपि वैदान्तिकादिसम्मतो विपर्ययविशेष एव।

——o——

1 Pāt. yo. sū. 1.6
2 Ibid 1.9
3 Yo. sū. bhā. 1.9
4 Yo. vār. 1.9
5 Ibid 1.9
6 Ibid 1.9
7 Sā. sū. vṛtti. 2.33

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## स्मृतिनिरूपणम्

'आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृति'[1]रिति वैशेषिकसूत्रम्। ज्ञानमात्रं प्रत्येवात्ममनःसंयोगविशेषस्य हेतुत्वात् तस्मात् संस्काररूपासाधारण-कारणाच्च स्मृतिर्भवति। तथैवोक्तं—'भावनाऽसाधारणकारणज्ञानं स्मृतिः।'[2] भावना हि संस्कार एव। स चानुभवजन्यः स्मृतिहेतुरन्तःकरणधर्मस्तार्किकादिमतेषु आत्मविशेषगुणो वा।

गौतमीयन्यायसूत्रे समानतन्त्रन्यायेन वैशेषिकस्मृतिलक्षणस्यैवाभ्युपगमात् यद्यपि पृथक् तल्लक्षणं न कृतं तथापि वौद्धैर्यत् क्षणिकविज्ञानप्रवाहस्यैव निरात्मकस्य स्मरणमुच्यते तत्खण्डनरूपेणोक्तं—'स्मरणन्त्वात्मनो ज्ञस्वाभाव्यात्।'[3] 'आत्मन एव स्मरणं न बुद्धिसन्ततिमात्रस्येति। ...अयं खलु ज्ञास्यति, जानाति, अज्ञासीदिति त्रिकालविषयेणानेकेन ज्ञानेन सम्बध्यते,......यत् यस्यायं स्वो धर्मस्तस्य स्मरणं न बुद्धिप्रबन्धमात्रस्य निरात्मकस्येति।'[4] तत्स्वरूपमप्युक्तं वात्स्यायनेन—'स्मरणं च खलु पूर्वज्ञातस्य समानेन ज्ञात्रा ग्रहणम्, अज्ञासिषममुमर्थं ज्ञेयमिति, सोऽयमेको ज्ञाता पूर्वज्ञातमर्थं गृह्णाति, तस्यास्य ग्रहणं स्मरणमिति।'[5] अन्यत्र च स्मरणस्य संस्कारजन्यत्वमाह—'यथा खल्वात्ममनसोः सन्निकर्षः संस्कारश्च स्मृतिहेतुरेवं प्रणिधानं लिंगादिज्ञानानि'[6] इत्यादि।

गौतमसूत्रे स्मृतीनां वहुविधान् हेतूनुद्बोधकांश्चोल्लिख्य विचित्रानि निदर्शनानि प्रपञ्चितानि। तानि च सर्ववादिसम्मतत्वादुल्लिख्यन्ते। यथोक्तं—'प्रणिधान-निवन्धाभ्यास-लिंग-लक्षण-सादृश्य-परिग्रहाश्रयाश्रित-सम्वन्धानन्तर्य-वियोगैककार्य-विरोधातिशय-प्राप्ति-व्यवधान-सुख दुःखेच्छा-द्वेष-भयार्थित्व-क्रिया-राग-धर्माधर्मनिमित्तेभ्यः'[7] इति। अत्र (१) प्रणिधानं मनसो विषयान्तर-

---

1 Vai. sū. 9.2.6

2 Sap. pad. 121 (C.S.S.)

3 Nyā, sū. 3.2.43

4 Nyā. sū. bhā. 3.2.43

5 Ibid. 3.2.42

6 Ibid. 3.2.34

7 Nyā. sū. 3.2.44

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



संचारवारणं तदर्थस्मृतिकारणम्। (२) निबन्ध एकग्रन्थोपनिबन्धनम्, यथा प्रमाणेन प्रमेयादिस्मरणम्। (३) अभ्यासः संस्कारबाहुल्यम्, एतस्य यद्यपि नोद्बोधकत्वं तथापि तादृशे शीघ्रमुद्बोधकसमवधानं भवति। अथवा, अभ्यासो दृढतरसंस्कारस्तस्य चोद्बोधकत्वमेवेति केचित्। (४) लिंगं व्याप्यं व्यापकस्य स्मारकं भवति। (५) लक्षणं कपिध्वजादि अर्जुनादेः स्मारकम्। (७) परिग्रहः स्वस्वामिभावः, स्वेन वा स्वामी, स्वामिना वा स्वं स्मर्यते। (८) आश्रयाश्रितो राजादितत्परिजनौ परस्परस्मारकौ। (९) सम्बन्धो गुरुशिष्यभावादिः। (१०) आनन्तर्यं—यथा प्रोक्षणमवघातस्य स्मारकम्। (११) वियोगो दारादेः स्मारकः। (१२) एककार्यात् कर्त्रन्तरदर्शनात् कर्त्रन्तरे स्मृतिर्भवति। (१३) विरोधादहिनकुलादेरन्यतरेणापरस्मरणम्। (१४) अतिशयः संस्कार उपनयनादिराचार्यादेः स्मारकः। (१५) प्राप्तिर्धनादेर्दातारं स्मारयति। (१६) व्यवधानमावरणम्, कोषादि खड्गादेः। (१७, १८) सुखदुःखाभ्यां तद्धेतुः स्मर्यते। (१९, २०) इच्छाद्वेषाभ्यां यमिच्छति यं च द्वेष्टि तं स्मरति। (२१) भयं तद्धेतोः स्मारकम्। (२२) अर्थित्वं दातुः। (२३) क्रिया—यथा रथेन रथकारः स्मर्यते। (२४) रागः पुत्रादेः स्मारकः। (२५, २६) धर्माधर्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूतसुखादेश्च स्मरणम्। हेतुविभागश्चायमतीव स्थूलः। उक्तं च भाष्यकारेण—'निदर्शनं स्मृतिहेतूनां न परिसंख्यान'[8]मिति। वस्तुतस्तु एकसम्बन्धिज्ञानं सम्बन्ध्यन्तरस्य स्मारकमित्यनेनैव तेषां बहूनां निदर्शनानां संग्रहः सम्भवति। रागद्वेषभयादीनां स्मारकत्वन्तु प्रसिद्धमेव।

एवं प्रशस्तपादभाष्येऽपि — 'लिंगदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पट्वभ्यासादादरप्रत्ययजनिताच्च संस्काराद् दृष्टश्रुतानुभूतेष्वर्थेषु शेषानुव्यवसायेच्छानुस्मरणद्वेषहेतुरतीतविषया स्मृतिरिति'[9] लक्षणं कृतम्। आत्ममनसोः संयोगविशेषात् संस्कारात् अतीतविषया स्मृतिरित्येवंरूपस्य लक्षणस्यैव कारणकार्योल्लेखेन विस्तारः कृतो लिंगदर्शनेत्यादिना। उक्तं च श्रीधरेण—'स्मृतिलक्षणामविद्यामाचष्टे—लिंगदर्शनेच्छेत्यादिना! ......आदिशब्देन न्यायसूत्रोक्तानि प्रणिधानादीनि संगृह्यन्ते। तान्यपेक्षमानात् आत्म-

8 Nyā. sū. bhā. 3.2.44

9 Pra. bhā. p. 627 (V.S.V.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मनसोः संयोगविशेषादिति स्मृतिकारणकथनम्। आत्ममनःसंयोगस्य च लिंगदर्शनादिसहकारितैव विशेषः, केवलादस्मात् स्मरणानुपपत्तेः। लिंगदर्शनवत् संस्कारोऽपि स्मृतेर्निमित्तकारणमित्याह—पट्वाभ्यासादरप्रत्ययजनितात् संस्काराज् जायते। पटुप्रत्ययः स्फुटतरप्रत्ययस्तस्मात् संस्कारो जायते।...तेन गृहीतस्यावृत्त्या पुनः पुनर्ग्रहणलक्षणोऽभ्यासः संस्कारकारणम्।... क्वचिच्चात्यन्ताश्चर्यतरे वस्तुनि सकृदुपलब्धे कालान्तरे स्मृतिदर्शनादादरग्रहणमपि संस्कारनिमित्तम्। दृष्टश्रुतानुभूतेष्विति विषयसंकीर्तनं कृतम्।... शेषानुव्यवसायेच्छास्मरणद्वेषहेतुरिति कार्यनिरूपणम्।'[10] शेषानुव्यवसायहेतुरित्यस्यानुमितिहेतुर्व्याप्तिस्मरणमित्यर्थः, इच्छाहेतुः सुखसाधनत्वस्मृतिः, प्रथमपदस्मृतिर्द्वितीयपदानुस्मरणहेतुः, द्वेषहेतुर्दुःखसाधनत्वस्मरणमित्येवमर्थो बोध्यः।

पुनश्चोक्तं श्रीधरेण—'तदित्येव स्मृतेराकारः। तत्र चार्थस्यातीतत्वं पूर्वानुभूतत्वं प्रतीयत इत्यतीतविषया स्मृतिः। अत एव न प्रमाणम्, तस्याः पूर्वानुभवविषयत्वोपदर्शनेनार्थं निश्चिन्वत्या अर्थपरिच्छेदे पूर्वानुभवपारतन्त्र्यात्।'[11]

नव्या हि नैयायिकाः—इन्द्रियाजन्यत्वे सति संस्कारजन्यं ज्ञानं स्मृतिरित्येवं स्मृतिलक्षणं प्राहुः। प्रत्यक्षविशेषरूपायां प्रत्यभिज्ञायामतिव्याप्तिवारणार्थमिन्द्रियाजन्यत्वे सतीति विशेषणम्। प्रत्यभिज्ञा हि संस्कारजन्याऽपि इन्द्रियजन्या च भवति। स्मृतिस्तु नेन्द्रियजन्या। तत्र संस्कारद्वारा अन्यूनविषयकपूर्वानुभवः कारणम्। उक्तं च विश्वनाथेन मुक्तावल्याम्—'तत्र पूर्वानुभवः कारणम्। अत्र केचित्—अनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेनैव, अन्यथा स्मरणोत्तरं स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्। मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुः। तन्न। यत्र समूहालम्बनानन्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट सकलविषयकस्मरणं तु नाभूत् तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य रोगस्य वा चरमफलस्य वा संस्कारनाशकत्वं वाच्यम्। तथाच न क्रमिकस्मरणा-

---

10 Nyā. Kan. p. 625-26 (V.S.V.)

11 Ibid. p. 627 (V.S.V.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



नुपपत्तिः। न च पुनः पुनः स्मरणादृढतरसंस्कारानुपपत्तिरिति वाच्यम्। झटित्युद्बोधकसमवधानस्य दार्ढ्यपदार्थत्वात्। न च विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यादिति वाच्यम्। विशेषधर्मेण व्यभिचाराज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात्।'[12]

स्मृतिरपि यथार्थायथार्थभेदेन द्विविधा। प्रमाजन्या यथार्था, अप्रमाजन्याऽयथार्था। यथार्थत्वेऽपि स्मृतेर्न प्रमात्वम्, पूर्वानुभवस्य संस्कारस्य वा प्रमाणान्तरत्वापत्तेः। अनुवादरूपत्वात् पूर्वानुभवपरतन्त्रत्वाच्च स्मृतेर्न प्रमात्वमिति केचित्। अनधिगतविषयत्वरूपाभिनवत्वाभावादप्रमात्वमित्यन्ये। तथाचोक्तं मीमांसकैः—

'तत्र यत् पूर्वविज्ञानं तस्य प्रामाण्यमिष्यते।
तदुपस्थानमात्रेण स्मृतेश्च चरितार्थता॥'[13]

एवं पूर्वज्ञानस्यैवावृत्तिमात्ररूपत्वेन स्मृतेर्न प्रमात्वमिति भाट्टमतम्।

प्राभाकरमतेनाऽप्युक्तं शालिकनाथेन—

'अनुभूतिः प्रमाणं सा स्मृतेरन्या स्मृतिः पुनः।
पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते॥
न प्रमाणं स्मृतिः पूर्वप्रतिपत्तेरपेक्षणात्।
अन्योन्यनिरपेक्षास्तु धारावाहिकबुद्धयः॥'[14]

समानविषयकपूर्वज्ञानसापेक्षत्वात् स्मृतिर्न प्रमाणम्; धारावाहिकप्रत्यक्षादिस्थले द्वितीयादिप्रत्ययानामधिगतविषयकत्वेऽपि न पूर्वप्रत्ययसापेक्षत्वमिति तेषां प्रामाण्यमव्याहतमेवेत्यर्थः।

अर्थस्यातीतदेशकालावस्थानामेव वर्तमानस्मृतिविषयत्वात् अर्थस्य स्मृतिकालीनावस्थादीनामविषयत्वात् न काऽपि स्मृतिर्यथार्था इति केषांचित् मतम्। अतीतावस्थादीनामतीतरूपेणैव स्मृतिविषयत्वात् स्मृतेर्यथार्थत्वमक्षुण्णमेव। न हि स्मृतिकाले अतीतदेशकालावस्थादिरर्थस्य वर्तमानदेश-

12 Sid. muk. p. 431 (N.S.)

13 Ślokavārtika quoted in Nyā. kan. p. 627 (V.S.V.)

14 Pra. pañ. p. 104 (B.H.U.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



कालावस्थारूपेण स्मर्यते येन तस्या अयथार्थत्वं स्यात्, किन्तु यथार्थरूपेणातीततयैव स्मर्यते इति तार्किकमतम्। उक्तं च प्रशस्तपादेन—'ये त्वनर्थजत्वात् स्मृतेरप्रामाण्यमाहुस्तेषामतीतानागतविषयस्यानुमानस्याप्रामाण्यं स्यादिति दूषणम्।'[15] वैशेषिकेदर्शने विद्याभेदरूपेण स्मृतेर्निरूपणात् यथार्थत्वम्, प्रत्यक्षानुमानयोरेव तन्मते प्रमाणत्वात्।

पातंजलसूत्रे—'अनुभूतविषयासम्प्रमोषः स्मृति'[16]रिति स्मृतिलक्षणं कृतम्। प्रामाणादिभिरनुभूते विषये योऽसम्प्रमोषः अस्तेयः सा स्मृतिरित्यर्थः। पूर्वानुभूतविषयानधिकविषया इति यावत्। उक्तं च—'सर्वे प्रमाणादयोऽनधिगतमर्थं सामान्यतः प्रकारतो वाऽधिगमयन्ति, स्मृतिः पुनर्न पूर्वानुभूतमर्यादामतिक्रामति; तद्विषया वा, तदूनविषया वा न तु तदधिकविषया इति।'[17]

तार्किकादिमते यस्य विषयस्य पूर्वं अनुभवस्तस्य विषयस्यैव स्मृतिः, न त्वनुभवस्यापि, तस्य पूर्वानुभवाविषयत्वात्। पातंजलमते तु पूर्वप्रत्ययस्यापि स्मरणं भवति, तथैवोभयसंस्कारजननात्। उक्तं च व्यासभाष्ये—'ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासस्तथाजातीयकं संस्कारमारभते, स संस्कारः स्वव्यंजकांजनस्तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति।'[18]

पुनश्चोक्तं—'तत्र ग्रहणाकारपूर्वा बुद्धिः, ग्राह्याकारपूर्वा स्मृतिः।'[19] तस्य च व्याख्यानमुक्तं वाचस्पतिना—'ननु यदि कारणविचारणे बुद्धिस्मरणयोः सारूप्यं कस्तर्हि विशेषः? इत्यत आह—तत्र ग्रहणेति। ग्रहणमुपादानम्, न च गृहीतस्योपादानं सम्भवति, तदनेनानधिगतबोधनं बुद्धिरित्युक्तम्। ग्रहणाकारो ग्रहणरूपम्, पूर्वं प्रधानं यस्याः सा तथोक्ता। ...ग्राह्याकारः पूर्वः प्रथमो यस्याः सा तथोक्ता, इदमेव च ग्राह्याकारस्य ग्राह्यस्य पूर्वत्वं यद् वृत्यन्तरविषयीकृतत्वमर्थस्य, तदनेन वृत्यन्तरविषयीकृतगोचरा स्मृतिरितित्युक्तं भवति।'[20]

---

15 Pra. bhā. p. 628 (V.S.V.)
16 Pāt. yo. sū. 1.11
17 Tattva. vai. 1.11
18 Yo. sū. bhā. 1.11
19 Ibid 1,11
20 Tattva. vai. 1,11

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



एतादृश्याः स्मृतेर्द्विविधत्वमुक्तं भाष्यकारेण विषयाणां कल्पितत्वाकल्पितत्वभेदेन। यथोक्तं—'सा च द्वयी भावितस्मर्तव्या चाभावितस्मर्तव्या च, स्वप्ने भावितस्मर्तव्या, जाग्रत्समये त्वभावितस्मर्तव्येति। सर्वाः स्मृतयः प्रमाण-विपर्यय-विकल्प-निद्रास्मृतीनामनुभवाद् भवन्ति।'[21] भावितस्मर्तव्येत्यस्य कल्पितः स्मर्तव्यो यया सेत्यर्थः। स्वप्ने पित्रादेरतीतस्य अननुभूत-देशकालसम्बन्धोऽपि प्रतीयते कल्पितः। तद्भिन्ना ह्यकल्पितस्मर्तव्या जाग्रत्काले स्मृतिः। सर्वासां वृत्तीनामनुभवादनुव्यवसायात् संस्कारः, संस्काराच्च पुनः तद्बोधरूपा स्मृतिरित्यर्थः। उक्तं च योगवार्तिके—'सर्ववृत्त्यन्ते स्मृतिवृत्तेरुपन्यासस्य बीजमाह—सर्वा इति, अनुभवादनुव्यवसायात्, अनुभावादिति पाठे प्रभावादित्यर्थः।'[22]

यद्यपि स्वप्ने भावितस्मर्तव्या स्मृतिविपर्यय एव तथापि स्मृत्याभासतया स्मृतित्वेनोक्तेति वाचस्पतिमतम्। वार्तिककारमते तु स्वप्नस्याप्यंशतः संस्कारजन्यत्वात् तादृशस्य स्वप्नांशस्यैवात्रोपन्यासः।

अद्वैतवेदान्तिभिर्यद्यपि संस्कारमात्रजन्यं ज्ञानं स्मृतिरिति[23] स्मृतिलक्षणं स्वीकृतं तस्या यथार्थत्वमपि स्वीकृतं तथापि स्मृतेरर्थमात्रविषयत्वं तेषामभिप्रेतं न तु पातंजलमतवत् प्रत्ययविषयत्वमपि। उक्तं च विवरणे—'अर्थस्मृतिसंस्कारस्य जनकं यत् पूर्वविज्ञानं तत् स्वयं ग्राह्यविशेषणतया स्वेनैव न विषयीक्रियते, अर्थमात्रविषयत्वात् पूर्वविज्ञानस्य। न हि पूर्वज्ञानेनाविषयीकृते विषये तत्संस्कारजन्या स्मृतिः समुत्पद्यते। तस्मादर्थमात्रविषयज्ञानजन्या स्मृतिरर्थमात्रमेव विषयीकरोति, न पूर्वज्ञानेनाविषयीकृतं ज्ञानमपि। अन्यथा नीलज्ञानात् पीतेऽपि स्मृतिः स्यात्। ननु स्मर्यमाने पूर्वानुभवसम्भेदः स्वानुभवसिद्धः? सत्यम्—यत् पूर्वानुभवसमये···अर्थज्ञानसद्भावविषयमनुमानज्ञानमुत्पन्नं तदनुमानज्ञानसंस्कारजनिता स्मृतिरनुभवसम्भिन्नमर्थं गमयति। मूलज्ञानेनाप्यर्थज्ञानविषयेन विशिष्टार्थविषयीकरणात्। यस्मादर्थस्मृतिसमनन्तरमनुभवविशिष्टार्थस्मृत्यन्तरजननादर्थस्मृतिरेवानुभवसम्भिन्नेति विभ्रमः,

21 Yo. bhā. 1.11

22 Yo. vār. 1.11

23 Advai. kau. p. 258-59

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तस्मात्…पूर्वज्ञानेन यावन्मात्रं वस्तुमात्रं वा ज्ञानसंभिन्नं वा वस्तु विषयीकृतं तावन्मात्रमेवावभासयति न स्वमूलज्ञानसम्भिन्नम्।'[24]

स्मृतिरपि शांकरमते अनुभववन्न पुरुषप्रयत्नाधीनमपि तु संस्कारोद्बोधाधीनम्। उक्तं च विद्यारण्येन—'एवं स्मृतिज्ञानमपि संस्कारोद्बोधाधीनं न पुरुषप्रयत्नाधीनम्। सदृशदर्शनाददृष्टवशाद्वा संस्कारोद्बोधे प्रयत्नमन्तरेणाप्यनिष्टविषयस्मृतिदर्शनात्। यदि क्वचित् स्मृतिविशेषे प्रयत्नापेक्षा दृश्येत, तदापि प्रयत्नेन चिन्तापरपर्यायचित्तैकाग्र्यमेव जायते न स्मृतिः। तेन चैकाग्र्येण संस्कार उद्बोध्यते। तदुक्तं—सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधका इति। अत एव पुरुषप्रयत्नाधीनं ध्यानं न स्मृतिप्रवाहरूपम्। अत उक्तं—ततश्च श्रुतिसमर्पिताकारविशिष्टाया मानसक्रियायाः प्रवाहो ध्यानं न तु स्मृतिप्रवाहः। …चिरं चित्तैकाग्र्यं कृत्वा तत्तद् वाक्यं यथा पठितमेवावगच्छति सैषा स्मृतिः। न चात्र पुरुषः स्वतन्त्रः, प्रयत्नेन चित्तैकाग्र्ये सम्पादितेऽपि कस्मिंश्चिद् वाक्यविशेषे स्मृत्यनुदयात्। न च स्मर्यमाणमपि वाक्यमन्यथा स्मर्तुं शक्यम्। …नापि स्वेच्छावशात् स्मर्तुं शक्यम्। अनिच्छतः शौचाद्यवसरेऽपि कदाचिद्वेदवाक्यस्मृतेरनिवार्यत्वात्। अतः कर्तुमकर्तुमन्यथाकर्तुमशक्या यथानुभूतं वस्त्वविलङ्घयन्ती तत्संस्कारोद्बोधमात्राधीना स्मृतिरित्युच्यते।'[25]

रामानुजमते स्मृतेरपि यथावस्थितव्यवहारानुगुणत्वेन यथार्थत्वात् प्राचीनैः प्रमाणत्वेन परिगणितत्वाच्च प्रामाण्यमपि तस्याः स्वीकृतम्। ननु स्मृतेः प्रामाण्ये कथं तन्मते त्रीणि प्रमाणानीत्युच्यते इति चेन्न। स्मृतेः प्रत्यक्षेऽन्तर्भावान्न पृथक् प्रमाणत्वम्। उक्तं च—'स्मृतेः प्रामाण्यांगीकारेऽपि संस्कारापेक्षत्वात् तस्याः प्रत्यक्षमूलत्वान्मूलभूते प्रत्यक्षेऽन्तर्भाव इति न पृथक्प्रमाणकल्पनम्। अतस्त्रीण्येव प्रमाणानि संभवन्ति। स्मृतिर्नाम पूर्वानुभवजन्यसंस्कारमात्रजन्यं ज्ञानम्। तत्र चोद्बुद्धः संस्कारो हेतुः। तदुद्बोधश्च—सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः—इत्युक्तप्रकारेण क्वचित्

24 Pañ. viv. p. 135-36 (Madras Govt.)

25 Viv. pra. saṃ. p. 821-26 (Acyutagranthamālā)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सदृशदर्शनाद् भवति क्वचिददृष्टात् क्वचिच्चिन्तया। आदि शब्देन साहचर्यस्यापि ग्रहणात् तेनापि भवति। सम्यक् पूर्वमनुभूतस्य सर्वस्य स्मृतिविषयत्वनियमः। क्वचित्कालदैर्घ्याद्व्याध्यादिना वा संस्कारप्रमोषात् स्मृत्यभावः।'[26] सा च स्मृतिः स्वकारणभूतप्रमितिभ्रान्तिसंशयानुरोधेन स्वयमपि यथार्थी भ्रमरूपा संशयरूपा चेति त्रिप्रकाराः सम्भवन्ति।

निवृत्तपूर्वावस्थे वस्तुनि तत्तोल्लेखिनी सर्वापि स्मृतिरयथार्था इति यत् केषांचिन्मतं तदपि न संगतम्। न हि स्मृतिर्निवृत्तां वस्तुनः पूर्वावस्थां वर्तमानत्वेन विषयीकरोति, अपि त्वतीतत्वेनैवेति न याथार्थ्यं क्षुण्णमिति दिक्।

जैनमतेऽपि अबाधितविषयत्वात् स्मृतेर्याथार्थ्यं तथा व्याप्तिस्मरणस्यानुमितिहेतोरप्रामाण्ये अनुमितेरप्यप्रामाण्यप्रसंगात् स्मृतेः प्रामाण्यं च स्वीकृतम्। तथाचोक्तमनन्तवीर्येण—'स्मृतिः प्रमाणमनुमानप्रामाण्यान्यथानुपपत्तेरिति... स्वविषयावभासनं स्मरणेऽप्यविशिष्टमित्यादि।'[27] 'संस्कारोद्बोधनिबन्धना तदित्याकारा स्मृति'[28]रिति चोक्तं माणिक्यनन्दिना। तत्व्याख्यानं चोक्तं प्रभाचन्द्रेण—'संस्कारः सांव्यवहारिकप्रत्यक्षभेदो धारणा। तस्योद्बोधः प्रबोधः। स निबन्धनं यस्याः तदित्याकारो यस्याः सा तथोक्ता स्मृतिः।'[29] उक्तं च—'न चानुभूतार्थविषयत्वे स्मृतेर्गृहीतग्राहित्वेनाप्रामाण्यम्, परिच्छित्तिविशेषसम्भवात्। न खलु यथा प्रत्यक्षे विशदाकारतया वस्तुप्रतिभासः तथैव स्मृतौ, तत्र तस्य वैशद्याप्रतीतेः। ...न चाविसंवादकत्वं स्मृतेरसिद्धम्, ...यत्र तु विसंवादः सा स्मृत्याभासा प्रत्यक्षाभासवत्। विसंवादकत्वे चास्याः कथमनुमानप्रवृत्तिः सम्बन्धस्यातोऽप्रसिद्धेः। न च सम्बन्धस्मृतिमन्तरेणानुमानमुदेत्यतिप्रसंगात्।'[30]

—o—

---

26 Yat. mat. dīp. p. 7 (A.A.)
27 Pra. rat. mā. p. 51 (chow.)
28 Pari. mū. sū. 3.3
29 Pra. ka. mār. 3.3
30 Ibid. 3.4

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## प्रत्यभिज्ञानिरूपणम्

पूर्वोत्तरकालवर्त्येकवस्तुविषयकं संस्कारजन्यमिन्द्रियजन्यं च सोऽयं घट इत्यादि ज्ञानं प्रत्यभिज्ञेति प्रायशः सर्वेषामभिमतम्। यथोक्तं न्यायभाष्ये—'यं पूर्वमज्ञासिषमर्थं तमिमं जानामीति ज्ञानयोः समानेऽर्थे प्रतिसन्धिज्ञानं प्रत्यभिज्ञानमिति।'[1]

तत्र बौद्धास्त्वन्यथा वदन्ति। तेषां भावानां क्षणिकत्वात् पूर्वोत्तरकालवर्तिन एकस्य वस्तुनोऽभावात् संस्कारजन्यमिन्द्रियजन्यं च (भावद्वयविषयकं) ज्ञानद्वयमेव सोऽयमित्यादिप्रत्यभिज्ञायां भासते। एकं स्मृत्यात्मकमपरं प्रत्यक्षम्। ज्ञानद्वयं सादृश्यादिवशेन विवेकाग्रहादेकज्ञानत्वेन मन्यते। तथाचोक्तं—'संस्कारस्य स्मृतिरेव कार्यमिन्द्रियस्यानुभव एव, सम्भूय न ताभ्यामेकं कार्यमारभ्येत, न हि मृत्पिण्डतन्तुनिर्वर्त्यमेकं घटपटरूपं कार्यमुपलब्धम्। तस्माद् द्वे एते ज्ञाने, स इति स्मरणमयमित्यनुभवः—

स्मृतिः स्मर्तव्यविषया ग्रहणं ग्राह्यगोचरम्।
न तदैक्यपरामर्शि दृश्यते प्रत्ययान्तरम्॥'[2] इति।

पूर्वज्ञानविशिष्टार्थग्राहित्वमपि प्रत्यभिज्ञाया वक्तुं न शक्यते, पूर्वज्ञानस्येदानीमसत्त्वेन विशेषणत्वायोगादित्यादिकमपि तेषां पर्यनुयोगः। शान्तरक्षितेनापि—

'क्षणभङ्गिषु भावेषु प्रत्यभिज्ञा च दुर्घटा।
न ह्यन्यतरदृष्टोऽर्थः प्रत्यभिज्ञायते परैः॥'[2a]

इत्यनुपपत्तिमाशंक्य—

'केषाञ्चिदेव चित्तानां विशिष्टा कार्यकारिता।
नियता तेन निर्बाधाः सर्वत्र स्मरणादयः॥'

---

1 Nyā. sū. bhā. 3.2.2

2 Nyā. mañ. II. p. 21 (Chow.)

2a Tattva. saṃ. 493 (Bauddha-Bhāratī)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



इत्यनेन प्रत्यभिज्ञायाः समाधानं कृतम्। उक्ता च धर्मकीर्तिना प्रमाणवार्तिके—

'संयोज्य प्रत्यभिज्ञानं कुर्यादप्यन्यदर्शने।'[2b]—

इत्यत्र ज्ञानद्वयसंयोजनेन प्रत्यभिज्ञानोपपत्तिः।

तार्किकास्तु वदन्ति—अतीतकालविशिष्टो वर्तमानकालावच्छिन्नश्चार्थः प्रत्यभिज्ञायां भासते। न च भूतः काल इदानीमस्तीत्युच्यते, भूतत्वेनैव भासनात्। तथाचोक्तः—'भूतः कालो भूततया गृह्यते वर्तमानो वर्तमानत्वैवार्थस्तूभयानुगत एक एव तथा ग्रहणात्।'[3] तस्मादिन्द्रियजन्यत्वात् प्रत्यक्षविशेष एव प्रत्यभिज्ञा।

न चासता भूतकालेन विशेषितमर्थं कथमिन्द्रियजज्ञानं विषयीकुर्यादिति वाच्यम्, शतं कपित्थानां भक्षितवान् वाहीक इत्यादिप्रतीतिस्थले अन्त्यसंख्येयप्रतीतिकाले यथा प्रागवलोकितान्यविद्यमानानि नवनवतिकपित्थानि शतप्रतीतिहेतुतां लभन्ते तथैवातीतकालसंसर्गोऽपि विशेषणरूपेण स्तम्भादिप्रत्यभिज्ञायां कारणत्वं लभमानो विषयीभवति।'[4] तस्मात् संस्कारसहकृतस्येन्द्रियस्यातिक्रान्तकालविशेषितपुरोवर्तिस्तम्भादिपदार्थेन सन्निकर्षे जाते तादृशपदार्थविषयकमेकमेव ज्ञानं प्रत्यभिज्ञानमुत्पद्यते इति। उक्तं च शिवादित्येन—'अतीतावच्छिन्नवस्तुग्रहणं प्रत्यभिज्ञानमिति।'[5]

नव्या अपि तार्किका इन्द्रियजन्यत्वे सति संस्कारजन्यमेकमेव ज्ञानं प्रत्यभिज्ञा प्रत्यक्षप्रमाविशेषरूपेति प्राहुः। उक्तं च विश्वनाथेन—'न च प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वे प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम्, अप्रयोजकत्वात्।'[6] संस्कारजन्यत्वस्य स्मृतित्वे प्रयोजकत्वाभावादित्यर्थः। मणिकारस्य मतमप्युद्धृतं विश्वनाथेन—'परे तु अनुद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्पते इत्याहुः।'[7] तथापि स्मरणं प्रति उद्बुद्धसंस्कारस्य हेतुत्वस्वीकारावश्यम्भावात् लाघवाभावात् वरं प्रत्यभिज्ञां प्रत्येव उद्बुद्धसंस्कारस्य हेतुत्वमित्यस्वरसबीजं तन्मतस्येति ध्येयम्।

---

2b Pramāṇa-vārtika, 101
3 Nyā mañ II. p. 32 (chow.)
4 Ibid. II. p. 32 (Chow.)
5 Sap. pād. 139 (C.S.S.)
6 Sid. muk. p. 531-32 (N.S.)
7 Ibid. p. 532 (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## प्रत्यभिज्ञानिरूपणम्

जैनमतेऽपि स्मरणप्रत्यक्षरूपज्ञानद्वयत्वं प्रत्यभिज्ञाया न स्वीकृतम्, प्रत्यक्ष-स्मरणाभ्यां प्रत्यभिज्ञाविषयस्यार्थस्य ग्रहीतुमशक्यत्वात्। पूर्वोत्तरविवर्तवर्त्यैकद्रव्यं हि प्रत्यभिज्ञानविषयः। न च तदनुभूतविषयकेन स्मरणेन वर्तमानविषयकप्रत्यक्षेण वा ग्रहीतुं शक्यते। उक्तं च माणिक्यनन्दिना—'दर्शनस्मरणकारणकं संकलनं प्रत्यभिज्ञानमिति।'[8] टीकायां च प्रभाचन्द्रेण—'स्मरण-प्रत्यक्षजन्यस्य पूर्वोत्तर-विवर्तवर्त्यैकद्रव्यविषयस्य संकलनज्ञानस्यैकस्य प्रत्यभिज्ञानत्वेन सुप्रतीतत्वात्; न खलु स्मरणमेवातीतवर्तमानविवर्तवर्तिद्रव्यं संकलयितुमलं तस्यातीतविवर्त-मात्रगोचरत्वात्। नापि दर्शनम्, तस्य वर्तमानमात्रपर्यायविषयत्वात्।'[9] तस्मादेकमेव ज्ञानं प्रत्यभिज्ञानं स्मरणप्रत्यक्षजन्यमिति जैनमतम्। न च तार्किकादिमत इव तस्य प्रत्यक्षेऽन्तर्भावः, प्रत्यक्षस्य पुरोऽवस्थितार्थविषय-कत्वेन पूर्वापरविवर्तवर्त्यैकत्वाविषयत्वात्। नापि स्मरणेऽन्तर्भावः, तेनापि तदेकत्वस्याविषयीकरणात्। तस्मादतिरिक्तप्रमाणत्वं (प्रमात्वं) प्रत्यभिज्ञान-स्येति स्थितम्। तथाचोक्तमनन्तवीर्येण—'ततः स्थितं प्रत्यक्षानुमानाभ्या-मर्थान्तरं प्रत्यभिज्ञानं सामग्रीस्वरूपभेदादिति। न चैतदप्रमाणम्। ततोऽर्थं परिच्छिद्य प्रवर्तमानस्यार्थक्रियायामविसंवादात् प्रत्यक्षवदिति।'[10] तस्मात् स्मरण-प्रत्यक्षोभयजन्यत्वादतिरिक्तो ज्ञानविशेषः प्रत्यभिज्ञा प्रमा च।

मीमांसकमते तु प्रत्यभिज्ञानस्य नातिरिक्तप्रमात्वमपि तु प्रत्यक्षत्वमेव। उक्तं च—भट्टनारायणेन—'सा च प्रत्यभिज्ञानत्वेन जायते। तथा च स इति अयमिति च द्वे भाने जन्येते। तत्र स इति भानजननशक्तिः संस्कारकृता। अयमिति भानजननशक्तिरिन्द्रियकृता।'[11] द्वे भाने इत्यस्य विशेषणद्वयभान-मित्यर्थः। प्राभाकरमतेऽपि…'प्रत्यभिज्ञानस्य न स्मृतित्वम्। इन्द्रियार्थ-सन्निकर्षसचिवसंस्कारजन्यत्वादिति।'[12]

अद्वैतवेदान्तिनोऽपि तार्किकवत् प्रत्यभिज्ञानस्य संस्कारेन्द्रियोभयजन्यैक-ज्ञानत्वं प्रत्यक्षविशेषरूपत्वं चाभिमतम्। सम्भवति हि संस्कारेन्द्रिययो-र्विजातीयज्ञानहेतुसामग्र्योरेकज्ञानोत्पादकत्वम्। उक्तं च पंचपादिकायाम्—

---

8 Pari. mu. sū. 3.5
9 Pra. ka. mār. 3.10
10 Pra. rat. mā. p. 56 (chow.)
11 Mā. me. p. 22. (Adyar)
12 Pra. pañ. p. 125 (B.H.U.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



'दृश्यते हि लिंगज्ञान-संस्कारयोः सम्भूय लिंगिज्ञानोत्पादनम्, प्रत्यभिज्ञानं चाक्ष-संस्कारयोः। उभयत्रापि स्मृतिगर्भमेकमेव प्रमाणज्ञानम्। संस्कारानुद्बोधे तदभावात्। न पुनः ज्ञानद्वये प्रमाणमस्ति '[13] उक्तं च विवरणे—'ननु प्रत्यभिज्ञायां सम्प्रयोगः पूर्वानुभूतस्मृतिश्च कारणं ज्ञानद्वययौगपद्य-प्रसंगाभावात्, न संस्कार इति, तत्राह—अयमेव न्याय इति। ज्ञानाज् ज्ञानान्तरोत्पत्तौ व्याप्त्याद्यभावात् संस्कार एव कारणमित्यर्थः।'[14] तस्मात् संस्कारेन्द्रियोभयजन्यमेकमेव ज्ञानं प्रत्यभिज्ञा। तत्र च वृत्त्यवच्छिन्नचैतन्याभेदो विषयचैतन्यस्येति प्रत्यक्षलक्षणस्य तन्मतसिद्धस्य सत्त्वात् प्रत्यक्षविशेषत्वमेव प्रत्यभिज्ञानस्येति।

रामानुजोयानान्तु स्मृतेरपि प्रत्यक्षेऽन्तर्भावात् प्रत्यभिज्ञानस्येन्द्रियजन्यस्य सुतरामेव प्रत्यक्षेऽन्तर्भावः। उक्तं च—यथा स्मृतेः प्रत्यक्षेऽन्तर्भावस्तथा सोऽयं देवदत्त इति प्रत्यभिज्ञाया अपि प्रत्यक्षेऽन्तर्भावः।'[15]

प्रसंगत उच्यते यत् काश्मीरीयशैवदर्शने हि प्रत्यभिज्ञाया एव परमप्रामाण्यमुच्यते, यतः सोऽहमित्यादिप्रत्यभिज्ञयैव जीवशिवयोरभेदो ज्ञायते येन परमपुरुषार्थलाभो भवति। तदुक्तम्—

> 'समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामि।'[16]
>
> 'ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना।
> करणेन नास्ति कृत्यं क्वापि भावनयापि वा॥'[17]

एवं ज्ञानात्मकमनोवृत्तीनामात्मगुणानां वा निरूपणं कृतम्। प्रतिभाकल्पनादीनां ज्ञानात्मकानां निरूपणं प्रत्यक्षनिरूपणानन्तरं परिच्छेदान्तरे विस्तारेण करिष्यते इति नात्र तेषामालोचनं कृतम्।

मानसभ्रम-स्वप्नादीनामपि परिच्छेदान्तरे निरूपणं भविष्यतीति नात्र तेषामालोचनं कृतम्।

—-०—-

13 Pañ. pā. p. 53 (Madras Gov.)

14 Pañ. pā. viv. p. 163 (Madras Gov.)

15 Yat. mat. dīp. p. 8 (A.A.). 16 Pratyabhijñā-kārikā, 1.

17 Śivadṛṣṭi 7.6.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## ( ६ )

## भावात्मकमनोवृत्तीनां निरूपणम्

ये मनोवृत्तयो मनोधर्मा वा पूर्वपरिच्छेदे आलोचितास्ते सर्वेऽर्थप्रकाशकत्वात् ज्ञानात्मिका उक्ताः। ये तु न तादृशा अर्थप्रकाशका न वा साक्षात् क्रियाजनकत्वेन प्रयत्नात्मकास्ते भावात्मकाः सुखदुःखेच्छाद्वेषा एवेदानीं निरूप्यन्ते। सुख-दुःखेच्छा-द्वेषाणां (अन्तःकरण-) भावविशेषरूपत्वात्ते भावात्मका उच्यन्ते। यद्यपि ह्रीर्भीरित्यादिश्रुत्या प्रत्यक्षतश्च लज्जाभयादीनामपि भावात्मकानां मनोधर्माणां सद्भावः प्रसिद्ध एव तथापि दर्शनशास्त्रेषु तेषामनुपयोगित्वात् प्रायशो निरूपणं न दृश्यते। अलंकारादिशास्त्रेषु तेषां विशेषेण निरूपणं वर्तते। तेषामुत्तरत्र यथायोग्यं निरूपणं करिष्यते इति सुखादीनामेव भावात्मकमनोधर्माणामत्र निरूपणं क्रियते।

## सुखनिरूपणम्

अस्ति हि सुखं नामान्तःकरणधर्मविशेष आत्मविशेषगुणो वा सर्वजनानुभवसिद्धः। सर्वात्मनां सर्वदाऽनुकूलवेदनीयं सुखं सदाज्ञायमानसत्ताकमेव, सुखोत्पत्त्यनन्तरमहं सुखीत्यादिप्रतीतेरवश्यम्भावात्। तच्चान्येच्छानधीनेच्छाविषयः स्वतः काम्यत्वात्। न हि सुखमन्यार्थमिच्छाविषयो भवति, अपि तु स्वार्थमेव (सुखार्थमेव)। सर्वमन्यत्तु सुखार्थमेवेच्छाविषयत्वं भजते। उक्तं च—'अयं खलु सुखसंवेदने व्यवस्थितः सुखं परमार्थं मन्यते, न सुखादन्यन्निःश्रेयसमस्ति, सुखे प्राप्ते चरितार्थः कृतकरणीयो भवति।'[1]

एतादृशसुखविषये देहात्मवादिनां चार्वाकाणां मतं ह्यतिप्रसिद्धं प्राकृतानामपि जनानामभिमतत्वात्। 'यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिबे'दित्यादिना तैर्देहेन्द्रियसुखस्यैव परमपुरुषार्थतयाऽवधारितत्वात्। तेषां मते

1. Nyā. sū. bhā. 4.1.58.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



ह्यङ्गनाद्यालिंगनादिजन्यसुखमेव निरतिशयसुखं परमपुरुषार्थश्च, स्वर्गसुख-मोक्ष-सुखादीनामसिद्धत्वात्। तदुक्तं—

'अंगनालिंगनाज्जन्यसुखमेव पुमर्थता।
कन्टकादिव्यथाजन्यं दुखं निरय उच्यते॥
...चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते॥'[1a] इत्यादि।

परन्तु नैतत् तार्किकादिदार्शनिकानां सम्मतम्। देहेन्द्रियाणां निमित्त-कारणत्वेऽपि सुखस्यात्मगुणत्वादन्तःकरणधर्मत्वाद् वा न देहेन्द्रियधर्मत्वम्।

सर्वात्मनामनुकूलवेदनीयं सुखमिति[2] तर्कशास्त्रसम्मतलक्षणम्। सर्वेषां नियमेनानुकूलवेदनीयमिति तदर्थः। शत्रुदुःखस्य अन्यं प्रति नियमेनानुकूल-वेदनीयत्वेऽपि न सर्वेषां तथा, शत्रुं प्रत्यनुकूलवेदनीयत्वाभावात्। कस्य-चिदपि पदार्थान्तरस्य नियमेनानुकूलवेदनीयत्वाभावात् स्वसुखस्य सदैव सर्वं प्रत्यनुकूलवेदनीयत्वं प्रसिद्धमेव। अनुकूलवेदनीयत्वं चेच्छाविषयत्वमेव। अहं सुखीत्यादिप्रतीत्या सुखं तु ज्ञानादिवदात्मधर्म एव। परमात्मन्यवृत्ति-त्वादनित्यं च। उक्तं च न्यायभाष्ये—'सुखस्यापि नित्यत्वं प्रमाणविरुद्धं कल्पयितुमशक्यमिति।'[3] इदन्तु प्राचीननैयायिकमतम्। नवीनमते परमात्मनि ब्रह्मणि नित्यसुखस्य प्रसिद्धत्वात्।

वैशेषिकदर्शने 'आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे'[4] इति सूत्रे यद्यपि सुखस्यात्मेन्द्रिय-मनःसंयोगजन्यस्य स्वरूपं नोक्तं तथापि प्रशस्तपादभाष्येऽनुग्रह-लक्षणं सुखमिति लक्षणमुक्तम्। तदर्थश्चोक्तः कन्दलीकारेण—'सुखं ह्यनकूल-स्वभावतया स्वविषयमनुभवं कुर्वन्(न्तं ?) पुरुषान्तरमनुगृह्णाति। सुखेनोत्पन्नेन स्वानुभवो जन्यते, स एवात्मनोऽनुग्रहः।'[5] सुखोत्पत्तिकारणानि चोक्तानि प्रशस्तपादभाष्ये—'स्रगाद्यभिप्रेतविषयसान्निध्ये सतीष्टोपलब्धीन्द्रियार्थ सन्नि-कर्षाद् धर्माद्यपेक्षादात्ममनसोः संयोगादनुग्रहाभिष्वंगनयनादिप्रसादजनकमुत्-

1a Sar. dar. saṃ. Cārvākadarśana, p. 3 (A.A.)
2 Tark. bhā. p. 171 (chow.)
3 Nyā. sū. bhā. 1.1.22
4 Vai. sū. 5.2.45
5 Nyā. Kan. p. 631-32 (V.S.V.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पद्यते तत्सुखम्। अतीतेषु विषयेषु स्मृतिजम्। अनागतेषु संकल्पजम्। यत्तु विदुषामसत्सु विषयानुस्मरणेच्छासंकल्पेष्वाविर्भवति तद्विद्या-शम-सन्तोषधर्मविशेषनिमित्तम्।'[6]

गौतमीयन्यायसूत्रे तु दुःखमेव प्रमेयपदार्थमध्ये परिगणितं न तु सुखम्, दुःखभावनाया एव वैराग्यजनकत्वादात्यन्तिकदुःखनिवृत्तिरूपापवर्गहेतुत्वात्। सुखं हि फलमध्ये प्रयोजनमध्ये च परिगणितं—'प्रवृत्तिदोषजनितोऽर्थः फलमिति'[7], 'यमधिकृत्य प्रवर्तते तत्प्रयोजन'[8]मिति च। उक्तं च जयन्तेन—'सुखदुःखे मुख्यं फलं तत्साधनन्तु शरीरेन्द्रियविषयादि गौणम्।'[9] प्रयोजनं तु—'गौणमुख्यभेदेन द्विविधम्। मुख्यं सुखप्राप्तिर्दुःखपरिहारश्च, तत्साधनं गौण'[9a]मिति च। तथापि सुखस्य प्रमेयसूत्रेऽनुल्लेखो दुःखस्य चोल्लेखो न प्रत्यात्मवेदनीयस्य सुखस्य प्रत्याख्यानार्थम्। सूत्रं च—'न, सुखस्यान्तरालनिष्पत्तेः।'[10] भाष्ये च—'न खल्वयं दुःखोद्देशः सुखस्य प्रत्याख्यानम्। निष्पद्यते खलु बाधनान्तरालेषु सुखं प्रत्यात्मवेदनीयं शरीरिणां तदशक्यं प्रत्याख्यातुमिति।'[11] एवं भावरूपत्वेन स्वानुभवसाक्षिकं सुखं सर्वैरेव स्वीकार्यम्। सुखसाधनानां स्रक्चन्दनादीनामनियतत्वात् सामान्यत इष्टदर्शनादीनां दृष्टकारणत्वं धर्मस्य चादृष्टकारणत्वं स्वीक्रियते। स्रगादिपदार्थानां सुखसाधनत्वमनियतमेव। उक्तं च न्यायमंजर्याम्—'तच्च प्रयोजनं (गौणं) देशकालपुरुषदशाभेदादव्यवस्थितम्, तद् यथा—ग्रीष्मे…परमं सुखसाधनं तदेव शिशिरे खेदाय जायते, तस्मादनियत एवायं सुखदुःखसाधनभावो भावानाम्।'[12]

शिवादित्येनापि—'सुखत्वसामान्यवन्निरुपाध्यनुकूलवेद्यं सुख'[13]मिति लक्षणं कृतम्। 'निरुपाधित्वमनन्यद्वारकत्वम्, सुखसाधनं तु सुखद्वारेणैवानुकूलमिति नातिव्याप्तिः।'[14] तस्य च सुखस्य द्वैविध्यमुक्तम्। यथा—'प्रयत्नोत्-

6 Pra. bhā. p. 630-32 (V.S.V.)   7 Nyā. sū. 1.1.20

8 Ibid 1.1.24   9 Nyā. mañ. II. p. 74 (chow.)

9a Ibid II. p. 126 (chow.)   10 Nyā. sū. 4.1.56

11 Nyā. sū. bhā. 4.1.56

12 Nyā. mañ. II. p. 126 (chow.)

13 Sap. pad. 87 (C.S.S.)   14 Sap. pad. ṭīkā 87 (C.S.S.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पायसाधनाधीनं सुखं सांसारिकम्। इच्छामात्राधीनसाधनसाध्यं सुखं स्वर्गः।'[15]

विश्वनाथेनापि—'सुखं तु जगतामेव काम्यं धर्मेण जायते।
निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते॥'[16]

इत्यत्र सुखस्य सुखत्वज्ञानादेवेच्छाविषयत्वं सुखत्वेन धर्मत्वेन च कार्यकारणभाव इत्यादिकमुक्तम्। उक्तं च तत्र दिनकरीटीकायां—'इदं तु प्राचां मतेनोक्तम्। नवीनमते तु विज्ञानमानन्दं ब्रह्मेति श्रुत्या भगवति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकं जन्यसुखत्वं सुखत्वावान्तरजातिर्वेति बोध्यम्।'[17] जन्यसुखमेव धर्मकार्यं न तु परमात्मनो नित्यसुखं तथेति भावः।

अथवा, भावत्वे सति स्वत इच्छाविषयत्वमेव सुखस्य लक्षणम्। भावत्वे सत्यन्येच्छानधीनेच्छाविषयत्वं तदर्थः। दुःखाभावस्यापि स्वत इच्छाविषयत्वात् तत्रातिव्याप्तिवारणाय भावत्वे सतीति विशेषणम्। दुःखाभावस्यापि सुखसाधनतयैव पुरुषार्थत्वं न स्वत इति केषांचिन्मतम्। मरणमूर्च्छादौ दुःखनिवृत्तिसम्भवेऽपि न तथा दुःखनिवृत्तिः केनापीष्यते तत्र सुखाभावादेवेति तेषामभिप्रायः।

येषां मते दुःखाभाव एव सुखं नातिरिक्तं सुखमस्ति भावरूपं तेषामभिप्रायं तत्खण्डनं चाह जयन्तभट्टः—'संसारेऽपि न सुखं नाम किंचिदस्तीति सर्व एवायं दुःखाभावमात्रे सुखव्यवहारः। तथाहि—प्रतीकारे व्याधेः सुखं विपर्यस्यति जन इति। उच्यते—आनन्दात्मनः प्रतिप्राणिसंवेद्यस्य निह्नोतुमशक्यत्वादनिवृत्तेऽपि दुःखे सुखसंवेदनान्न दुःखाभावः सुखम्। निरभिलाषात्मकदुःखाभावः सुखमित्यपि न मनोज्ञम्। यस्तु दुःखाभावे क्वचित् सुखमित्यपि व्यपदेशः प्रशान्तरोगिणामिव पूर्वदर्शितः स भाक्त इति न तावता स्वसंवेदनसाक्षिकसुखापह्नवः कर्तुमुचितः।'[18]

उक्तं च श्रीधरेण—'ये तु दुःखाभावमेव सुखमाहुस्तेषामानन्दात्मनाऽनुभवविरोधः, हितमाप्स्यामि अहितं हास्यामीति प्रवृत्तिद्वैविध्यानुपपत्तिश्च।'[19]

15 Ibid 141 (C.S.S.) 16 Bhā. pari. p. 502 (N.S.)
17 Dinakarī p. 502 (N.S.) 18 Nyā. mañ. II. p. 80 (Chow.)
19 Nyā. kan. p. 633 (V.S.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सांख्यैरपि सुखस्य भावरूपत्वं पुरुषार्थत्वं च स्वीकृतम्। उक्तं च विज्ञानभिक्षुणा—'पुरुषार्थस्य द्वैविध्यात्—द्विप्रकारत्वात्। सुखत्व-दुःखाभावत्वाभ्यामित्यर्थः। सुखी स्याम्, दुःखी न स्यामिति हि पृथगेव लोकानां प्रार्थना दृश्यते इति।'[20] ननु भाराद्यपगमे दुःखाभावस्यैव सुखरूपत्वात् दुःखाभाव एव सुखं स्यादिति चेन्न। तत्रापि दुःखाभावस्य सुखहेतुत्वं बोध्यं न तु सुखरूपत्वम्, विनिगमनाविरहाच्च दुःखस्यापि सुखाभावरूपत्वप्रसंगात्। अत एवोक्तमनिरुद्धेन—'दुःखाभावः सुखमिति तत्प्रतिषेधार्थमाह—पंचावयवयोगात् सुखसंवित्तिरिति। यद्यपि मानसप्रत्यक्षेण भावरूपं सुखमवसीयते, तथापि परबोधाय प्रमाणमप्युक्तम्।'[21] सुखसद्भावे न्यायप्रयोगश्चोक्तो विज्ञानभिक्षुणा—'सुखं सत् अर्थक्रियाकारित्वात्...यथा चेतनः। पुलकादिरूपार्थक्रियाकारि च सुखम्, तस्मात् सदिति।'[22]

सांख्यमते सुखस्य नात्मगुणत्वं नापि अद्वैतमत इवात्मस्वरूपत्वमपि त्वन्तःकरणधर्मत्वमेव। बाह्यकारणसंयोगे चित्तस्थसत्त्वगुणस्यैवादृष्टवशादुद्रेके सति तस्य बाह्यवस्तुनिष्ठसत्त्वगुणस्य च सुखतयाऽनुभवः। एकस्या एव पद्मावत्याः पुरुषभेदेनादृष्टभेदात् सुखदुःखमोहत्वं प्रसिद्धम्। तथा चोक्तं मधुसूदनेन—

'त्रिगुणात्मकमेकैकं वस्तु त्र्याकारमीक्ष्यते।
निजमानससंकल्पभेदेन पुरुषैस्त्रिभिः॥
कामिन्याः सुखता भर्त्रा सपत्न्या दुःखरूपता।
तदलाभात् तथाऽन्येन मोहत्वमनुभूयते॥'[23]

अपि चोक्तं विज्ञानभिक्षुणा—'यथा दुःखे द्वेषो बलवत्तरो नैवं सुखेऽभिलाषो बलवत्तरोऽपि तु तदपेक्षया दुर्बल इत्यर्थः। तथा च सुखाभिलाषं बाधित्वाऽपि दुःखद्वेषो दुःखनिवृत्तावेवेच्छां जनयतीति।'[24] अतो सुखाभिलाषस्य प्रबलत्वेऽपि दुःखनिवृत्तिरूपे परमपुरुषार्थे न प्रवृत्त्यनुपपत्तिः, दुःखद्वेषस्यैव प्रबलतरत्वात्।

20 Sā. pra. bhā. 6.9
21 Sā. sū. vṛtti. 5.27
22 Sā. pra. bhā. 5.27
23 Bhak. ras. 1.16-17
24 Sā. pra. bhā. 6.6

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अत एवोक्तं—'कुत्रापि कोऽपि सुखीति। स्वल्पो मनुष्यदेवादिरेव सुखी भवतीत्यर्थः।'[25]

तस्मात् सांख्यमते सत्त्वगुणस्यैव कार्यं[25a] सुखमदृष्ट-विषयसंप्रयोगादि-जन्यम्। अतो न नित्यसुखं नाम किंचिदस्ति। न चात्मन आनन्दरूपत्व-मपि तु चिद्रूपत्वमेव।

पातंजलेऽपि सांख्यवदेव सुखस्य सत्त्वगुणरूपत्वमन्तःकरणधर्मत्वं चाभ्यु-पेयते। योगसूत्रे सुखस्य पृथग्रूपेण निरूपणाभावेऽपि 'सुखानुशयी रागः' 'ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वा'[26]दित्यादौ सुखानुभवस्य रागहेतुत्वम्, पुण्यहेतुकविपाकानां च सुखहेतुत्वमुक्तम्। उक्तं च व्यासभाष्ये—'या भोगेष्विन्द्रियाणां तृप्तेरुपशान्तिस्तत् सुखमित्यादि।'[27] रजोगुणोद्रेकस्यो-पशान्तिस्ततश्च सत्त्वोद्रेक एव सुखमित्यर्थः। अथवा कदाचिद्दुःखाभाव एव सुखमित्युपचर्यते। न नित्यसुखं नाम किंचिदस्ति, सर्वस्यैव सुखस्य सत्त्वो-द्रेकजन्यत्वात्। यदपि शास्त्रेषु क्वचित् नित्यसुखं पठ्यते तदात्यन्तिकदुःखा-भावे एव उपचरितम्।

बौद्धमते सुखं हि चैत्तिकत्वाद्(चैत्तत्वाद्वा)विज्ञानवदेव स्वसंवेद्यम्। उक्तं च धर्मकीर्तिना—'सर्वं चित्तचैत्तानामात्मसंवेदनम्।'[28] उक्तं च धर्मोत्तरेण —'चैत्ताः...सुखादयः। सुखादय एव स्फुटानुभवत्वात् स्वसंविदिताः'[29] इत्यादि। सुखस्य ज्ञानस्य च विषयहेतुकत्वाद् अभिन्नहेतुकत्वेन तयोर-भेदाद् विज्ञानाकारविशेष एव सुखम्। विज्ञानस्य स्वसंवेदनत्वात् सुख-स्यापि स्वसंवेदनत्वम्।

जैनमतेऽपि सुखादीनां ज्ञानाभिन्नत्वं ज्ञानवत् स्वसंवेदनत्वमपि सिद्धम्। उक्तं च प्रभाचन्द्रेण—'सुखदुःखेच्छादीनां चाबुद्धिरूपत्वे रूपादिवन्नात्मगुणता युक्ता इति।'[30]

---

25 Sā. sū. ; Sā. pra. bhā. 6.7
25a Sā. kā. 12
26 Pāt. yo. sū. 2.7, 14
27 Pāt. sū. bhā. 2.15
28 Nyā. bin. p. 19 (chow.)
29 Nyā. bin. ṭikā. p.19 (chow.)
30 Pra. ka. mār. p. 597 (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्राभाकारास्त्वाहुः—'यच्च स्वसंवेदनं सर्ववित्तीनां प्रत्यक्षमुक्तं तदनुमन्यामहे। सुखादीनां यत् तदभिन्नहेतुतया तदभेदात् स्वसंवेदनमिष्टं तदनुपपन्नम्। हेत्वभेदस्यासिद्धेः। अर्थस्य ज्ञानहेतुत्वात्, ज्ञानस्य च सुखादिनिमित्तात्। असन्निहितेऽप्यर्थे तज्ज्ञानमात्रात् स्वप्नादिषु सुखाद्युपपत्तेः।'[31] पुनश्च—'सुखदुःखेच्छाद्वेषप्रयत्नास्तु मानसप्रत्यक्षवेद्याः। न च दुःखाभावमात्रं सुखम्। दुःखाभावस्य दुःखानुपलम्भरूपत्वात्, तद्वियुक्तात्मन उपलब्धेरेव दुःखानुपलम्भरूपत्वात्। आत्मोपलम्भातिरिक्तसुखोपलम्भानुभवाच्च।'[32] प्राभाकरमते तार्किकमतवदेवात्ममनःसंयोगो हेतुः। सुखं हि मानसप्रत्यक्षगम्य आत्मविशेषगुण एव। उक्तं च—'तेनाभ्यन्तराणां सुखादीनां ग्रहणे सन्निकर्षद्वयं कारणम्। आत्ममनःसन्निकर्षः संयोगाख्यः, सुखादिमनःसन्निकर्षश्च संयुक्तसमवायलक्षणः।'[33] अत आत्मन आनन्दरूपत्वमपि तेषामनभिमतम्। उक्तं च—'न च प्रेमास्पदतया आत्मन आनन्दरूपतासिद्धिः, आत्मनि प्रेमासिद्धेः। शरीरोपघाते हि दुःखोदयात् तदुपघातपरिहारार्थं सर्वे प्रार्थयन्ते इत्यात्मनि प्रेमाभिमानः।...अतो विषयविशेषसंभोगज एव आनन्द इति सुन्दरम्।'[33a]

भाट्टमतेऽपि सुखस्य मानसप्रत्यक्षगम्यत्वं स्वीकृतम्। तच्च सुखं तन्मते त्रिविधम्—'ऐहिकसुखं तु स्रक्चन्दनादिजन्यं दुःखमिश्रम्। स्वर्गसुखं तु प्रदेशान्तरप्राप्यं दुःखरहितम्।'[34] स्वर्गसुखं चोक्तं शबरस्वामिना मीमांसाभाष्ये—'प्रीतिः स्वर्ग इति। इह पुनः स्वर्गशब्द एव प्रीतेरभिधाता। प्रीतिवचनश्चेत् यागो गुणभूतः, प्रीतिः प्रधानम्। कुतः। तादर्थ्यात् पुरुषप्रयत्नस्य। प्रीत्यर्थं हि पुरुषो यतते। यदि यागो न प्रीत्यर्थो भवेत्, असाधकं कर्म भवेत्। यो हि प्रीत्यर्थः स साध्यते नान्यः। यद्यपि यागः कर्तव्यः श्रूयते, तथापि न कर्तव्यः। सुखदः कर्तव्यो भवति। दुःखदो यागः, तस्मात् प्रत्यक्षेणाकर्तव्यः। प्रत्यक्षेण च दुःखदः। तस्मादकर्तव्यो यागः(स्यात्), यदि न प्रीत्यर्थः'[35] इत्यादि। उक्तं च कुमारिलभट्टेन टुप्टीकायां—'यदीप्सितं पुरुषार्थत्वेन तस्यैव कामना मुख्या; तदुपायभूता

---

31 Pra. pañ. p. 144 (B.H.U.)  
32 Ibid p. 330 (B.H.U.)  
33 Ibid, p. 153. (B.H.U.)  
33a Ibid p. 335 (B.H.U.)  
34 Mā. me. p. 252 (Adyar)  
35 Mī. śa. bhā. 6.1.2

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



क्रिया, तत्साधनानि च नान्तरीयकत्वात् काम्यन्ते। साध्यसम्पत्तये सर्वः प्रवर्तते, न तु कर्म सेत्स्यतीति।'[36] मोक्षसुखं च नित्यं मोक्षे अभिव्यज्यते—आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इत्यादिश्रुतेः।[37]

रामानुजमतेऽपि विषयरूपोपाधियोगात् बुद्धेरेवाकारभेदः सुखमात्मगुणरूपम्। येन विषयविशेषेण विशेषितं ज्ञानं सुखस्य जनकमित्यभिमतं तद्विषयज्ञानमेव सुखं तेनैव सुखित्वव्यवहारोपपत्तेः। ज्ञानस्य सुखजनकतया ज्ञानातिरिक्तसुखांगीकारे प्रमाणाभावात्। उक्तं च—'सुखादिजनकतया ज्ञानातिरेके प्रमाणाभावा'[38] दिति। 'आनन्दादयः...जीवगुणा अनन्ता धर्मभूतज्ञानावस्थाविशेषा एव'[39] इति च। सर्वथाऽपि ज्ञानातिरेकाभावेऽपि सर्वेषामनुकूलवेदनीयं सुखस्वरूपं तेषां सम्मतमेव। उक्तं च श्रीभाष्ये—'तदेव हि सुखं यदनुभूयमानं पुरुषानुकूलं भवति। कर्मवश्यानां क्षेत्रज्ञानां ब्रह्मणोऽन्यत्वेनानुभूयमानं कृत्स्नं जगत् तत्तत्कर्मानुरूपं दुखं च परिमितसुखं च भवति।'[40]

अद्वैतवेदान्तमते 'विज्ञानमानन्दं ब्रह्म'[41], 'यो वै भूमा तत्सुख'[42] मित्यादिश्रुतिभिः स्वरूपतो नित्यमेव सुखं चिदात्मस्वरूपम्। यदा तु सात्त्विकान्तःकरणवृत्तिषु प्रतिफलितमभिव्यज्यते तदा जीवैर्जन्यसुखरूपेणोपभुज्यते। सात्त्विकवृत्तेर्जन्यत्वेन सुखस्यापि जन्यत्वं प्रतीयते। तदुक्तं—'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुजीवन्ति'[43]। सात्त्विकवृत्तिप्रतिबिम्बितसुखमेवात्र मात्राशब्देन विवक्षितम्। तदभिप्रेत्यैव गीतायामुक्तं—मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः'[44] इत्यादि। ब्रह्मस्वरूपसुखं चाभिप्रेत्याह—'सुखमात्यन्तिकं यत् तद् बुद्धिग्राह्यमतीन्द्रिय'[45] मिति, 'सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते'[46] इति च।

---

36 Mī. ṭup. ṭīkā, 6.1.2
37 Mā. me. p. 212 (Adyar)
38 Yat. mat. dīp. p. 59 (A.A.)
39 Ibid p. 60 (A.A.)
40 Bṛ. sū. Rā. bhā. 1.3.7
41 Bṛ. up. 3.9.28
42 Chā. up. 7.13.1
43 Bṛ. up. 4.3.32
44 Gītā 2.14
45 Ibid 6.21
46 Ibid 6.28

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



ब्रह्मात्मस्वरूपत्वादेव सुखस्य ईप्साविषयत्वेन सर्वप्रवृत्तिमूलत्वं सिध्यति। तदुच्यते—'यदा वै सुखं लभतेऽथ करोति, नासुखं लब्ध्वा करोति, सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति।'[47] अस्यानन्दस्वरूपस्यासत्त्वे न कश्चित् कंचिदपि व्यापारं कुर्यात्, न वा जीवनधारणमपि कुर्यात्। तदुच्यते—'रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति। को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति।'[48]

अपि च वेदान्तमते अयमात्मा ब्रह्म इत्यादि वाक्यशतैरात्मनो ब्रह्मस्वरूपत्वावधारणादात्मैवानन्दस्वरूप इति सिध्यति। युक्त्याऽपि आत्मन आनन्दस्वरूपत्वं सिद्धं भवति। सुखस्वरूपत्वादेवात्मा निरतिशयप्रेमास्पदं भवति। परमप्रेमास्पदात्मसम्पर्कादेवान्यत् सर्वं प्रियं भवति। तदुक्तं —'इयमात्मा, परानन्दः परप्रेमास्पदं यतः।'[49] परमप्रेमास्पदत्वं चात्मनः सर्वेषामनुभवसिद्धं 'आत्मनस्तु कामाय सर्वं प्रियं भवति'[50]—इत्यादिश्रुतिप्रसिद्धं च। तच्चात्मनः परमानन्दरूपत्वं प्रकाशितमप्यप्रकाशितं विद्यते। अतः प्रकाशितत्वादात्मनि प्रेम, अप्रकाशितत्वाच्च विषयस्पृहेति उभयमपि सिध्यति।[51]

नन्वात्मन एव सुखरूपत्वे सुखस्य च नित्यत्वे कथं विषयसंस्पर्शवशात् सुखमुत्पद्यते? उच्यते—विषयाकांक्षावशाच्चित्तं यदा विषयाभिमुखं बहिर्मुखं भवति तदा रजस उद्रेकात् तृष्णादुखं तापाख्यमुपजायते। यदा तु विषयप्राप्तेर्विषयसम्भोगाद्वा तृष्णातापस्य तात्कालिक्युपशान्तिर्भवति तदा चित्तस्य प्रत्यावर्तनादन्तर्मुखत्वं सत्त्वप्राधान्यं च भवति, अन्तर्मुखचित्तवृत्तौ चात्मस्वरूपसुखस्य प्रतिबिम्बनं जायते। तदेव जन्यसुखं विषयसुखं वेत्यभिधीयते।[52] अतएव पंचदश्यां ब्रह्मानन्दो (आत्मानन्दो) वासनानन्दो विषयानन्दश्चेति त्रैविध्यमानन्दस्योक्तम्।[53] सुषुप्तावनुभूतं कारणशरीरे

---

47 Chā. up. 7.12.1
48 Tait. up. 2.7
49 Pañcadaśī 1.8
50 Bṛ. up. 4.5.6.
51 Pañcadaśī 1.11-14
52 Ibid 11.86
53 Ibid 11.87

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रतिबिम्बितसुखमेव सुप्तोत्थितस्य तुष्णींस्थितावनुभूयमानं सुखदुःखान्तरालेषु चानुभूयमानं सुखं वासनानन्द इत्युच्यते। विषयानन्दस्यैव पुनर्भेदाः प्रिय-मोद-प्रमोदा यथाक्रममिष्टदर्शन-लाभ-सम्भोगादिजन्याः। प्रकारान्तरेण सुखस्य द्वैविध्यमुक्तं—'बाह्यभोगान्मनोराज्यात् सुखदुःखे द्विधा मते।'[54] गीतायां च प्रकारान्तरेण सुखस्य सात्त्विक-राजसिक-तामसिकभेदेन त्रैविध्यं वर्णितम्—

'सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥
विषयेन्द्रियसंयोगाद् यत्तदग्रेऽमृतोपमम्।
परिणामे विषमिव तत् सुखं राजसं स्मृतम्॥
यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत् तामसमुदाहृतम्॥'[55] इति।

सुप्तोत्थितस्य—या सुखमस्वाप्समिति स्मृतिः सा सुषुप्तिकालीनसुखानुभूतिपूर्वा भवितुमर्हतीति सुषुप्तौ सुखं तदनुमवश्च सिध्यति। तच्च सुखं कारणशरीरस्थाविद्यावृत्तिप्रतिबिम्बितात्मस्वरूपसुखमेव।

अथवा सुषुप्तिकाले—'सम्भवति च मुख्य एव स्वरूपानन्दानुभवः। ननु तदपि सुखमविद्यावृतं न प्रकाशमर्हति। न, अनावृतसाक्षिचैतन्यसुखांशस्य प्रकाशोपपत्तेः। जागरणे तर्हि किमिति नावभासते? भासते एव परमप्रेमास्पदत्वलक्षणं सुखम्। तीव्रवायुविक्षिप्तप्रदीपप्रभावत् मिथ्याज्ञानविक्षिप्ततया न स्पष्टमवभासते। सुषुप्तौ तु तदभावादधिकं व्यज्यते इति।'[56] उक्तं च

54 Ibid 11.94

55 Gita 18.36-39

56 Pañ. viv. II. p. 262. (Madras Gov.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



'सुषुप्तिकाले सकले विलीने, तमोऽभिभूतः सुखरूपमेतीति ।'[57] 'आनन्दभुक् चेतोमुखः प्राज्ञ'[58] इति च। उक्तं च विद्यारण्येन—

'तथा सति सुषुप्तौ च दुःखाभावोऽनुभूतितः ।
विरोधिदुःखराहित्यात् सुखं निर्विघ्नमिष्यताम् ॥'[59] इत्यादि ।

तैत्तिरीयेऽपि प्रियमोदप्रमोदादिसुखभेदानां आनन्दसामान्यस्य च 'ब्रह्म पुच्छं प्रतिष्ठा' इत्युक्त्वा ब्रह्मानन्दस्यैव प्रतिविम्बत्वेन कार्यरूपाः प्रियमोदप्रमोदादिभेदा विषयानन्दा इति प्रतिपादितम् ।'[60] छान्दोग्ये—'नाल्पे सुखमस्ति, यो वै भूमा तत्सुख'[61]मित्यनेन परिच्छिन्नविषयाणामधिकतृष्णाहेतुत्वेन दुःखबीजत्वात् सुखहेतुत्वं निषिध्यते, तृष्णा हि दुःखबीजमिति । आत्मस्वरूपस्य भूमसुखस्यैव च ब्रह्मात्मज्ञानेन वरणीयत्वमुच्यते ।

——o——

57 Kai. up. 1. 13
58 Māṇ. up. 1. 5
59 Pañcadaśī 11. 38
60 Tait. up. 3. 5
61 Chā. up. 7. 13. 1



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## दुःखनिरूपणम्

अधर्मरूपादृष्टकारणजन्यमनभिलषितसंप्रयोगरूपदृष्टकारणकं दुःखं हि सर्वेषां सर्वदा प्रतिकूलवेदनीयम्। शत्रुसुखस्य कस्मैचित् प्रतिकूलवेदनीयत्वेऽपि न सर्वेषां प्रतिकूलवेदनीयत्वं शत्रुं प्रति प्रतिकूलवेदनीयत्वाभावादिति न तत्रातिव्याप्तिः। पदार्थान्तरस्य कदाचित् प्रतिकूलवेदनीयत्वेऽपि न सर्वदा (नियमेन) प्रतिकूलवेदनीयत्वम्। स्वदुःखं तु सदैव सर्वं प्रति प्रतिकूलवेदनीयम्। तद्धि अन्तःकरणधर्मविशेषः, तार्किकादिमते आत्मविशेषगुणविशेषो वा। स्वतो द्वेषविषयत्वं वा दुःखस्य लक्षणम्। दुःखत्वज्ञानादेव दुःखे द्वेषो जायते। दुःखसाधनताज्ञानाच्च परतः पदार्थान्तरेषु द्वेषः।

'बाधनालक्षणं दुःखमिति'[1] गौतमीयन्यायसूत्रम्। बाधना पीडनं सन्तापनं, सा लक्षणं यस्य तद्दुःखमित्यर्थः। दुःखस्य पीडनं हि प्रतिकूलवेदनीयत्वमेव। अत एवोक्तं शिवादित्येन—'दुःखत्वसामान्यवन्निरुपाधिप्रतिकूलवेद्यं दुःखमिति।'[2] स्वतो द्वेषविषयत्वमेव निरुपाधिप्रतिकूलवेद्यत्वम्। सर्पशत्रुप्रभृतिषु द्वेषस्तु न स्वतः (निरुपाधिः), किन्तु दुःखसाधनतयैवेति ध्येयम्।

वैशेषिकसूत्रे दुःखकारणनिर्वचने सुखवदेव दुःखस्यापि आत्ममनःसंयोगजन्यत्वमिन्द्रियार्थसंयोगजन्यत्वं चाभिहितम्—'आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे इति।'[3] अधर्मजन्यत्वं तु विशेषो बोध्यः। अत एव प्रशस्तपादेन उपघातलक्षणं दुःखमिति लक्षणमुक्त्वा दुःखकारणानि वर्णितानि—'विषाद्यनभिप्रेतविषयसान्निध्ये सत्यनिष्टोपलब्धीन्द्रियार्थसन्निकर्षादधर्माद्यपेक्षादात्ममनसोः संयोगाद् यदमर्षोपघातदैन्यनिमित्तमुत्पद्यते तत् दुःखम्। अतीतेषु सर्पव्याघ्रचौरादिषु स्मृतिजम्। अनागतेषु संकल्पजम्।'[4] लक्षणं च व्याख्यातं न्यायकन्दल्यां — 'उपहन्यतेऽनेनेत्युपघातः, उपघातलक्षणमुपघातस्वभावम्।

---

1 Nyā. sū. 1.1.21
2 Sap. pad. 88. (C.S.S.)
3 Vai. sū. 5.2.45
4 Pra. bhā. p. 633 (V.S.V.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



दुःखमुपजातं प्रतिकूलस्वभावतया स्वात्मविषयमनुभवं कुर्वदात्मानमुपहन्ति। दुःखे सति तदनुभवलक्षण आत्मोपघातः स्यात्।'[5] नव्यैरप्युक्तं—'अधर्मजन्यं दुखं स्यात् प्रतिकूलं सचेतसाम्।'[6] 'दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः।'[7]

उक्तं च माधवसरस्वत्या वैशेषिकमतनिरूपणे—'प्रतिकूलतया निरुपाधिवेद्यं दुःखम्। तत्साधनं तु सोपाधिवेद्यम्। न च सुखदुःखयोः परस्पराभावरूपत्वम्, अन्योन्यानिरूप्यत्वात्। तस्माद् द्वयमपि भावरूपम्। दुःखस्य चासाधारणकारणमधर्मः।'[8]

दुःखं ह्यात्मविशेषगुणत्वेन जायमानमेव मानसप्रत्यक्षगम्यमिति नाज्ञातसत्ताकं दुःखं सम्भवतीति तार्किकमतम्। अन्येषामपि मते अन्तःकरणधर्मत्वेन जायमानमेव साक्षिवेद्यमिति नाज्ञातसत्ताकम्।

सांख्यपातंजलमते तु नात्मविशेषगुणो दुःखमपि तु चित्तधर्म एव अदृष्टजन्यः। अधर्मवशात् अनिष्टसंप्रयोगे वाह्यवस्तुनि चित्ते च रजोगुणस्योद्रेके सति रजःपरिणामविशेष एव दुःखतयाऽनुभूयते। उक्तं च योगभाष्ये—'भोगेष्विन्द्रियाणां…या लौल्यादनुपशान्तिस्तद्दुःखमिति।'[9] लौल्याद् रजोगुणोद्रेकादित्यर्थः। अनुपशान्तिरिति चित्तस्य क्षोभ इत्यर्थः। अतस्त्रिगुणात्मकपदार्था अप्यदृष्टानुसारेण सुखदुःखमोहात्मकाः सर्वे सर्वरूपा भवन्ति।[10]

इदमत्रावधेयम्—यद्यपि लोके सुखस्य मुख्यतया सुखसाधनानां च गौणतया सुखत्वमेव न दुःखत्वं परस्परविलक्षणत्वात्, तथापि सूक्ष्मवेदनानां विवेकिनां योगिनां च सर्वमेव दुःखं परिणामादिदुःखरूपत्वात् गुणवृत्तिविरोधाच्च। तदुक्तं योगसूत्रे—'परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः।'[11] उक्तं च भाष्ये—'तथा चोक्तं—नानुपहत्य भूतान्युपभोगः सम्भवतीति।…विषयसुखं चाविद्येत्युक्तम्, या भोगेष्विन्द्रियाणां तृप्तेरुप-

---

5 Nyā. Kan. p. 635 (V.S.V.)
6 Bhā. pari. p. 502 (N.S.)
7 Sid. muktā. p. 503 (N.S.)
8 Sar. dar. kau. p. 28 (Trivandrum)
9 Yo. sū. bhā. 2.15
10 Ibid 2. 15
11 Pāt. yo. sū. 2.15

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



शान्तिस्तत् सुखम्, या लौल्यादनुपशान्तिस्तद् दुःखम्। ...यतो भोगाभ्यासमनु विवर्धन्ते रागाः कौशलानि चेन्द्रियाणामिति, तस्मादनुपायः सुखस्य भोगाभ्यास इति, स खल्वयं वृश्चिकविषभीत इवाशीविषेण दष्टो यः सुखार्थी विषयवासनानुवासितो महति पंके निमग्न इति। एषा परिणामदुःखता नाम प्रतिकूला सुखावस्थायामपि योगिनमेव क्लिश्नाति अक्षिपात्रकल्पो हि विद्वानिति।'[12]

न्यायभाष्येऽपि दुःखस्य प्रमेयपदार्थमध्ये परिगणनं सुखमात्रस्य दुःखमिश्रितत्वात् सर्वे भावा दुःखात्मका इति भावनया वैराग्योत्पादनार्थं न तु सुखपदार्थस्य प्रत्याख्यानार्थम्। उक्तं च न्यायभाष्ये—'एवं सर्वमुत्पत्तिस्थानं विविधबाधनानुषक्तं पश्यतः सुखे तत्साधनेषु च शरीरेन्द्रियबुद्धिषु दुःखसंज्ञा व्यवतिष्ठते इति।'[12a] अन्यच्च—'बाधना पीडा ताप इति। तयाऽनुबद्धमनुषक्तमविनिर्भागेण वर्तमानं दुःखयोगाद्दुःखमिति। सोऽयं सर्वं दुःखेनानुविद्धमिति पश्यन् दुःखं जिहासुर्जन्मनि दुःखदर्शी निर्विद्यते, निर्विण्णो विरज्यते, विरक्तो विमुच्यते।'[13] उक्तं च जयन्तभट्टेन—'सकलप्राणभृदनुभवसाक्षिकत्वेन च सुखस्य प्रत्याख्यातुमशक्यत्वात्,.. ... न सुखलेशस्य संसारे जन्तुभिरनुभूयमानस्य प्रत्याख्यानाय दुःखग्रहणम्, सर्वत्र तथात्वभावनोपदेशार्थम्, सन्नपि सुखलवो दुःखमेवेति भावयितव्यः, तत् साधनमपि सर्वं दुःखमेवेति मन्तव्यम्।'[14]

सर्वं दुःखमिति बुद्धवाक्यानुसारिणां बौद्धानामपि मते दुःखमेवार्यसत्यचतुष्टयानां प्रथमं सत्यम्। यथोक्तं हरिभद्रेण—

...'चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः।
दुःखं संसारिणः स्कन्धास्ते च पंच प्रकीर्तिताः॥
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च॥'[15]

---

12 Yo. sū. bhā. 2.15

12a Nyā. sū. bhā. 4.1.55

13 Ibid 1.1.21

14 Nyā. mañ. II. p. 76 (chow.)

15 Ṣaḍ. dar. sāmu. p. 5 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



एतदपि न स्वसंवेद्यसुखप्रत्याख्यानार्थम्, यत उक्तं मणिभद्रेण टीकायां—'वेद्यते इति वेदना पूर्वभवपुण्यपापपरिणामबद्धाः सुखदुःखानुभवरूपाः।'[16] सुखवद्दुःखमप्यात्मसंवेदनं स्वसंवेद्यमित्यर्थः। उक्तं च—'सर्वं चित्तचैत्तानामात्मसंवेदनमिति।'[17]

तच्च दुःखं त्रिविधं प्रसिद्धम्—आध्यात्मिकमाधिभौतिकमाधिदैविकं च। तत्रात्मानं स्वसंघातमधिकृत्य प्रवृत्तमित्याध्यात्मिकम्। तदपि द्विविधम्—शारीरं मानसं च। तत्र शारीरं व्याध्यादिजनितम्, कामक्रोधादिजनितं मानसम्। यद्यपि सर्वमेव दुःखं मानसं तथापि मनोमात्रजन्यत्वाजन्यत्वाभ्यां मानसामानसत्वभेदः। तथा भूतानि प्राणिनोऽधिकृत्य प्रवृत्तमाधिभौतिकम्—यथा व्याघ्रचौराद्युत्थम्। देवानग्निवाय्वादीनधिकृत्य प्रवृत्तमित्याधिदैविकम्—यथा दाहशीतादिजनितम्।[18]

प्रकारान्तरेण दुःखं द्विविधं मीमांसकादिमतप्रसिद्धम्- ऐहिकमामुष्मिकं च। 'तत्र ऐहिकं रोगादिजन्यम्। आमुष्मिकं तु रौरवमहारौरवरूपम्। तत्रोभयत्राप्यधर्मः कारणम्।'[19]

किं च शरीराभिमानिनो न धर्माधर्मजनितसुखदुःखेभ्योऽव्याहतिरस्ति। तदुक्तं—'न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति'[20] इति। परन्तु शरीराभिमानरहितस्य विदुषो मोक्षप्राप्तस्य वाऽशरीरस्यात्मनो न प्रियाप्रियाभ्यां सुखदुःख्याभ्यां संस्पर्शोऽस्ति। तदप्युक्तं तत्रैव—'अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः इति।'[21]

सर्वेषां दुःखानामात्यन्तिकनिवृत्तिः सर्वेषामेव मनुष्यानामत्यन्तमिष्टा। सैव सांख्य-पातञ्जल-तार्किक-वेदान्तादिमतेषु मोक्षरूपेणाभिप्रेता॥

—o—

16 Saḍ. dar. samu. ṭīkā p. 6 (Chow.)

17 Nyā. bin. p. 19 (chow.)

18 Sām. pra. bhā. 1.1

19 Mā. me. p. 253 (Adyar)

20 Chā. up. 9.12.1

21 Ibid 8.12

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# इच्छानिरूपणम्

'यज्जातीयस्यार्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान् तज्जातीयमेवार्थं पश्यन्नुपादातुमिच्छती'[1] त्युक्तं वात्स्यायनेन न्यायसूत्रभाष्ये। अहमिच्छामीत्यादिप्रतीतिसिद्धे'च्छात्वसामान्यवती अर्थित्वलक्षणा इच्छा'[2] —इत्युक्तं शिवादित्येन। सा च ममेदं स्यादित्येवमादिरूपा। सुखत्वज्ञानं इष्ट-(सुख-) साधनताज्ञानं वा इच्छोत्पत्तौ कारणम्। सा च पुनः प्रवृत्तौ कारणम्। तथा चोक्तं प्राचीनैः—ज्ञानजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः। सुखत्वज्ञानजन्या सुखसाधनत्वज्ञानजन्या दुःखाभावत्वज्ञानजन्या दुःखाभावसाधनत्वज्ञानजन्या च इच्छा भवतीत्यर्थः। इच्छा पुनश्चिकीर्षाद्वारा कृतौ प्रयत्ने हेतुर्भवति। तदनन्तरं च शारीरचेष्टारूपा क्रिया जायते। उक्तं च—

'निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ॥'[3]

सुखत्वज्ञानात् सुखे, दुःखाभावत्वज्ञानाद्दुःखाभावे, तदन्यतरसाधनत्वज्ञानाच्च सुखसाधने दुःखाभावसाधने वा (विषयादौ) इच्छा जायते इति भावः। इच्छा यथा चिकीर्षाद्वारा प्रवृत्तिहेतुर्भवति तदग्रे निरूपयिष्यते।

सा चेच्छा तार्किकादिमते अहमिच्छामीत्यादिप्रतीतेरात्मविशेषगुण एव मानसप्रत्यक्षगम्या,[4] ज्ञानसुखादिवत् तृतीयक्षणविनाशिनी च। ज्ञानवत् सविषया च। तथा चोक्तं विश्वनाथेन—'इच्छा द्विविधा—फलविषयिनी उपायविषयिणी च, फलं तु सुखं दुःखाभावश्च। तत्र फलेच्छां प्रति फलज्ञानं कारणम्। अत एव पुरुषार्थः सम्भवति, यज्ज्ञातं स्ववृत्तितयेष्यते स पुरुषार्थ इति तल्लक्षणात्। इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः। उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम्।'[5]

---

1 Nyā. sū. bhā. 1.1.10
2 Sap. pad. 89 (C.S.S.)
3 Bhā. pari. p. 503 (N.S.)
4 Pra. bhā. p. 132 (V.S.V.)
5 Sid. muktā. p. 503 (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उक्तं च प्रशस्तपादेन—'स्वार्थं परार्थं वाऽप्राप्तप्रार्थनेच्छा। सा चात्ममनसोः संयोगाद् सुखाद्यपेक्षाद् स्मृत्यपेक्षाद्वोत्पद्यते। प्रयत्नस्मृतिधर्माधर्महेतुः।'[6] सुखाद्यपेक्षाद् सुखे इच्छा, सुखाभिज्ञस्य सुखस्मृतिपूर्वकः पूर्वसुखसाधनसजातीये इच्छा उद्पद्यते इति भावः। इच्छा पुनः प्रयत्ने प्रवृत्त्यादौ, अभिलषितन्निषयें संस्कारोत्पादादिच्छाविषये पुनः स्मृतौ, प्रवृत्तिद्वारा धर्माधर्मयोश्च हेतुर्भवतीत्यर्थः।

उक्तं च तेनैव—'कामः, अभिलाषः, रागः, संकल्पः, कारुण्यम्, वैराग्यम्, उपधा, भाव इत्येवमादय इच्छाभेदाः। मैथुनेच्छा कामः, अभ्यवहारेच्छा (भोजनेच्छा) अभिलाषः, पुनः पुनर्विषयानुरंजनेच्छा रागः। अनासन्नक्रियेच्छा संकल्पः। स्वार्थमनपेक्ष्य परदुःखप्रहानेच्छा कारुण्यम्, दोषदर्शनाद् विषयत्यागेच्छा वैराग्यम्। परवंचनेच्छा उपधा। अन्तर्निगूढेच्छा भावः। चिकीर्षा-जिहीर्षेत्यादिक्रियाभेदादिच्छाभेदा भवन्ति।'[7]

उक्तं च जयन्तभट्टेन—'अनुकूलेष्वर्थेष्वभिलापलक्षणो रागः,...कामो मत्सरः स्पृहा तृष्णा लोभ इति पंचप्रकारो रागपक्षः, स्त्रीसम्भोगेच्छा कामः, यदन्यस्मै दीयमानमपि वस्तु धनवन्न क्षीयते तदपरित्यागेच्छा मत्सरः, अनात्मीयवस्त्वादित्सा स्पृहा, पुनर्भवप्रतिसन्धानहेतुभूतेच्छा तृष्णा, निषिद्धद्रव्यग्रहणेच्छा लोभ इत्यभिलापप्रकारभेदाद् रागपक्ष एवायम्।'[8] एवं च उक्ताः सर्वे आत्मगुणा ( सांख्यादिमतेन अन्तःकरणधर्माः ) इच्छाया एव प्रकारभेदा बोध्यव्याः। अतः कामशास्त्रोक्तस्य रतिशृंगारादेरत्रैव इच्छापदार्थेऽन्तर्भावः। तेषां रतिविशेषे रतिसाधनांगनादौ वा इच्छारूपत्वात्।

एवं भक्तिशास्त्रोक्तभावभक्त्यादिपदार्थानामपि परमेश्वरेऽनुरागविशेषरूपत्वादिच्छायामेवान्तर्भावः। स्नेहप्रीत्यादिकमपि सर्वमिच्छायाः प्रकारभेदा एव। ननु विषयस्त्र्यादिप्रीतेरिच्छारूपत्वेऽपि केयमात्मप्रीति यां 'आत्मानमेव प्रियमुपासीत'[9] 'आत्मनस्तु कामाय सर्वं प्रियं भवति'[10] 'प्रेयोऽन्यस्मात् सर्वस्मादन्तर-

---

6 Pra. bhā. p. 634 (V.S.V.)

7 Ibid p. 635-36 (V. S. V.)

8 Nyā mañ. II. p. 70 (chow.)

9 Bṛ. up. 1.4.8

10 Ibīd. 2.4.5

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तरं यदयमात्मा'[11] इत्याद्युपनिषद्वाक्येषु श्रूयते ? अप्राप्तविषये एवेच्छायाः सम्भवात् न सा नित्यप्राप्ते निजात्मनि सम्भवतीति चेन्न। आत्मस्वरूपसुखमात्रावलम्बिनी सात्त्विकी अन्तःकरणवृत्तिरेवात्मप्रीतिरिच्छाश्रद्धादिव्यतिरिक्ता एवेति वेदान्तानुसारिविद्यारण्यमतम्। तथा चोक्तं—

'तर्ह्यस्तु सात्त्विकी वृत्तिः सुखमात्रानुवर्तिनी।
प्राप्ते नष्टेऽपि सद्भावादिच्छातो व्यतिरिच्यते॥
सुखे वैषयिके प्रीतिमात्रमात्मा त्वतिप्रियः।
सुखे व्यभिचरत्येषा नात्मनि व्यभिचारिणी॥'[12]

सुखे इत्यस्य वैषयिकसुखे इत्यर्थः। नित्ये आत्मसुखे अतिप्रीतिस्त्वव्यभिचारिण्येव।

पातंजलेऽपि—'सुखानुशयी रागः'[13]—इत्यत्रेच्छायाः प्रबलाया एव रागशब्देन निरूपणं कृतम्। उक्तं च भाष्ये—'सुखाभिज्ञस्य सुखानुस्मृतिपूर्वः सखे तत्साधने वा यो गर्धस्तृष्णा लोभः स राग इति।'[14] उक्तं च वाचस्पतिना—'अनुभूयमाने तु सुखे नानुस्मृतिमपेक्षते, तत्साधने तु स्मर्यमाने दृश्यमाने वा सुखानुस्मृतिपूर्व एव रागः, दृश्यमानमपि हि सुखसाधनं तज्जातीयतया चास्य सुखहेतुत्वमनुमाय इच्छति।'[15] उक्तं च योगवार्तिके—'तेन सुखसाक्षात्कारतः सुखस्मृतितश्च रागो भवतीति रागस्य कारणमुक्तम्।'[16]

माधवसरस्वत्या तु वैशेषिकरीत्या सर्वदर्शनकौमुद्यां लक्षणादिकमुक्तमिच्छायाः। यथा—'इष्टव्यवहारहेतुर्गुण इच्छा। इच्छामीत्यनुभवसिद्धा। चिकीर्षा-श्रद्धा-संकल्पादय इच्छाविशेषाः। सुखमिच्छाम्, दुःखं द्वेषम्, इच्छाद्वषौ प्रयत्नमिति न्यायेन सुखादिच्छा जायते, प्रयत्नं च जनयति। अत एवेष्टसाधनताज्ञानात् इच्छाद्वारा पुरुषस्य प्रवृत्तिरित्युच्यते। शास्त्रे इष्टं तु सुखमेव।'[17]

——०...—

11 Ibid. 1.4.8
12 Pañcadaśī, 12.22.25
13 Pāt. Yo. sū. 2.7
14 Yo. sū. bhā. 2.7
15 Tat. Vai. 2.7
16 Yo. Vār. 2.7
17 Sar. dar. Kau. p. 30 (Trivandrum)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## चिकीर्षानिरूपणम्

चिकीर्षाऽपीच्छाविशेष एवेति पूर्वमेवोक्तम्। कर्तुमिच्छा चिकीर्षा इति सरलार्थः। तथाऽपि त्विच्छासाधारणादस्या विशेषात् पृथङ्निरूपणम्। वृष्ट्यादौ हीष्टसाधनताज्ञानादिच्छोत्पत्तावपि न चिकीर्षा जायते कृतिसाध्यत्वज्ञानाभावात्। कृतिसाध्यत्वज्ञाने सतीष्टसाधनताज्ञानात् चिकीर्षा जायते एव पाकादौ। तथा चोक्तं—'कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषयिणीच्छा चिकीर्षा। पाकं कृत्या साधयामीति तदनुभवात्। चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं च कारणम्। ......अतएव वृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा।......( अपि च ) वलवद्द्विष्टसाधनताज्ञानं ( चिकीर्षायां ) प्रतिवन्धकमतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा।...( कस्यचिन्मते ) वलवदनिष्टाजनकत्वज्ञानं कारणम्।'[1] तन्मते तु सर्वदा सर्वत्रैव—'इदं वलवदनिष्टं न जनयिष्यति' इति ज्ञानं चिकीर्षायां कारणतया अपेक्षितं स्यात्, तन्न सम्यक्, अनुभवविरोधात्। तादृशज्ञानं विनापि कृतिसाध्यताज्ञानादिष्टसाधनताज्ञानाच्च भोजनादौ चिकीर्षा जायते। वलवद्द्विष्टसाधनत्वज्ञानस्य प्रतिवन्धकत्वेन तदभावस्यैव तत्र सत्त्वात् चिकीर्षोपपत्तेः। मधुविषसंपृक्तान्नभोजने तु न चिकीर्षा, वलवद्द्विष्टसाधनत्वज्ञानस्य प्रतिवन्धकस्य तत्र सत्त्वात्। अत्रापि द्विष्टस्य ( दुःखस्य ) इष्टापेक्षया वलवत्तरत्वज्ञानमपेक्षितम्। अत एव दुःखजनके रन्धनादौ द्विष्टसाधनत्वज्ञानसत्त्वेऽपि तद्दुःखस्येष्टापेक्षयाऽल्पीयस्त्वज्ञानात् जायते एव चिकीर्षा।

—-—०—-—

1 Sid. muktā. p. 504 (N.S.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# द्वेषनिरूपणम्

'एवमेकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद्दुःखहेतौ द्वेषः' इति, 'अमर्ष-लक्षणो द्वेषः'[1] इति चोक्तं न्यायभाष्ये वात्स्यायनेन। 'द्वेषत्वसामान्यवान् प्रज्वलनात्मको द्वेषः'[2]—इति द्वेषलक्षणं शिवादित्येन कृतम्। द्वेषत्वसामान्यं हि द्वेष्मीत्यादिप्रतीतिसिद्धम्। उक्तं च प्रशस्तपादेन—'प्रज्वलनात्मको द्वेषः। यस्मिन् सति प्रज्वलितमिवात्मानं मन्यते स द्वेषः। स चात्ममनसोः संयोगाद् दुःखापेक्षाद् स्मृत्यपेक्षाद्वोत्पद्यते। यत्न-स्मृति-धर्माधर्महेतुः। क्रोधो द्रोहो मन्युरक्षमाऽमर्ष इति द्वेषभेदाः'[3], द्वेषस्यैवैते प्रकारभेदा इत्यर्थः। तार्किकादिमते सर्वेषामेवात्मविशेषगुणानामात्म-मनःसंयोगजन्यत्वाद्-द्वेषोऽप्यात्ममनसोः संयोगाद् जायते। अनुभूते दुःखे तत्सजातीये च द्वेषस्तु दुःखत्वज्ञानादेव भवतीति बोध्यम्। अतीते दुःखहेतौ द्वेषस्तु स्मृत्यपेक्षाद् भवति। तथाचोक्तं श्रीधरेण—'अतीते दुःखहेतौ तज्जदुःखस्मृतिजो द्वेषः।... स्मृतिरपि द्वेषादुपजायते, यो यं द्वेष्टि स तं सततं स्मरति।... शरीरेन्द्रिया-दिविकारहेतुः क्षणमात्रभावी द्वेषः क्रोधः। अलक्षितविकारश्चिरानुबद्धापकारा-वसानो द्वेषो द्रोहः। अपकृतस्य प्रत्यपकारासमर्थस्यान्तर्निगूढो द्वेषो मन्युः। परगुणद्वेषोऽक्षमा। स्वगुणपरिभवसमुत्थो द्वेषोऽमर्षः।'[4] यथा इच्छायाः प्रयत्नः, प्रयत्नाच्च प्रवृत्ति-निवृत्तिरूपाद् धर्माधर्मौ जायेते, तथा द्वेषादपि प्रयत्नः, तस्माच्च धर्माधर्मौ उत्पद्येते।

द्वेषस्य स्वरूपं प्रकारभेदाश्चोक्ता जयन्तभट्टेन—'प्रतिकूलेष्वसहलक्षणो द्वेषः।... द्वेषपक्षोऽपि पंचविधः, क्रोध ईर्ष्याऽसूया द्रोहोऽमर्ष इति। अक्षिभ्रुवा-दिविकारहेतुः प्रज्वलनात्मकः क्रोधः, साधारणेऽपि वस्तुनि परस्य दर्शनाद्य-सहनमीर्ष्या, परगुणेष्वक्षमाऽसूया, परापकारो द्रोहः, अदर्शितमुखादिविकारः परं प्रति मन्युरमर्ष इत्यसहनप्रकारभेदादेव द्वेषपक्षः।'[5]

---

1 Nyā. sū. bhā. 1.1.10 ; 4.1.3    2 Sap. pad. 90 (C.S.S.)
3 Pra. bhā. p. 637 (V.S.S.)    4 Nyā. kan. p. 637-38 (V.S.V.)
5 Nyā. mañ. II. p. 71 ; Nyā. sū. bhā. 4.1.3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उक्तं च विश्वनाथेन—'...दुःखं स्यात् प्रतिकूलं सचेतसा'मिति, 'दुःखत्वज्ञानादेव स्वाभाविकद्वेषविषय इत्यर्थः'[6] इति च। तथा च दुःखत्वज्ञानाद् दुःखे, दुःखसाधनत्वज्ञानाद् दुःखजनकेऽमित्रादौ द्वेषो जायते इति भावः। अन्यत्र च तदेवोक्तं—'द्विष्टसाधनताबुद्धिर्भवेद् द्वेषस्य कारणम्।'[7] दुःखोपायविषयकद्वेषं प्रति बलवद्द्विष्टसाधनताज्ञानं कारणमित्यर्थः। तत्रापि बलवदिष्टसाधनताज्ञानं प्रतिबन्धकं भवति, तेन नान्तरीयकदुःखजनके पाकादौ न द्वेषः।'[8]

पातंजलदर्शनेऽपि 'दुःखानुशयी द्वेषः'[9] इति सूत्रे दुःखानुशयस्य द्वेषहेतुत्वं यदुक्तं तत् पूर्वानुभूतदुःखसजातीयदुःखे दुःखसाधने अमित्रादौ च बोध्यम्। तदेवोक्तं व्यासभाष्ये—'दुःखाभिज्ञस्य दुःखानुस्मृतिपूर्वो दुःखे तत्साधने वा यः प्रतिघो मन्युर्जिघांसा क्रोधः स द्वेष इति।'[10] विशेषस्तूक्तो योगवार्तिककारेण—'अत्र जिघांसेतिवचनात् द्वेषोऽपीच्छाविशेष एवेत्याशयः।'[11] द्वेषात् पुनर्दुःखतत्साधनविषया परिहारेच्छा विनाशेच्छा वा जायते। ततश्च प्रवृत्तिर्निवृत्तिर्वा प्रयत्नरूपेत्यपि बोध्यम्।

———०———

6 Bhā. pari. p. 502 (N.S.) ; mūtā. p. 503 (N.S.)

7 Ibid p. 506 (N.S.)

8 Sid. muktā. p. 506 (N.S.)

9 Pāt. yo. sū. 2.8

10 Yo. sū. bhā. 2.8

11 Yo. vār. 2.8

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( ७ )

## प्रयत्नात्मकान्तरधर्मनिरूपणम्

सन्ति केचिदन्तःकरणधर्मास्तार्किकादिमते आत्मविशेषगुणाः प्रवृत्तिनिवृत्तिजीवनहेतुसंज्ञका ये साक्षादेव शरीरे चेष्टां जनयन्ति। ते प्रयत्नात्मका इत्यभिहिताः। प्रयत्नो यत्नः कृतिः इत्येते पर्यायाः। यद्यपि चिकीर्षाऽपि प्रयत्नबीजत्वेन कथंचित् प्रयत्नसदृशमेव प्रतीयते तथापि तस्या इच्छाविशेषरूपत्वाद् भावात्मकधर्मेष्वेव निरूपणं कृतम्। अत्र तु प्रवृत्तिनिवृत्तिजीवनयोनिनामधेयानां प्रयत्नात्मकान्तरधर्माणामेव निरूपणं क्रियते।

चिकीर्षाया अनन्तरं शारीरचेष्टायाश्च पूर्वं जायते कश्चिदन्तःकरणधर्म आत्मविशेषगुणो वा प्रयत्नो नाम। स एव कृतिरित्युच्यते। तथैव प्राचीनानामुक्तिः—इच्छाजन्या भवेत् कृतिः, कृतिजन्या भवेच्चेष्टा इत्यादि। आन्तरप्रयत्नादेव प्रवृत्तिनिवृत्तिरूपात् शरीरे प्रवृत्तिरूपा निवृत्तिरूपा वा चेष्टा जायते। यथा इच्छाजन्या कृतिर्जायते तथा द्वेषादपि चिकीर्षाद्वारा कृतिर्जायते। एवं जीवनादृष्टादपि श्वासादिक्रियाहेतुभूतोऽतीन्द्रियः प्रयत्नो जायते। तथा च इच्छा-द्वेष-जीवनादृष्टान्यतमजन्यत्वे सति चेष्टाश्वासान्यतरजनकत्वं प्रयत्नसामान्यस्य लक्षणं सम्भवति।[1] तार्किकादिमते प्रयत्नः 'अहं यते' इत्यादिप्रतीतिसिद्ध आत्मगुण एव, ज्ञानेच्छादिवद् द्विक्षणस्थायी सविषयकश्च। ज्ञानेच्छाकृतिद्वेषाः सविषया इति तेषां मतम्।

स च प्रयत्नस्त्रिविधः—प्रवृत्तिर्निवृत्तिर्जीवनयोनिश्चेति पूर्वमेवोक्तः। जीवनयोनिर्जीवनहेतुरित्यप्यभिधीयते।

### प्रवृत्तिः

तत्र हीच्छाद्वेषजन्य इष्टप्राप्त्यनुकूलक्रियाजनकः प्रयत्नः प्रवृत्तिः। प्रवृत्तौ च

1 Tattvāloka. p. 174 (Chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उपादानस्य ( समवायिकारणस्य ) प्रत्यक्षम्, इष्टसाधनताज्ञानम्, कृतिसाध्यताज्ञानम्, चिकीर्षा च कारणम्। उक्तं च विश्वनाथेन—

'चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्॥'[2]

'मधुविषसम्पृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः। कृतिसाध्यताज्ञानादिवद् बलवदनिष्टाननुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां प्रवृत्तौ कारणमित्यपि वदन्ति।'[3]

ननु चिकीर्षां प्रत्येव एतेषां कृतिसाध्यताज्ञानादीनां हेतुत्वात्, चिकीर्षायाः प्रवृत्तिहेतुत्वे कथं पुनस्तेषां कृतिसाध्यताज्ञानादीनां प्रवृत्तिं प्रति कारणत्वमिति चेन्न। चिकीर्षाया व्यापारत्वाद् व्यापारेण व्यापारिणो नान्यथासिद्धत्वं भवतीति।

प्राभाकरमीमांसकमते तु चिकीर्षाद्वारा कार्यताज्ञानमेव प्रवृत्तौ कारणम्। चिकीर्षा च कृतिसाध्यताज्ञानसाध्या, न चेष्टसाधनताज्ञानमपेक्षते। अत एव वेदविधिश्रवणे नित्यकर्मादौ कार्यताज्ञानात् कृतिसाध्यताप्रकारकात् चिकीर्षोत्पत्तौ प्रवृत्तिर्जायते। काम्ये च काम्यसाधनताज्ञानेन कार्यताज्ञानात् चिकिर्षोत्पत्तौ प्रवृत्तिरिति दिक्।[4]

सांख्ययोगवेदान्तादिमतेषु त्वेते प्रयत्नभेदा ज्ञानेच्छादिवदन्तःकरणधर्मा एव नात्मगुणाः, आत्मनो निर्गुणत्वात्।

रामानुजमते तु एते आत्मगुणत्वेऽपि ज्ञानविशेषा एव। उक्तं च—'जीवात्मविशेषगुणानां बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां षण्णां ज्ञानविततिरूपत्वेन ज्ञानान्तर्भावस्योक्तत्वात्।'[5]

भाट्टमतेऽपि प्रयत्न आत्मगुणत्वेन स्वीक्रियते। उक्तं च नारायणभट्टेन—'प्रयत्नस्तु शरीरादौ हेतुः कर्मसमुद्भवे इति।'[6]

---

2 Bhā. pari. p. 507 (N.S.)
3 Sid. muktā. p. 507 (N.S.)  4 Ibid p. 507-509 (N.S.)
5 Yat. mat. dīp. p. 97-98 (A.A.)
6 Mā. me. p. 253 (Adyar)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



## निवृत्तिः

एवं द्वेषजन्योऽनिष्टपरिहारानुकूलः क्रियानिवृत्तिजनकः प्रयत्नो निवृत्तिः। निवृत्तौ फलगतद्वेषो द्विष्टसाधनताज्ञानं च कारणम्। तथा चोक्तं— 'निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः।'[7] सिद्धान्तमुक्तावल्यां च— 'द्विष्टसाधनताज्ञानस्य निवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधारितमिति भावः।'[8]

अत्रापि निवृत्तौ बलवदिष्टसाधनत्वज्ञानं प्रतिबन्धकं ज्ञेयम्। अतो द्विष्ट-(दुःख-)साधनेऽपि पाकादौ प्रवृत्तिरेव जायते, न निवृत्तिः।

## जीवनयोनिः

श्वास-प्रश्वास-रक्तसंचालनादिशरीरचेष्टाया हेतुभूतस्य कस्यचित् प्रयत्नस्य मानसप्रत्यक्षत्वाभावेऽपि उक्तशरीरचेष्टानां चेष्टात्वात् तत्रापि प्रयत्नोऽनुमितो जीवनादृष्टजन्यो जीवनयोनिः जीवनहेतुर्वाऽभिधीयते।

तथा च जीवनादृष्टजन्योऽतीन्द्रियः प्राणसंचरणादिजनकः प्रयत्नो जीवनयोनिः। उक्तं च विश्वनाथेन—

'यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्।
शरीरे प्राणसंचारे कारणं तत् प्रकीर्तितम्॥'

'जीवनयोनिप्रयत्नो यावज्जीवमनुवर्तते, स चातीन्द्रियः।…प्राणसंचारो हि अधिकश्वासादिः प्रयत्नसाध्यो दृष्टः। इत्थं च प्राणसंचारस्य सर्वस्य यत्नसाध्यत्वानुमानात् प्रत्यक्षप्रयत्नबाधाच्चातीन्द्रिययत्नसिद्धिः, स एव जीवनयोनिर्यत्नः।'[9]

वैशेषिकदर्शने तु भंग्यन्तरेण प्रयत्नो वर्णितः। उक्तं च माधवसरस्वत्या वैशेषिकप्रक्रियायां प्रयत्नविषये—'आत्मधर्म उत्साहः प्रयत्नः कृत्युद्योगादिपदवेदनीयः।…अयं यत्न एवाख्यातवाच्यतया भावनेत्युच्यते। इच्छा-

7 Bhā. pari. p. 526 (N.S.) 8 Sid. muktā. p. 527 (N.S.)

9 Bhā. pari. ; Sid. muktā. p. 527 (N.S.)

10 Sar. dar. kau. p. 30 (Trivandrum)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



द्वेषाभ्यां जायते, शरीरक्रियाजनकश्च। ननु स्पन्दव्यतिरेकेण प्रयत्नपदार्थो नास्तीति चेन्न। तदभावेऽप्यहं प्रयते इत्यनुभवात्।...स च द्विविधः जीवनयोनिप्रयत्नः, चिकीर्षाधीनप्रयत्नश्चेति। तत्राद्यः श्वासनिमेषादिहेतुः। द्वितीयश्चेष्टादिहेतुः। आद्योऽनुमेयः। द्वितीयः प्रत्यक्षः।'[10]

प्रयत्नो हि शरीरविधारणे, अन्तःकरणेन्द्रियसंयोगक्रियायामपि कारणं भवति। उक्तं च प्रशस्तपादेन—प्रयत्नः संरम्भ उत्साह इति पर्यायाः। स च द्विविधः—जीवनपूर्वकः, इच्छाद्वेषपूर्वकश्च। तत्र जीवनपूर्वकः सुप्तस्य प्राणापानसन्तानप्रेरकः, प्रबोधकाले चान्तःकरणस्येन्द्रियान्तरप्राप्तिहेतुः। अस्य जीवनपूर्वकस्यात्ममनसोः संयोगाद्धर्माधर्मापेक्षादुत्पत्तिः। इतरस्तु हिताहितप्राप्तिपरिहारसमर्थस्य व्यापारस्य हेतुः शरीरविधारकश्च। स चात्ममनसोः संयोगादिच्छापेक्षाद् द्वेषापेक्षाद्वोत्पद्यते।'[11] जीवनपूर्वक इति जीवनादृष्टजन्य इत्यर्थः। अदृष्टवशाद्यदेन्द्रियविशेषेणान्तःकरणं संयुज्यते तदा संयोगहेत्वन्तःकरणक्रियाया जीवनपूर्वकप्रयत्न एव कारणमित्यर्थः।

उक्तं च न्यायकन्दल्यां श्रीधरेण—'सदेहस्यात्मनो विपच्यमानकर्माशयसहितस्य मनसा सह संयोगः सम्बन्धो जीवनम्, तत्पूर्वकः प्रयत्नः कामर्थक्रियां करोति ?...सुप्तस्य प्राणापानक्रिया प्रयत्नकार्या क्रियात्वात्। न च तदानीमिच्छाद्वेषौ प्रयत्नहेतू सम्भवतः, तस्माज् जीवनपूर्वक एव प्रयत्नः प्राणापानप्रेरकः, किन्तु प्रबोधकालेऽन्तःकरणस्येन्द्रियान्तरप्राप्तिहेतुश्च। विषयोपलम्भानुमितान्तःकरणेन्द्रियसंयोगः प्रयत्नपूर्वकान्तःकरणक्रियाजन्यः, अन्तःकरणेन्द्रियसंयोगात्, जागरान्तःकरणेन्द्रियसंयोगवदिति प्रयत्नपूर्वकतासिद्धिः। अस्य जीवनपूर्वकस्यात्ममनसोः संयोगाद् धर्माधर्मापेक्षादुत्पत्तिः, धर्माधर्मापेक्ष आत्ममनसोः संयोगो जीवनम्, तस्मादस्योत्पत्तिरित्यर्थः।

इतरस्तु इच्छाद्वेषपूर्वकश्च हिताहितप्राप्तिपरिहारसमर्थस्य व्यापारस्य हेतुः शरीरविधारकश्च। गुरुत्वे सत्यपततः शरीरस्येच्छापूर्वकप्रयत्नो विधारकः। स चात्ममनसोः संयोगादिच्छाद्वेषापेक्षादुत्पद्यते। हितसाधनोपादानेषु प्रयत्न इच्छापूर्वकः, दुःखसाधनपरित्यागे प्रयत्नो द्वेषपूर्वक इति।'[12]

—–—०—–—

11 Pra. bhā. p. 638 (V.S.V.)  12 Nyā. kan. p. 638-39 (V.S.V.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

(८)

## अतीन्द्रियमनोधर्मनिरूपणम्

सन्ति केचिदन्तःकरणधर्मा तार्किकादिमतेनात्मविशेषगुणा ये मानसप्रत्यक्षायोग्यत्वादतीन्द्रियाः। अतीन्द्रियत्वेनानुमितिसिद्धत्वेऽपि तेषां सम्यग्ज्ञानार्थं निरूपणमवश्यमेव कर्तव्यं यतः तैरेवान्ये मनोधर्माः प्रायशो जन्यन्ते नियन्त्र्यन्ते च। तेषां हि प्रधाना अदृष्टसंस्काराः कुत्रचिदसाधारणकारणत्वेन कुत्रचिद्वा साधारणकारणत्वेन ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नान् प्रत्यक्षगम्यानन्तःकरणधर्मान् जनयन्ति। यथा, अदृष्टाख्यधर्माधर्मौ सुख-दुःखोपभोगौ जनयतः, संस्कारश्च स्मृतिप्रत्यभिज्ञानादिकं जनयति। अदृष्टस्य च जन्यमात्रं प्रति साधारणकारणत्वं कर्मवादिभिः सर्वैरभ्युपेयते। श्रूयते च बृहदारण्यके—'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च।'[1] अत्र पूर्वप्रज्ञा ज्ञानजः संस्कारः, कर्म च कर्माशयरूपादृष्टमेव; ते जन्मान्तरारम्भे जीवमनुवर्तन्ते इति भावः। वेदबाह्यैरपि जैनबौद्धादिभिरेते स्वीक्रियन्ते एव।

एतैरेव सर्वेऽन्ये मनोधर्मा इच्छाद्वेषादयो जन्यन्ते नियन्त्र्यन्ते च। तैश्च पुनरिच्छाद्वेषादिभिः सर्वेऽस्माकं व्यवहाराः प्रवर्तन्ते इत्यदृष्टसंस्कारा एव प्रधानतोऽस्माकं व्यवहारनियामका इति वक्तुं शक्यते। यद्यपि शास्त्रविहितनिषिद्धानुष्ठानजन्यधर्माधर्मरूपादृष्टस्वीकार आस्तिकानामेवोपपद्यते, तथापि सर्वैरेव सुख-दुःखादिव्यवस्थाभ्युपगन्तृभिः जैनबौद्धादिभिरपि सदसत्कर्मवादिभिरवश्यमेव सदसत्कर्मजन्यं किञ्चित् स्वीकरणीयं कालान्तरे शुभाशुभफलजनकम्।

उक्ताश्च व्यासेनाऽपि योगभाष्ये केचिदपरिदृष्टचित्तधर्माः संस्कारदृष्टजीवनहेतुप्रयत्नसहिताः। तदुक्तम्—'चित्तस्य द्वये धर्माः—परिदृष्टाश्चापरिदृष्टाश्च; तत्र प्रत्ययात्मकाः (प्रमाणादयो रागादयश्च) परिदृष्टाः, वस्तुमात्रात्मका

1 Br. up. 4.4.2

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अपरिदृष्टाः। ते च सप्तैव भवन्ति, अनुमानेन प्रापितवस्तुमात्रसद्भावाः—

निरोधधर्मसंस्काराः परिणामोऽथ जीवनम्।
चेष्टा शक्तिश्च चित्तस्य धर्मा दर्शनवर्जिताः॥'[2]

अत्र बहव अतीन्द्रियचित्तधर्मा विवृताः। तेषु निरोधो वृत्तीनाम्—असंप्रज्ञातावस्था चित्तस्य, धर्मः—धर्माधर्मरूपकर्माशयः, संस्कारो वासना ज्ञानाशयो वा। परिणामोऽसंविदितश्चित्तस्य गुणानां प्रतिक्षणपरिणामित्वेनानुमेयः, जीवनं हि प्राणधारणप्रयत्नविशेषोऽसंविदितो जीवनादृष्टजन्यः। चेष्टाऽत्र चित्तस्यासंविदितक्रिया तत्तदिन्द्रियादिसंयोगहेतुः। तथा शक्तिरपि सर्ववस्तुषु इव चित्तेऽपि असंविदिता। एतेषु अदृष्ट-संस्कार-जीवनयोनि-प्रयत्नानां प्राधान्यात् सर्वैरभ्युपगमाच्च ते एव विस्तारेण निरूप्यन्ते।

## अदृष्टनिरूपणम्

विहितनिषिद्धकर्मणां दृष्टफलव्यतिव्यतिरेकेणापि सूक्ष्मकर्मावशेषरूपं किञ्चित् स्थायिव्यापाररूप कालान्तरभाविफलजनकमनुमीयते कल्प्यते वा, फलजनने व्यापाररूपस्य तस्य दृष्टत्वाभावादेव तददृष्टमित्युच्यते। तदेव मीमांसकैरपूर्वमित्युच्यते, तार्किकादिभिरदृष्टमिति। विहितनिषिद्धकर्मणामनुष्ठानानन्तरमचिरान्नाशेऽपि तज्जन्यो धर्मविशेषोऽधर्मविशेषो वाऽन्तःकरणे आत्मनि वा जायते आफलोत्पादनस्थायी। इदञ्चादृष्टं प्राणिनां सुखदुःखभोग-वैचित्र्यानुमेयं श्रुत्यर्थापत्तिस्मृतिसिद्धञ्च। तदुक्तमुदयनेन—'चिरध्वस्तं फलायालं न कर्मातिशयं विना'[3] इत्यादिना। अनुष्ठानान्तरमेव विनष्टं कर्म यागादि, अतिशयमदृष्टं विना कालान्तरभाविस्वर्गादिफलजननाय समर्थं न भवतीत्यर्थः। अतोऽदृष्टं कल्प्यते इति भावः। स्मृतयश्च सञ्चित-प्रारब्ध-क्रियमाणभेदभिन्नानि तत्त्वज्ञानप्रायश्चित्तादिनाश्यानि धर्माधर्मरूपाण्यदृष्टानि शतशो वर्णयन्ति।

वैशेषिकसूत्रे चोक्तम्—'अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तर-संयोगाश्चेत्यदृष्टकारितानि।'[4] मृतशरीरान्मनसो विभागकारणमपसर्पणकर्म

2 Yo. sū. bhā. 3.15 3 Nyāyakusumañjali. 1.10



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अदृष्टादेवोत्पद्यते ; तथा स्वर्गे नरके वा कर्मानुरूपशरीरेण मनःसंयोगार्थं कर्म उपसर्पणमपि। तथा भुक्तपीतयोऽभ्यन्तरसंयोगानुकूलं कर्मादृष्टकारितम्।

तथा चोक्तं प्रशस्तपादेनापि—'अपसर्पणकर्मोपसर्पणकर्म चात्ममनः-संयोगाददृष्टापेक्षात्।'[5] ...'यदा त्वैहिकशरीरोपभोग्यौ धर्माधर्मौ प्रक्षीणौ तदा देहान्तरोपभोग्यधर्माधर्मयोर्वृत्तिलाभः प्रतिवन्धाभावाज्जातः। ताभ्यां लब्धवृत्तिभ्यामैहिकदेहोपभोग्यात् कर्मणोऽन्याभ्यामात्ममनःसंयोगसहायाभ्यां (धर्माधर्माभ्यां) मृतशरीरान्मनसो विभागकारणमपसर्पणकर्म उत्पद्यते। ...तदनन्तरं तन्मनो मृतशरीराद् वहिर्निर्गतं ताभ्यामेव लब्धवृत्तिभ्यां धर्माधर्माभ्यां सकाशादुत्पन्नेनातिवाहिकशरीरेण सम्वध्यते। तदाऽऽतिवाहिक-शरीरसंक्रान्तं मनः स्वर्गं नरकं वा गच्छति। तत्र गत्वा कर्मानुरूपेण शरीरेण सम्वध्यते, स्वर्गे नरके वा प्रत्यग्रजातेन शरीरेण मनःसंयोगार्थं मनसः कर्म उपसर्पणम्। तदपि धर्माधर्मरूपादृष्टकारितमिति शेषः।'[6] उक्तञ्च—'योगिनां वहिरुद्रेचितस्य मनसोऽभिप्रेतदेशगमनं प्रत्यागमनं च, तथा सर्गकाले प्रत्यग्रेण शरीरेण सम्वन्धार्थं कर्मादृष्टकारितम्। एवमन्यदपि महाभूतेषु यत् प्रत्यक्षानु-मानाभ्यामनुपलभ्यमानकारणमुपकारापकारसमर्थं च भवति तदप्यदृष्ट-कारितम्—यथा सर्गादावणुकर्म...महाभूतानां प्रक्षोभणमित्यादि।'[7]

अदृष्टानि धर्माधर्मरूपाणि पुण्यपापरूपाणि वा विहितनिषिद्धकर्मानुष्ठान-जन्यानि प्रायशो भाविजन्मवेदनीयसुखदुःखफलाणि भवन्ति। तस्मादिह-जन्मनि फलजनकानामदृष्टानां प्रारब्धनामधेयानां पूर्वजन्मान्तरे एवोपचय आसीदिति वोध्यम्। कदाचित्तु इह जनितानामिहैव फलभोगः। यथोक्तं पातञ्जले—'क्लेशमूलः कर्माशयः दृष्टादृष्टजन्मवेदनीयः।'[8] तच्चादृष्टं द्विविधं ज्ञेयं—धर्मोऽधर्मश्चेति। तत्र 'धर्मत्वसामान्यवान् सुखासाधारणं कारणं धर्मः', अधर्मत्वसामान्यवान् दुःखासाधारणं कारणमधर्मः'[9] इति धर्माधर्मयोर्लक्षणे शिवादित्येन कृते।

---

4 Vai. sū. 5.2.17
5 Pra. bhā. p. 736 (V.S.V.)
6 Nyā. kan. p. 737-38 (V.S.V.)
7 Pra. bhā. p. 739-40 (V.S.V.)
8 Pāt. yo. sū. 2.12
9 Sap. pad. 96, 97 (C.S.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उक्तञ्च माधवसरस्वत्या वैशेषिकप्रक्रियायां—'अतोभयत्र कार्यमेव प्रमाणम्। यत्राध्ययनकृष्यादीष्टसामग्र्यां समानायामपि फलवैचित्र्यं दृश्यते, तत्रादृष्टसामग्रीवैचित्र्यमेवानुमेयम्। कारणवैचित्र्यं विना कार्यवैचित्र्यासम्भवात्। अतोऽदृष्टसिद्धिरिति।'[10]

उक्तञ्च शालिकनाथेन प्रभाकरमतानुसारेण—'अदृष्टं तु धर्माधर्मलक्षणमागमगम्यमेव।[10a]

जैनमते यद्यपि धर्माधर्मौ स्वीकृतौ न तेषामात्मगुणत्वं गुणत्वं वा, तेषां बन्धकारण-जडपुद्गलद्रव्यरूपत्वात्। तथा चोक्तं प्रभाचन्द्रेण—'न धर्माधर्मौ आत्मगुणौ अचेतनत्वाच्छब्दादिवत्। ...अचेतनौ तौ स्वग्रहणविधुरत्वात्, न च बुद्ध्याऽस्य व्यभिचारः, अस्याः स्वग्रहणात्मकत्वप्रसाधनात्। प्रसाधितश्च पौद्गलिकत्वं कर्मणां...।' पुनश्च—'इदं तु युक्तं—कर्तुः प्रियहितमोक्षहेतुः धर्मः, अधर्मस्त्वप्रियप्रत्ययहेतुः।'[11]

बौद्धैस्तु कर्म-कर्मफलस्वीकारेऽपि वैशेषिकाद्यभिप्रेतमात्मगुणरूपमदृष्टं न स्वीक्रियते। उक्तञ्च शान्तरक्षितेन—

'मनोयोगात्मनां पूर्वं विस्तरेण निषेधनात्।
परोक्तलक्षणोपेतं नादृष्टमुपपद्यते ॥'

'कर्तृफलदायी आत्मगुण आत्ममनःसंयोगजः स्वकार्यविरोध्यदृष्टमिति···परोक्तादृष्टलक्षणम्। तदेतदात्मनो मनसः तत्संयोगस्य च तत्कारणत्वेनाभिमतस्य पूर्वं निषिद्धत्वात् कारणाभावादेवासदिति सिद्ध'[12]मित्यर्थः।

सांख्यपातञ्जलवेदान्तादिमतेष्वदृष्टमन्तःकरणधर्म एवातीन्द्रियः प्रत्यक्षायोग्यत्वात्। सांख्यपातञ्जलमतयोरदृष्टं कर्माशयः यद्यपि द्विविधस्तथापि तद्धेतुभूतं कर्म चतुर्विधं भवति—शुक्लं कर्म, कृष्णं कर्म, शुक्लकृष्णं कर्म, अशुक्लाकृष्णं

---

10 Sar. dar. kau. p. 30 (Trivandrum)

10a Pra. pañ. p. 330 (B.H.V.)

11 Pra. kā. mā. p. 572, 600 (Nirnayāsagar)

12 Tattva. saṃ. 690; Tattva. saṃ. ṭikā 690 (Baudh bhā)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



कर्म चेति। तथाचोक्तं—'कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्।'[13] शुक्लं दानादि, कृष्णं हिंसादि, शुक्लकृष्णं हिंसामिश्रितं यागादि, अशुक्लाकृष्णं योगिनां जपध्यानादि।

एतन्मते सर्वोऽपि कर्माशयोऽविद्याऽस्मितारागद्वेषादिक्लेशमूल एव। पुण्यकर्माशयोऽपि धर्माख्यो रागद्वेषादिजनित एव। उक्तञ्च—'क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः।'[14] व्यासभाष्ये च - 'ते पुण्यापुण्यकर्माशयः कामक्रोधलोभमोहप्रसवः। स दृष्टजन्मवेदनीयश्चादृष्टजन्यवेदनीयश्च। तत्र तीव्रसंवेगेन मन्त्रतपःसमाधिभिर्निर्वर्तित ईश्वरदेवतामहर्षिमहानुभावानामाराधनाद्वा यः परिनिष्पन्नः स सद्यः परिपच्यते पुण्यः कर्माशय इति। तथा तीव्रक्लेशेन भीतव्याधितकृपणेषु विश्वासोपगतेषु वा महानुभावेषु वा तपस्विषु कृतः पुनः पुनरपकारः स चापि पापकर्माशयः सद्य एव परिपच्यते।'[15] वाचस्पतिनाप्युक्तं—'अविद्यामूलः कर्माशयो जात्यायुर्भोगहेतुः,...आशेरते सांसारिकाः पुरुषा अस्मिन्नित्याशयः, कर्मणामाशयौ धर्माधर्मौ।'[16] तौ पुण्यपापौ इत्यप्युच्येते।

उक्तञ्च व्यासदेवेन—'सति मूले तद्विपाको जात्यायुर्भोगाः'[17] इत्यस्य सूत्रस्य भाष्ये—'सत्सु क्लेशेषु कर्माशयो विपाकारम्भी भवति, नोच्छिन्नक्लेशमूलः। तस्माज् जन्मप्रायणान्तराले कृतः पुण्यापुण्यकर्माशयप्रचयो विचित्रः प्रधानोपसर्जनभावेनावस्थितः प्रायणाभिव्यक्त एकप्रघट्टकेन मिलित्वा मरणं प्रसाध्य संमूर्च्छित एकमेव जन्म करोति, तच्च जन्म तेनैव कर्मणा लब्धायुष्कं भवति, तस्मिन्नायुषि तेनैव कर्मणा भोगः सम्पद्यते इति...अत एकभविकः कर्माशय उक्त इति।...यो ह्यदृष्टजन्मवेदनीयोऽनियतविपाकस्तस्य त्रयी गतिः।—कृतस्याविपक्वस्य नाशः, प्रधानकर्मण्यावापगमनं वा, नियतविपाकप्रधानकर्मणाऽभिभूतस्य वा चिरमवस्थानमिति।...इयं कर्मगतिर्विचित्रा दुर्विज्ञाना चेति। न चोत्सर्गस्यापवादान्निवृत्तिरिति एकभविकः कर्माशयोऽनुज्ञायते इति।'[18] एवं यद्यपि

13 Pāt. yo. sū. 4.7
14 Ibid. 2.12
15 Yo. sū. bhā. 2. 12
16 Tattva. vai. 2. 12
17 Pāt. yo. sū. 2. 13
18 Yo sū. bhā. 2. 13

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पातञ्जले 'एकभविकः कर्माशयः' इति मतमभ्युपगतम्—एकस्मिन्नेव जन्मनि पूर्वजन्मनः सर्वेषां कर्मणां भोग भवति न सञ्चितं तिष्ठतीति वादोऽनुज्ञातस्तथापि 'नियतविपाकप्रधानकर्मणाभिभूतस्य चिरमवस्थान'मित्यनेनापवादेन सञ्चितस्यापि कर्मणः स्वीकारे अवकाशः प्रदत्तः।

रामानुजमते त्वदृष्टस्वीकारेऽपि तस्येश्वरज्ञानेऽन्तर्भावः। उक्तञ्च—'धर्माधर्मयोरपीश्वरप्रीत्यप्रीतिरूपत्वेनेश्वरज्ञानेऽन्तर्भावात्।'[19] 'तत्तत्कर्माचरणपरिणतेश्वरबुद्धिविशेष एवादृष्टमित्यर्थः।'[19a] तत्रादृष्टयोः धर्माधर्मरूपयोरभ्यर्हितत्वादादौ धर्मो निरूप्यते।

——०——

19 Yat. mat. dīp. p. 98 (A.A.)

19a Dīpikā-prakāśa—p. 98. (A. A.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## धर्मः

उक्तं प्रशस्तपादेन—'धर्मः पुरुषगुणः। कर्तुः प्रियहितमोक्षहेतुः, अतीन्द्रियोऽन्त्यसुखसंविज्ञानविरोधी पुरुषान्तःकरणसंयोगविशुद्धाभिसन्धिजो वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः। ···तत्र सामान्याणि धर्मे श्रद्धा, अहिंसा, भूतहितत्वम्, सत्यवचनम्, अस्तेयम्, ब्रह्मचर्यम्, अनुपधा, क्रोध-, वर्जनम्, अभिषेचनम्, शुचिद्रव्यसेवनम्, विशिष्टदेवताभक्तिरुपवासोऽप्रमादश्च। ...दृष्टं प्रयोजनमनुद्दिश्यैतानि साधनानि भावप्रसादं चापेक्ष्यात्ममनसोः संयोगाद् धर्मोत्पत्तिः।'[1] अनुपधा भावशुद्धिरित्यर्थः। अभिषेचनं स्नानादि। उक्तश्च कन्दलीकारेण—'अतीन्द्रियः केनचिदिन्द्रियेणायोगिभिर्न गृह्यते इत्यतीन्द्रियो धर्मः। ...तस्य (धर्मस्य) यदि प्रथमभोगादपि नाशः कालान्तरे फलानुत्पादः। न चैकस्य निर्भागस्य भागशो नाशः सम्भाव्यते, तस्मादन्त्यस्यैव (धर्मनाशकत्वम्)। सम्यग्विज्ञानेन धर्मो विनाश्यते।···विशुद्धोऽभिसन्धिः दम्भादिरहितः सङ्कल्पविशेषः, तस्माद्धर्मो जायते।'[2]

माधवसरस्वत्याऽपि वैशेषिकप्रक्रियायां धर्मलक्षणमुक्तम्—'श्रुत्यादिविहितक्रियासाध्यः पुरुषगुणो धर्मः। साक्षात्साध्यत्वमत्र विवक्षितम्। तेन स्वर्गादौ न प्रसङ्गः। प्रायश्चित्तसाध्यदूरितध्वंसे प्रसङ्गनिराकरणाय गुण इति।'[3]

विश्वनाथेन चोक्तं—

'धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिकारणम्।
गङ्गास्नानादि-यागादिव्यापारः स तु कीर्तितः॥'[4]

तथा च सिद्धान्तमुक्तावल्यां—'यागादीनां चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात्।' स्व-स्वव्यापारान्यतराभावे कारणत्वाभावादिति भावः।

---

1 Pra, bhā. p. 659-72 (V.S.V.)

2 Nyā. kan. 664 (V.S.V.)

3 Sar. dar. kau p. 30 (Trivandrum)

4 Bhā. pari. p. 531-32 (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



जैनमतेऽपि अचेतनद्रव्यरूपो धर्मः कर्तुः प्रियहितमोक्षहेतुः स्वीकृत एवेत्युक्तम्। उक्तञ्च भास्करनन्दिना तत्त्वार्थवृत्तौ—'धर्मादयोऽर्हत्प्रणीते आगमे अनादिपारिणामिक्यः संज्ञा रूढा वेदितव्याः। अथवा क्रियानिमित्ता एताः संज्ञा व्युत्पाद्यन्ते। कथमिति चेदुच्यते—स्वयं गतिक्रियापरिणामिनां जीवपुद्गलानां साचिव्यं यो ददाति स धर्मः। तद्विपरीतलक्षणश्चाधर्मः।'[5]

न्याय-वैशेषिक-सांख्य-पातञ्जल-वेदान्तादिमतेषु पुण्यपापाख्यानि कर्माणि त्रिविधाणि भवन्ति—प्रारब्ध-क्रियामाण-सञ्चितभेदात्। पूर्वपूर्वजन्मार्जितेषु कर्मसु यानि वर्तमानदेहमारभ्य तत्र भोगार्थं फलप्रदाने नियोजितानि तान्येव प्रारब्धान्युच्यन्ते। यान्यवशिष्टानि भाविजन्मान्तरेषु फलोत्पादन-योग्यानि तानि सञ्चितानि। अस्मिन् जन्मन्यनुष्ठीयमानानि क्रियमाणानि कर्माण्युच्यन्ते। तत्र प्रारब्धानि अस्मिन्नेव जन्मनि भोगेन प्रायश्चित्तादिना वा क्षेतव्यानि। न तु ब्रह्मज्ञानेन प्रकारान्तरेण वा प्रारब्धस्य क्षयः सम्भवति। मुक्तेषु यथा क्षीणे वेगे पतति तथैव भोगेन क्षये प्रारब्धस्य विनाशो भवति। योगमते तु निर्विकल्पसमाधिनाऽपि प्रारब्धस्य द्रुतं क्षयः सम्भवति। सञ्चित-क्रियमाणयोस्तु प्रायश्चित्तादिना अंशतः, ब्रह्मज्ञानेन च सम्यक् विनाशो भवतीति बोध्यम्।

रामानुजमते 'एष ह्येवैनं साधु कर्म कारयति'[6]—इत्यादि श्रुत्या ईश्वरस्य बुद्धिविशेषः जीवेषु धर्माचरणरूपेण परिणतो धर्म इत्युक्तमेव।

—–o—–

5 Tattvā. vṛ. 5.1. 6 Kau. up. 3.9

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## अधर्मः

'अधर्मत्वसामान्यवान् दुःखासाधारणकारणमधर्मः'[1] इति वैशेषिकाभिप्रेतमधर्मलक्षणमुक्तं शिवादित्येन। प्रशस्तपादेन चोक्तम्—'अधर्मोऽप्यात्मगुणः। कर्तुरहितप्रत्यवायहेतुरतीन्द्रियोऽन्त्यदुःखसंविज्ञानविरोधी। तस्य तु साधनानि शास्त्रे प्रतिषिद्धानि धर्मसाधनविपरीतानि हिंसाऽनृतस्तेयादीनि। विहिताकरणं प्रमादश्चैतानि दुष्टाभिसन्धिं चापेक्ष्यात्ममनसोः संयोगादधर्मस्योत्पत्तिः।'[2] तद्व्याख्यानमुखेन चोक्तं श्रीधरेण—'अहितं दुःखसाधनम्, प्रत्यवायो दुःखम्। ...(अन्त्यदुःखेन, तथा) सम्यग्विज्ञानं तेन विनाश्यते। ...विहितस्यावश्यं करणीयस्याकर्तव्यता, प्रमादोऽबुद्धिपूर्वकोऽतिक्रमः। एतदपि द्वयमधर्मसाधनम्। ···यत्र कामनापूर्वकमधर्मसाधनानुष्ठानं तत्र दुष्टोऽभिसन्धिरधर्मकारणम्। अकामकृते तु प्रमादेनास्य हेतुत्वम्।'[3] धर्माधर्मयोरतीन्द्रियत्वेऽपि सुखादिवदात्मनःसंयोगादेव तयोरात्मविशेषगुणत्वेनोत्पत्तिः। धर्मस्य अन्त्य- सुखभोगेनेवाधर्मस्यान्त्यदुःखभोगेन नाशो भवति। तत्त्वज्ञानेनापि धर्मस्याधर्मस्य च नाशो भवतीत्यपि बोध्यम्। उक्तञ्च प्रशस्तपादेन संविज्ञानविरोधित्वमधर्मस्यापि।

उक्तञ्च विश्वनाथेन नव्यन्यायमतेन—

'अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः।
प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ॥'[4]

निषिद्धानुष्ठानजन्योऽधर्मो नरकादिदुःखहेतुरित्यर्थः। उक्तञ्च मुक्तावल्यां विश्वनाथेन—'यदि ह्यधर्मो न स्यात् तदा प्रायश्चित्तादिना नाश्यत्वं न स्यात्। न हि तेन ब्रह्महननादीनां नाशः प्रतिबन्धो वा विधातुं शक्यते तस्य पूर्वमेव विनष्टत्वादिति भावः।'[5] धर्मवदधर्मोऽपि जीवात्मगुणः।

---

1 Sap. pad. 97 (C.S.S.)
2 Pra. bhā. p. 677 (V.S.V.)
3 Nyā. kan. p. 678 (V.S.V.)
4 Bhā. pari. p. 534 (N.S.)
5 Sid. muk. p. 536 (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



येषामेव वादिनां प्रायश्चित्तं नाम किञ्चित् स्वीकृतमस्ति तेषामधर्मोऽपि पापाख्योऽवश्यं स्वीकरणीयो भवति प्रायश्चित्तनाश्यपदार्थरूपेण। अन्यथा प्रायश्चित्तनाश्यं किमपि न स्यात्, निषिद्धानुष्ठानानां पूर्वमेव उत्पन्नविनिष्टत्वादिति भावः। प्रायश्चित्तं चोक्तं स्मृतिपुराणादौ—

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्॥"[6]

——o——

6 Agnipurāṇa 174.8



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## संस्कारनिरूपणम्

यथा शुभाशुभकर्मणामवशेषरूपमदृष्टं जायते कर्मभ्यः, तथैव ज्ञानानामप्यवशेषरूपः संस्कारो जायते उपेक्षाऽनात्मकेभ्यो ज्ञानेभ्यः। अयमेव संस्कार-भावना-ज्ञानाशय-वासनेत्यादिपदैरभिधीयते। स च संस्कारः स्मृतिरूपकार्यैरनुमेयः।

वेग-स्थितिस्थापक-भावनासाधारणं संस्कारलक्षणमुक्तं शिवादित्येन—'संस्कारत्वजातिमान् स्वोत्पत्त्यवस्थापादको गुणः संस्कारः'[1] इति। संस्कारोत्पत्तिकालीनावस्थापादक इत्यर्थः। भावनालक्षणञ्चोक्तं—'ज्ञानजः संस्कारो भावना'[2] इति। भावनाऽपि ज्ञानजः संस्कारः स्वोत्पत्तिकालीनज्ञानावस्थां पुनरापादयति स्मरणेनेति भावः।

उक्तञ्च माधवसरस्वत्या वैशेषिकप्रक्रियायां—'स्वोत्पादकसजातीयोत्पादकत्वे सति स्वयं तद्विजातीय एकाश्रितो गुणः संस्कारः। यथा—ज्ञानजातीयानुभवसमुत्पाद्या भावना ज्ञानजातीयस्मृतिजनिका स्वयं तद्विजातीया' इत्यादि, 'भावना आत्मनि'[3] इति च।

वैशेषिकसूत्रे हि स्मृतिस्वप्नादिकारणत्वेन संस्कारस्योल्लेखो वर्तते। तथा हि—'आत्ममनसोः संयोगविशेषात् संस्कारात्च स्मृतिः॥ तथा स्वप्नः॥'[4] इत्यत्र यथा स्मृतिः संस्कारजन्या तथा स्वप्नोऽपि संस्कारजन्य इत्युक्तम्।

वैशेषिकभाष्ये चोक्तं प्रशस्तपादेन—'भावनासंज्ञकस्त्वात्मगुणो दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतुर्भवति ज्ञान-मद-दुःखादिविरोधी। पट्वभ्यासादरप्रत्ययजः। पटुप्रत्ययापेक्षादात्ममनसोः संयोगादाश्चर्येऽर्थे पटुः संस्कारातिशयो जायते। यथा—दाक्षिणात्यस्योष्ट्रदर्शनादिति। विद्याशिल्पव्यायामादिष्वभ्यस्यमानेषु तस्मिन्नेवार्थे पूर्व-पूर्वसंस्कारमपेक्षमानादुत्तरोत्तरस्मात् प्रत्ययादात्ममनसोः संयोगात् संस्कारातिशयो जायते। प्रयत्नेन

---

1 Sap. pad. 95 (C.S.S.)
2 Ibid 143 (C.S.S.)
3 Sar. dar. kau. p. 31 (Trivandrum)
4 Vai. sū. 10.1. 6-7

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मनश्चक्षुषि स्थापयित्वाऽपूर्वमर्थं दिदृक्षमानस्य विद्युत्संपातदर्शनवदादरप्रत्ययः, तमपेक्षमानादात्ममनसोः संयोगात् संस्कारातिशयो जायते। यथा—देवह्रदे राजतसौवर्णपद्मदर्शनात्।'[5]

उक्तञ्च श्रीधरेण तद्व्याख्याने—'भावनासंज्ञकस्तु संस्कार आत्मगुणः। ...दृष्टश्रुतानुभूतेषु स्मृतेः प्रत्यभिज्ञानस्य च हेतुरिति तस्य कार्यकथनम्। दृष्टश्रुतानुभूतेष्विति विपर्ययावगतोऽप्यर्थो बोध्यव्यः, तत्रापि स्मृतिदर्शनात्। प्रतिपक्षज्ञानेन संस्कारो विनाश्यते, द्यूतादिव्यसनापन्नस्य पूर्वाधीतविस्मरणात्। मदेनापि संस्कारस्य विनाशः, सुरामत्तस्य पूर्वस्मृतिलोपात्। मरणादिदुःखादपि संस्कारो विनश्यति, जन्मान्तरानुभूतस्मरणाभावात्। आदिशब्देन सुखादिपरिग्रहः। भोगासक्तस्य कुपितस्य वा पूर्ववृत्तस्मृत्यभावात्। पटुप्रत्ययात् अभ्यासप्रत्ययात् आदरप्रत्ययाच्च संस्कारो जायते।...विद्या शास्त्रागमादिका, शिल्पं पत्त्रभङ्गादिक्रिया, व्यायाम आयुधादिश्रमः, तेष्वभ्यस्यमानेषु तस्मिन्नेवार्थे पूर्वगृहीते।...न ह्याद्यानुभव एव संस्कारविशेषमाधत्ते, प्रथमं तदर्थस्मरणाभावात्। नाप्युत्तर एव हेतुः पूर्वाभ्यासवैयर्थ्यात्। तस्मात् पूर्वसंस्कारापेक्षोत्तरोत्तरानुभवाहिताधिकाधिकसंस्कारोत्पत्तिक्रमेणोपान्त्यसंस्कारापेक्षादन्त्यानुभवात् तदुत्पत्तिः।'[6,7]

नव्यन्याये चोक्तं विश्वनाथेन—

'भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत्॥
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते।'[8]

मुक्तावल्याञ्चोक्तं तेनैव—'यतः स्मरणं प्रत्यभिज्ञानं च जनयत्यतः संस्कारः कल्प्यते। विना व्यापारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यात्, स्व-स्वव्यापारान्यतराभावे कारणत्वासम्भवात्।'[9] एतन्मते चानुभवत्वेनैव संस्कारं प्रति तथा स्मृतिं प्रति कारणत्वमिति न स्मरणात् संस्कारान्तरोत्पत्तिः;

---

5 Pra. bhā. p.647-56 (V.S-V.)

6,7 Nyā. kan. p. 648-50 (V.S.V.)

8 Bhā. pari. p. 530 (N.S.)  9 Sid. muk. p. 531 (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



किन्तु पूर्वसंस्कारेणैव क्रमिकस्मरणं पुनः पुनः स्मरणं वा सम्भवति। समानप्रकारकस्मरणस्य संस्कारनाशकत्वे प्रमाणाभावात्। तथाच पुनः पुनः स्मरणाद्दृढतर संस्कारोत्पत्तिर्न संस्कारस्य वाहुल्याद् भवति, किन्तु विद्यमानस्यैव संस्कारस्य झटित्युद्बोधकसमधानं पुनः पुनः स्मरणेन जायते, उद्बुद्धाच्च संस्कारात् स्मरणान्तरमिति।[10] व्याध्यादेर्दीर्घकालस्य चरमफलस्य (चरमस्मरणस्य) वा संस्कारनाशकत्वम्।

केचित्तु ज्ञानत्वेनैव संस्कारं प्रति कारणत्वमिति संस्कारस्य फलनाश्यत्वनियमाद् स्मरणेन पूर्वसंस्कारस्य विनष्टत्वेऽपि तेनैव स्मरणेन पुनः संस्कारान्तरोत्पत्तिद्वारा स्मरणान्तरं जन्यते इति वदन्ति। विशेषधर्मेणानुभवत्वेन कारणत्वे व्यभिचारज्ञानाभावे सामान्यधर्मेण ज्ञानत्वेनान्यथासिद्धत्वादनुभवत्वेनैव कारणत्वमिति नव्यानामभिप्रायः।[11]

अद्वैतवादिनां मते संस्कारस्य समानविषयकस्मृतिनाश्यत्वे प्रमाणाभावेऽपि, संस्कारोत्पत्तौ ज्ञानत्वेन कारणत्वस्वीकारे न काचिदनुपपत्तिः प्रत्युत पुनः पुनः स्मरणात् संस्कारवाहुल्यात् संस्कारदार्ढ्यस्योपपत्तिरेव। उक्तञ्च मधुसूदनेन—...'स्मृतित्वेन स्मृतेः संस्कारनिवर्तकत्वे मानाभावात्। स्मृतौ हि जातायां संस्कारो दृढो भवतीत्यनुभवसिद्धम्। तेषां दृढतरत्वञ्च समानविषयकसंस्कारानेकत्वात्।'[12] अद्वैतमते संस्कारस्त्वन्तःकरणधर्म एव वृत्तिध्वंसजन्यः, कदाचित् सुषुप्तिप्रलयादौ अन्तःकरणासत्त्वात् तत्कारणीभूताविद्यायामेव संस्काररूपेण तिष्ठतीति न सुषुप्त्यनन्तरं स्मरणादीनामनुपपत्तिः।

पातञ्जलमते अनुभवो विषयस्यैव प्रत्ययस्यापि संस्कारं जनयति, तथा स्मरणमपि। तथोक्तं व्यासेन भाष्ये—'ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासस्तथाजातीयकं संस्कारमारभते; स संस्कारः स्वव्यञ्जकाञ्जनस्तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति।'[13] संस्कारस्य स्मृति-

10 Ibid. p. 431-32. (N.S.)
11 Ibid. p. 432 (N.S.)
12 Advaita-siddhi. p. 177 (Nirnayāsagar)
13 Yo. sū. bhā. 1.11

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रत्यभिज्ञा-भ्रमादिजनकत्वन्तु स्वीकृतमेव। परन्तु सांख्यपातञ्जलयोः प्राधान्येन मोक्षशास्त्रत्वात् समाधि-प्रज्ञादिसाधने संस्कारस्य विविधोपयोगित्वमपि प्रदर्शितम्। तथा हि यत्र 'वितर्कबाधने प्रतिपक्षभावनम्'[14] विहितं तत्रापि प्रतिपक्षभावनाजनितसंस्काराणामेव वितर्कहिंसादिसंस्काराभिभवजनकतया तद्विहितं बोध्यव्यम्। 'तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी'[15] ति सूत्रे हि सम्प्रज्ञातसमाधिजप्रज्ञाजनितसंस्कारस्य अन्यव्युत्थानसंस्कारबाधकत्वमुक्तम्। यथोक्तं भाष्ये—'समाधिप्रज्ञाप्रतिलम्भे योगिनः प्रज्ञाकृतः संस्कारो नवो नवो जायते। समाधिप्रज्ञाप्रभवो संस्कारो व्युत्थानसंस्काराशयं बाधते। व्युत्थान-संस्काराभिभवात् तत्प्रभवाः प्रत्यया न भवन्ति।...न ते प्रज्ञाकृताः संस्काराः क्लेशक्षयहेतुत्वाच्चित्तमधिकारविशिष्टं कुर्वन्ति, चित्तं हि ते स्वकार्यादव-सादयन्ति।'[16] तदनन्तरं 'तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः'[17] इति सूत्रे सम्प्रज्ञातसमाधिजप्रज्ञायास्तज्जसंस्काराणाञ्च निरोधे निर्बीजसमाधि-रुक्तः। उक्तञ्च व्यासेन भाष्ये—'स न केवलं समाधिप्रज्ञाविरोधी प्रज्ञा-कृतानां संस्काराणामपि प्रतिबन्धी भवति; कस्मात्? निरोधजः संस्कारः समाधिजान् संस्कारान् बाधते इति; निरोधस्थितिकालक्रमानुभवेन निरोध-चित्तकृतसंस्कारास्तित्वमनुमेयम्।...ते संस्काराश्चित्तस्याधिकारविरोधिनो न स्थितिहेतवः, यस्मादवसिताधिकारं सहकैवल्यभागीयैः संस्कारैश्चित्तं विनि-वर्तते; तस्मिन्निवृत्ते पुरुषः स्वरूपप्रतिष्ठोऽतः शुद्धमुच्यते।'[18]

तथा कर्माशयानां विपाकरूपभोगजननेऽपि वासनाख्यसंस्काराणामनु-गुणानामभिव्यक्तिरपेक्षिता। भोगानुगुणसंस्कारं विना भोगासम्भवात्। न हि संस्काररहितस्य भोग्यसंप्रयोगेऽपि तदुपभोगः सम्भवति असंस्कृतस्य सङ्गीताद्युपभोगादर्शनात्। तथा चोक्तं—'ततस्तद्विपाकानुगुणानामेवाभिव्यक्ति-र्वासनानाम्।'[19] उक्तञ्च भोजवृत्तौ—'इह हि द्विविधाः कर्मवासनाः स्मृति-मात्रफला जात्यायुर्भोगफलाश्च। तत्र जात्यायुर्भोगफला एकानेकजन्मभवा

14 Pāt. yo. sū. 2.33
15 Pāt. yo. sū. 1.50
16 Yo. sū. bhā. 1.50
17 Pāt. yo. sū. 1.51
18 Yo. sū. bhā. 1.51
19 Pāt. yo. sū. 4.8

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



इत्यनेन पूर्वमेव कृतनिर्णयाः। यास्तु स्मृतिमात्रफलास्तासु ततः कर्मणो येन कर्मणा यादृक् शरीरमारब्धं देवमनुष्यतिर्यगादिभेदेन तस्य विपाकस्य या अनुगुणा अनुरूपा वासनास्तासामेवाभिव्यक्तिर्वासनानां भवति।'[20] उक्तञ्च व्यासेन भाष्ये—'यज्जातीयस्य कर्मणो यो विपाकस्तस्यानुगुणा या वासनाः कर्मविपाकमनुशेरते तासामभिव्यक्तिः, न हि दैवं कर्म विपच्यमानं नारकतिर्यङ्मनुष्यवासनाभिव्यक्तिनिमित्तं भवति, किन्तु दैवानुगुणा एवास्य वासना व्यज्यन्ते।'[21]

सांख्यदर्शनेऽपि संस्कारविषये सूक्ष्मज्ञातव्यान्युक्तानि। सुषुप्तिकाले यद्यपि चित्ते संस्कारास्तिष्ठन्ति तथापि न ते विषयस्मारका भवन्ति, निद्रादोषाभिभवादेव। तदेवोक्तं—'वासनया न स्वार्थख्यापनं दोषयोगेऽपि, न निमित्तस्य प्रधानबाधकत्वम्'[22] इति। उक्तञ्च विज्ञानभिक्षुणा—'यथा वैराग्ये तथा निद्रादोषयोगेऽपि सति वासनया न स्वार्थख्यापनं—स्वविषयस्मारणं भवति। यतो न निमित्तस्य गुणीभूतस्य संस्कारस्य बलवत्तरनिद्रादोषबाधकत्वं सम्भवतीत्यर्थः।'[23] पुनश्च जीवन्मुक्तस्य प्रारब्धसंस्कारवशात् यच्चक्रभ्रमिवत् शरीरावस्थानं भवति तत्र स एव एकः संस्कारः प्रारब्धभोगसम्पादकः। स च कर्मवदेव भोगसमाप्तिनाश्यः, न तु प्रतिक्रियं प्रतिभोगव्यक्ति संस्कारनानात्वम्, बहुव्यक्तिकल्पनागौरवप्रसङ्गात्।[24]

अद्वैतवेदान्तमते वृत्तिध्वंस एव संस्कारजनकः। अतएव तैः सुखादिस्मरणोपपत्त्यर्थं सुखाद्युपलम्भे सुखादिविषयकान्तःकरणवृत्तिः स्वीकृता। रज्जुसर्पाद्युपलम्भे बहिःसम्प्रयोगाभावात् चान्तःकरणवृत्त्यसम्भवेऽपि तत्स्मरणोपपत्त्यर्थमविद्यावृत्तिरङ्गीकृता। तथा च तत्तद्वृत्तिध्वंसजनितसंस्कारादेव तत्तत्स्मरणोपपत्तिः।

केषाञ्चिन्मते तु सुखदुःखादीनामेवान्तःकरणवृत्तिस्वरूपत्वात् सदा ज्ञायमानस्वरूपत्वाच्च न सुखादिविषया वृत्त्यन्तरमपेक्षिता, अपि तु सुखादिरूपवृत्तिध्वंसादेव तद्विषयकसंस्कारोत्पत्तेः स्मरणोपपत्तिः।

---

20 Yo. sū. bho. vṛ. 4.8
21 Yo. sū. bhā. 4.8
22 Sā. sū. 5.119
23 Sā. pra. bhā. 5.119
24 Sā. pra. bhā. 5.120

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



बृहदारण्यकभाष्ये हि शङ्करेणोक्तं संस्कारविषये—'...न हि वासनया विना कर्म कर्तुं फलञ्चोपभोक्तुं शक्यते ; न हि अनभ्यस्तविषये कौशलमिन्द्रियाणां भवति। पूर्वानुभववासनाप्रवृत्तानां त्विन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुपपद्यते। दृश्यते च केषाञ्चित् कासुचित् क्रियासु चित्रकर्मादिलक्षणासु विनैवेहाभ्यासेन जन्मत एव कौशलम् ; कासुचिदत्यन्तसौकर्ययुक्तास्वप्यकौशलं केषाञ्चित्। तथा विषयोपभोगेषु स्वभावत एव केषाञ्चित् कौशलाकौशले दृश्येते।'[25]

मधुसूदनेनोक्तं भक्तिरसायने संस्कारोत्पत्तौ कामक्रोधस्नेहादितापकैः द्रवीभूतचित्तस्य हेतुत्वम्—

'द्रुते चित्ते विनिक्षिप्तः स्वाकारो यस्तु वस्तुनः।
संस्कार-वासना भाव-भावनाशब्दभागसौ ॥
शिथिलीभावमात्रन्तु मनो गच्छत्यतापकैः।
न तत्र वस्तु विशति वासनात्वेन किञ्चन ॥'[26]

अद्वैतमते अन्तःकरणमेव संस्काराश्रयो न त्वात्मा। ननु तथापि अद्वैतमते मिथ्यारजतानुभवजन्याः संस्काराः कुत्रोत्पद्यन्ते ? प्रमाजन्यसंस्काराणामन्तःकरणे उत्पन्नत्वेऽपि अविद्यावृत्तिकृतानां भ्रमसंस्काराणान्तःकरणे उत्पादासम्भवात्। तथाच कथमनुभूतानां मिथ्यारजतादीनां स्मृतिः ? उच्यते। अविद्यावृत्तिजन्याः संस्कारा अविद्यायामुत्पन्ना अपि अन्तःकरणे पर्यवस्यन्ति। तत्रेदमाकारान्तःकरणस्य तादृशरजताकाराविद्याधिष्ठानत्वात्। तथा च प्रमाजन्या इव भ्रमजन्या अपि संस्कारा अन्तःकरणाश्रिताः, निमित्तकारणत्वेन पुनः साक्षिणि स्मरणाकारामविद्यावृत्तिं जनयितुं समर्थाः। अथवा, प्रमास्थले यथा अन्तःकरणे उत्पन्ना संस्काराः वस्तुतः कारणीभूतमूलाविद्यायामेवोत्पन्नाः सन्तः अन्तःकरणे संदृश्यन्ते, तथा भ्रमस्थलेऽपि मूलाविद्यायामुत्पन्ना एव संस्काराः तूलाविद्यायां मूलाविद्यावस्थाविशेषरूपायां संदृश्यन्ते। तथा च मूलाविद्यास्थसंस्कारा एव भ्रमप्रमोभयस्थले स्मृतिजनने समर्था भवन्तीति दिक्।[26a]

---

25 Bṛ. up. Śā. bhā. 4.4. 2-3     26 Bhak. ras. 1.6-7

26a Vide Siddhantabindu-prapātanā p. 125-26 (B.O,R.I.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



रामानुजमते भावनाख्यसंस्कारोऽपि ज्ञानावस्थाविशेष एव। उक्तञ्च—'भावनाख्यसंस्कारस्य ज्ञानविशेषरूपत्वात्।'[26b] उक्तञ्च तत्र प्रकाशटीकायाम्—'संस्कारो हि धर्मभूतज्ञानस्यावस्थाविशेषः, स्मृत्यादिवत्। ज्ञानस्य द्रव्यत्वेन तस्यावस्थावत्त्वमुपपद्यते इति।'

बौद्धैरपि संस्कारस्कन्धस्वीकारेण संस्कारः स्वीकृत एव। उक्तं च—'संस्कारस्कन्धश्चतुर्भ्योऽन्ये संस्काराः'[27] इति। चतुर्भ्यः रूपवेदनासंज्ञाविज्ञानस्कन्धेभ्यो व्यतिरिक्ताः संस्कारस्कन्ध इत्यर्थः। स च संस्कारश्चेतसो विज्ञानस्यात्मभूत एव पूर्वानुभवाहितसामर्थ्यरूपः स्मृतिहेतुः। न तु स आत्मगुणः, आत्मन एवानभ्युपगात्। तथा चोक्तं शान्तरक्षितेन—

भावनाख्यस्तु संस्कारश्चेतसो वासनात्मकः।
युक्तो नात्मगुणश्चैष युज्यते तन्निराकृतेः।[28]

उक्तञ्च कमलशीलेन—'पूर्वानुभवाहितसामर्थ्यलक्षणा चेतसः स्वात्मभूता भावना स्मृत्यादिहेतुरिष्यते एव यस्या वासनेति प्रसिद्धिः।'[29]

जैनैरपि स्मृत्यादिजननसामर्थ्यरूप एव संस्कारः स्वीक्रियते आत्मानोऽनर्थान्तरभुतः। तथा चोक्तं प्रभाचन्द्रेण—'भावनाख्यस्तु संस्कारो धारणापरनामा नानिष्टः, पूर्वपूर्वानुभवाहितसामर्थ्यलक्षणस्यात्मनोऽनर्थान्तरभूतस्य स्मृत्यादिहेतुत्वेनास्यास्माभिरिष्टत्वात्।[30]

उक्तञ्च भास्करनन्दिनाऽपि तत्त्वार्थवृत्तौ—'निश्चितस्य कालान्तराविस्मरणकारणं धारणा। यथा सैवेयं वलाका या पूर्वाह्ने मया दृष्टा।'[31]

शाक्तागमे त्रिपुरारहस्ये चित्तस्य तत्त्वज्ञानोत्पत्तिप्रतिबन्धकसंस्काराणां त्रैविध्यमुक्तम्। अपराधवासना, कर्मवासना, कामवासना चेति। तासामपनोदने स्वल्पविचारेण श्रवणमात्राद्वा स्वत एव तत्त्वज्ञानं जायते। अपराध-

---

26b Yat. māt. dīp. p. 98 (A.A.)
27 Abhi. ko. 1.15
28 Tattva sam, p. 685 (Baudh. bhā)
29 Tattva. saṃ. ṭīkā p. 229
30 Pra. Ka. mā. P. 599. (Nirnayasagar)
31 Tattvā. vṛ. 1. 15

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



वासना पुनर्द्विविधा—अश्रद्धावासना विपरीतग्रहवासना चेति। सा चापराधत्वनिश्चयान्निवर्तते। पूर्वदुष्कृतसंस्कारजन्यं गुरूपदेशग्रहणप्रतिबन्धकं बुद्धिस्थमालिन्यं कर्मवासना निरोधेनापि दुर्ज्ञेया, ईश्वरानुग्रहमात्रापनेया। कामवासना तु एकस्यापि पुरुषस्यासंख्येया वैराग्याद्यपनेया।[32] तथाचोक्तं त्रिपुरारहस्ये—

'राम! तस्माद्वासनानां निरासः साधनं स्मृतम्॥'
'वासना विविधाः प्रोक्तास्तत्र मुख्या वदामि ते॥'
'अपराध-कर्म-कामभेदेन त्रिविधा हि सा।'
'एताभिस्तिसृभी राम! वासनाभिर्यतो मनः।
समाक्रान्तमतो नूनं तत्तत्त्वं नावभासते॥'[33]

## जीवनयोनिप्रयत्नः

जीवनहेतुप्रयत्नरूपो हि अपरिदृष्टचित्तधर्मः पूर्वमेव प्रयत्नात्मकचित्तधर्मपरिच्छेदे विस्तारेण निरूपितः। स च जीवनादृष्टजन्योऽसंविदितरूपेण सदैव चित्ते तिष्ठन् प्राणापानादिव्यापारे रक्तसञ्चालनादिव्यापारे च हेतुर्भवति, चेष्टामात्रस्यैव प्रयत्नजन्यत्वात्। न्यायवैशेषिकादिमतेषु अयमपि प्रयत्नः प्रवृत्तिनिवृत्तिरूपप्रयत्नवदात्मविशेषगुण एव, न त्वन्तःकरणधर्मः। सर्वथाऽपि जीवनहेतुप्रयत्नोऽतीन्द्रियः स्वीकृत एव।

पातञ्जलभाष्ये वर्णिता अन्येऽपि अपरिदृष्टचित्तधर्मा निरोध-शक्त्यादयः पूर्वमेव व्याख्याता इति विरम्यते।

32 Tri. ra. tan. 19.13–26
33 Ibid. 19.13, 15, 16, 30



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



## अदृष्ट-स्वतन्त्रकर्म-स्वतन्त्रेच्छाविचारः

प्राचीनभारतीयदर्शनेषु तथा आधुनिक-प्राच्य-पाश्चात्त्यदर्शनेषु चायं महान् वितर्कविषयः यदस्माकं सर्वा एव प्रचेष्टा अदृष्टकारिताः, उतास्ति प्रचेष्टासु अस्माकं स्वातन्त्र्यं पूर्णतः, अंशतो वा? तत्र शास्त्रदृष्टया अस्मद्विचारतश्च यत् प्रतिभाति तदुच्यते।

ननु सर्वं चेष्टितं स्वतन्त्रं वा अदृष्टकारितं वा, किं तेन भवति? उच्यते। यदि सर्वमेव चेष्टितमदृष्ट-कारितं स्यात् कस्मिंश्चिदपि कर्मणि अस्माकं यदि स्वातन्त्र्यं न स्यात् तदा शास्त्रोपदेशानां गुरूपदेशानां च वैयर्थ्यं स्यात्; पापकर्मणि वा पुण्यकर्मणि वा मोक्षसाधने श्रवणादौ चास्माकं स्वातन्त्र्याभावादुपदेशानामानर्थक्यमेव। पक्षान्तरे यदि तेषु कर्मसु अस्माकं स्वातन्त्र्यं स्यात् तदैव उपदेशानुसारेणास्माकं किञ्चित् कर्तुमकर्तुं वा सामर्थ्यसम्भवात् उपदेशसार्थक्यं भवेत्।

तत्र तावत् तार्किकानां नैयायिकवैशेषिकाणामिदं समाधानं यत्—यद्यपि सर्वं एव जन्यपदार्थोऽदृष्टजन्यस्तथापि सुखदुःखभोगं प्रत्येवादृष्टस्यासाधारण-कारणत्वात् जन्यमात्रं प्रति च कालादिवत् साधारणकारणत्वात् कर्मानुष्ठानं प्रत्यपि अदृष्टस्य साधारणकारणत्वान्नादृष्टेनास्माकं कर्तृत्वस्य हानिः। यथा कालस्य साधारणकारणत्वेऽपि कालवशादिदं कुर्म इति नास्माकं कर्तृत्व-हानिः, तथैवादृष्टस्य साधारणकारणत्वेऽपि न कर्तृत्वं स्वातन्त्र्यं वा कर्मणि क्षुण्णम्। कर्तृत्वञ्च क्रियायां स्वातन्त्र्यमेव। अस्त्येव सन्ध्योपासनाया-मस्माकं कर्तुमकर्तुं वा स्वातन्त्र्यम्, तथा निषेधविषये सुरापानादौ अपि। तस्मात् जीवानां क्रियायां कर्तृत्वस्य स्वातन्त्र्यस्य च सत्वात् न शास्त्रो-पदेशवैयर्थ्यम्।

रामानुजादिवैष्णवमते च—यद्यपि सर्वमेव कर्मकर्मफलादिकमीश्वरा-धीनमेव, तथापि ईश्वरेण एव जीवेषु किञ्चित् कर्तृत्वं तथा स्वातन्त्र्यं च प्रदत्तम् तेनैव कर्तृत्वेन शुभमशुभं वा कर्म कुर्वन् जीवः पुण्यं वा पापं वा सुखदुःखप्रदमाचिनोति।

अद्वैतवेदान्तादिमतेषु यद्यपि जीवस्य चिदात्मनः स्वरुपतः कर्तृत्वमपि नास्ति, तथापि बुद्ध्युपाधिवशादारोपितं कर्तृत्वं तथा तादृशं स्वातन्त्र्यं च कर्मसु विद्यते इति तेनैव कर्म कुर्वन् जीवो बुद्धौ पुण्यं वा पापं वा लभते। बुद्धिस्थं तत्फलं सुखदुःखभोगमप्यात्मनि आरोपितमेव लभते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अतएव 'न नैर्घृण्यवैषम्ये जीवकर्मापेक्षत्वात्तस्य' इति ब्रह्मसूत्रे सर्वैरेवाचार्यैः जीवस्य सुख-दुःखादिभोगानां जीवकर्मसापेक्षत्वादीश्वरस्य पक्षपातित्वनिष्ठुरत्वादिदोषाः क्षालिताः। यद्यपि तैरेवं कथञ्चित् जीव-कर्तृत्व-स्वीकारेण शास्त्रोपदेशानर्थक्यं निवारितम्, क्रियासु जीवानां स्वातन्त्र्यात् क्रियाजनित-गुणदोषौ धर्माधर्मरूपौ च स्थापितौ, तथाप्यत्र विद्यते अधिकमपि सूक्ष्मतरं चिन्तनीयमिति तदालोच्यते।

सत्यं जीवानां कासुचित् क्रियासु स्वाधीनत्वं स्वातन्त्र्यं वा विद्यते, येन तैः स्वेच्छया हस्तसञ्चालनादिकं कर्तुमकर्तुमन्यथाकर्तुं वा शक्यते। तदेव क्रियायां स्वाधीनत्वं स्वातन्त्र्यं वा यत् स्वेच्छानुसारेण कर्तुमकर्तुं वा सामर्थ्यम्। तथापि क्रियासु स्वातन्त्र्यं न निरङ्कुशं निरतिशयं वा। अपि तु तत् स्वातन्त्र्यं सीमितमेव। न हि कस्यापि पद्भ्यामाकाशगमने स्वातन्त्र्यमस्ति; न च पदसञ्चालनेऽपि निरङ्कुशं स्वातन्त्र्यमस्ति, सहसा पङ्गुत्वागमे पदसञ्चालनेऽपि सामर्थ्याभावात्। तस्मात् कासुचिदेव योग्यक्रियासु मानवानां सीमितमेव स्वातन्त्र्यं स्वाधीनता वा विद्यते इत्यस्माकं सिद्धान्तः।

परन्तु स्वेच्छानुसारेण क्रियासामर्थ्यं यथा क्रियायां स्वातन्त्र्यं मन्यते, न हि तादृशं स्वातन्त्र्यमिच्छायां मानवानां विद्यते, स्वेच्छानुसारेण इच्छाजनने सामर्थ्याभावात्। न हि कश्चित् भृशमुदरपूरणे सति भोजनेच्छां स्वस्मिनुत्पादयितुं समर्थः। न हीच्छा क्रियाविशेषो येन कर्तुमकर्तुं वा शक्या स्यात्। अपितु इष्टसाधनताज्ञाने सति बलवत्तरानिष्टसाधनताज्ञानाभावे च सति इच्छा भवत्येव विनाऽपि तद्विषयिनीमिच्छाम्। सत्यामपि पुनरिच्छाविषयिन्यामिच्छायाम् इष्टसाधनताज्ञानाभावे बलवत्तरद्विष्ट-साधनताज्ञाने वा इच्छा कदापि न भवति, भावयितुं शक्यते वा। चिकीर्षायाञ्च कृतिसाध्यताज्ञानमपि कारणं भवति, तेन वर्षणे आकाशगमने वा इष्टसाधनत्वज्ञानसत्त्वेऽपि न कस्यचित् चिकीर्षा प्रवृत्तिर्वा भवति।

इष्टसाधनत्वज्ञानं कृतिसाध्यत्वज्ञानञ्च पुनर्बहिरान्तरकारणकलापाद् भवति। अदृष्ट-संस्कारादिकं सामर्थ्यञ्चान्तरकारणानि। तस्मादिष्टसाधनत्वादिज्ञानानामेव साक्षादिच्छाजनकत्वात् अदृष्टसंस्कारादिनाञ्च तत्प्रयोजकत्वात् न मानवानामिच्छाविषये किञ्चिदपि स्वातन्त्र्यं नाम स्वेच्छाप्रयोज्यत्वमस्तीति सिद्धान्तः।

तस्मादिदमायातं यत् क्रियायां कथञ्चित् स्वातन्त्र्यसत्त्वेऽपि नास्ति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मानवानां क्रियाजनिकायामिच्छायां किञ्चिदपि स्वातन्त्र्यमिच्छाया अदृष्टाद्यधीनेष्टसाधनताज्ञानजन्यत्वात् ।

ननु तर्हि क्रियाणामपीच्छापूर्वकत्वात् परम्परया अदृष्टसंस्काराद्यधीनत्वात् पुरुषकारस्य वैयर्थ्यं स्यादिति चेन्न । यथा भोजनादृष्टेन भोजनचेष्टाया वैयर्थ्यं न भवति तादृशपुरुषकारद्वारैव भोजनादृष्टस्य फलप्रदानात्, तथैव पुरुषकारस्यैव साक्षात् फलजनकत्वात् परम्परयाऽदृष्टादिप्रयोज्यत्वेऽपि न कश्चिद्दोषः—न पुरुषकारवैयर्थ्यमिति भावः ।

ननु तथापि शास्त्रोपदेशस्य वैयर्थ्यं स्यात्, अनुकूलादृष्टसंस्कारादिसत्त्वे एव इष्टसाधनत्वादिज्ञानोत्पत्त्या इच्छाद्युत्पादे शास्त्रार्थानुष्ठाने प्रवृत्तिसम्भवात्, तदभावे शास्त्रोपदेशश्रवणेऽपि प्रवृत्त्यसम्भवादिति चेन्न । अनुकूलादृष्टसंस्कारादिसत्त्वे शास्त्रोपदेशश्रवणद्वारैव इष्टसाधनत्वज्ञानेच्छादिजननात् प्रवृत्तिसम्भवात् सार्थकमेव शास्त्रोपदेशदानं तत्श्रवणञ्चेति सर्वमवदातम् । प्रतिकूलादृष्टसंस्कारादिसद्भावे शास्त्रोपदेशश्रवणादीनां वैयर्थ्यं प्रसिद्धमेव 'शास्त्राण्यधीत्यापि भवन्ति मूर्खाः' इत्यादौ ।

—o—

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( ६ )

## प्रत्यक्षनिरूपणम्

ज्ञाननिरूपणावसरे प्रत्यक्षं सामान्यतो निरूपितमेव । प्रत्यक्षज्ञानमेव हि एकः पदार्थो यस्मिन् सर्वेषां वादिनां सचार्वाकाणामविप्रतिपत्तिः । चार्वाका अपि प्रत्यक्षस्य प्रामाण्यं स्वीकुर्वन्ति । तस्यापि प्रामाण्यं सांव्यवहारिकमिति जैना माध्यमिका अद्वैतिनश्च मन्यन्ते । प्रसिद्धानां प्रत्यक्षादिप्रमाणां प्रामाण्यं व्यावहारिकमेवेति जैना मन्यन्ते, इन्द्रियाजन्यानामात्माश्रितप्रत्यक्षाणामवधि-मनःपर्यय-केवलानामेव मुख्यं प्रत्यक्षत्वं तात्त्विकप्रामाण्यं चेति तेषां मतम् । तदुक्तं भास्करनन्दिना—'संव्यवहारापेक्षया तु देशतो वैशद्यसम्भवात् स्वसंवेदनमिन्द्रियज्ञानं च प्रत्यक्षमिति चाख्यायते । ···तमेवात्मानं प्रत्याश्रितं सम्यग्ज्ञानमिन्द्रियानिन्द्रियाद्यनपेक्षं प्रत्यक्षमिति व्यपदिश्यते ।'[1] उक्तं च परीक्षामुखसूत्रे माणिक्यनन्दिना—'इन्द्रियानिन्द्रियनिमित्तं देशतः सांव्यवहारिकं'[2]मिति ।

माध्यमिकानां शून्यवादिनां बौद्धानामपि सर्वेषां प्रत्यक्षादीनां सांवृतत्वात् व्यावहारिकमेव तेषां प्रामाण्यं न तु तात्त्विकम्, चतुष्कोटिविनिर्मुक्तस्य शून्यस्यैव तात्त्विकत्वात्, प्रमाणविषयसर्वभावानां मिथ्याविकल्पितत्वात् । तदुक्तं लंकावतारे—

'न स्वभावो न विज्ञप्तिर्न वस्तु न च आलयः ।<br>
बालैर्विकल्पिता ह्येते शवभूतैः कुतार्किकैः ॥<br>
केशोण्डुकं यथा मिथ्या गृह्यते तैमिरैर्जनैः ।<br>
तथा भावविकल्पोऽयं मिथ्या बालैर्विकल्प्यते ॥'[3]

अद्वैतवेदान्तिनामपि तात्त्विकप्रामाण्यं (-प्रमात्वं) ब्रह्मस्वरूपप्रकाशकानां सत्यं ज्ञानमित्यादिवाक्याजन्यज्ञानानां तथा तत्त्वमस्यादिवाक्यजन्यापरोक्षज्ञानानामेव, तद्विषयस्यैवाबाधितत्वात् । घटादिप्रत्यक्षानां विषयस्य परमार्थतो बाधितत्वात्[4] तेषां प्रामाण्यं (प्रमात्वं) सांव्यवहारिकमेव । यथोक्तं धर्म-

---

1 Tattvā. vṛ. 1.11.12
2 Pari. mu. sū. 2.5
3 Laṅkā. sū. p. 167-68. (kyoto)
4 Vedā. pari. p. 12 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



राजाध्वरीन्द्रेण—'एवं निरूपितानां प्रमाणानां प्रामाण्यं द्विविधम्—व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वं चेति ।'[5]

प्रमाख्येषु यथार्थानुभवेषु प्रत्यक्षानुभवस्य प्राधान्यं सर्वैरेव स्वीकृतम् । तच्च प्राधान्यं सर्वप्रमाणमूलत्वाद्वा ज्येष्ठत्वाद्वा ( प्राथमिकत्वाद्वा ) इन्द्रियसन्निकर्षजन्यत्वाद्वा विशेषावधारणात्मकत्वाद्वा साक्षात्त्वाद्वा वैशद्याद्वा विषयस्य प्रमात्रभेदाद्वेति तत् मतभेदेन तत्तत्प्रत्यक्षलक्षणालोचनावसरे स्फुटीभविष्यति ।

अनुमित्यादीनां सर्वेषां प्रत्यक्षसापेक्षत्वात् प्रत्यक्षस्य ज्येष्ठत्वं सर्वप्रमामूलत्वं च सर्वैरेव स्वीकृतम् । तथाहि—लिंगदर्शनं व्याप्तिग्रहमूलसहचारदर्शनं ( -प्रत्यक्षं ) चानुमितिप्रयोजकम् । पिण्डदर्शनं चोपमितिप्रयोजकम् । तथा शाब्दबोधः शब्द ( वाक्य ) -श्रवणसापेक्षः शक्तिग्रहमूलव्यवहारादिदर्शनसापेक्षश्च । अनुपलब्धिरपि अधिकरणप्रत्यक्षसापेक्षेति सर्वत्र यथायथं बोध्यम् । अतएव सर्वत्र दर्शनेषु प्रत्यक्षप्रमायाः प्रत्यक्षप्रमाणस्य च प्रथमं निरूपणं दृश्यते ।

## विभिन्नदर्शनोक्तलक्षणभेदाः

वैशेषिकदर्शने यद्यपि प्रत्यक्षलक्षणं स्पष्टतया नाभिहितं तथापि 'आत्मेन्द्रियार्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत्'[6] इत्यात्मनि प्रमाणोपन्यासमुखेन यत् सूत्रमुक्तं तेन वक्रोक्तिरूपेण प्रत्यक्षलक्षणमेव सूचितम् । तदनुमानादन्यत् प्रत्यक्षमेवेत्यर्थः । पुनश्च 'ज्ञाननिर्देशो ज्ञानविधिरुक्तः' 'गुणकर्मसु सन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणम्'[7] इति सूत्रयोः प्रत्यक्षज्ञानेऽर्थसन्निकर्षस्य हेतुत्वं गुणकर्मादिप्रत्यक्षे च द्रव्यघटितसन्निकर्षस्य संयुक्तसमवायादेर्हेतुत्वमुक्तम् । 'सामान्यविशेषेषु सामान्यविशेषाभावात् तत एव ज्ञानम्' 'सामान्यविशेषापक्षं द्रव्यगुणकर्मसु'[8] इति सूत्रद्वयेऽपि सत्ताद्रव्यत्वादिप्रत्यक्षे द्रव्यघटितसन्निकर्षस्यैव हेतुत्वमुक्तम्, न तु द्रव्यप्रत्यक्षवत् तत्रापि द्रव्यत्वा[illegible]त्वेन प्रत्यक्षहेतुत्वम्, सामान्यानां द्रव्यत्वादिशून्यत्वात् ; द्रव्यगुणकर्मसु प्रत्यक्षं तु द्रव्यत्वादिजातिविशेषप्रकारकं जायते, तेषां सामान्यानामिव स्वरूपतो

5 Ibid. p. 157 (chow.)
6 Vai. sū. 3.1.18
7 Ibid. 8.1.3 ; 8.1.4
8 Ibid. 8.1.5 ; 8.1.6

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



भानासम्भवात् । 'द्रव्ये द्रव्यगुणकर्मापेक्षम्'[9] इति सूत्रे द्रव्यप्रत्यक्षं द्रव्यगुणकर्माणि विशेषणविधयाऽपेक्षते इत्युक्तम्, यथा––अयं दण्डवान्, अयं शुक्लः, अयं चलतीत्यादिप्रत्यक्षमिदमंशे द्रव्यगुणकर्मप्रकारकमपि भवतीति । गुणकर्मप्रत्यक्षे तु न गुणकर्मप्रकारकत्वं गुणकर्मसु गुणकर्माभावादित्युक्तं––'गुणकर्मसु गुणकर्माभावाद् गुणकर्मापेक्षं न विद्यते'[10] इत्यादि ।

प्रशस्तपादभाष्ये च वैशेषिकाभिप्रायः स्पष्टतयाऽभिहितः । तथा ह्युक्तं––'तत्राक्षमक्षं प्रतीत्योत्पद्यते इति प्रत्यक्षम् । अक्षाणीन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि षट् । तद्धि द्रव्यादिषु पदार्थेषूत्पद्यते । द्रव्ये तावद् द्विविधे महत्यनेकद्रव्यवत्त्वोत्भूतरूप-प्रकाश-चतुष्टयसन्निकर्षाद् धर्मादिसामग्र्ये च स्वरूपालोचनमात्रम् ; सामान्यविशेषद्रव्यगुणकर्मविशेषणापेक्षादात्ममनःसन्निकर्षात् प्रत्यक्षमुत्पद्यते––सद् द्रव्यं पृथिवी विषाणी शुक्लो गौर्गच्छतीति । रूप-रस-गन्ध-स्पर्शेष्वनेकद्रव्यसमवायात् स्वगतविशेषात् स्वाश्रयसन्निकर्षान्नियतेन्द्रियनिमित्तमुत्पद्यते । शब्दस्य त्रयसन्निकर्षाच्छ्रोत्रसमवेतस्य तेनैवोपलब्धिः । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्ववेगकर्मणां प्रत्यक्षद्रव्यसमवायाच्चक्षुःस्पर्शनाभ्यां ग्रहणम् । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां द्वयोरात्ममनसोः संयोगादुपलब्धिः । भाव-द्रव्यत्व-गुणत्व-कर्मत्वादीनामुपलभ्याधारसमवेतानामाश्रयग्राहकैरिन्द्रियैर्ग्रहणमित्येतदस्मदादीनां प्रत्यक्षम्'[11] इत्यादि । अत्र प्रथमतोऽनेकद्रव्यवत्त्वोद्भूतरूपालोकादिसहकारेणात्ममनइन्द्रियार्थैतच्चतुष्टयसन्निकर्षवशात् कालादृष्टादिसाधारणकारणेषु सत्सु स्वरूपालोचनमात्रं निर्विकल्पकप्रत्यक्षमुक्त्वा ततः सविकल्पकप्रत्यक्षमप्युक्तं सामान्यादिविशेषणापेक्षादात्ममनःसन्निकर्षात् सद् द्रव्यं पृथिवीत्यादौ ।

न्यायवैशेषिकमीमांसकप्रभृतीनां मतेषु विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वाद् घटोऽयमिति विशिष्टप्रत्यक्षस्य पूर्वं विशेषणघटत्वस्य घटस्य च प्रत्यक्षं इन्द्रियसन्निकर्षादिजन्यं निर्विकल्पकं प्रथमं जायते इत्यवश्यं स्वीकार्यम् । तदनन्तरं सविकल्पकप्रत्यक्षं जायते गुणजात्यादिविशिष्टम् । निर्विकल्पकसविकल्पकयोरुभयोरेव लक्षणं कणादगौतमसूत्रेषु कृतम् ।

वैशेषिकमते प्रत्यक्षप्रमाणं तथा प्रमाणफलमपि विकल्पभेदाद् द्विविधं सम्भवतीत्युक्तं प्रशस्तपादेन । यथा––'तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं

9 Ibid. 8.1.7
10 Ibid. 8.1.8
11 Pra. bhā. p. 442-64 (V.S.V.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रत्यक्षं प्रमाणम्, प्रमेया द्रव्यादयः पदार्थाः, प्रमाता आत्मा, प्रमितिर्द्रव्यादि-विषयं ज्ञानम्। सामान्यविशेषज्ञानोत्पत्तौ अविभक्तमालोचनज्ञानमात्रं प्रत्यक्षप्रमाणम्, अस्मिन् नान्यत् प्रमाणान्तरमस्ति, अफलरूपत्वात्।'[12] तद्व्याख्यानं चोक्तं श्रीधरेण--'सम्प्रति प्रमाणफलं विभजते--तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षमिति। सामान्यं सत्ताद्रव्यत्वगुणत्वादिकम्, विशेषा व्यक्तयः, तेषु स्वरूपालोचनमात्रं विकल्परहितं प्रमाणम्, प्रमायां साधकतमत्वात्।......प्रमाणे तु निर्विकल्पके विशेषणज्ञानादिलक्षणे (विशेषण-विशिष्ट-) विशेष्यज्ञानादिलक्षणा प्रमा भवत्येवेत्यतिशयः।......यदा निर्विकल्पकं सामान्यविशेषज्ञानं प्रमाणं तदा द्रव्यादिविषयं विशिष्टं ज्ञानं प्रमितिरित्यर्थः। यदा निर्विकल्पकं सामान्यविशेषज्ञानमपि प्रमारूपमर्थप्रतीतिरूपत्वात्, तदा तदुत्पत्तावविभक्तमालोचनमात्रं प्रत्यक्षम्। आलोच्यतेऽनेनेत्यालोचनमिन्द्रियसन्निकर्षस्तन्मात्रम्, अविभक्तं केवलं ज्ञानानपेक्षमिति यावत्, सामान्यविशेषज्ञानोत्पत्तौ प्रमाणम्। विशेष्यज्ञानोत्पत्तावपीन्द्रियार्थसन्निकर्षः प्रमाणं भवत्येव प्रमाहेतुत्वात्, किन्तु विशेषणज्ञानसहकारितया न केवलः, सामान्यविशेषज्ञानोत्पत्तौ तु ज्ञानानपेक्षः केवल एवेत्यभिप्रायः। सन्निकर्षमात्रमिह (निर्विकल्पके) प्रमाणं न ज्ञानमित्यत्रोपपत्तिमाह--न तस्मिन्निति।'[13] इन्द्रियसन्निकर्षस्य प्रमाणत्वे निर्विकल्पकप्रत्यक्षं फलं प्रमितिरिति निष्कर्षः। सविकल्पकेऽपि निर्विकल्पकविशेषणज्ञानसहकारितया इन्द्रियसन्निकर्षः प्रमाणमित्यपि बोध्यम्।

सविकल्पकप्रत्यक्षज्ञानस्यैव प्रमाणत्वं हानोपादानादिबुद्धीनां च प्रमाणफलत्वमभ्युपगम्य कल्पान्तरमपि प्रदर्शितं प्रशस्तपादेन। तदुक्तं—'अथवा, सर्वपदार्थेषु चतुष्टयसन्निकर्षादवितथमव्यपदेश्यं यज्ज्ञानमुत्पद्यते तत् प्रत्यक्षं प्रमाणम्, प्रमेया द्रव्यादयः पदार्थाः, प्रमाता आत्मा, प्रमितिर्गुण-दोषमाध्यस्थ्यदर्शनमिति।'[14] परिष्कृतं च तत् श्रीधरेण न्यायकन्दल्यां—'सम्प्रति हानादिबुद्धीनां फलत्वे विशेष्यज्ञानं प्रमाणमित्याह-अथवेति। चतुष्टयग्रहणमुदाहरणार्थम्। द्वयसन्निकर्षात् त्रयसन्निकर्षादवितथं[15] संशयविपर्ययरहितमव्यपदेश्यं......शब्दाजन्यं यद्विज्ञानं जायते तत् प्रत्यक्षं प्रमाणम्। संशयो ह्यनवस्थितोभयधर्मतया पदार्थमुपदर्श्य (अन्ते) व्यवस्थितैकधर्माणं प्रापयति,

---

12 Pra. bhā.p. 471-73 (V.S.V.)

13 Nyā. Kan. p.471-73 (V.S.V.)

14 Pra. bhā. p. 474. (V.SV.)

15 आत्मप्रत्यक्षे द्वयसन्निकर्षः, सुखादिप्रत्यक्षे च त्रयसन्निकर्षः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अन्यथाऽध्यवसायो वितथ एवेत्यवितथपदेन व्युदस्यति। अव्युत्पन्नस्य सन्निहितेऽर्थे व्यापृयमाणे चक्षुषि शब्दश्रवणानन्तरं यद्गौरिति ज्ञानं जायते तत्राक्षमपि कारणम्, अन्यथा (गोः) रेखोपरेखत्वादिविशेषप्रतीत्ययोगात्। न च तत् प्रत्यक्षम्, अनन्तरभाविनः शब्दस्यैव तदुत्पत्तौ साधकतमत्वादिन्द्रियसन्निकर्षस्यापि तत्सहकारित्वात्। तथापि पृष्टो व्यपदिशति—अनेन समाख्यातम्,[16] न पुनरेवमभिधत्ते—प्रत्यक्षो मया प्रतीतं गौरयमिति, तस्य व्यवच्छेदार्थमुक्तमव्यपदेश्यमिति। प्रमितिर्गुणदोषमाध्यस्थ्यदर्शनम्। गुणदर्शनमुपादेयत्वज्ञानम्, दोषदर्शनं हेयत्वज्ञानम्, माध्यस्थ्यदर्शनं न हेयं नोपादेयमिति ज्ञानं प्रमितिः, पदार्थस्वरूपबोधे सति उपकारादिस्मरणात्।'[17]

एवं प्रमाणफले विप्रतिपत्तिर्दृश्यते। मतभेदेनार्थप्रकाशो वा हानोपादानादिस्तद्बुद्धिर्वा प्रमाणफलम्।[18] अयं भावः—यथार्थानुभवस्य प्रमायाः करणमेव मुख्यं प्रमाणमित्येव तार्किक-सांख्य-वेदान्तिप्रभृतीनां मतम्। तेषां मते बोध एव मुख्यं प्रमाणफलं प्रमितिः। जैनानां मते हानादिबुद्धिः, हानोपादानादिरूपप्रवृत्त्यादिर्व्यवहारो वा प्रमाणफलं प्रमितिः। तेषां मते प्रवृत्त्यादेरेव प्रमितित्वात् ज्ञानमेव मुख्यं प्रमाणम्। तथा ह्युक्तं माणिक्यनन्दिना—'स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम्'[19] 'हिताहितप्राप्तिपरिहारसमर्थं हि प्रमाणं ततो ज्ञानमेव तत्'[20] इत्यादि।

वैशेषिकानां प्राचीननैयायिकाणां च मतयोर्ज्ञानमिन्द्रियसन्निकर्षो वा विकल्पभेदेन प्रमाणं भवति। तत् पूर्वमेव प्रदर्शितं प्रशस्तपादभाष्येण।[21] वात्स्यायनेनापि तदुक्तं न्यायभाष्ये—'अक्षस्य अक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्निकर्षः, ज्ञानं वा। यदा सन्निकर्षः, तदा ज्ञानं प्रमितिः। यदा ज्ञानं तदा हानोपादनोपेक्षाबुद्धयः फलम्।'[22] भाट्टप्राभाकराणामपि मतेषु विकल्पेन इन्द्रियसन्निकर्षादीनां ज्ञानस्य वा प्रमाणत्वं, ज्ञानस्य दानादिबुद्धेर्वा फलत्वमभिप्रेतमित्यग्रे निरूपयिष्यते।

इदमपि बोध्यं यत् प्रत्यक्षपदेन यद्यपि मुख्यत इन्द्रियसन्निकर्षादिजन्यं ज्ञानमेव उच्यते, तथापि करणव्युत्पत्त्या इन्द्रियसन्निकर्ष इन्द्रियं वा ज्ञानकरणमपि

---

16 समाख्यातं गौरयमिति भावः।
17 Nyā. Kan. p. 474-75 (V.S.V.)
18 Pra pañ p.112 (B.H.U.)
19 Parī. mu. sū. 1. 1
20 Ibid-1.2
21 Pra. bhā. p. 474 (V.S.V.)
22 Nyā. bhā. 1.1.3



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



बोधयितुं शक्यते । उक्तं हि कन्दलीकारेण—'अक्षमक्षं प्रतीत्य या बुद्धिरुत्पद्यते तत् प्रत्यक्षम् । सुखादयश्च न बुद्धिस्वभावाः कुतस्तेषु प्रसक्तिः । यद्येवं सन्निकर्षस्य प्रामाण्यं न लभते ? सत्यम्, इतो वाक्यान्न लभते यदि तु करणव्युत्पत्त्या तस्यापि प्रामाण्यममिमतं परिच्छेदहेतुत्वात् इति ।'[23]

शिवादित्येन चोक्तं सप्तपदार्थ्याम्—'तत्त्वानुभवः प्रमा ।···प्रमा प्रत्यक्षमनुमितिश्च । प्रत्यक्षं सप्तप्रकारम् । तच्च ईश्वर-घ्राण-रसन-चक्षु-स्त्वक्-श्रोत्र-मनोलक्षणम् ।······वस्तुस्वरूपमात्रग्रहणं निर्विकल्पम् । विशिष्टस्य ग्रहणं सविकल्पकम् ।···सविकल्पकनिर्विकल्पकयोस्तु प्रामायामप्रमायां चान्तर्भावः ।'[24]

उक्तं च तद्व्याख्यानं मितभाषिण्यां माधवसरस्वत्या—'नन्वयं घट इति विशिष्टज्ञानं सविकल्पकम्, प्रथमाक्षसन्निपातजं ज्ञानं निर्विकल्पम्, एतद्द्वयं किमिति नोद्दिष्टमित्यत आह—सविकल्पकेति । रजते एव इदं रजतमिति सविकल्पकं प्रमा, अरजते रजतज्ञानमप्रमा इत्यर्थः । निर्विकल्पकं तु प्रमायामेवान्तर्भवति, तस्य प्रथमाक्षसन्निपातजस्य वस्तुस्वरूपमात्रविषयकस्य काप्यबाधात्, सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायात्, निर्विकल्पकस्य प्रकाराभावात् इति ।'[25]

इदं हि वैशेषिकमतेन बोध्यम् । न्यायमते तु 'न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम्'[26] इति बोध्यम्, तद्वति तत्प्रकारकज्ञानस्यैव प्रमात्वात्, निर्विकल्पकस्य च निष्प्रकारकत्वात् ।

गौतमीयन्यायसूत्रे वात्स्यायनभाष्ये च प्रत्यक्षलक्षणादिकं स्पष्टतररूपेणाभिहितम् । तत्रापि प्रत्यक्षपदं प्रमाज्ञानबोधकम्, प्रकरणात् प्रमाकरणबोधकं वा । 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्ष'मिति प्रत्यक्षसूत्रे यदि प्रमाणस्यैव प्रकृतत्वात् प्रत्यक्षपदं प्रमाणपरं तदा लक्षणे यत इत्यध्याहारेण प्रमाणे लक्षणं नेतव्यम् । अथवा, प्रमालक्षणमेवेदमस्मिन् ज्ञाते प्रमाणज्ञानस्यानायासेनैव लभ्यत्वात् ।

उक्तं च वात्स्यायनेन न्यायभाष्ये—'इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यत्

23 Nyā. kan. p. 443 (V.S.V.)
24 Sap. pad. p. 72, 27, 82, 29 (Cal. S.S.
25 Mitabhā. p. 32. (C.S.S.)
26 Bhā. pari. p. 481 (N. S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



ज्ञानं तत् प्रत्यक्षम् ।···नेदं कारणावधारणम्—एतावत् प्रत्यक्षे कारणमिति ; किन्तु विशिष्टकारणवचनम् । यत् प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते । यत्तु समानमनुमानादिज्ञानस्य न तन्निवर्त्यते इति ।'[27]

तस्मात् प्रत्यक्षं यथेन्द्रियार्थसन्निकर्षजन्यं तथा मन-इन्द्रियसंयोगजन्यमात्म-मनःसंयोगजन्यं चेति बोध्यम् । उक्तं च विश्वनाथेन न्यायसूत्रवृत्तौ—'प्रत्यक्षसूत्रे इन्द्रियार्थसन्निकर्षाभिधानं हि न कारणाभिधित्सया, येनात्ममनः-संयोगस्यानभिधानेन न्यूनत्वम्, अपि तु लक्षणाभिप्रायेण । तत्र च सामग्री-घटितस्येवासाधारणकारणघटितस्यापि लक्षणस्य सुवचत्वात् । इन्द्रियार्थसन्नि-कर्षस्य चासाधारणत्वात् पृथक् वचनम्—आत्ममनःसंयोगादिसाधारणकारणाद् व्यवच्छिद्य लक्षणघटकतया वचनं युक्तम् ।'[28] तस्मादुक्तं वृत्तिकार-सम्मते सूत्रेऽपि—'प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य पृथग्वचन-मिति ।'[29] भाष्यपाठोऽयमित्यन्ये ।

प्रत्यक्षसूत्रस्थाव्यपदेश्यपदं च पूर्वपक्षपूर्वकं व्याख्यातं वात्स्यायनेन भाष्ये —'यावदर्थं वै नामधेयशब्दास्तैरर्थसम्प्रत्ययः, अर्थसम्प्रत्ययाच्च व्यवहारः । तत्रेदमिन्द्रियार्थसन्निकर्षादुत्पन्नमर्थज्ञानं रूपमिति वा रस इत्येवं वा भवति । रूपरसशब्दाश्च विषयनामधेयम् । तेन व्यपदिश्यते ज्ञानं रूपमिति जानीते, रस इति जानीते । नामधेयशब्देन व्यपदिश्यमानं सत् शाब्दं प्रसज्यते, अत आह—अव्यपदेश्यमिति ।······यदा तु सोऽर्थो गृह्यते तदा पूर्वस्मादर्थज्ञानान्न विशिष्यते, तदर्थविज्ञानं तादृगेव भवति, तस्य त्वर्थज्ञानस्य अन्यः समाख्या-शब्दो नास्ति येन प्रतीयमानो व्यवहाराय कल्पते, न चाप्रतीयमानेन व्यवहारः । तस्मात् ज्ञेयार्थस्य संज्ञाशब्देनेतिकरणयुक्तेन निर्दिश्यते ज्ञानं—रस इति ज्ञान-मिति । तदेवमर्थज्ञानकाले स न समाख्याशब्दो व्याप्रियते, व्यवहारकाले तु व्याप्रियते । तस्मादशाब्दमर्थज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नमिति ।'···

'यदतस्मिंस्तदिति तद्व्यभिचारि । यत्तु तस्मिंस्तदिति तदव्यभिचारि प्रत्यक्षमिति । दूराच्चक्षुषा ह्ययमर्थं पश्यन् नावधारयति धूम इति वा रेणुरिति वा । तदेतदिन्द्रियार्थसन्निकर्षोत्पन्नमनवधारणज्ञानं प्रत्यक्षं प्रसज्यते इत्यत आह—व्यवसायात्मकमिति । न चैतन्मन्तव्यमात्ममनःसंयोगजन्यमेवान-

27 Nyā. sū. bhā. 1. 1. 4
28 Nyā. sū. vṛ. 2. 1. 24 (26)
29 Nyā. sū. 2. 1. 24 (26)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



वधारणज्ञानमिति ।...चक्षुषा ह्ययमर्थं पश्यन् नावधारयति, यथा चेन्द्रियेणोपलब्धमर्थं मनसोपलभते, एवमिन्द्रियेणानवधारयन् मनसा नावधारयति । यच्चैतदिन्द्रियानवधारणपूर्वकं मनसाऽनवधारणं तद्विशेषापेक्षं विमर्शमात्रं संशयो न पूर्वमिति । सर्वत्र प्रत्यक्षविषये ज्ञातुरिन्द्रियेण व्यवसायः, पश्चान्मनसाऽनुव्यवसायः, उपहतेन्द्रियाणामनुव्यवसायाभावादिति ।'

'आत्मादिषु सुखादिषु च प्रत्यक्षलक्षणं व्यक्तव्यम् । अनिन्द्रियजन्यं हि तदिति ? इन्द्रियस्य वै सतो मनस इन्द्रियेभ्यः पृथगुपदेशो धर्मभेदात् । भौतिकानि हीन्द्रियाणि नियतविषयाणि । सगुणानां चैषामिन्द्रियभावः । मनस्त्वभौतिकं सर्वविषयं च, नास्य सगुणस्येन्द्रियभाव इति । सति चेन्द्रियार्थसन्निकर्षे सन्निधिमसन्निधिं चास्य युगपत्ज्ञानानुत्पत्तिकारणं वक्ष्याम इति । मनसश्चेन्द्रियभावान्न वाच्यं लक्षणान्तरमिति ।'[30]

जयन्तभट्टेनापि न्यायमंजर्यां प्रायशः भाष्यानुसारेणैव सूत्रस्य व्याख्यानं कृतम् । सूत्रस्थ-पदानां तात्पर्योद्घाटनप्रसंगेनेन्द्रियसन्निकर्षादिनिरूपणमपि तेन कृतम् । तथा ह्युक्तं—'नन्विन्द्रियार्थसन्निकर्षोत्पन्नमिन्द्रियगत्यनुमानमप्यस्ति, तद्धीन्द्रियार्थसन्निकर्षेण लिंगभूतेन जन्यते देशान्तरप्राप्त्येव तपनगमनानुमानमिति कथमनेन पदेनानुमानमपाक्रियते ? नैतदेवम्, इन्द्रियेण स्वविषयसन्निकृष्टेन सता तत्रैव यद्विज्ञानमुत्पद्यते तदिन्द्रियार्थसन्निकर्षोत्पन्नमिह ब्रूमहे ; न चेदृशमिन्द्रियगत्यनुमानम् । कुतो विशेषप्रतिलम्भ इति चेत्, उत्पन्नग्रहणादिति ब्रूमः । उत्पन्न-ग्रहणेनं हि सन्निकर्षस्य कारकत्वं ख्याप्यते, तच्चापीन्द्रियविषयेऽर्थे ज्ञानमुत्पादयतो निर्वहति । इन्द्रियगत्यनुमाने तु न सन्निकर्षं कारकमाहुरपि तु ज्ञापकम् ।'[31]

एवमुत्पन्नपदस्य तात्पर्यमुद्घाट्य तदनन्तरमिन्द्रियाणामुद्देशं कृत्वा इन्द्रियार्थान् वर्णयन्ति जयन्तभट्टपादाः । यथा—'इन्द्रियाणि घ्राणरसननयनस्पर्शनश्रोत्राणि पृथिव्यादिभूतपंचकप्रकृतीनि वक्ष्यन्ते । अर्थास्तु गन्धरसरूपस्पर्शशब्दा गन्धत्वादिस्वजात्यवच्छिन्नास्तदधिकरणानि पृथिव्यप्तेजांसि द्रव्यानि, तदधिष्ठानाः संख्यादयो गुणाः, उत्क्षेपणादीनि कर्माणि, तद्वृत्तीनि सामान्यानि येषां स्पर्शनेन चक्षुषा च ग्रहणं कणव्रतमते निरूपितं तेऽर्थाः, प्रागुक्तश्चाभावोऽप्यर्थ एव विचार्यावगम्यमानत्वात् ।'[32]

30 Nyā. su. bhā. 1.1.4
31 Nyā. mañ. 1. p. 68 (chow.)
32 Ibid. I. p. 68 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तदनन्तरं तत्रेन्द्रियार्थसन्निकर्षा अपि वर्णिता न्यायवैशेषिकसम्मताः। तदुक्तं—'सन्निकर्षस्त्विन्द्रियाणामर्थैः सह षट्प्रकारः, तत्र द्रव्यं चक्षुषा त्वगिन्द्रियेण वा संयोगाद् गृह्यते, तद्गतो रूपादिगुणः संयुक्तसमवायात्, रूपत्वादिसामान्यानि संयुक्तसमवेतसमवायाद्गृह्यन्ते, चक्षुषा संयुक्तं द्रव्यं तत्र समवेतं रूपं रूपे च समवेतं रूपत्वमिति ; समवायात् शब्दो गृह्यते,···शब्दत्वं समवेतसमवायाद् गृह्यते,······संयुक्तविशेषणभावादभावग्रहणं व्याख्यातम्—इह घटो नास्तीति, चक्षुषा संयुक्तो भूप्रदेशस्तद्विशेषणीभूतश्चाभाव इति।'[33]

इन्द्रियाणां प्राप्यकारित्वं प्रागेव इन्द्रियपरिच्छेदे विस्तारेणालोचितम्। अत्रापि सन्निकर्षस्यावश्यकत्वप्रसंगेन प्राप्यकारित्वमपि जयन्तभट्टेनाभिहितम्। तथोक्तं—'ननु सन्निकर्षावगमे किं प्रमाणम्, व्यवहितानुपलब्धिरिति ब्रूमः। यदि ह्यसनिकृष्टमपि चक्षुरादीन्द्रियमर्थं गृह्णीयाद् व्यवहितोऽपि ततोऽर्थ उपलभ्येत, न चोपलभ्यते, तस्मादस्ति सन्निकर्षः। नन्वव्यवधानमेवास्तु (प्रत्यक्षकारणं) किं सन्निकर्षेण ? मैवम्, इन्द्रियाणां कारकत्वेन प्राप्यकारित्वात्, संसृष्टं च कारकं फलाय कल्पते इति कल्पनीयः संसर्गः। ··· रसन-स्पर्शनयोश्च स्पष्टं प्राप्यकारित्वमुपलभ्यते इति तत्सामान्यादिन्द्रियान्तरेष्वपि कल्पनीयम्।'[34]

अव्यपदेश्यपदस्य सूत्रस्थस्य मतभेदेन बहुविधा आशयाः प्रदर्शिता जयन्तभट्टेन। तत्र मनस्तत्त्वनिरूपणे उपयोगिनः केचित् विषया अत्रालोच्यन्ते। विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वात् विशेषणविशिष्टविशेष्यरूपस्य अर्थस्य प्रत्यक्षे विशेषणज्ञानं निर्विकल्पकरूपं कारणमुक्तं तार्किकैः। तथा च—आत्ममनःसंयोगादिषु ज्ञानसामान्यकारणेषु सत्सु इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रथमतो निर्विकल्पमेव जायते गोत्वादिविषयकम्। तदनन्तरं च निर्विकल्पकज्ञानसहकृतादिन्द्रियार्थसन्निकर्षादेव जायते गोत्वादिविशिष्टगोज्ञानं सविकल्पकरूपम्। परन्तु यदयं गौरिति ज्ञानं वाचकशब्दावच्छिन्नं जायते तदिन्द्रियजन्यत्वात् प्रत्यक्षं वा ? शब्दजन्यत्वाच्छाब्दं वा ? इन्द्रियशब्दोभयजन्यत्वादतिरिक्तं किंचित् ज्ञानं वेत्यवश्यमेव विचारणीयम्।

तत्र वैशेषिकमतं प्रशस्तपादभाष्येण पूर्वमुक्तमेव। तन्मते गौरयमिति ज्ञानस्य शब्दजन्यत्वेन शाब्दत्वात् शब्दाजन्यं शब्दाननुविद्धमेवेन्द्रियार्थसन्नि-

33 Ibid I. 68-69. (chow.)

34 Ibid I. p. 69 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

... Equipment Heritage Foundation, Jalgaon



कर्षोत्पन्नज्ञानं प्रत्यक्षं भवति। गौरयमित्यादिज्ञानवारणार्थमेव प्रत्यक्षलक्षणे अव्यपदेश्यमिति पदम्। अत एवाव्युत्पन्नस्य पृष्टे व्यवहारो दृष्टः—अनेनोक्तमयं गौरिति, न तु मया चक्षुषा दृष्टो गौरिति। तन्मते निर्विकल्पकं सामान्यविशेषज्ञानम्, गोत्वादिविशिष्टविशेष्यज्ञानं च सविकल्पकं प्रत्यक्षमेव भवति। किन्तु व्यवहारकाले वाचकशब्दावच्छिन्नं शब्दजन्यत्वात् शाब्दमेव।

केचिज्जरन्नैयायिका अपि वैशेषिकवदेव शब्दावच्छिन्नज्ञानानां व्यपदेश्यज्ञानत्वमुक्त्वा तद्वारणार्थमव्यपदेश्यपदमित्याहुः। तदुक्तं जयन्तेन—'तत्र वृद्धनैयायिकास्तावदाचक्षते, व्यपदिश्यते इति व्यपदेश्यं शब्दकर्मतामापन्नं ज्ञानमुच्यते। यदिन्द्रियार्थसन्निकर्षादुत्पन्नं सद् विषयनामधेयेन व्यपदिश्यते रूपज्ञानं रसज्ञानमिति तदव्यपदेश्यं ज्ञानं प्रत्यक्षप्रमाणफलं मा भूदित्यव्यपदेश्यग्रहणम्।'[35]

अथवा, शब्देन्द्रियाभ्यां सम्भूय जनितत्वादुभयजमिदं ज्ञानं व्यपदेशाज्जातमिति व्यपदेश्यमुच्यते, तदव्यपदेश्यपदेन व्युदस्यते इत्यपि केचित् वदन्ति। वस्तुतस्तु शाब्दिकानां मते गौरित्यादिज्ञानानां शब्दावच्छिन्नवाच्यविषयत्वेन ज्ञानमात्रस्यैव शब्दानुविद्धत्वाच्च प्रत्यक्षमिन्द्रियार्थसन्निकर्षोत्पन्नं नाम न किंचिदस्ति। न च शब्दानुसन्धानरहितः कश्चित् प्रत्ययो दृश्यते, यथाह भर्तृहरिः—

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते॥'[36]

अतो न निर्विकल्पकं शब्दाजन्यं शब्दाननुविद्धं किंचित् ज्ञानमस्तीन्द्रियार्थसन्निकर्षोत्पन्नमिति मतेन लक्षणस्याशंकितासम्भवदोषवारणार्थमेवाव्यपदेश्यपदमिति। एतदेव मतं पूर्वपक्षरूपेणोक्त्वा खण्डितं न्यायभाष्ये।

जयन्तभट्टेनाप्युक्तं न्यायभाष्यानुसारेणैव — 'यदिदमविदितपदपदार्थसम्बन्धस्य ज्ञानमुत्पद्यते, विदितपदसम्बन्धस्यापि वा यत् प्रथमाक्षसन्निपातसमये एव ज्ञानमनुल्लिखितशब्दकं शब्दानुस्मरणे हेतुभूतमुपजायते तदशाब्दम्— अशब्दावच्छिन्नविषयमव्यपदेश्यमिन्द्रियार्थसन्निकर्षैककरणमविकल्पं प्रत्यक्षम्। ...न च निर्विकल्पकसमये यत्किंचिदिदमित्यादिसामान्यशब्दो-

---

35 Ibid I. p. 73 (chow.)

36 Vākyapadīya 1.124

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



ल्लेखः कोऽपि कैश्चिदनुभूयते । तस्मात्···तथाविधस्य ज्ञानस्य लक्ष्यस्य सद्भावान्न व्यर्थं लक्षणमित्येवमसम्भवदोषनिराकरणार्थमपदेश्यपदमिति ।'[37]...

अपि चेन्द्रियार्थसन्निकर्षोत्पन्नं गौरित्यादिज्ञानमपि शाब्दं वक्तुं न युक्तम् । 'न चात्र शब्दावच्छिन्नार्थः प्रकाशते तथाविधार्थग्रहणे करणाभावात् ।···अपि च गौरित्याादिज्ञानमिन्द्रियार्थसन्निकर्षान्वयव्यतिरेकानुविधायि प्रसभं तत्कथं शाब्दमित्युच्यते ।—

शब्दस्मरणसापेक्षं यस्योत्पादकमिन्द्रियम् ।
तदेव यदि ते शाब्दमहो नैयायिको भवान् ।।'[37]

अत्र यद्युच्येत शब्दावच्छिन्नमर्थं न चक्षुः श्रोत्रं वा ग्रहीतुं समथम्, तन्न, चक्षुरेव शब्दावच्छिन्नमर्थं ग्रहीतुमलम् । तदप्युक्तं तत्रैव––

'ननु नाविषये युक्तमिन्द्रियस्य प्रवर्तनम् ।
तेन शब्दविशिष्टार्थज्ञानं नेन्द्रियजं ब्रुवे ।।
मरीचिषु जलज्ञानं कथमिन्द्रियजं तव ।
तत्रापि हि न तोयेन सन्निकर्षोऽस्ति चक्षुषः ।।
ननु स्मृत्युपारूढमुदकं तत्र गृह्यते ।
इहापि स्मृत्युपारूढः शब्दः कस्मान्न गृह्यते ।।···
यथा चाविषये तस्मिन्नीरे नयनजा मतिः ।
तथा वाचकसंस्पृष्टे वाच्ये किमिति नेष्यते ।।
यथा च तव कालादि नीरूपमपि चाक्षुषम् ।
तथा शब्दानुरक्तोऽपि किमितयर्थो न चाक्षुषः ।।···
तस्माद् गौरिति विज्ञानं प्रत्यक्षमवधार्यताम् ।
शब्दस्मरणसापेक्षचक्षुरिन्द्रियनिर्मितम् ।।
मानसत्वं तु यत्तस्य नेष्यते युक्तमेव तत् ।
तद्भावानुविधायित्वात् बाह्येन्द्रियजमेव तत् ।।'[38]

तथाच निर्विकल्पकसविकल्पकभेदेन प्रत्यक्षद्वैविध्यसूचनायैवाव्यपदेश्यं व्यवसायात्मकं चेति पदद्वयमिति तात्पर्यटीकायां वाचस्पतिना सूत्रवृत्तौ विश्वनाथेन चोक्तम् । तथा ह्युक्तं विश्वनाथेन··'तस्य विभागः अव्यपदेश्यं व्यवसाया-

37 Nyā. mañ. I. p. 76-77 (chow.) 38 Ibid I. p. 77-78 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



त्मकमिति, निर्विकल्पं सविकल्पकं चेति द्विविधं प्रत्यक्षमित्यर्थः ।'[39] उक्तं च वाचस्पतिना तात्पर्यटीकायां—'तस्मात् सविकल्पकप्रत्यक्षावरोधार्थं व्यवसायात्मकपदमिति सिद्धम् ।'[39a]

नव्यनैयायिकानां मते तु यथा ज्ञानलक्षणालौकिकसन्निकर्षबलेन मरीचिषु तोयभानं चक्षुषैव भवति, यथा वा सुरभि चन्दनमित्यत्र चक्षुरविषयस्य सौरभस्य ज्ञानं ज्ञानलक्षणसन्निकर्षबलेन चक्षुषैवोपनीतभानरूपेण भवति, तथैव स्मरणात्मकज्ञानलक्षणसन्निकर्षबलेन चक्षुरविषयाणामपि गवादिवाचकशब्दानामुपनीतभानसम्भवात् चक्षुषैव वाचकशब्दविशिष्टार्थस्य गौरयमित्यादिरूपेण प्रत्यक्षं भवतीति न तस्य शाब्दत्वापत्तिरिति दिक् ।

निर्विकल्पकप्रत्यक्षमपि नव्यनैयायिकमते संसर्गानवगाहि निष्प्रकारकं घटघटत्वयोर्ज्ञानम्, निष्प्रकारकत्वादेवातीन्द्रियं शब्दाव्यपदेश्यं च ।[40]

जैनास्तु—ज्ञानमेव प्रमाणं तस्यैव हिताहितप्राप्तिपरिहाररूपप्रमाणफले सामर्थ्यादिति वदन्ति । तदुक्तं माणिक्यनन्दिना—'स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम्, हिताहितप्राप्तिपरिहारसमर्थं हि प्रमाणं ततो ज्ञानमेव तदिति ।'[41] ज्ञानं च स्वपराभासि । तदुक्तं तत्रैव—'कर्मवत् कर्तृकरणक्रियाप्रतीते'[42]रिति । तच्च ज्ञानं जैनमते सामान्यतो द्विविधम्—प्रत्यक्षपरोक्षभेदात् । तत्र 'विशदं प्रत्यक्षम्', 'प्रतीत्यन्तराव्यवधानेन विशेषवत्तया वा प्रतिभासनं वैशद्य'[43]मिति परीक्षामुखसूत्रेषु प्रत्यक्षलक्षणमुक्तम् । तच्च प्रत्यक्षं पुनः सांव्यवहारिकासांव्यवहारिकभेदेन द्विविधं बोध्यम् । सांव्यवहारिकं प्रत्यक्षमिन्द्रियानिन्द्रियनिमित्तमिति इन्द्रियमनउभयजन्यं भवति[43a], क्वचिद्वा मनोमात्रजन्यम् । सर्वार्थग्राहित्वेन मनस इन्द्रियत्वानंगीकारादनिन्द्रियं मन एव । स्मृत्यादिकं पुनः केवलमनिन्द्रियजन्यमेव भवतीति विशेषः । आत्ममनसोस्तु सर्वत्र ज्ञाने साधारणकारणत्वमिष्यपि बोध्यम् । उक्तं हि प्रभाचन्द्रेण—'आत्मनः समनन्तरप्रत्ययस्य (मनसः) वा प्रत्ययान्तरेऽपि (परोक्षेऽपि) अविशेषादत्रानभिधानम्, असाधारणकारणस्यैव निरूपयितुमभिप्रेतत्वात् । सन्निकर्षस्य चाव्यापकत्वादसाधकत्वाच्चानभिधानम् ।'[43b]

---

39 Nyā. sū. vṛ. 1.1.4
39a Tātparyaṭīkā 1.1.4
40 Bhā. pari. p. 254, 481 (N. S.)
41 Parī. mu. sū. 1.1, 2
42 Ibid 1. 9
43 Ibid 2.3, 4
43a Ibid 2.5
43b Pra. kā. mār. 2.5

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उक्तं च भास्करनन्दिना तत्त्वार्थवृत्तौ—'पराण्यात्मनोपात्तानीन्द्रियमनांसि अनुपात्तानि प्रदीपालोकपरोपदेशादीनि च प्रोच्यन्ते। तदपेक्षं सम्यग्ज्ञानं परोक्षं विशिष्टवैशद्याभावात् संव्यवहारानपेक्षया, सूत्रक्रममपेक्ष्याद्ये मतिश्रुते, परोक्षं प्रमाणं भवति। संव्यवहारपेक्षया तु देशतो वैशद्यसम्भवात् स्वसंवेदनमिन्द्रियज्ञानं च प्रत्यक्षमिति चाख्यायते।'[44] एवं जैनमते इन्द्रियजन्यज्ञानस्य व्यवहारे कथंचित् प्रत्यक्षत्वस्वीकारेऽपि तस्य परसापेक्षत्वात् परमार्थतः परोक्षत्वमेव।

उक्तं च तेनैव 'प्रत्यक्षमन्य'[45]दिति तत्त्वार्थसूत्रव्याख्याने—'अक्ष्णोति व्याप्नोति जानातीत्यक्ष आत्मा। तमेवात्मानं प्रत्याश्रितं सम्यग्ज्ञानमिन्द्रियाद्यनपेक्षं प्रत्यक्षमिति व्यपदिश्यते। अन्यदवधि-मनःपर्यय-केवलज्ञानत्रितयमित्यर्थः। मतिश्रुताभ्यामवशिष्टमवध्यादिसंवेदनत्रितयं वैशद्यप्रकर्षयोगान्मुख्यं प्रत्यक्षमिति संलक्ष्यते। तच्च सकलविकलविकल्पाद् द्वेधा। सकलप्रत्यक्षं केवलज्ञानम्। विकलप्रत्यक्षमवधिमनःपर्ययज्ञानद्वितयम्।'[46] उक्तं च मणिभद्रेण—"द्वे प्रमाणे अभिमते, के ते इत्याह—प्रत्यक्षं परोक्षं चेति। अश्नुते अक्ष्णोति वा व्याप्नोति सकलद्रव्यक्षेत्रकालभावानित्यक्षो जीवः, अश्नुते विषयमित्यक्षमिन्द्रियं च। अक्षमक्षं प्रतिगतं प्रत्यक्षमिन्द्रियाण्याश्रित्य व्यवहारसाधकं यज् ज्ञानमुत्पद्यते तत्प्रत्यक्षमित्यर्थः। अवधि-मनःपर्यय-केवलज्ञानानि तद्भेदाश्च प्रत्यक्षमेव। अतएव सांव्यवहारिक-पारमार्थिकेन्द्रियकातीन्द्रियकादयो भेदा अनुमानादधिकज्ञानविशेषप्रकाशकत्वादत्रैवान्तर्भवन्ति।'[47] एवं च जैनमते अतीन्द्रियाणामवधि-मनःपर्यय-केवलाख्यानामेव प्रत्यक्षाणां वैशद्यप्रकर्षात् मुख्यं प्रत्यक्षत्वं बोध्यम्। इन्द्रियमनोजन्यानां तु मतिज्ञानान्तर्गतानां प्रत्यक्षाणां गौणं सांव्यवहारिकं प्रत्यक्षत्वम्। तथा चोक्तं—'अन्तर्बहिश्च परिस्फुटं मन्यते यया सा मतिः। व्यवहारप्रत्यक्षं स्वसंवेदनमिन्द्रियज्ञानं च प्रोच्यते'[48] इति। 'तत्राशेषतो विशदमतीन्द्रियं यद्विज्ञानं तन्मुख्यं प्रत्यक्ष'[49]मिति च।

---

44 Tattvā. vṛ. 1.11 45 Tattvā. sū. 1.12
46 Tattvā. vṛ. 1.12 47 Saḍ. dar. samu. ṭikā p. 57 (chow.)
48 Tattvā. vṛ. 1.13 49 pra. ka. mār. 2.12

२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पुनश्चोक्तं भास्करनन्दिना तत्त्वार्थवृत्तौ—'तन्मत्यादिप्रकारं ज्ञानमिन्द्रियानिन्द्रियनिमित्तम्, नार्थजन्यमर्थस्य ग्राह्यत्वेन कर्मरूपत्वात् ।'[50] जैनमते प्रत्यक्षस्येन्द्रियमनोजन्यत्वेऽपि नार्थजन्यत्वम् । यथोक्तं माणिक्यनन्दिनाऽपि परीक्षामुखसूत्रे—'नार्थालोकौ कारणं परिच्छेद्यत्वात्तमोवत् ।'[51] तदुपपत्तिश्चोक्ता सूत्रान्तरे—'तदन्वयव्यतिरेकानुविधानाभावाच्च केशोण्डुकज्ञानवन्नक्तंचरज्ञानवच्च'[52] इति । विनाप्यर्थं केशोण्डुकप्रत्यक्षदर्शनात्, विनाप्यालोकं नक्तंचराणां पेचकादीनां प्रत्यक्षदर्शनान्नार्थालोकौ प्रत्यक्षे कारणमपि तु प्रत्यक्षग्राह्यत्वं तेषां भवत्येवेति भावः । तदुक्तं सूत्रे—'अतज्जन्यमपि तत्प्रकाशकमिति ।'[52a] तस्य व्याख्यानमुक्तं प्रमेयकमलमार्तण्डे—'ताभ्यामर्थालोकाभ्यामजन्यमपि तयोः प्रकाशकम्' (प्रत्यक्षम्) । अपि चोक्तं भास्करनन्दिना—'अत एव गुणा एव चक्षुरादिभिर्गृह्यन्ते न द्रव्यमिति परमतनिराकरणार्थं सूत्रारम्भः'[53] (—अर्थस्य इति) ।

प्रत्यक्षभेदमप्याह मतिज्ञानभेदनिरूपणमुखेन तत्त्वार्थसूत्रे—'अवग्रहेहावायधारणाः ।'[54] तदर्थश्चोक्तो भास्करनन्दिना—'विषयविषयिसम्बन्धे सति श्वेतत्वादिविशेषरहितवस्तुसत्तावभासिनी निर्विकल्पिका दर्शनाख्या प्रतीतिर्जायते, यथा तदहर्जातस्य प्रथमसमयोन्मेषकाले बालकस्य । श्वेतत्वादिविशेषवस्तुप्रतिभासः सविकल्पकोऽवग्रहो भवति, यथेदं दृष्टं यद्वस्तु तच्छ्वेतमिति । तत एव सत्यपि परिच्छित्तिमात्राविशेषे दर्शनावग्रहयोर्निर्विकल्पकत्व-सविकल्पकत्वकृतो भेदः परिस्फुटः प्रतीयते इति ।'[55] ईहावायधारणास्तु मतिज्ञानभेदा न प्रत्यक्षरूपा अपि तु प्रत्यक्षानन्तरं विशेषज्ञानाकांक्षा-विशेषनिश्चय-पूर्वापरप्रतिसन्धानहेतुसंस्काररूपाः । सर्वाण्येव ज्ञानानि आत्मनो धर्मरूपाणि,—'ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो···चैतन्यलक्षणो जीवः'[56] इति हरिभद्रवचनात् । प्रत्यक्षस्य निर्विकल्पकसविकल्पकभेदो हि जैनानां सम्मत एव । उक्तं च—'साकारानाकारविकल्पात् साकारं सविकल्पकं ज्ञानमित्यर्थः । अनाकारं निर्विकल्पकं दर्शनमित्यर्थः । तदुक्तम्—

---

50 Taṭtvā. vṛ. 1.14
51 Pari. mu. sū. 2.6
52 Ibid 2.7
52a Ibid 2.8
53 Tattvā. vṛ. 1.17
54 Tattvā. sū. 1.15
55 Tattvā. vṛ 1.15
56 Ṣaḍ. dar. samu. p. 50 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon.



सविकल्पं भवेज् ज्ञानं निर्विकल्पं तु दर्शनम् ।
द्वामिमौ प्रतिभासस्य भेदौ वस्तुनि कीर्तितौ ।।'[57] इति ।

सांव्यवहारिकप्रत्यक्षस्य हेतुभूतानि 'स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि, पंचेन्द्रियाणि'[58] इति जैनमतम् ; न षट्, एकादश वा । तानि पुर्नद्विविधानि—द्रव्येन्द्रियं भावेन्द्रियं चेतीन्द्रियनिरूपणे उक्तमेव । तत्रापि—'निर्वृत्त्युपकरणे द्रव्येन्द्रियम्' इति सूत्रवृत्तौ भास्करेणोक्तं—'कर्मणा निर्वर्त्यते इति निर्वृत्तिः । निर्वृत्तेरुपकारः क्रियते येन तदुपकरणम् ।...तत्र निर्वृत्तिर्द्विविधा—बाह्याभ्यन्तरभेदात् । बाह्या चक्षुरादिषु मसूरिकादिसंस्थानरूपा । अभ्यन्तरा...आत्मप्रदेशसंश्लिष्टसूक्ष्मपुद्गलसंस्थानरूपा । उभयनिर्वृत्तिद्वारेणैवात्मनोऽर्थोपलम्भसम्भवः । उपकरणमपि बाह्याभ्यन्तरविकल्पाद् द्वेधा । तत्र बाह्यमुपकरणमक्षिपत्रपक्ष्मद्वयादि । अभ्यन्तरमुपकरणं कृष्णशुक्लमण्डलादि ।'[59] 'लब्ध्युपयोगौ भावेन्द्रिय'मिति सूत्रस्य वृत्तौ चोक्तं—'लम्भनं लब्धिर्ज्ञानावरणक्षयोपशमे सत्यात्मनोऽर्थोपलम्भशक्तिरित्यर्थः । उपयुज्यत इत्युपयोगः । तस्यैवात्मनोऽर्थग्रहणव्यापार इत्यर्थः । लब्धिश्चोपयोगश्च लब्ध्युपयोगौ । तौ चेतनात्मकौ भावेन्द्रियं भवतः । तत्र भावेन्द्रियमेव मुख्यं प्रमाणं स्वार्थप्रमितौ साधकतमत्वात्, द्रव्येन्द्रियस्योपचारत एव प्रामाण्योपगमात् ।'[60]

अत्रेदमपि बोध्यं यत्, जैनमते सुखदुःखाद्यात्मधर्मा अपि ज्ञानात्मका एवेति ज्ञानवदेव स्वसंवेदनरूपाः । उक्तं च प्रभाचन्द्रेण प्रमेयकमलमार्तण्डे—'सुखदुःखेच्छादीनां चाबुद्धिरूपत्वे रूपादिवन्नात्मगुणता युक्ता'[61] इति, 'सुखादेः संवेदनादर्थान्तरस्वभावस्याप्रतिभासनादाह्लादनाकारपरिणतज्ञानविशेषस्यैव सुखत्वात्, तस्य चाध्यक्षत्वात् । ...न खलु घटादिवत् सुखाद्यविदितस्वरूपं पूर्वमुत्पन्नं पुनरिन्द्रियेण सम्बध्यते ततो ज्ञानं ग्रहणं चेति लोके प्रतीतिः । प्रथममेवेष्टानिष्टाविषयानुभवानन्तरं स्वप्रकाशात्मनोऽस्योदयप्रतीतेः । ...यदि चार्थान्तरभूतप्रमाणप्रत्यक्षाः सुखादयस्तर्हि तदपि प्रमाणं प्रमाणान्तरप्रत्यक्षमित्यनवस्था'[62] इति च ।

57 Tattvā. vṛ. 2.9
58 Tattvā. sū. 2.19,15
59 Tattvā vṛ. 2.17
60 Ibid 2.18
61 Pra. ka. mār. P. 597 (chow.)
62 Ibid P. 129-30 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by ... Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अपि चोक्तं तेनैव—'बहिरर्थग्रहणापेक्षया हि विज्ञानानां प्रत्यक्षेतरव्यपदेशः, तत्र प्रमाणान्तरव्यवधानाव्यवधानसद्भावेन वैशद्येतरसम्भवात्, न तु स्वरूपग्रहणापेक्षया, तत्र तदभावा'[63]दिति। मणिभद्रेण चोक्तं—'तदपि स्वसंवेदनापेक्षया प्रत्यक्षमेव, बहिरर्थापेक्षया तु परोक्षव्यपदेशमश्नुते।'[64]

किंच, जैनमते प्रत्यक्षे अर्थस्य कारणत्वाभावाच्चक्षुषश्चाप्राप्यकारित्वान्नेन्द्रियसन्निकर्षः प्रमाणत्वेनापेक्षितः। उक्तं च प्रमेयकमलमार्तण्डे—चक्षुषश्चाप्राप्यकारित्वेनाग्रे समर्थनात् कथं घटेन संयोगस्तदाभावात् कथं रूपादिना संयुक्तसमवायादिरित्यव्याप्तिः सन्निकर्षप्रमाणवादिना'[65]मिति। 'एतेनेन्द्रियवृत्तिः प्रमाणमित्यभिदधानः सांख्यः प्रत्याख्यातः। ज्ञानस्वभावमुख्यप्रमाणकरणत्वात् तत्राप्युपचारतः प्रमाणव्यवहाराभ्युपगमा'[66]दिति च।

भाट्टमतेऽपि तार्किकमतवत् प्रमाकरणमेव प्रमाणम्। अपि तु प्रमालक्षणं तेषां भिद्यते। तार्किकमते यथार्थानुभव एव प्रमा। स्मृतेरनुभवत्वाभावादेव न प्रमात्वम्। भाट्टमते तु अज्ञाततत्त्वार्थज्ञानमेव प्रमा। स्मृतेर्ज्ञातार्थविषयत्वान्न प्रामाण्यम्। तथोक्तं श्लोकवार्तिके कुमारिलभट्टेन—

'तस्माद् दृढं यदुत्पन्नं नापि संवादमृच्छति।
ज्ञानान्तरेण विज्ञानं तत् प्रमाणं प्रतीयताम्॥'[67]

उक्तं च सुचरितमिश्रेण टीकायां—'विज्ञानं विशिष्टविषयं ज्ञानम्, अधिकविषयमिति यावत्, एतेन स्मरणं व्यवच्छिनत्ति, तद्धि पूर्वज्ञानादविशिष्टमनधिकविषयत्वात्।'[68] उक्तं च भट्टनारायणेन—

'प्रमाकरणमेवात्र प्रमाणं तर्कपक्षवत्।
प्रमा चाज्ञाततत्त्वार्थज्ञानमेवात्र भिद्यते॥

अज्ञातपदेनात्र ज्ञातविषययोः स्मृत्यनुवादयोर्निरासः। तत्रानुवादानामप्रामाण्यं तार्किकादीनां नानुमतम्।......फलविशेषाभावात् फलार्थं च प्रमाणानां स्वीकारात् स्मृत्यादिवदनुवादोऽपि बहिष्कार्य एवेति।'[69] पुनश्चोक्तं-'तदेव-

---

63 Ibid p. 220(chow.)
64 Saḍ dar. samu. ṭikā. p. 59 (chow.)
65 Pra. ka mār. p. 17 (chow.)
66 Ibid p. 19 (chow.)
67 Ślo. vār. 2. 80
68 Ślo. vār. tikā. 2. 80
69 Mā. me. p. 2. (Adyar)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मज्ञाततत्त्वावगमरूपायाः प्रमायाः करणत्वेनेन्द्रियसन्निकर्षादीनां प्रमाणत्वं सिद्धम् । इह च प्रमाशब्देन लक्षणया तत्कार्यभूतस्य प्राकट्यस्यापि प्रतिपादनात् प्राकट्यरूपप्रमाकरणत्वेन ज्ञानस्यापि प्रमाणत्वमाहुः । एतावता च वयं फलप्रमाणवादिन इति गीयामहे इति ।'[70]

प्रत्यक्षलक्षणमपि भाट्टमते इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमेव । तथोक्तं जैमिनिसूत्रे—'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम् (अनिमित्तं विद्यमानोपलम्भनत्वात्)'[71] । उक्तं च श्लोकवार्तिके तत्व्याख्याने—

'अविद्यमानसंयोगात् प्रत्यक्षत्वनिराकृतिः ।
....... योगिनां केन लभ्येत नेष्टं सद्ग्रहणं यदि ॥'[72]

उक्तं च टीकायां सुचरितमिश्रेण—'तत्रापि सच्छब्दमादौ चिन्तयति ।...... संश्चासौ सम्प्रयोगश्चेति कर्मधारयोऽयम्, सच्छब्दश्च विद्यमानवचनः । तदयमर्थो भवति विद्यमानसम्प्रयोगजंन्यं प्रत्यक्षमिति ।'[73] पुनश्चोक्तं श्लोकवार्तिके लक्षणार्थः—

'सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः ।
प्रयोग इन्द्रियाणां च व्यापारोऽर्थेषु कथ्यते ॥
दुष्टत्वाच्छुक्तिकायोगो वार्यते रजतेक्षणात् ।
एवं सत्यनुवादत्वं लक्षणस्यापि सम्भवेत् ॥'[74]

पुनश्चोक्तं सामान्यतः श्लोकवार्तिके—

'सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना ।
सामान्यं वा विशेषो वा ग्राह्यं नातोऽत्र कल्प्यते ॥'[74a]

सम्बद्धवर्तमानविषयत्वात् प्रत्यक्षस्य सामान्यविशेषयोरुभयोरेव प्रत्यक्षविषयत्वं सम्भवतीत्यर्थः ।

मानमेयोदये चोक्तं भट्टनारायणेन—'तत्रेन्द्रियसन्निकर्षजं प्रमाणं (प्रमा) प्रत्यक्षम् । कानि पुनरिन्द्रियाणि ? उच्यते । चक्षुरसनघ्राणस्पर्शनश्रोत्राणि मनश्चेति षडिन्द्रियाणि ।......सन्निकर्षस्तु द्विविधः । संयोगः संयुक्ततादात्म्यं चेति । तत्र पृथिव्यप्तेजसां चक्षुस्त्वगिन्द्रियाभ्यां

---

70 Ibid. p. 5-6 (Adyar)
71 Jaimini-sūtra. 1.1.4
72 Ślo. vār. 4. 36
73 Ślo. vār. ṭikā. 4.36
74 Ślo. vār. 4.38,39
74a Ibid. 4. 84

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust. Equipment Heritage Foundation, Jalgaon



संयोगाद् ग्रहणम् । वायोस्त्वक्संयोगात् । दिङ्नभस्तमसां दृक्संयोगात् । शब्दस्य श्रोत्रसंयोगात् । आत्मनो मनःसंयोगात् । अत्र विभुनोरप्यात्ममनसोरजन्यसंयोगसाधनात् संयोगः । कालस्य तु—युगपदादिप्रत्ययस्य कालविषयत्वेन्द्रियजन्यत्वयोर्वक्ष्यमाणत्वात् तस्य च सर्वेन्द्रियजन्यत्वात्—सर्वैरपीन्द्रियैः संयोगाद् ग्रहणम् ।'[75]...

'यदा तु चक्षुरादिषु संयुक्तेषु पूर्वोक्तेषु पृथिव्यादिषु तदात्मभूतानां जातिगुणकर्मणां ग्रहणं तदा संयुक्ततादात्म्यं सन्निकर्षः ।......यदा तु जातिगुणकर्मगतानां सत्तारूपत्वकर्मत्वादीनां ग्रहणं तदा तेषामेव परम्परया तादात्म्यसम्भवात् संयुक्ततादात्म्यमेव सन्निकर्ष इति मन्यामहे । यद्वा......अस्माकमपि संयुक्ततादात्म्यतादात्म्यं नाम तृतीयः सन्निकर्षोऽस्तु, का हानिः । जातिगुणकर्मणां स्वाश्रयैस्तादात्म्यमेव सम्बन्ध इति पश्चात् साधयिष्यते । तस्माद् द्वेधा त्रेधा वा सन्निकर्षः ।'[76]

तार्किकवदेव भाट्टानामपि निर्विकल्पकसविकल्पकमेदेन द्विविधं प्रत्यक्षमभिमतम् । यथोक्तं श्लोकवार्तिके—

'अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ।।
न विशेषो न सामान्यं तदानीमनुभूयते ।
तयोराधारभूता तु व्यक्तिरेवावसीयते ।।...
निर्विकल्पकबोधेऽपि द्व्यात्मकस्यापि वस्तुनः ।
ग्रहणं लक्षणाख्येयं ज्ञात्रा शुद्धं तु गृह्यते ।।...
ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया ।
बुद्ध्याऽवसीयते साऽपि प्रत्यक्षत्वेन सम्मता ।।'[77]

उक्तं च भट्टनारायणेनापि—'तच्चेन्द्रियसन्निकर्षजं ज्ञानं द्विविधम्—निर्विकल्पकं सविकल्पकं चेति । तत्रेन्द्रियसन्निकर्षानन्तरमेव द्रव्यादिस्वरूपमात्रावगाहि शब्दानुगमशून्यं यत्संमुग्धज्ञानं जायते तत् विशिष्टकल्पनाभावान्निर्विकल्पकमित्युच्यते । यत्तु तदनन्तरं शब्दस्मरणसहितं जात्यादिविशिष्टवस्तुविषयं रक्तोऽयं घटोऽयमित्यादिव्यक्तविज्ञानं तत् सविकल्पकम् ।'[78]

---

75 Mā. me. p. 8, 12-13. (Adyar) 76 Ibid. p. 13-14. (Adyar)
77 Ślo. vār. 4. 112-13 ; 118 ; 120.
78 Mā. me. p. 17. (Adyar)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रमाणत्वं फलत्वं च भट्टमते बुद्धिभेदेन भिद्यते एव। यथोक्तं श्लोकवार्तिके—

'प्रमाणफलभावस्तु यथेष्टं परिकल्प्यताम् ।...
यद्वेन्द्रियं प्रमाणं स्यात् तस्य वार्थेन संगतिः ।
मनसो वेन्द्रियैर्योग आत्मना सर्व एव वा ॥
तदा ज्ञानं फलं तत्र व्यापाराच्च प्रमाणता ।
व्यापारो न यदा तेषां तदा नोत्पद्यते फलम् ॥
प्रमाणफलते बुद्ध्यो र्विशेषणविशेष्ययोः ।
(यदा तदापि पूर्वोक्ता भिन्नार्थत्वनिराक्रिया) ॥
हानादिबुद्धिफलता प्रमाणं चेद् विशेष्यधीः ।
उपकारादिसंस्मृत्या व्यवायश्चेदियं फलम् ॥'[79]

प्राभाकरास्त्वाहुः—अनुभूतिः प्रमाणमिति । तेन स्मृतेः प्रमाणत्वव्युदासः । उक्तं च शालिकनाथेन—

'अनुभूतिः प्रमाणं सा स्मृतेरन्या'...
'न प्रमाणं स्मृतिः पूर्वप्रतिपत्तेरपेक्षणात् ॥
मानत्वं संविदां बाह्यं हानादानादिकं फलम् ।'[80]

इत्यादि । अनुभवमात्रस्यैव यथार्थत्वात् प्रामाण्यम् । शुक्तौ इदं रजतमिति ज्ञानस्यापि पुरोवर्तिशुक्तिदेशान्तरीयरजतविषकप्रत्यक्ष-स्मरणात्मकज्ञानद्वयरूपत्वान्नायथार्थत्वम् । रजतस्मरणस्य स्मृतित्वान्न प्रामाण्यम् । इदमिति प्रत्यक्षस्य तु प्रामाण्यमेव । उक्तं च प्रत्यक्षलक्षणं शालिकनाथेन प्रकरणपंजिकायाम्—

'साक्षात् प्रतीतिः प्रत्यक्षं मेयमातृप्रमासु सा ।
मेयेष्विन्द्रिययोगोत्था द्रव्यजातिगुणेषु सा ॥

स्वाभितमिदानीं प्रत्यक्षलक्षणमाह—साक्षात् प्रतीतिः प्रत्यक्षमिति । ननु भावनाप्रकर्षपर्यन्तजा स्मृतिरपि साक्षात्कारवती प्रत्यक्षं प्रसज्येत । न, प्रमाणाधिकारात् । अनुभूतिः प्रमाणम्, तद्विशेषश्च प्रत्यक्षमिति न स्मृतेः प्रत्यक्षत्वापत्तिः । प्रत्यक्षस्य विषयमाह—मेय-मातृ-प्रमासु सा । तत्र विभाग-

79 Ślo. vār, 4.59, 60, 61, 70, 73
80 Pra. pañ. p. 104-5 (B.H.U.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



माह—मेयेषु इन्द्रिययोगोत्था, द्रव्यजातिगुणेष्विन्द्रिययोगोत्था सा प्रत्यक्ष-प्रतीतिः । मेयेषु इन्द्रियसंयोगेन तत्-संयुक्तसमवायेन समवायेन च जायते ।'

'कानि पुनरिन्द्रियाणि ? घ्राण-रसन-नयन-त्वक्-श्रवणानि बाह्यानि, आन्तरं च मनः । किं पुनरेषामस्तित्वे भेदे च प्रमाणम् ? उच्यते—विषयावबोधस्तावत् कादाचित्को दृश्यते, तस्य चात्मा समवायिकारणम् । असमवायिकारणेन विना कार्यं न जायते । ...तत्र नित्यद्रव्यसमवायिनो वैशेषिकगुणस्य (बोधस्य) द्रव्यान्तर (मनः)-संयोग एवासमवायिकारणत्वेनावधारितः'[81] इति । अन्यत्र च—'न च केवलादात्मनःसंयोगादेव रूपाद्यवगमः । अन्धादीनामभावादिति चक्षुरादिबहिरिन्द्रियाण्यंगीक्रियन्ते । पंचधा च बाह्यरूपाद्युपलम्भलक्षणकार्यव्यवस्थानात् पंच चक्षुरादीनि कल्प्यन्ते ।'[82]

मेयेषु प्रत्यक्षमिन्दियार्थसन्निसर्षजन्यं द्विविधं भवति—निर्विकल्पकसविकल्पकभेदात् । तदप्युक्तं शालिकनाथेन—

'सविकल्पाऽविकल्पा च प्रत्यक्षा बुद्धिरिष्यते ।
आद्या विशिष्टविषया स्वरूपविषयेतरा ।।'[83]

तथा ज्ञानमात्रमेव प्राभाकरमते स्वस्मिन् ज्ञाने मातरि चात्मनि प्रत्यक्षप्रमा । उक्तं च—

'सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा ।
साक्षात्कारत्वसामान्यात् प्रत्यक्षत्वेन सम्मता ।।

या काचिद् ग्रहणस्मरणरूपार्थप्रतीतिस्तत्र साक्षादात्मा भाति । न ह्यर्थावभासिनि आत्मनि अनवभासमाने विषया भासन्ते । ...तस्मात् सर्वैरेव ज्ञानहेतुभिरात्मनि साक्षात्कारवती धीरुत्पद्यते'[84] इति । पुनश्चोक्तं तेनैव—'स्मृतिष्वनुमानादिषु च न प्रमेयमपरोक्षम् । तेन प्रमेयापेक्षयैव प्रमाणान्तरत्वव्यपदेश इति मन्तव्यम् । सर्वाश्च प्रतीतयः स्वयं प्रत्यक्षाः प्रकाशन्ते । तेन

81 Ibid. p. 146-49 (B.H.U.)
82 Ibid. p. 330 (B.H.U.)
83 Ibid. p. 104 (B.H.U.)
84 Ibid p. 168-69 (B.H.U.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तासां स्वात्मनि युक्तमेव प्रत्यक्षत्वं प्रमाणत्वं च। मेय-मातृ-प्रमाणानां प्रतीतौ विशेषः कः ? उच्यते--मेये मातरि च व्यतिरिक्ता प्रतीतिः साक्षात्कारवती, मितौ त्वव्यतिरिक्ता'[85] इति।

बौद्धमते हि नामजात्यादिकल्पनारहितमर्थक्रियासमर्थवस्तुमात्रावगाहि निर्विकल्पकप्रत्यक्षमेवाभ्रान्तं भवति। तन्मते नामजात्यादेः कल्पनारूपत्वात् तद्विशिष्टार्थप्रत्यक्षं सविकल्पकं भ्रान्तमेव न प्रमाणम्।

'अविसंवादकं ज्ञानं सम्यग्ज्ञान'[86]मिति बौद्धमतं धर्मोत्तरेणोक्तम्। तस्य ज्ञानस्यार्थसारूप्यमेव प्रमाणम्, तस्यैवार्थाधिगतिरूपप्रमाणफलजनकत्वात्। ज्ञानं च स्वयं प्रदर्शितमर्थं प्रापयत् संवादकमुच्यते। प्राप्तुं शक्यमर्थमादर्शयत् प्रापकम्। उक्तं च धर्मोत्तरेण—'यथा च प्रत्यक्षं प्रतिभासमानं नियतमर्थं दर्शयति, अनुमानं च लिंगसम्बद्धं नियतमर्थं दर्शयति। अत एते नियतार्थस्य प्रदर्शके। तेन ते प्रमाणे। नान्यद् विज्ञानम्। आभ्यां प्रमाणाभ्यामन्येन च ज्ञानेन प्रदर्शितोऽर्थः कश्चिदत्यन्तविपर्यस्तः, यथा मरीचिकासु जलम्। स चासत्त्वात् प्राप्तुमशक्यः। कश्चिदनियतो भावाभावयोः यथा संशयार्थः, न च भावाभावाभ्यां युक्तोऽर्थो जगत्यस्ति। ततः प्राप्तुमशक्यस्तादृशः।'[87] अतो न संशयविपर्यययोः प्रामाण्यमिति भावः। पुनश्चोक्तं तेनैव—'अर्थक्रियार्थिभिश्चार्थक्रियासमर्थार्थप्राप्तिनिमित्तं ज्ञानं मृग्यते। ...ततोऽर्थक्रियासमर्थवस्तुप्रदर्शकं सम्यग्ज्ञानम्।'[88] तच्च सम्यग्ज्ञानं द्विविधं प्रत्यक्षमनुमानं च। प्रत्यक्षपदं चैवं व्याख्यातं धर्मोत्तरेण न्यायबिन्दुटीकायां—'प्रतिगतमाश्रितमक्षम्।...अक्षाश्रितत्वं च व्युत्पत्तिनिमित्तं शब्दस्य, न तु प्रवृत्तिनिमित्तम्। अनेन तु अक्षाश्रितत्वेनैकार्थसमवेतमर्थसाक्षात्कारित्वं लक्ष्यते। तदेव शब्दस्य प्रवृत्तिनिमित्तम्। ततश्च यत्किंचिदर्थस्य साक्षात्कारिज्ञानं तत् प्रत्यक्षमुच्यते। यदि त्वक्षाश्रितत्वमेव प्रवृत्तिनिमित्तं स्यादिन्द्रियज्ञानमेव प्रत्यक्षमुच्येत, न मानसादि।'[89]

धर्मकीर्तिनाऽपि प्रत्यक्षलक्षणमुक्तम्—'तत्र कल्पनापोढमभ्रान्तं प्रत्यक्ष'[90]मिति। तदर्थश्चोक्तो धर्मोत्तरेण—'कल्पनास्वभावरहितमित्यर्थः। अभ्रान्त-

---

85 Ibid p. 170 (B.H.U.)
86 Nyā. bin. ṭikā. p. 5 (chow.)
87 Ibid p. 6 (chow.)
88 Ibid p. 7 (chow.)
89 Ibid p. 11 (chow.)
90 Nyā. bin. p. 11 (chow.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मर्थक्रियाक्षमे वस्तुरूपेऽविपर्यस्तमुच्यते। अर्थक्रियाक्षमं च वस्तुरूपं सन्निवेशोपाधिधर्मात्मकम्। तत्र यन्न भ्राम्यति तद्भ्रान्तम्।...इत्येवमभ्रान्तग्रहणं विप्रतिपत्तिनिरासार्थम्।'[91] कल्पनापोढमित्यस्य तात्पर्यमाह सूत्रेण धर्मकीर्तिः—'अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना, तया रहित'[92]मिति। तद्व्याख्यानं चोक्तं धर्मोत्तरेण—'अभिलापो वाचकशब्दः। अभिलापेन संसर्गः अभिलापसंसर्गः। एकस्मिन् ज्ञाने अभिधेयाकारस्याभिधानाकारेण सह ग्राह्याकारतया शीलनम्। यथा व्युत्पन्नसंकेतस्य घटार्थकल्पना घटशब्दसंसृष्टार्थावभासा भवति। काचित् त्वभिलापेनासंसृष्टाऽपि अभिलापसंसर्गयोग्याभासा भवति, यथा बालकस्याव्युत्पन्नसंकेतस्य कल्पना।...योग्यग्रहणे तु साऽपि संगृह्यते। यद्यपि अभिलापसंसृष्टाभासा न भवति तदहर्जातस्य बालकस्य कल्पना, अभिलापसंसर्गयोग्यप्रतिभासा तु भवत्येव। या अभिलापसंसृष्टा साऽपि योग्या। तत उभयोरपि योग्यग्रहणेन संग्रहः।...तया कल्पनया कल्पनास्वभावेन रहितं शून्यं सज्ज्ञानं यदभ्रान्तं तत्प्रत्यक्षमिति परेण सम्बन्धः।'[93]

अभ्रान्तमिति पदस्यापि तात्पर्यमुक्तं धर्मकीर्तिना, विपर्ययकारणानामुल्लेखपूर्वकं तदविपर्यस्तानां प्रत्यक्षत्वाभिधानेन—'तिमिराशुभ्रमणनौयानसंक्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्ष'[94]मिति।

तच्च प्रत्यक्षं बौद्धमते चतुर्विधम्—(१) इन्द्रियज्ञानम्, (२) मनोविज्ञानम्, (३) आत्मसंवेदनम्, (४) योगिज्ञानं चेति। इन्द्रियजन्यं रूपादिज्ञानमेवेन्द्रियज्ञानम्। इन्द्रियज्ञानविषयक्षणोत्पाद्याव्यवहितोत्तरक्षणविषयकमानसप्रत्यक्षमेव बौद्धशास्त्रप्रसिद्धं मनोविज्ञानम्। तदुक्तं धर्मकीर्तिना—'स्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं तत् मनोविज्ञानम्'[95]इति। समनन्तरप्रत्ययश्च मन एव। उक्तं च धर्मोत्तरेण टीकायां—'तदनेन एकसन्तानान्तर्भूतयोरेवेन्द्रियज्ञान-मनोज्ञानयोर्जन्यजनकभावे मनोविज्ञानं प्रत्यक्षमित्युक्तं भवति।'[96]

---

91 Nyā. bin ṭikā. p. 12 (chow.)
92 Nyā. bin. p. 13 (chow.)
93 Nyā. bin. ṭikā. p. 13-16 (chow.)
94 Nyā. bin. p. 16 (chow.)
95 Ibid p. 17 (chow.)
96 Nyā. bin. ṭikā. p. 18 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उक्तं चेन्द्रियज्ञानमनोविज्ञानद्वयमेवं लंकावतारसूत्रे—'चतुर्भिर्महामते कारणैश्चक्षुर्विज्ञानं प्रवर्तते। कतमैश्चतुर्भिर्यदुत स्वचित्तदृश्यग्रहणानवबोधतोऽनादिकालप्रपंच-दौष्ठुल्य (स्फुल्य) रूपवासनाभिनिवेशतो विज्ञानप्रकृतिस्वभावतो विचित्ररूपलक्षणकौतूहलतः। एभिर्महामते चतुर्भिः कारणैरोधान्तरजलस्थानीयादालयविज्ञानात् प्रवृत्तिविज्ञानतरंग उत्पद्यते···सह तैरेव महामते पंचभिर्विज्ञानकायैर्हेतुविषयपरिच्छेदलक्षणावधारकं नाम मनोविज्ञानं तद्धेतुशरीरं प्रवर्तते।'[97]

स्वसंवेदनं चोक्तं धर्मकीर्तिना—'सर्वं चित्तचैत्तानामात्मसंवेदन'[98]मिति। अर्थमात्रग्राहि विज्ञानं चित्तम्, विशेषावस्थाग्राहिणः सुखादयः चैत्ताश्चैत्तिका वा। ते सर्वे स्वसंविदिता इत्यर्थः। उक्तं च धर्मोत्तरेण—'नास्ति सा काचित् चित्तावस्था यस्यामात्मनः संवेदनं न प्रत्यक्षं स्यात्'[99]इति।

योगिप्रत्यक्षं चोक्तं सूत्रे—'भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानं चेति।'[100] प्रमाणसिद्धसद्भूतार्थविषयकभावनाप्रकर्षजन्यं योगिप्रत्यक्षमित्यर्थः। भावनाप्रकर्षस्य पर्यन्तो स्फुटाभत्वारम्भस्य ईषदसम्पूर्णत्वम्। तदुक्तं धर्मोत्तरेण—'ततः सम्पूर्णावस्थायाः प्राक्तनी अवस्था स्फुटाभत्वप्रकर्षपर्यन्त उच्यते।'[101] 'तस्मात् पर्यन्तात् यज्जातं भाव्यमानस्य सन्निहितस्येव स्फुटतराकारग्राहि ज्ञानं (तत्) योगिनः प्रत्यक्षम्। तद्धि स्फुटाभम्, स्फुटाभत्वादेव निर्विकल्पम्··· प्रमाणशुद्धार्थग्राहित्वाच्च संवादकम्।'[102]

एवं चतुर्विधानामेव प्रत्यक्षाणां विषयः नामजात्यादिकल्पनारहितं स्वलक्षणमेव, न तु सामान्यलक्षणम्। तदुक्तं धर्मोत्तरेण—'स्वमसाधारणं लक्षणं तत्त्वं स्वलक्षणम्। वस्तुनो ह्यसाधारणं तत्त्वमस्ति सामान्यं च। यदसाधारणं तत् प्रत्यक्षग्राह्यम्।'[103] एवं च नामजातिसंसर्गरहितघटाद्येव स्वलक्षणमर्थक्रियासमर्थं

---

97 Laṅkā. sū. p. 44 (kyoto)
98 Nyā. bin. p. 19 (chow.)
99 Nyā. bin. ṭikā p. 19 (chow.)
100 Nyā. bin. p. 20 (chow.)
101 Nyā. bin. ṭikā. p. 20 (chow.)
102 Nyā. bin. ṭikā. p. 20-21. (chow.)
103 Ibid p. 23 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



वस्तु परमार्थसत् । स्वलक्षणलक्षणमुक्तं न्यायबिन्दौ धर्मकीर्तिना—'यस्यार्थस्य संन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासभेदस्तत् स्वलक्षणम् ।'[104] ज्ञानप्रतिभासभेदश्चार्थस्य स्फुटत्वास्फुटत्वाभ्यां बोध्यः । उक्तं च धर्मोत्तरेण—'सर्वाण्येव हि वस्तूनि दूरादस्फुटानि दृश्यन्ते समीपे स्फुटानि । तान्येव स्वलक्षणानि ।'[105] ...

बौद्धानां प्रत्यक्षनिरूपणे या प्रक्रिया भवंगवीथिरूपा अभिधर्मार्थसंग्रहे निरूपितास्तत्र क्षणभेदाश्च ये कल्प्यन्ते, तेऽतिसूक्ष्मतया बौद्धमनोविद्याया-मत्यन्तमादृताः । ते विशेषाध्याये बौद्धमनस्तत्त्वे सविस्तारं निरुपयिष्यन्ते इति ग्रन्थविस्तारभयादत्र उल्लेखमात्रं कृतमिति ।

सांख्यमते पुरुषनिष्ठो बोध एव प्रमा, तस्याः साधकतमं करणं ह्यन्तःकरण-वृत्तिरेव प्रमाणमित्येव मुख्यः सिद्धान्तः । तथाहि सांख्यसूत्रं—'द्वयोरेकतरस्य वाप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा तत्साधकतमं यत् तत् त्रिविधं प्रमाणम् ।'[106] उक्तश्च तस्यार्थो विज्ञानभिक्षुणा प्रवचनभाष्ये—'असन्निकृष्टः प्रमातरि अनारूढो-ऽनधिगत इति यावत् । एवम्भूतस्यार्थस्य वस्तुनः परिच्छित्तिरवधारणं प्रमा । सा द्वयोर्बुद्धिपुरुषयोरुभयोरेव धर्मो भवतु, किं वैकतरमात्रस्य, उभयथैव तस्याः प्रमायाः साधकतमं फलायोगव्यवच्छिन्नं करणं तच्च त्रिविधं वक्ष्यमाण-रूपेणेत्यर्थः । स्मृतिव्यावर्तनायानधिगतेति । भ्रमव्यावर्तनाय वस्त्विति । संशयव्यावर्तनाय त्ववधारणमिति । अत्र यदि प्रमारूपं फलं पुरुषनिष्ठमुच्यते, तदा बुद्धिवृत्तिरेव प्रमाणम् । यदि च बुद्धिनिष्ठमात्रमुच्यते तदा त्विन्द्रियसन्नि-कर्षादिरेव प्रमाणम् । पुरुषस्तु प्रमासाक्ष्येव, न प्रमातेति । यदि पौरुषेयबोधो बुद्धिवृत्तिश्चोभयमपि प्रमोच्यते, तदा तूक्तमुभयमेव प्रमाभेदेन प्रमाणं भवति । चक्षुरादिषु तु प्रमाणव्यवहारः परम्परयैव सर्वथेति भावः । पातंजलभाष्ये तु व्यासदेवैः पुरुषनिष्ठबोधः प्रमेत्युक्तः । पुरुषार्थमेव करणानां प्रवृत्त्या फलस्य पुरुषनिष्ठताया एव औचित्यात् । अतोऽत्रापि स एव मुख्यः सिद्धान्तः । न च पुरुषबोधस्वरूपस्य नित्यतया कथं फलत्वमिति वाच्यम् । केवलस्य नित्यत्वेऽपि अर्थोपरक्तस्य कार्यत्वात् । पुरुषार्थोपरागस्यैव वा फलत्वादिति ।'

104 Nyā. bin. p. 23 (chow.)
105 Nyā. bin. tīkā p. 23 (chow.)
106 Sā. sū. 1.87

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



'अत्रेयं प्रक्रिया। इन्द्रियप्रणालिकयाऽर्थसन्निकर्षेण आदौ बुद्धेरर्थाकारा वृत्तिर्जायते। तत्र चेन्द्रियसन्निकर्षजा प्रत्यक्षा वृत्तिरिन्द्रियविशिष्टबुद्ध्याश्रिता, नयनादिगतपित्तादिदोषैः पित्त्याद्याकारवृत्त्युदयादिति विशेषः, सा च वृत्तिरर्थोपरक्ता प्रतिबिम्बरूपेण पुरुषारूढा सती भासते। पुरुषस्यापरिणामितया बुद्धिवत् स्वतोऽर्थाकारत्वासम्भवात्, अर्थाकारताया एव चार्थग्रहणत्वात् अन्यस्य दुर्वचत्वादिति।...योगभाष्याच्च—बुद्धेः प्रतिसंवेदी पुरुष इति प्रतिध्वनिवत् प्रतिसंवेदः संवेदनप्रतिविम्बस्तस्याश्रय इत्यर्थः।'

'केचित्तु वृत्तौ प्रतिविम्बितं सदेव चैतन्यं वृत्तिं प्रकाशयति, तथा वृत्तिगतप्रतिविम्ब एव वृत्तौ चैतन्यविषयता, न तु चैतन्ये वृत्तिप्रतिविम्बोऽस्तीत्याहुः। तदसत्। विनिगमनाविरहेण वृत्तिचैतन्ययोरन्योन्यविषयताख्यसम्बन्धरूपतयाऽन्योन्यप्रतिबिम्बसिद्धेश्च। बाह्यस्थले अर्थाकारताया एव विषयतारूपत्वसिद्धया आन्तरेऽपि तत्तदर्थाकारताया एव विषयतात्वौचित्याच्चेति।'

'केचित्तु तार्किकाः...विषयतामतिरिक्तं पदार्थमाहुः। तदप्यसत्। अनुभूयमानार्थाकारत्वं विहाय विषयतान्तरकल्पने गौरवादिति। ...तस्मादचैतन्यचैतन्ययोरन्योन्यविषयतारूपोऽन्योन्यस्मिन्नन्योन्यप्रतिविम्बः सिद्धः।'[107]

एवं विज्ञानभिक्षुणा प्रमास्वरूपं फलं प्रमाणं चाभिधाय—'यत् सम्बद्धं सत् तदाकारोल्लेखि विज्ञानं तत् प्रत्यक्ष'मिति सांख्यसूत्रानुसारेण प्रत्यक्षलक्षणमपि प्रपंचितम्। '...सम्बद्धवस्त्वाकारधारि भवति यद् विज्ञानं बुद्धिवृत्तिस्तत्प्रत्यक्षं प्रमाणमित्यर्थः। अत्र सदित्यन्तं हेतुगर्भविशेषणम्। तथा च स्वार्थसन्निकर्षजन्याकारस्याश्रयो वृत्तिः प्रत्यक्षं प्रमाणमिति निष्कर्षः। वृत्तिः सम्बन्धार्थं सर्पतीत्यागाभिसूत्रान्न वृत्तेः सन्निकर्षजन्यत्वमित्याकाराश्रयग्रहणम्। चक्षुरादिद्वारकबुद्धिवृत्तिश्च प्रदीपस्य शिखातुल्या बाह्यार्थसन्निकर्षानन्तरमेव तदाकारोल्लेखिनी भवतीति नासम्भवः।'[108] उक्तं च तेनैव—'योगिनामबाह्यप्रत्यक्षत्वान्न दोषः' इति सूत्रभाष्ये—'ऐन्द्रियकप्रत्यक्षमेवात्र लक्ष्यम्। अतो न तत्प्रत्यक्षेऽव्याप्तिरित्यर्थः।'[109]

पातंजलमतेऽपि प्रत्यक्षलक्षणं व्यासभाष्ये वाचस्पतिटीकायां योगवार्तिके च परिष्कृतम्। उक्तं हि व्यासदेवैः प्रमाणसूत्रभाष्ये—'इन्द्रियप्रणालिकया

107 Sā. pra. bhā. 1. 87
108 Ibid 1.89
109 Ibid 1.90

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



चित्तस्य बाह्यवस्तूपरागात् तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्। फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः, बुद्धेः प्रतिसंवेदी पुरुष इत्युपरिष्टादुपपादयिष्यामः।'[110]

भाष्यव्याख्यानं चोक्तं वाचस्पतिपादैः तत्त्ववैशारद्याम्—'अनधिगततत्त्वबोधः पौरुषेयो व्यवहारहेतुः प्रमा, तत्करणं प्रमाणम्। ...अर्थस्य इति समारोपितत्वं निषेधति; तद्विषया इति बाह्यगोचरतया ज्ञानाकारगोचरत्वं (बौद्धाभिमतं) वारयति। चित्तवर्तिनो ज्ञानाकारस्य बाह्यज्ञेयसम्बन्धं दर्शयति बाह्यवस्तूपरागात् इति। व्यवहितस्य तदुपरागे हेतुमाह—इन्द्रियप्रणालिकया इति।......सामान्यविशेषात्मन इति। न तद्वत्ता, किन्तु तादात्म्यमर्थस्य। यद्यपि सामान्यमपि प्रत्यक्षे प्रतिभासते तथाऽपि विशेषं प्रति उपसर्जनभूतमित्यर्थः।......फलं पौरुषेयश्चित्तवृत्तिबोध इति। ननु पुरुषवर्ती बोधः कथं चित्तगताया वृत्तेः फलम्? इत्यत आह—अविशिष्ट इति। न हि पुरुषगतो बोधो जन्यतेऽपि तु चैतन्यमेव बुद्धिदर्पणप्रतिबिम्बितं बुद्धिवृत्त्याऽर्थाकारतया तदाकारतामापद्यमानं फलम्।'[111]

योगवार्तिके च तद्व्याख्यातं विज्ञानभिक्षुणा—'इन्द्रियाण्येव नाडी चित्तसंचरणमार्गाः, तैः संयुज्य तद्गोलकद्वारा बाह्यवस्तूपरक्तस्य चित्तस्येन्द्रियसाहित्येनैवार्थाकारः परिणामो भवति न केवलस्य चित्तस्य, शंखपैत्याद्याकारतायां नयनादिगतपित्ताद्यन्वयव्यतिरेकाभ्याम्; अतो... रूपादिवृत्तिषु चक्षुरादीनामपि कारणत्वं (करणत्वं) शास्त्रेषूच्यते। वृत्तिः प्रभावद्द्रव्यमेवेति प्रागेवोक्तम्। सा वृत्तिरेव दीपप्रभावद् बाह्यर्थमुपसृत्य चक्षुराद्येकीभावेन घटाद्याकारा भवति। स्वप्नध्यानादौ घटाद्याकारतया चित्तवृत्तेरनुभूयमानत्वात् बाह्येऽपि ज्ञानाकारः सिध्यति। अत्रांशे बौद्धानामस्माकं चैकमत्येऽपि न साम्यम्, अस्माभिर्बाह्यार्थस्यापि स्वीकारादिति।'

'स च बोधश्चित्तवृत्त्या सहाविशिष्ट इति वृत्तिसारूप्यसूत्रे उपपादितमित्यर्थः। अयं घट इत्याकारा बिम्बरूपा वृत्तिः कारणम् (करणं), तस्या एव वृत्तेश्चैतन्ये प्रतिबिम्बनाच्चैतन्यमपि अयं घट इत्याकारमिव सद् बोधाख्यं फलं भवतीति नात्र विशेषः शब्देन वक्तुं शक्यते, विवेकिभिरेवेक्षुक्षीरादिमाधुर्य-

---

110 Yo. sū. bhā. 1.7

111 Tat. vai. 1.7

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



स्येव स्वयं विशेषोऽनुभूयते दृग्दृश्यादिवैधर्म्यादिति भावः।'[112] अत्राप्ययमभिप्रायः—यद्यपि पुरुषस्यापरिणामिन्याश्चितेः स्वयमाकारो न सम्भवति, तथा न वृत्तिसाक्षित्वं विषयग्रहणं वा तदाकारत्वाभावात्, तथापि प्रतिबिम्बवशादेव विषयोपरक्तवृत्त्याकारापत्त्या पुरुषस्य चितेर्वृत्तिसाक्षित्वं तथा विषयग्रहणं च सम्भवति। स च प्रतिबिम्बो वाचस्पतिमते वृत्तौ ह्येव चैतन्यस्य, तेनैव तदाकारापत्तिसम्भवात्। विज्ञानभिक्षुमते तु विनिगमनाविरहेण वृत्तेरपि पुरुषचैतन्ये प्रतिबिम्बनात् परस्परप्रतिबिम्ब इति दिक्।

रामानुजमते यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमेत्युक्तमेव। प्रमाकरणं प्रमाणम्। प्रमाणानि प्रत्यक्षानुमानशब्दाख्यानि त्रीण्येव।

तन्मते साक्षात्कारिप्रमाकरणमेव प्रत्यक्षप्रमाणम्। साक्षात्कारित्वञ्च नेन्द्रियजन्यत्वम्, ईश्वरप्रत्यक्षे योगिप्रत्यक्षे चेन्द्रियाजन्ये अव्याप्तिप्रसङ्गात्। अतः अनुमितिशाब्दबोधावृत्तिज्ञानत्वव्याप्यजातिविशेष एव साक्षात्कारित्वमिति बोध्यम्। उक्तञ्च यतीन्द्रमतदीपिकायां—'अत्र साक्षात्कारिप्रमाकरणं प्रत्यक्षम्। अनुमानादिव्यावृत्त्यर्थं साक्षात्कारीति। दुष्टेन्द्रियजव्यावृत्त्यर्थं प्रमेति।'[113]

रामानुजमतेऽपि प्रत्यक्षस्य निर्विकल्पकसविकल्पकभेदेन द्वैविध्येऽपि निर्विकल्पकज्ञानमपि विशिष्टज्ञानमेव गुणसंस्थानादिप्रकारम्, न तु तार्किकमतवत् संसर्गानवगाहि निष्प्रकारकम्। तथाचोक्तं श्रीनिवासेन—'तच्च प्रत्यक्षं द्विविधम्, निर्विकल्पकसविकल्पकभेदात्। निर्विकल्पकं नाम गुणसंस्थानादिविशिष्टप्रथमपिण्डग्रहणम्। सविकल्पकं तु सप्रत्यवमर्शं गुणसंस्थानादिविशिष्टद्वितीयादिपिण्डज्ञानम्। उभयमप्येतद् विशिष्टविषयमेव अविशिष्टग्राहिणो ज्ञानस्यानुपलम्भादनुपपत्तेश्च।'[114] तथा श्रीभाष्येऽपि—'प्रत्यक्षमपि निर्विकल्पकसविकल्पकभेदभिन्नं···। अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम्, द्वितीयादिपिण्डग्रहणं सविकल्पकमुच्यते। तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते, द्वितीयादिपिण्डग्रहणेष्वेवानुवृत्तप्रतीतिः।'[115]

---

112 Yo. Vār. 1.7
113 Jat. mat. dīp. p. 4-5 (Ananda Asram)
114 Ibid p. 5 (A. A.)
115 Br. sū. Rā. bhā. p. 73 (Nirnayasagar)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तथा प्रत्यक्षे ग्रहणप्रक्रियाऽप्युक्ता श्रीनिवासेन—'ग्रहणप्रकारस्तु—आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन। इन्द्रियाणां प्राप्यप्रकाशकारित्वनियमात्। अतो घटादिरूपार्थस्य चक्षूरूपेन्द्रियस्य च सन्निकर्षे सत्ययं घटः पट इति चाक्षुषज्ञानं जायते। एवमेव स्पार्शनप्रत्यक्षादयोऽपि।'

'द्रव्यग्रहणे संयोगः सम्बन्धः। द्रव्यगतरूपादिग्रहणे समवायानङ्गीकारात् संयुक्ताश्रयणं सम्बन्धः।'

'निर्विकल्पकसविकल्पकभेदभिन्नं प्रत्यक्षं द्विविधम्—अर्वाचीनमनर्वाचीनं च। अर्वाचीनं पुनर्द्विविधम्—इन्द्रियसापेक्षं तदनपेक्षं चेति। तदनपेक्षं च द्विविधम्—स्वयंसिद्धं दिव्यं चेति। स्वयंसिद्धं योगजन्यम्, दिव्यं भगवत्प्रसादजन्यम्। अनर्वाचीनं त्विन्द्रियनिरपेक्षं मुक्त-नित्येश्वरज्ञानम् (प्रत्यक्षम्)। अनर्वाचीनं तु प्रसङ्गादुक्तम्। एवं साक्षात्कारिप्रमाकरणं प्रत्यक्षमिति सिद्धम्।'[116]

एतन्मते यथार्थस्मृतेः प्रत्यभिज्ञायाः अभावग्राहकानुपलब्धेः ऊहस्य अनध्यवसायस्य प्रतिभायाश्च यथा प्रत्यक्षेऽन्तर्भावस्तथोक्तं श्रीनिवासेन यतीन्द्रमतदीपिकायां—'एवं स्मृतेरपि यथावस्थितव्यवहारानुगुणत्वेन प्रामाण्यात्, स्मृतेरपि प्रमाणत्वेन परिगणनाच्च,.........स्मृतेः प्रामाण्याङ्गीकारेऽपि संस्कारसापेक्षत्वात् तस्याः प्रत्यक्षमूलकत्वान्मूलभूते प्रत्यक्षेऽन्तर्भाव इति न पृथक्प्रमाणकल्पनम्।......यथा स्मृतेः प्रत्यक्षेऽन्तर्भावस्तथा सोऽयं देवदत्त इति प्रत्यभिज्ञाया अपि प्रत्यक्षेऽन्तर्भावः। अस्मन्मते अभावस्य भावान्तररूपत्वात् तज्ज्ञानस्यापि प्रत्यक्षेऽन्तर्भावः। प्रायः पुरुषेणानेन भवितव्यमेतदूहः। पुरः किंसंज्ञकोऽयं वृक्ष इत्यनध्यवसायो ज्ञानं संशय उक्तः। एतयोरपि प्रत्यक्षेऽन्तर्भावः। पुण्यपुरुषनिष्ठा प्रतिभाऽपि प्रत्यक्षेऽन्तर्भूता।'[117]

तस्माद् रामानुजीयमते साक्षात्कारित्वमेव प्रत्यक्षस्य प्राबल्यहेतुः वैशद्यहेतुश्चेति बोध्यम्।

---

116 Jat. mat. dip. p. 5-6 (A. A.)
117 Ibid p. 7-8 (A. A.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अद्वैतवेदान्तिनां तु प्रत्यक्षलक्षणमभिनवमेव शास्त्रमूलं सुगभीरानुभवमूलञ्च । चैतन्यमेव तन्मते साक्षादपरोक्षस्वरूपम् । यत्तु घटादीनां प्रत्यक्षं तदपि इन्द्रियादिव्यवहितमेव न तु साक्षात् । तदपि चैतन्यापरोक्षत्वनिमित्तमेव । घटादिविषयाणां चैतन्यारोपितत्वेन चैतन्याभिन्नतया विषयाधिष्ठानचैतन्यद्वारैव तदवच्छेदकस्य विषयस्य प्रत्यक्षं भवति । तथा हि यदा इन्द्रियप्रणाल्या बुद्धिवृत्तेर्विषयदेशगमनेन विषयाकारत्वं जायते, तदा प्रमातृचैतन्यस्यान्तःकरणावच्छिन्नस्य प्रमाणचैतन्यस्य वृत्त्यवच्छिन्नस्य प्रमेयचैतन्यस्य च विषयावच्छिन्नस्याभेदो जायते । उपाधिकृतभेदस्थले उपाधीनामेककालीनैकदेशस्थत्वे उपाधेयाभेदस्यावश्यम्भावात् । एतदेव प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वं तद्विषये प्रमायाः प्रमाणस्य च प्रत्यक्षत्वप्रयोजकम् । तस्मादिन्द्रियजन्यत्वं न प्रत्यक्षत्वप्रयोजकं साक्षात् साक्षिवेद्यान्तःकरणसुखदुःखादिप्रत्यक्षे ईश्वरप्रत्यक्षे च इन्द्रियजन्यत्वाभावात् । न च तेषां मनइन्द्रियजन्यत्वम्, 'ह्रीर्धीर्भीरित्येतत् सर्वं मन एव'[118] इत्यादिश्रुत्या मनसो ज्ञानसुखाद्याकारपरिणतस्य विषयत्वेनैव न तत्र प्रत्यक्षे करणत्वम् । वेदान्तपरिभाषाकारादिमते मनस इन्द्रियत्वाभावाच्च मनसः पुनः सुखाद्याकारकवृत्तिस्वीकारेऽपि मनोजन्यत्वेऽपि नेन्द्रियजन्यत्वम् । तदुक्तं धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायां—'प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम् । प्रत्यक्षप्रमा चात्र चैतन्यमेव—यत् साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः, अपरोक्षादित्यस्यापरोक्षमित्यर्थः । चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते । ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः । तदुक्तं विवरणे—वृत्तौ ज्ञानत्वोपचारादिति ।......इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः इत्यादिश्रुत्या मनसोऽनिन्द्रियत्वावगमाच्च ।......... नहीन्द्रियजन्यत्वेन साक्षात्त्वम्, अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः, ईश्वरप्रत्यक्षस्यानिन्द्रियजन्यस्य साक्षात्त्वानापत्तेश्च ।......तथाच तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे (तत्तद्विषयांशे, न तु स्वस्मिन् ज्ञानांशे) प्रत्यक्षत्वम् ।'[119]

अपि च, यथा ज्ञानस्य प्रत्यक्षत्वमुच्यते तथा विषयस्यापि प्रत्यक्षत्वं प्रसिद्धम् । घटज्ञानं प्रत्यक्षम्, घटः प्रत्यक्ष इत्युभयथा व्यवहारदर्शनात् ।

118 Br. up. 1.5.3

119 Ved. pari. p. 14–33 (chow.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



यद्यपि प्रत्यक्षज्ञानविषयत्वमेव विषयस्य प्रत्यक्षत्वमिति वक्तुं शक्यते, तथाप्यनवस्थाभिया ज्ञानात्मकवृत्तिविषयकवृत्त्यनङ्गीकारेण वृत्तेः प्रत्यक्षज्ञानविषयत्वाभावात् वृत्तेरपि प्रत्यक्षत्वोपपत्त्यर्थं प्रत्यक्षज्ञानविषयत्वरूपविषयगतप्रत्यक्षत्वलक्षणमपहाय प्रमातृचैतन्याभिन्नत्वमेव विषयस्य प्रत्यक्षत्वं वक्तव्यम्। तथाहि—सिद्धान्ते चैतन्यारोपितविषयस्य विषयचैतन्याभिन्नतया, प्रमातृचैतन्यस्य च पूर्वोक्तप्रकारेण विषयदेशे वृत्तेर्निर्गमनेन वा, आन्तरसुखादिविषयदेशे स्थितया वा विषयचैतन्याभिन्नतया विषयचैतन्याभिन्नो विषयः प्रमातृचैतन्याभिन्न एव भवतीति विषयस्य प्रत्यक्षत्वं सिध्यति। तदुक्तं धर्मराजाध्वरीन्द्रेण—'घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वम्,……… प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः। तथा च घटादेः स्वावच्छिन्नचैतन्याध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता, अधिष्ठानसत्ताऽतिरिक्ताया आरोपितसत्ताया अनङ्गीकारात्। विषयचैतन्यञ्च पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धं घटादेरपरोक्षत्वम्।……अयं निर्गलितार्थः—स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्ताऽतिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम्। तत्र संयोग-संयुक्ततादात्म्यादीनां सन्निकर्षाणां चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः'[120] इति।

अद्वैतमतेऽपि सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षद्वैविध्यं स्वीकृतम्। उक्तं हि धर्मराजाध्वरीन्द्रेण—'तच्च प्रत्यक्षं द्विविधम्—सविकल्पकनिर्विकल्पकभेदात्। तत्र सविकल्पकं वैशिष्ट्यावगाहिज्ञानं यथा घटमहं जानामीत्यादिज्ञानम्। निर्विकल्पकं तु संसर्गानवगाहिज्ञानम्—यथा सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यज्ञानम्।……तथा च सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निःसृतान्तःकरणवृत्त्यभ्युपगमेन वृत्त्यवच्छिन्नचैतन्यदेवदत्तावच्छिन्नचैतन्ययोरभेदेन सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वम्। एवं तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्यापि, तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात्।'

'ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम्? उच्यते। वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गवत्त्वं तन्त्रम्, अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः, किन्तु तात्पर्यविषयत्वम्।……

120 Ibid p. 33-39 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्यमवसितमिति कथं तात्पर्याविषयसंसर्गमवबोधयेत्। इदमेव तत्त्वमस्यादिवाक्यानामखण्डार्थत्वं यत् संसर्गानवगाहियथार्थज्ञानजनकत्वमिति।'[121]

ऐन्द्रियकप्रत्यक्षातिरिक्तमस्ति प्रत्यक्षं साक्षिप्रत्यक्षं नामाद्वैतवेदान्तिनाम्। अन्तःकरणतद्धर्मसुखदुःखादीनां ज्ञानाज्ञानानाञ्च साक्षिप्रत्यक्षेणैव प्रत्यक्षम्। तथा कालाकाशादीनां रज्जुसर्पादीनाञ्च प्रातिभासिकानां साक्षिप्रत्यक्षविषयत्वं साक्षात्साक्षिवेद्यत्वमिति वा प्रसिद्धम्। तदुक्तं वेदान्तपरिभाषायाम्—'तच्च प्रत्यक्षं पुनर्द्विविधम्—जीवसाक्षि ईश्वरसाक्षि चेति। तत्र जीवो नामान्तःकरणावच्छिन्नं चैतन्यम्। तत्साक्षि तु अन्तःकरणोपहितं चैतन्यम्। अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः।.........अयं जीवसाक्षी प्रत्यात्मं नाना, एकत्वे मैत्रावगते चैत्रस्याप्यनुसन्धानप्रसङ्गः।'[122] ईश्वरसाक्षी तु मायोपहितं चैतन्यं मनोविज्ञानेऽनुपयोगितया नात्र निरूपणयोग्यमिति बोध्यम्। अपि च घटादिबाह्यविषयाणामपि ज्ञाततया अज्ञाततया वा साक्षिचैतन्यभास्यत्वमेव। प्रमाणवृत्तिसद्भावे ज्ञाततया भास्यत्वम्, तदभावे त्वज्ञाततयैव घटादेः साक्षिचैतन्यभास्यत्वम्। तदुक्तं विवरणे—'सर्वं वस्तु ज्ञाततया वा अज्ञाततया वा साक्षिचैतन्यस्य विषय एव' इति। उक्तं च सदानन्देनाद्वैत-सिद्धिसिद्धान्तसारे—

'धीवृत्तेरुदयात् पूर्वमज्ञातार्थप्रसिद्धये।
धीवृत्तिव्यतिरिक्तस्य ज्ञानस्यावश्यकत्वतः॥

अन्यथा साधकाभावे स्यादर्थो नरशृङ्गवत्।
वृत्तिरूपं न तज् ज्ञानं किन्तु साक्षिचिदद्वयम्॥

वृत्तिगोत्पत्तिनाशाद्यसंस्पृष्टं विविधं खवत्।
अज्ञानसाधकत्वात् तन्नाज्ञाननिवर्तकम्।
तच्च वृत्त्युपरक्तं सदज्ञानान्ध्यनिवर्तकम्॥'[123]

पुनश्चात्रेदमनुधावनीयं यत्, प्रत्यक्षप्रमाया यल्लक्षणं कृतं विषयचैतन्याभेदरूपं तत् ज्ञप्तेः विषयांशे एव—विषयप्रकाशने एव। स्वात्मांशे तु

121 Ved. pari. p. 40-45 (chow.)
122 Ibid p. 45-48 (chow.)
123 Advai. si. sā. p. 43 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



ज्ञानप्रकाशने पूर्वोक्तं चैतन्यत्वमेव प्रत्यक्षलक्षणमिति अनुमित्यादेरपि वह्न्यंशे परोक्षत्वेऽपि ज्ञानांशे चैतन्यरूपतया प्रत्यक्षत्वमेव ।[124]

अपि चाद्वैतिभिः सांख्यादिभिरिवान्तःकरणवृत्तिः प्रत्यक्षाद्यनुभवेषु स्वीकृता । यथोक्तं शंकराचार्यपादै उपदेशसाहस्र्याम् —

'स्वप्नस्मृत्योर्घटादे हिं रूपाभासः प्रदृश्यते ।
पुरा नूनं तदाकारा धीर्दृष्टेत्यनुमीयते ।।'[125]

'स्पप्नस्मृत्योर्दृष्टार्थविषयत्वनियमात् पूर्वदृष्टस्य वाह्यार्थस्य तत्राभावात् स्वप्नस्मृत्योरुपलभ्यमानो विषयोऽर्थाकारवृत्तिमदन्तःकरणमेवेति जाग्रत्पूर्वानुभवयोरप्यन्तःकरणमेवार्थाकारवृत्तिमदपरोक्षमनुभूतमिति कल्प्यते इति भावः ।'[126]
पुनश्चोक्तं तत्रैवः —

'भूषासिक्तं यथा ताम्रं तन्निभं जायते तथा ।
रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ।।
व्यञ्जको वा यथालोको व्यङ्ग्यस्याकारतामियात् ।
सर्वार्थव्यञ्जकत्वाद्धीरर्थाकारा प्रदृश्यते ।......
व्यञ्जकत्वं तदेवास्या रूपाद्याकारदृश्यता ।
द्रष्टृत्वं च दृशेस्तद्वद् व्याप्तिः स्याद्धिय उद्भवे ।।'[127]

यथा रूपाद्याकारेणावभासमानत्वमेव धियो रूपादिव्यञ्जकत्वं तथा दृशेरात्मनो धिय उद्भवे धर्माधर्मवशादुत्पत्तौ सत्यां तद्व्याप्तिस्तदात्मना स्फुरणमेव द्रष्टृत्वं न परिणामः—इत्यर्थः । एवमाचार्येण वुद्धिवृत्तिर्निरूपिता ।

जाग्रदनुभवेपु वृत्तेः प्रयोजनञ्चोक्तं आवरणभङ्गरूपम् । तदुक्तं—

'वृत्त्याऽऽवरणभङ्गे चित्प्रकाशोऽनावृतः स्वतः ।
अतो वृत्तेः पुरा दृश्याप्रतीतिरुपपद्यते ।।'[128]

---

124 Veda. pari. p. 52-53 (chow.)
125 Upadeśasāhasri p. 14.1
126 Ibid-ṭikā (Ramatirtha) 14.1
127 Upa. sā 14. 6
128 Advai. si. sā. p. 43 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



जीवस्यापच्छिन्नत्वपक्षे परिच्छिन्नत्वपक्षे वा आवरणभङ्गार्था सम्बन्धार्था वा वृत्तिरितीष्यते। यथोक्तं वेदान्तपरिभाषायां—'सा चान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम्। अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम्। एवं सति घटादेर्न सर्वदा भानप्रसङ्गः, अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात्।······परोक्षव्यावृत्तवृत्तिविशेषस्य तदुपहितचैतन्यस्य वाऽऽवरणभङ्गजनकत्वमित्यावरणाभिभवार्था वृत्तिरित्युच्यते।'

'सम्बन्धार्था वृत्तिरित्यपरं मतम्।······न हि वृत्तिविरहदशायां (अपरिच्छिन्नस्य) जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः, किं तर्हि, घटादिभानप्रयोजकं सम्बन्धविशेषम्। स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च व्यङ्ग्यव्यञ्जकतालक्षणः कादाचित्कः तत्तदाकारवृत्तिनिबन्धनः।'[129] जीवस्य परिच्छिन्नत्वपक्षे तु सुतरां तादृशसम्बन्धार्था एव वृत्तिरिति बोध्यम्। उक्तञ्च सदानन्देन—

'अविद्योपाधिको जीवः सर्वव्यापी मतः क्वचित्।
तथाऽन्तःकरणोपाधिः परिच्छिन्नो मतः क्वचित्॥

तत्राद्ये विषयाभासि जीवचैतन्यमिष्यते।
द्वितीये ब्रह्मचैतन्यं विशेषोऽयं विविच्यताम्॥

जीवस्यानावृतत्वे वाऽऽवृतत्वे वा मते भवेत्।
विषयोपरागार्था वाऽऽवरणाभिभवाय वा॥

वृत्तिः स्यात् सर्वगत्वेऽस्य प्रतिकर्मव्यवस्थितौ।
परिच्छिन्नत्वपक्षे साऽभेदाभिव्यक्तये मता॥'[130]

ननु परोक्षस्थलेऽप्यनुमित्यादौ वह्न्याद्याकारान्तःकरणवृत्तेः स्वीकाराद् अपरोक्षवृत्तेः को विशेषः। परोक्षस्थले वृत्तेरस्वीकारे आवरणसत्त्वात् ज्ञानासम्भव एव स्यात्। वृत्तिस्वीकारे तेनैवावरणभङ्गे सति विषयस्यापरोक्षत्वं कथं न स्यात्? उच्यते। अनुमित्यादिपरोक्षानुभवस्थले विषयज्ञानार्थं वृत्तिस्वीकारेऽपि विषयेण इन्द्रियसन्निकर्षाभावात् वृत्तेर्बहिर्विषयदेशे निर्गमना-

129 Ved. pari. p. 184-86 (chow.)
130 Advai. si. sā. p. 45 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



भावेन वृत्त्यवच्छिन्नचैतन्यस्य विषयचैतन्याभिन्नत्वाभावात् न ज्ञानस्य प्रत्यक्षत्वम् । परोक्षवृत्त्याऽऽवरणभङ्गोऽपि तत्रासत्त्वापादकावरणस्यैवाभिभवः, न तु अभानापादकावरणस्य । तथा चानुमितिस्थले वह्निरस्तीत्येव व्यवहारः, न तु वह्निर्भातीति । तस्मादज्ञानस्यावृति द्विविधा ज्ञेया । असत्त्वापादिका नास्तीतिव्यवहारहेतुः, अभानापादिका च न भातीतिव्यवहारहेतुः । तदुक्तं पञ्चदश्यां विद्यारण्येन —

'ज्ञानद्वयेन नष्टेऽस्मिन्नज्ञाने तत्कृतावृतिः ।
न भाति नास्ति चेत्येषा द्विविधाऽपि विनश्यति ।।

परोक्षज्ञानतो नश्येदसत्त्वावृतिहेतुता ।
अपरोक्षज्ञाननाश्या ह्यभानावृतिहेतुता ।।'[131]

तस्मादद्वैतमते वृत्त्यवच्छिन्नचैतन्यस्य विषयचैतन्याभेदेन साक्षाद्विषयव्याप्त्या द्विविधावृतिविनाशेन विषयप्रकाशनात् प्रत्यक्षज्ञानस्य प्राबल्यं वैशद्यञ्च परोक्षानुभवापेक्षया इति बोध्यम् । परोक्षस्थले तु वृत्त्या विषयचैतन्याभेदाभावादांशिकावृतिनाशेन नास्तीतिव्यवहारनिवर्तकानुभवस्य अस्तीतिव्यवहारसम्पादकस्य न तादृशं वैशद्यं प्राबल्यं वा ।

---

131 Pañcadaśī, 7. 44-45

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( १० )

## निर्विकल्पकप्रत्यक्षनिरूपणम्

निर्विकल्पकप्रत्यक्षं नाम किंचित् प्रत्यक्षमस्ति न वा, अस्ति चेत् किं तस्य स्वरूपमिति मनस्तत्त्वनिरूपणे महानयं वितर्क इति पृथग्रूपेण सविस्तारं मतभेदेन निर्विकल्पकप्रत्यक्षं निरूप्यते ।

तत्र तावन्नास्ति निर्विकल्पकप्रत्यक्षं नाम किंचिदिति शाब्दिकानां भर्तृहरि-प्रभृतीनामुद्गारः । तथा चोक्तं वाक्यपदीये —

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।'[1]

प्रत्ययमात्रस्यैव शब्दानुविद्धत्वान्निर्विकल्पकप्रत्यक्षं न सम्भवतीति तेषामाशयः । अपि च व्यवहारार्थमेव ज्ञानमाश्रियते । न च निर्विकल्पेन कश्चिद् व्यवहारो सम्भवति । यद्युच्येत बालानां तिरश्चां चास्त्येव निर्विकल्पः प्रत्ययो व्यवहारश्च, तन्न । तेषामपि सूक्ष्मवागुपपत्तेः । यथोक्तं—

'वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ।।'[2]

शाब्दिकमतमसहमानाः कन्दलीकारप्रमुखा वैशेषिकाः प्राहुः—'केचित् सविकल्पकमेवैकं प्रत्यक्षमाचक्षते, व्यवसायात्मकत्वेन सर्वस्य व्यवहारयोग्यत्वात्, शब्दव्युत्पत्तिरहितानामपि तिरश्चामर्थविकल्पात् प्रवृत्तेः, तान् प्रत्याह— स्वरूपालोचनमात्रमिति । स्वरूपालोचनमात्रं ग्रहणमात्रं विकल्परहितं प्रत्यक्षमात्रमिति यावत् । यदि वस्तुस्वरूपस्य निर्विकल्पेन ग्रहणं नेष्यते तदा तद्वाचकशब्दस्य स्मृत्यभावात् सविकल्पकमपि न स्यात् । अतः सविकल्पकमिच्छता निर्विकल्पकमप्येषितव्यम्, तच्च न सामान्यमात्रं गृह्णाति भेदस्यापि

1 Vākyapadīya, 1. 123 (chow.)

2 Ibid 1. 124 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



(विशेषस्य व्यक्तेरपि) प्रतिभासनात् । नापि (बौद्धमतवत्) स्वलक्षणमात्रम्, सामान्याकारस्य संवेदनात्, व्यक्त्यन्तरदर्शने प्रतिसन्धानाच्च । किन्तु सामान्यं विशेषं चोभयमपि गृह्णाति ।·········निर्विकल्पकदशायां च पिण्डान्तरानुसन्धानाभावात् सामान्यविशेषयोरनुवृत्तिव्यावृत्ती धर्मौ न गृह्येते, तयोरग्रहणान्न विविच्य ग्रहणम्, स्वरूपग्रहणं तु (सामान्यविशेषयोः) भवत्येव तस्यान्यानपेक्षत्वात् ।'[3]

एवं प्रशस्तपादादिवैशेषिकाचार्यमते अनुभवबलात् सविकल्पकान्यथानुपपत्त्या चाविविक्तसामान्यविशेषग्राहि निर्विकल्पकप्रत्यक्षमवश्यमेव स्वीकार्यमिति प्रत्यक्षनिर्णये उक्तमेव । गौतमीयन्यायसूत्रेऽपि प्रत्यक्षलक्षणे अव्यपदेश्यमित्यनेन निर्विकल्पकप्रत्यक्षमेवोक्तमिति प्रतिपादितं प्रत्यक्षनिरूपणे । व्यपदेशरहितमपि शब्दानुवेधरहितं ज्ञानं सम्भवतीति शाब्दिकमतनिराकरणमेव तत्रोक्तमिति बोध्यम् । नव्यनैयायिकानां मते विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वात् घट इति सविकल्पकप्रत्यक्षस्य घटत्वविशिष्टघटज्ञानरूपस्य घटत्वरूपविशेषणज्ञानजन्यत्वात् घटसविकल्पकप्रत्यक्षात् पूर्वं घटघटत्वयोः संसर्गानवगाहि निष्प्रकारकं ज्ञानं जायते निर्विकल्पकाख्यम् । तच्च ज्ञानं निष्प्रकारकत्वादेवातीन्द्रियं—मानसप्रत्यक्षाविषयमिति भावः । तथा चोक्तं विश्वनाथेन—'चक्षुःसंयोगानन्तरं घट इत्याकारकं घटत्वादिविशिष्टं ज्ञानं न सम्भवति, पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात्, विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् । तथा च प्रथमतः घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते, तदेव निर्विकल्पकं तच्च न प्रत्यक्षम्',[4]—न मानसप्रत्यक्षविषम् इत्यर्थः । तच्च निर्विकल्पकप्रत्यक्षं नव्यन्यायमते प्रकारतादिशून्यत्वाद् भ्रमप्रमालक्षणायोगात् न भ्रमो नापि प्रमा । तथा चोक्तं तेनैव—

> 'न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ।
> प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत् ।।'[5] इति ।

अतीन्द्रियत्वाच्चानुमानगम्यमेव निर्विकल्पकं न स्वप्रत्यक्षसिद्धम् । तदुक्तं विश्वनाथेन—'ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।'[6] माधवसरस्वत्या तु

3 Nyā kan. p. 446 (V.S.V.)
4 Sid. muktā. p. 251 (N.S.)
5 Bhā. pari. p. 481—82 (N.S.)
6 Ibid p. 254. (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



निर्विकल्पकप्रत्यक्षस्य प्रमात्वमेव स्वीकृतं तस्याबाधात् । तदुक्तं मितभाषिण्याम्- 'निर्विकल्पकं तु प्रमायामेवान्तर्भवति, तस्य प्रथमाक्षसन्निपातजस्य वस्तुस्वरूप-मात्रविषयकस्य काप्यबाधात्, सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायात्, निर्विकल्पकस्य च प्रकाराभावात् ।'[7]

कुमारिलभट्टपादैरपि शाब्दिकमतखण्डनपूर्वकं स्वमतानुसारेण निर्विकल्पक-प्रत्यक्षं प्रतिष्ठापितम् । तथा ह्युक्तं श्लोकवार्तिके—

'अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥
न विशेषो न सामान्यं तदानीमनुभूयते ।
तयोराधारभूता तु व्यक्तिरेवावसीयते ॥

निर्विकल्पकबोधेऽपि द्वयात्मकस्यापि वस्तुनः ।
ग्रहणं लक्षणाख्येयं ज्ञात्रा शुद्धं तु गृह्यते ॥
......यथा रूपादयो भिन्नाः प्राक् शब्दात् स्वात्मनैव तु ।
गम्यन्ते तद्वदेवैतत् संज्ञित्वं केवलं परम् ॥

न चाविकल्पितः शब्दादिति वाच्यो न गृह्यते ।
तेनागृहीतशब्दोऽपि गोत्वादीन् प्रतिपद्यते ॥'[8]

उक्तं च सुचरितमिश्रेण टीकायां—'अयमप्यनेकान्तः यः सविकल्पकमेव प्रत्यक्षमिति । आलोचनज्ञानमपि सविकल्पकात् पृथग्भूतमस्ति । प्रतीमो हि वयमुन्मिषितचक्षुषः सहसा सम्मुग्धं द्व्याकारं (सामान्यविशेषात्मकं परमार्थं वस्तु, यत् सामान्यं विशेष इति च पश्चात् परीक्षका विभजन्ते । न हि व्यवहारार्थ-मेव प्रमाणमाश्रियते, उपेक्षा हि प्रमाणफलमिष्यते एव । अपि च सन्ति केचिद् व्यवहारा ये निर्विकल्पकमात्रादेव भवन्ति, यथाऽग्निना दह्यमानस्य सहसाऽ-पसरणम् । तिर्यग्बालानां चाविकल्पकेनैव सर्वो व्यवहारः । न च तेषां सूक्ष्मशब्दसद्भावे प्रमाणमस्ति'[9] इत्यादि । पुनश्चोक्तं तेनैव—'लक्षणाख्येयमिदं निर्विकल्पकस्य रूपं—सामान्यविशेषात्मकं वस्तु निर्विकल्पकेन विषयीक्रियते

---

7 Mitabhā. 29. p. 33 (Calcutta sanskrit series.)
8 Ślo-vār. 4. 112-13, 118, 175, 176.
9 Ślo-vār. ṭikā, 4.112



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



इति। तच्च निर्विकल्पकलक्षणकारैरेव परीक्षकैर्व्याख्यायते। प्रमाता तु सामान्यमिदं विशेषोऽयमिति च विवेकविधुरमिदमिति सम्मूग्धरूपमेव वस्तूपलभते। शुद्धमिति अनुवृत्तिव्यावृत्तिपरामर्शरहितं गृह्यते इत्यर्थः।'[10] उक्तं च मानमेयोदये—'तत्रेन्द्रियसन्निकर्षानन्तरमेव द्रव्यादिस्वरूपमात्रागाहि शब्दानुगमशून्यं यत् सम्मुग्धज्ञानं जायते तद्विशिष्टकल्पनाभावान्निर्विकल्पकमुच्यते।......पूर्वमर्थदर्शनाभावे शब्दस्मरणस्य हेत्वभावप्रसंगा'[11] दित्यादि।

प्राभाकरैरपि शालिकनाथैः—

'सविकल्पाऽविकल्पा च प्रत्यक्षा बुद्धिरिष्यते।
आद्या विशिष्टविषया स्वरूपविषयेतरा॥'

—इति कारिकाव्याख्याने उक्तं—'प्रथमं हि स्वरूपज्ञानं द्रव्यजातिगुणेषूत्पद्यते। तच्च स्वानुभवसिद्धम्। समाहितमनस्को विषयान्तरानुसन्धानशून्य इन्द्रियसंयुक्तं वस्तु साक्षादुपलभ्यते इति स्वसंविदेवात्र प्रमाणम्। तस्य च न (बौद्धमतवत्) स्वलक्षणमात्रं विषयः। जात्याकारग्राहित्वस्य स्पष्टत्वात्। नापि सामान्यमात्रविषयत्वं भेदग्रहणस्य प्रतीतिसिद्धत्वात्। ......सामान्यविशेषौ द्वे वस्तुनी प्रतिपद्यमानं प्रत्यक्षं प्रथममुत्पद्यते, किन्तु वस्त्वन्तरानुसन्धानशून्यतया सामान्यविशेषतया न प्रतीयते। अनुगतं हि सामान्यमुच्यते, व्यावृत्तश्च विशेषः। न च वस्त्वन्तरानुसन्धानमन्तरेणानुगतिव्यावृत्ती प्रत्येतुं शक्येते। अप्रतिपद्यमानोऽपि च ते शक्नोत्येव स्वरूपं तयोः प्रतिपत्तुमिति निर्विकल्पं सामान्यविशेषविषयम्।'[12]

इदमत्र ध्येयं यत्—भाट्टप्राभाकरवैशेषिकानां मते स्वानुभवसिद्धमेव प्रथमं वस्तुस्वरूपग्राहि निर्विकल्पकं स्वरूपतः सामान्यविशेषविषयम्। नव्यन्यायमते तु तदतीन्द्रियत्वात् जातिव्यक्तिविषयकत्वेऽपि अनाकारमनुमानमात्रगम्यम्।

जैनमते ज्ञानमात्रस्यैव स्वपरव्यवसायात्मकत्वेन व्यवहारजनकत्वात् सविकल्पकत्वेन यद्यपि नास्ति तार्किकसम्मतवदतीन्द्रियं निर्विकल्पकम्, तथापि

---

10 Ibid. 4.118

11 Mā. me. p. 17-18 (Adyar)

12 Pra. pañ. p 160-64 (B.H.U.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



गुणादिविशेषवर्जितं वस्तुसत्तामात्रावगाहि निर्विकल्पकमस्त्येव दर्शनाख्यम् । यथोक्तं भास्करनन्दिना—'विषयविषयिसम्बन्धे सति श्वेतत्वादिविशेषरहितवस्तु-सत्तावभासिनी निर्विकल्पिका दर्शनाख्या प्रतीति र्जायते, यथा तदहर्जातस्य प्रथमसमयोन्मेषकाले बालकस्य ।'[13] अन्यत्र च तेनैव—'सविकल्पं भवेज् ज्ञानं निर्विकल्पं तु दर्शनम् ।......दर्शनं चतुर्भेदं—चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनं चेति ।'[14]

अद्वैतवेदान्तिनस्तु तार्किकयुक्तिमसहमाना वदन्ति—नायं नियमः सवि-कल्पकप्रत्यक्षे प्रथमतः निर्विकल्पकमेव जायते, तादृशनिर्विकल्पके प्रमाणाभावात् । पूर्वं विशेषणप्रत्यक्षं विनाऽपि विशिष्टबुद्ध्युदयदर्शनात् । उक्तं हि न्यायरत्नावल्यां ब्रह्मानन्देन—'न च निर्विकल्पकप्रत्यक्षस्योक्तसिद्ध्यै तादृशमिन्द्रियसन्निकर्षकार्य-त्वमावश्यकमिति वाच्यम् । उक्तप्रत्यक्षे मानाभावात् । न च 'जातिमान् घट' इत्यादौ ...शुद्धघटत्वादिप्रकारताप्रयोजकत्वेन घटत्वादिनिर्विकल्पकसिद्धिरिति वाच्यम् । विजातीयसन्निकर्षत्वेनैवोक्तविषयताकधीहेतुत्वसम्भवात् । अनन्त-कोटिनिर्विकल्पक-कल्पने गौरवात् ।'[14a] ....

तथापि प्रकारान्तरेण निर्विकल्पकप्रत्यक्षमद्वैतिनामपि सम्मतम् । तच्च तन्मते अहं ब्रह्मास्मि तत्त्वमसीत्यादिवाक्यजन्यं संसर्गानवगाहि अखण्डचैतन्य-रूपार्थापरोक्षम् । वैशिष्ट्यानवगाहिशुद्धार्थे तात्पर्यस्यावधारणे वाक्यजन्यज्ञानस्य शुद्धार्थविषयकत्वम्, दशमस्त्वमसीत्यादाविव विषयसन्निकर्षे वाक्यजन्यज्ञानस्याप्य-परोक्षत्वमद्वैतिभिः प्रमाणचैतनस्य विषयचैतन्याभेदेन प्रतिष्ठापितम् । उक्तं हि धर्मराजाध्वरीन्द्रेण—'निर्विकल्पकं तु संसर्गानवगाहि ज्ञानम् । यथा—सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यज्ञानम् । ननु शाब्दमिदं ज्ञानं न प्रत्यक्ष-मिन्द्रियाजन्यत्वादिति चेत्, न । न हीन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रं दूषितत्वात् । किन्तु......प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमित्युक्तम् । ......इदमेव तत्त्वमस्यादिवाक्यानामखण्डार्थत्वम्'[15] इत्यादि ।

---

13 Tat. vṛ. 1.15

14 Ibid. 2.9

14a Nyāyaratnāvalī, p. 264 (chow.)

15 Vedā. pari. p 41-45 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अपि च केचित् सुषुप्तौ अविद्यावृत्त्या निर्विकल्पकसाक्षिचैतन्यानुभवमपि स्वीकुर्वन्ति । उक्तं च सिद्धान्तविन्दौ मधुसूदनस्वामिना—'सुषुप्तौ निर्विकल्पक-साक्षिचैतन्यानुभवांगीकाराच्च ।'[16]

बौद्धमते स्वलक्षणविषयं निर्विकल्पकमेव प्रत्यक्षप्रमाणम्, न सविकल्पकम्। तस्य च न सामान्यं विषयः, सामान्यस्य कल्पनारूपत्वात्; किन्तु वस्तुनो यदसाधारणं स्वं लक्षणं तत्त्वं तदेव निर्विकल्पकप्रत्यक्षस्य विषयो भवति । तदुक्तं धर्म-कीर्तिना—'तत्र कल्पनापोढमभ्रान्तं प्रत्यक्ष'मिति, 'अभिलापसंसर्गयोग्यप्रतिभास-प्रतीतिः कल्पना, तया रहित'मिति, 'तस्य स्वलक्षणमेव विषयः' इति, 'यस्यार्थस्य सन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासभेदस्तत् स्वलक्षण'मिति च ।'[17] उक्तं च तद्व्याख्याने धर्मोत्तराचार्येण—'कल्पनापोढम्—कल्पनास्वभावरहितमित्यर्थः । अभ्रान्तमर्थक्रियाक्षमे वस्तुरूपेऽविपर्यस्तमुच्यते । अर्थक्रियाक्षमं च वस्तुरूपं सन्निवेशोपाधिधर्मात्मकम्, तत्र यन्न भ्राम्यति तदभ्रान्तम् ।......अभिलापेन संसर्गः, अभिलापसंसर्गः । एकस्मिन् ज्ञानेऽभिधेयाकारस्य अभिधानाकारेण सह ग्राह्याकारतया शीलनम् । ......तया कल्पनया कल्पनास्वभावेन रहितं तत् प्रत्यक्षमिति । ......स्वमसाधारणं तत्त्वं स्वलक्षणम् । वस्तुनो हि असाधारणं च तत्त्वमस्ति सामान्यं च । यदसाधारणं तत् प्रत्यक्षग्राह्यम् ।......ज्ञानप्रतिभास-भेदश्चार्थस्य स्फुटत्वास्फुटत्वाभ्यां बोध्यः । .........सर्वाण्येव हि वस्तूनि दूरादस्फुटानि दृश्यन्ते, समीपे स्फुटानि । तान्येव स्वलक्षणानि ।'[18]

एवं च बौद्धसम्मतं निर्विकल्पकप्रत्यक्षं तार्किकमीमांसकादिसम्मतात् सामान्यविशेषविषयकाद् विजातीयमेव स्वलक्षणमात्रविषयम् । यथा—वैया-करणानां न निर्विकल्पकं नाम प्रत्यक्षमस्ति, तथा तद्वैपरीत्येन बौद्धानां न सविकल्पकं नामाभ्रान्तं प्रत्यक्षमस्ति, विकल्पज्ञानस्य बुद्धिनिर्माणस्य भ्रान्तत्वात् ।

रामानुजमते यद्यपि निर्विकल्पकप्रत्यक्षं किंचित् स्वीकृतम्, तथापि तन्नामत एव निर्विकल्पकं जात्यादिविशिष्टप्रथमपिण्डग्रहणस्य तार्किकादिमत-सिद्धसविकल्पकप्रत्यक्षस्यैव रामानुजमते निर्विकल्पकत्वात् । संस्थानरूपजाते-

---

16 Siddhā. bin. p. 5 (B.O.R.I.)

17 Nyā. bin. p. 11-23 (chow.)

18 Nyā. bin. ṭikā. p. 12-23 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



गोत्वादेरनुवृत्तिग्राहकस्य द्वितीयादिपिण्डग्रहणस्यैव तन्मते सविकल्पकत्वात् । तथोक्तं श्रीभाष्यकारेण—'केनचिद्विशेषेणेदमित्थमिति हि सर्वा प्रतीतिरुपजायते, त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्यचिदपि पदार्थस्य ग्रहणायोगात् । अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम्, द्वितीयादिपिण्डग्रहणं सविकल्पकमुच्यते । तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते, द्वितीयादिपिण्डग्रहणेष्वेवानुवृत्तिप्रतीतिः । ···सास्नादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिण्डग्रहणे गृह्यत इति प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वम् ।'[19]

उक्तं च यतीन्द्रमतदीपिकायां श्रीनिवासेन—'निर्विकल्पकं नाम गुणसंस्थानादिविशिष्टप्रथमपिण्डग्रहणम् । सविकल्पकं तु गुणसंस्थानादिविशिष्टद्वितीयादिपिण्डज्ञानम् । उभयविधमप्येतद्विशिष्टविषयमेव, अविशिष्टग्राहिणो ज्ञानस्यानुपलम्भादनुपपत्तेश्च ।'[20]

तस्मात् फलतो रामानुजमते संसर्गानवगाहि अविशिष्टज्ञानरूपं निर्विकल्पकप्रत्यक्षमस्वीकृतमेव ।

तान्त्रिकदर्शने तु शब्दसम्भेदवर्जितं वस्तुस्वरूपमात्रावगाहि निर्विकल्पकं सांख्यादाविव स्वीकृतमेव । तच्च इदमेतदित्यादिशब्दसम्भेदवर्जितं भेदप्रतिभासवर्जितं च । तदुक्तं त्रिपुरारहस्यतन्त्रे—

'प्रकाशो निर्विकल्पः स्याद्वस्तूनामविभेदतः ।
विमर्शः शब्दसम्भेदाद् विभेदात् सविकल्पकः ।।

अयमेवंविध इति शब्दसम्भेदवर्जितः ।
वस्तुदर्शनरूपोऽसौ प्रकाशो निर्विकल्पकः ।।'[21]

---

19 Br. sū. Rā. bhā. p. 73 (N. S.)
20 Yat. mat. dīp. p. 5 (A. A.)
21 Tri. ra. tan. 16. 66-67

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( ११ )

## अलौकिकप्रत्यक्षनिरूपणम्

इन्द्रियार्थयोः संयोगादिसन्निकर्षजन्यं लौकिकप्रत्यक्षं निरूपितम् । लौकिकसन्निकर्षजन्यप्रत्यक्षव्यतिरिक्तमलौकिकप्रत्यक्षं न्याय-वैशेषिक-बौद्ध-जैन-सांख्य-पातंजल-शंकर-रामानुजादीनां सर्वेषामेव सम्मतम् । मीमांसकानां मते तु अविद्यमाने अलौकिके वा अर्थे योगिनामपि प्रत्यक्षं न सम्भवति, तत्रेन्द्रियसन्निकर्षासम्भवात् । कथंचित् योगजधर्मबलेन लौकिके अर्थे दूरस्थे व्यवहिते वा सम्भवेतापि अलौकिकं ज्ञानं तदपि अस्मदादीनां प्रतिभाप्रत्ययवत् न प्रत्यक्षम्, न वा प्रमाणम्, भूयशो विसंवादात् । तदुक्तं श्लोकवार्तिके—

'अतीतानागतेऽप्यर्थे सूक्ष्मे व्यवहितेऽपि वा ।
प्रत्यक्षं योगिनामिष्टं कैश्चिन् मुक्तात्मनामपि ।।
...न लोकव्यतिरिक्तं हि प्रत्यक्षं योगिनामपि ।।'[1]
प्रत्यक्षत्वन तस्यापि विद्यमानोलम्भनम् ।
सत्सम्प्रयोगजत्वं वाऽप्यस्मत् प्रत्यक्षवद् भवेत् ।।'[2]

उक्तं च तथैव नारायणभट्टेन मानमेयोदये—'यत्पुनर्भूतभविष्यदादिविषयं योगिज्ञानमीश्वरज्ञानं चेन्द्रियसन्निकर्षजत्वाभावेऽप्यपरोक्षमस्ति इति तत्संग्रहणायापरोक्षप्रमाव्याप्तं प्रत्यक्षमिति तार्किकैरुक्तं तदप्ययुक्तम् । प्रत्यक्षस्य विद्यमानोपलम्भनियमात् भूतादीनां प्रत्यक्षत्वस्यानुपपत्तेः ।'[3]

वैशेषिकसूत्रे तु विद्यारूपेण प्रमाणत्वेनैवार्षं ज्ञानमलौकिकमुक्तम्—'आर्षं सिद्धदर्शनं च धर्मेभ्यः ।'[4] ऋषीणां योगजधर्मेण जनितं यच्च सिद्धानां सतां वस्तूनां दर्शनं प्रत्यक्षात्मकं तत् धर्मेभ्य एव जायते इति प्रमाणमेव, न भ्रमरूपमिति भावः ।

---

1 Ślo. vār. 4. 26, 28
2 Ibid. 4. 29
3 Mā. me. p. 24 (Adyar)
4 Vai. sū 9. 2. 13

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उक्तं च प्रशस्तपादेनार्षज्ञानव्याख्याने––'आम्नायविधातॄणामृषीणामतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगाद् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते । तत् तु प्रस्तारेण देवर्षीणाम्, कदाचिदेव लौकिकानाम् ।'[5]

व्याख्यातं च कन्दलीकारेण––'आम्नायो वेदस्तस्य विधातारः कर्तारो ये ऋषयस्तेषामतीतेष्वनागतेषु वर्तमानेष्वतीन्द्रियेषु धर्माधर्मदिक्कालप्रभृतिषु चात्ममनसोः संयोगात् यत् प्रातिभं ज्ञानं यथार्थनिवेदनं यथास्वरूपसंवेदनं संशयविपर्ययरहितं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते विद्वांसः। इन्द्रियलिंगाद्यभावे यदर्थप्रतिभानं सा प्रतिभा, प्रतिभैव प्रातिभमित्युच्यते तत्रभवद्भिः ।'[6] अत्रेदमलौकिकप्रातिभज्ञानमेवार्षज्ञानत्वेन निरूपितम् । लौकिकानां प्रातिभज्ञानं तु पृथङ् निरूपयिष्यते ।

योगजधर्मजन्यं योगिप्रत्यक्षमपि प्रशस्तपादेन स्वीकृतम् । यथोक्तं–– 'अस्मद्विशिष्टानां तु योगिनां युक्तानां योगजधर्मानुगृहीतेन मनसा स्वात्मान्तराकाशदिक्कालपरमाणुवायुमनस्सु तत्समवेतगुणकर्मसामान्यविशेषेषु समवाये चावितथं स्वरूपदर्शनमुत्पद्यते । वियुक्तानां पुनश्चतुष्टयसन्निकर्षाद् (आत्ममन-इन्द्रियार्थसन्निकर्षाद्) योगजधर्मानुग्रहसामर्थ्यात् सूक्ष्मव्यवहितविप्रकृष्टेषु प्रत्यक्षमुत्पद्यते ।'[7]

यद्यपि न्यायसूत्रेषु न्यायभाष्ये च नालौकिकप्रत्यक्षं योगजप्रत्यक्षं वा कथितं दृश्यते, न च आर्षज्ञानस्य वैशेषिकैरिव पृथक्प्रामाण्यं नैयायिकैः स्वीक्रियते, तथापि समानतन्त्रन्यायेन योगजधर्मजन्यमलौकिकप्रत्यक्षं नैयायिकानां सम्मतमेव बोध्यम् ।

अतएव जयन्तभट्टेन न्यायमंजर्यां भट्टमतखण्डनपूर्वकं योगजसन्निकर्षबलेनालौकिकमिन्द्रियप्रत्यक्षं योगजमानसप्रत्यक्षं वा महताऽऽयासेन प्रतिष्ठापितम् । तथा चोक्तं—'अस्मदादिरपेक्षितालोकोऽवलोकयति निकटस्थितमर्थवृन्दम्, उन्दुरवैरिणस्तु (विडालाः) सान्द्रतमतमःपंकपटलविलिप्तदेशपतितमपि

5 Pra. bhā. p. 627-28 (V. S. V.)

6 Nyā. kan. p. 628 (V.S.V.)

7 Pra. bhā. p. 464-65

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



संपश्यन्ति······सोऽयं दर्शनातिशयः शुक्लादिगुणातिशय इव तारतम्यसमन्वित इति गमयति परमपि निरतिशयमतिशयम्। अतश्च यत्रास्य परः प्रकर्षस्ते योगिनो गीयन्ते, दर्शनस्य च परोऽतिशयः सूक्ष्मव्यवहितविप्रकृष्टभूतभविष्यादिविषयत्वम्। ननु स्वस्वविषयानतिक्रमेण भवतु तदतिशयकल्पना, धर्मस्तु चक्षुषो न विषय एव, यदुक्तं—

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलंघनात्।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता ॥*

एतदयुक्तम्, यतो यद्यपि नास्मदादिनयनविषयो धर्मस्तथापि योगीन्द्रियगम्यो भविष्यति। तथाहि—योजनशतव्यवहितमन्धकारान्तरितं वा नास्मदादिलोचनगोचरतामुपयाति, सम्पातिवृषदंशदृशोस्तु विषयो भवत्येव।'

'नन्वेवमविषये प्रवृत्तं योगिनां चक्षुर्गन्धादीनपि गृह्णीयात्······नैतदेवम्, रसादिग्राहीण्यपि योगिनामिन्द्रियाणि चक्षुर्वदतिशयवन्त्येवेति न रसादिषु चक्षुर्व्यापारः परिकल्प्यते। धर्मेऽपि न तर्हि कल्पनीय इति चेन्न तस्य रसादिवत् तदविषयता (चक्षुरविषयता), शब्दस्याभावात्। अपि च योगीन्द्रियाविषयत्वं धर्मस्य कथमवगतवान् भवान्? अविषयत्वं तद्भावेऽपि तदनवगमादवगम्यते, यथा नयनसद्भावेऽपि शब्दाश्रवणात् तदविषयता शब्दस्यावसीयते। न चैवं योगिचक्षुषि सत्यपि धर्मस्याग्रहणमवगन्तुं शक्नोति भवान् उभयस्यापि भवतः परोक्षत्वादिति विषयः स तस्य नेति नैव वक्तुं युक्तमिति।'[8]

यदि वा धर्मे चाक्षुषादिबाह्येन्द्रियविषयत्वं योगजधर्मजन्यमपि न स्यात्, तथापि मनःकरणकं योगजप्रत्यक्षमव्याहतमेवेति पूर्वपक्षपूर्वकमवधारितं जयन्तभट्टेन तत्रैव—

'ननु कर्तव्यतारूपस्त्रिकालस्पर्शरहितः।
चक्षुर्विषयतामेति धर्म इत्यतिसाहसम् ॥

सत्यं साहसमेतत् ते मम वा चर्मचक्षुषः।
न त्वेष दुर्गमः पन्था योगिनां सर्वदर्शिनाम् ॥

---

* Ślo. vār, 2. 114

8 Nyā. mañ. I. p. 95-96 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



(अथवा) यदि हि बाह्येन्द्रियेष्वमर्षो न तेष्वतिशयो विषह्यते तदलमनुवन्धेन—

मनःकरणकं ज्ञानं भावनाभ्याससम्भवम् ।
भवति ध्यायतां धर्मे कान्तादाविव कामिनाम् ।।

मनो हि सर्वविषयं न तस्याविषयं कश्चिदस्ति, अभ्यासवशाच्चातीन्द्रियेष्वप्यर्थेषु परिस्फुटाः प्रतिभासाः प्रादुर्भवन्तो दृश्यन्ते ।'[9]

पुनश्च जयन्तभट्टो योगाभ्यासजन्यं मनसि योगिनामपूर्वमतिशयमंगीकरोति स्थूनानिखननन्यायेन पूर्वपक्षोत्थापनपूर्वकम्—'नन्वभ्यासोऽपि क्रियमाणो नात्यन्तमपूर्वमतिशयमावहति लंघनाभ्यासवत्, योऽपि हि प्रतिदिनमनन्यकर्मा लंघनमभ्यस्यति सोऽपि कतिपयपदपरिमितमवनितलमभिलंघयति न तु पर्वतमम्बुधिं वेति । उच्यते—

लंघनं देहधर्मत्वात् कफजाड्यादिसम्भवात् ।
मा गात् प्रकर्षं ज्ञाने तु तस्य कः प्रतिबन्धकः ।।

लंघनादौ तु पूर्वेद्युः प्रयत्नसमुपार्जितः ।
न देहेऽतिशयः कश्चिदन्येद्युरवतिष्ठते ।।

तत्र केवलमभ्यासात् प्रक्षये कफमेदसोः ।
शरीरलाघवं लब्ध्वा लंघयति यथोचितम् ।।

इह विज्ञानजन्यस्तु संस्कारोऽवतिष्ठते ।
क्रमोपचीयमानोऽसौ परातिशयकारणम् ।।

यथानुवाकग्रहणे संस्थाऽभ्यसनकल्पितः ।
स्थिरः करोति संस्कारः पाठस्मृत्यादिपाटवम् ।।

यथा वा पुटपाकेन शोध्यमानं शनैः शनैः ।
हेमनिष्प्रतिकाशं तद् याति कल्याणतां पराम् ।।

तथैव भावनाभ्यासाद् योगिनामपि मानसम् ।
ज्ञाने सकलविज्ञेयसाक्षात्कारे क्षमं भवेत् ।।

---

9 Ibid. I. p. 96-97 (chow.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



…तदेवं क्षीणदोषाणां ध्यानावस्थितचेतसाम् ।
निर्मलं सर्वविषयं ज्ञानं भवति योगिनाम् ।।'[10]

एवं योगाभ्यासजन्यं मनस्यपूर्वमतिशयं तद्बलेन चालौकिकं प्रत्यक्षं स्वीकृत्य मीमांसकमतं खण्डयति जयन्तभट्टः । उपसंहरति च—'अस्ति विशेषः, ईश्वरस्य तथाविधं नित्यमेव ज्ञानं योगिनां तु योगभावनाभ्यासप्रभवमिति ।'[11]

पातंजलेऽपि योगजमलौकिकप्रत्यक्षं विशेषत एव स्वीकृतं निरूपितं च भूयशो बहुत्र। तथाहि पातंजले—'तज्जयात् प्रज्ञालोकः'[12], 'परिणामत्रयसंयमादतीतानागतज्ञानम्' 'प्रत्ययस्य परचित्तज्ञानम्'[13] इत्यादिषु बहूषु सूत्रेषु धारणाध्यानसमाधिरूपाद् योगादलौकिकज्ञानमभिहितं विस्तारेण । पातंजले 'प्रातिभाद्वा सर्व'मितिसूत्रे[13a] यत् प्रातिभज्ञानमुक्तं तत् प्रशस्तपादोक्तप्रातिभज्ञानमिवालौकिकमेव योगिऋषीणां प्रत्यक्षमुक्तम् । तथैवोक्तं भाष्ये व्यासदेवेन—'प्रातिभं नाम तारकम्, तद्विवेकजस्य ज्ञानस्य पूर्वरूपम्, यथोदये प्रभा भास्करस्य, तेन वा सर्वमेव जानाति योगी प्रातिभस्य ज्ञानस्योत्पत्ताविति ।'[14] उक्तं च योगवार्तिके विज्ञानभिक्षुणा—'प्रातिभं स्वप्रतिभोत्थमनौपदेशिकं ज्ञानं संसारतारणोपायत्वात् तारकमिति ।'[15] सूत्रान्तरेऽपि 'ततः प्रातिभ-श्रावणवेदनादर्शास्वादवार्ता जायन्ते'[16] इत्यत्र प्रातिभपदेनालौकिकमेव योगिप्रत्यक्षमभिहितम् । तथैवोक्तं भाष्ये—'प्रातिभात् सूक्ष्मव्यवहितविप्रकृष्टातीतानागतज्ञानं श्रावणाद् दिव्यशब्दश्रवण'[17] मित्यादि । उक्तं च—'ते प्रातिभादयः समाहितचितस्योत्पद्यमाना उपसर्गः तद्दर्शनप्रत्यनीकत्वात्, व्युत्थितचितस्योत्पद्यमानाः सिद्धयः'[18] इति ।

सांख्यदर्शने यद्यपि नालौकिकप्रत्यक्षस्य विशेषतो निरूपणं दृश्यते, तथापि समानतन्त्रन्यायेन योगशास्त्रसम्मतं सर्वमलौकिकप्रत्यक्षमभ्युपगतमेव । 'योगि-

10 Ibid. I. p. 97-98 (chow.)
11 Ibid. I. p. 99 (chow.)
12 Pāt. yo. sū. 3.5
13 Ibid. 3. 13 ; 3.19
13a Ibid. 3.33
14 Yo. sū. bhā. 3.33
15 Yo. vār. 3. 33
16 Pāt. yo. sū. 3.36
17 Yo. sū. bhā. 3.36
18 Ibid. 3.37

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



नामबाह्यप्रत्यक्षत्वान्न दोषः', 'लीनवस्तुलब्धातिशयसम्बन्धाद्वाऽदोषः'[19] इत्यादि-सूत्रेषु तदेव सूचितम्। उक्तं च स्पष्टतः प्रवचनभाष्ये विज्ञानभिक्षुणा—'ननु योगिनामतीनागतव्यवहितवस्तुप्रत्यक्षेऽव्याप्तिः, सम्बद्धवस्त्वाकाराभावादित्या-शंक्य तस्यालक्ष्यत्वेन समाधत्ते। ऐन्द्रियकप्रत्यक्षमेवात्र लक्ष्यम्। योगिन-श्चाबाह्यप्रत्यक्षकाः, अतो……न तत्प्रत्यक्षेऽव्याप्तिरित्यर्थः।'

'वास्तवं समाधानमाह—लीनेत्यादि। अथवा, तदपि लक्ष्यमेव। तथापि न दोषो—नाव्याप्तिः। यतो लीनवस्तुषु लब्धयोगजन्यातिशयस्य योगिचित्तस्य सम्बन्धो घटत इत्यर्थः। अतो लीनशब्दः पराभिप्रेतासन्निकृष्ट-वाची। सत्कार्यवादिनां ह्यतीतादिकमपि स्वरूपतोऽस्तीति तत्सम्बन्धः सम्भवे-दिति व्यवहितविप्रकृष्टेषु सम्बन्धहेतुविधया लब्धातिशयेति विशेषणम्। अतिशयश्च व्यापकत्वम्, वृत्तिप्रतिबन्धकतमोनिवृत्तिश्चेति।'

'इदं चात्रावधेयम्। यत् सम्बद्धं सदित्यादिपूर्वसूत्रे बुद्धेरर्थसन्निकर्षस्यैव प्रत्यक्षहेतुतालाभात् प्रत्यक्षसामान्ये बाह्यार्थसाधारणे बुद्ध्यर्थसन्निकर्ष एव कारणम्। इन्द्रियसन्निकर्षास्तु चाक्षुषादिप्रत्यक्षेषु विशिष्यैव कारणानि। तमःप्रतिबन्धेन बुद्धिसत्त्वस्य वृत्त्यसम्भवात्। तच्च तमः कदाचिदर्थेन्द्रिययोः सन्निकर्षेण कदाचिच्च योगजधर्मेणापसार्यते'[20] इति।

जैनमते अलौकिकप्रत्यक्षमिन्द्रियाद्यजन्यमतिप्रसिद्धमेव। तन्मते हीन्द्रिय-जन्यानां प्रत्यक्षाणां विशिष्टवैशद्याभावात् सांव्यवहारिकं प्रत्यक्षत्वमभिप्रेतम्। 'प्रत्यक्षमन्य'दिति तत्त्वार्थसूत्रस्य वृत्तौ भास्करनन्दिनोक्तं—'अक्ष्णोति व्याप्नोति जानातीत्यक्ष आत्मा। तमेवात्मानं प्रत्याश्रितं सम्यग्ज्ञानमिन्द्रियानिन्द्रियाद्यन-पेक्षं प्रत्यक्षमिति व्यपदिश्यते। अन्यदवधि-मनःपर्यय-केवलज्ञानत्रितयमित्यर्थः। मतिश्रुताभ्यामवशिष्टमवध्यादिसंवेदनत्रियं वैशद्यप्रकर्षयोगान् मुख्यं प्रत्यक्षमिति संलभ्यते।'[21] अत्र तु अनिन्द्रियस्य मनसोऽप्यपेक्षा निराकृता जैनैरलौकिक-प्रत्यक्षे आत्माश्रिते। एषां योगिप्रत्यक्षानां दूरदर्शनादिरूपाणां परमनोगत-विज्ञानरूपाणां प्रकृष्टतत्त्वज्ञानरूपाणां चावधि-मनःपर्यय-केवलज्ञानानामेव मुख्यं

19 Sā. sū. 1.90,91
20 Sā. sū. bhā. 1.90,91
21 Tat. vṛ. 1.12

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रत्यक्षत्वं प्रकृष्टवैशद्यादिति । तेष्वपि मनःपर्यय-केवलज्ञानानां न कदापि मिथ्यात्वं भवति । 'मतिश्रुतावधयो विपर्ययश्च'[22] इति सूत्रात् ।

बौद्धमतेऽपि इन्द्रियज्ञान-मनोविज्ञान-स्वसंवेदन-योगिज्ञानरूपभेदचतुष्टय-विशिष्टेषु प्रत्यक्षेषु योगिप्रत्यक्षं प्रसिद्धमेव । उक्तं हि धर्मकीर्तिना न्याय-बिन्दौ—'भूतार्थभावनाप्रकर्षपर्यन्तजं चेति'[23] सूत्रेण योगिज्ञानस्य लक्षणोल्लेख-पूर्वकं प्रत्यक्षस्य चातुर्विध्यम् । व्याख्यातं च तत् धर्मोत्तरेण—'भूतः सद्भूतोऽर्थः । प्रमाणेन दृष्टश्च सद्भूतः । यथा चत्वार्यार्यसत्यानि । भूतार्थस्य भावना पुनः पुनश्चेतसि विनिवेशनम् । भावनायाः प्रकर्षो भाव्यमानार्था-भासस्य ज्ञानस्य स्फुटाभत्वारम्भः । प्रकर्षस्य पर्यन्तो यदा स्फुटाभत्वमीषद-सम्पूर्णं भवति । यावद्धि स्फुटाभत्वमपरिपूर्णं तावत् तस्य प्रकर्षगतिः । सम्पूर्णं तु यदा तदा नास्ति प्रकर्षगतिः । ततः सम्पूर्णावस्थायाः प्राक्तन्यवस्था स्फुटाभत्वप्रकर्षपर्यन्त उच्यते । तस्मात् पर्यन्ताद् यज्जातं भाव्यमानस्य सन्निहितस्येव स्फुटतराकारग्राहि ज्ञानं (तद्) योगिनः प्रत्यक्षम् । तदिह स्फुटाभत्वारम्भावस्था भावनाप्रकर्षः । अभ्रकव्यवहितमिव यदा भाव्यमानं वस्तु पश्यति सा प्रकर्षपर्यन्तावस्था । करतलामलकवद् भाव्यमानस्यार्थस्य यद्दर्शनं तद्योगिनः प्रत्यक्षम् । तद्धि स्फुटाभम् । स्फुटाभत्वादेव च निर्विकल्पम् । विकल्पविज्ञानं हि संकेतकालदृष्टत्वेन वस्तु गृह्णच्छब्दसंसर्गयोग्यं गृह्णीयात् । ......तदसद्रूपं वस्तुनो गृह्णदसन्निहितार्थग्राहित्वादस्फुटाभम् । अस्फुटा-भत्वादेव च सविकल्पम् । ततः स्फुटाभत्वान्निर्विकल्पम् ।'[24]

अतीतानागतादिविषयकयोगजप्रत्यक्षे मीमांसकानामसम्मतिः पूर्वमेवोक्ता, तत्र यदनुक्तं तदुच्यते । उक्तं हि सुचरित-मिश्रेण श्लोकवार्तिकटीकायां—'अपि च भावनाबलजमप्रमाणं गृहीतग्रहणात् । यावदेव हि गृहीतं तावदेव भावनया विषयीक्रियते । मात्रयाऽपि त्वधिकं भावनया न गोचरयति । योगाभ्यासाहित-संस्कार-पाटवनिमित्ता हि स्मृतिरेव भावनेत्यभिधीयते । सा च न प्रमाणमिति स्थितमेव । न चोत्तरकालं साक्षात्कारिज्ञानमुदेतीति प्रमाणमस्ति । इन्द्रिय-सन्निकर्षमन्तरेणार्थसाक्षात्कारस्य क्वचिदप्यदर्शनात् । भवति चात्र प्रयोगः—

22 Tat. sū. 1.31

23 Nyā. bin. p. 20 (chow.)

24 Nyā. bin. ṭikā. p. 20 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



योगिनां धर्माधर्मयोरपरोक्षावभासि ज्ञानं नास्ति, इन्द्रियसन्निकर्षाभावात्, अस्मदादिवदिति ।'[25] उक्तं च कुमारिलभट्टैः—

'तेषामवर्तमानेऽर्थे या नामोत्पद्यते मतिः ।
प्रत्यक्षं सा ततस्त्वेव नाभिलाषस्मृतादिवत् ।।'[26]

प्राभाकरमतेनाप्युक्तं शालिकनाथेन—'यच्च योगिज्ञानं प्रत्यक्षं मतम्, तदप्यसत् प्रमाणविशेषो हि प्रत्यक्षम् । न च भूतार्थभावनाप्रकर्षपर्यन्तजस्य योगिज्ञानस्य प्रमाणतैव सम्भवति, स्मृतिरूपत्वात् । प्रमाणेन हि भूतमर्थं परिच्छिद्य या भावना सा स्मृतिविशेष एवेति न प्रमाणम्, न वा प्रत्यक्षमिति ।'[27]

अतः कर्मकाण्डिनां मीमांसकानां मते योगाभ्यासबलेनापि नालौकिकप्रत्यक्षं किंचिदपि सम्भवति । यदपि भवति योगिनां ज्ञानं तदिन्द्रियसन्निकर्षाभावान्न प्रत्यक्षम्, गृहीतग्राहित्वाद्वा निश्चयाभावाद्वा नापि प्रमाणम् । तेषां धर्मानुग्रहवशेनानागतादिविषया या मतिर्जायते सा तु प्रतिभारूपत्वान्नार्थनिश्चयाय प्रभवति । इन्द्रियलिंगाद्यजन्यं प्रतिभाज्ञानमग्रे निरूपयिष्यते ।

उपनिषद्ब्रह्मसूत्रादिपराणां शंकरादीनामलौकिकप्रत्यक्षं योगाभ्यासजन्यं कारणान्तरजन्यं वाऽङ्गीकृतमेव । तथा चोक्तं शंकराचार्येण—'भवति ह्यस्माकमप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षम् । तथा च व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरन्तीति स्मर्यते ।...योगोऽप्यणिमाद्यैश्वर्यप्राप्तिफलः स्मर्यमाणो न शक्यते साहसमात्रेन प्रत्याख्यातुम् ।'[27a]

रामानुजीयानामपि मते अर्वाचीनस्य जीवप्रत्यक्षस्य द्वैविध्यमुक्तमिन्द्रियसापेक्षत्वतदनपेक्षत्वकृतम् । इन्द्रियानपेक्षमलौकिकप्रत्यक्षमपि द्विविधम्, स्वयसिद्धं दिव्यं चेति । तत्र स्वयंसिद्धमिन्द्रियानपेक्षं योगजन्यम् । दिव्यं भगवत्प्रसादजन्यम् ।[28] एवं तन्मते इन्द्रियसन्निकर्षाभावेऽपि योगाभ्यासजन्यं भगवत्प्रसादजन्यं च साक्षात्कारिप्रमारूपमलौकिकप्रत्यक्षं जायते एव ।

---

25 Ślo. Vār. ṭikā. 4.29
26 Ślo. vār. 4.30
27 Pra. pañ. p. 144 (B.H.U.)
27a Br. sū. Śā. bhā. 1.3.33
28 Jat. mat. dīp. p. 6 (Ananda Asram)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तार्किकमतं पूर्वमेवोक्तम् । नव्यास्तु नैयायिकाः योगजसन्निकर्षबलेनैव अतीतानागतसूक्ष्मव्यवहितविप्रकृष्टार्थानां चाक्षुषादि मानसं वा प्रत्यक्षमलौकिकं स्वीकुर्वन्तस्तदतिरेकेणापि सामान्यलक्षण-ज्ञानलक्षणजन्यं द्विविधमलौकिक-प्रत्यक्षं सयुक्तिकं समर्थयन्ति । तत्र सामान्यलक्षणसन्निकर्षजन्यमलौकिकप्रत्यक्षं तत्रैव भवति यत्र धूमव्यक्तेश्चाक्षुषानन्तरं धूमत्वाश्रयसकलधूमानां ज्ञानं जायते, यत एवं संशयो दृश्यते—सर्वे धूमा वह्निव्याप्या न वेति । धूमत्व-(ज्ञान-)रूपसन्निकर्षेण धूमत्वाश्रयाणां सकलधूमानां तादृशालौकिक-प्रत्यक्षानभ्युपगमे तादृशः सकलधूमधर्मिकः संशय एव नोपपद्येत । अपि च यत्र चन्दनस्य चक्षुःसन्निकर्षानन्तरमेव 'सुरभि चन्दनम्' इत्याद्याकारं ज्ञानं जायते तत्र सौरभेन घ्राणेन्द्रियसन्निकर्षाभावात्, चक्षुषा च सौरभस्य लौकिक-सन्निकर्षायोगात् चन्दने सौरभस्मरणात्मकज्ञानस्य पूर्वप्रत्यक्षजन्यस्य तत्र सन्निकर्षरूपत्वात् सौरभस्य चाक्षुषमेवालौकिकं तत्र जायते । इदमेव ज्ञान-लक्षणसन्निकर्षजन्यमलौकिकप्रत्यक्षमुपनीतभानं वाचक्षते ।

किं च, चक्षुषा 'घटो नास्ति' इत्यादिप्रत्यक्षे प्रतियोगिनो घटस्योपस्थिति-रपि ज्ञानलक्षणसन्निकर्षजन्यं बोध्यम् । किं च, प्रत्यभिज्ञायां तत्तां-शोपस्थितिः भ्रमस्थले रजतत्वादेरुपस्थितिरपि उपनीतभानमेव । तदुक्तं हरिरामेण ज्ञानलक्षणाविचाररहस्ये—'तत्र लौकिकसन्निकर्षं विनापि सोऽयमित्यादिप्रत्यभिज्ञायां स्मरणाद्युपनीततत्तायाः, घटो नास्तीत्याद्यभाव-प्रत्यक्षादौ प्रतियोग्यादीनां, तदिन्द्रिययोग्यतां विनापि सुरभि चन्दनमित्याकारक-चाक्षुषादौ सौरभादीनां, घटमहं जानामीत्याकारकमानसादौ घटादीनां भानाज् ज्ञानस्य सन्निकर्षमुद्रया प्रत्यक्षहेतुता कल्प्यते । तज्जन्यप्रत्यक्षमेवोपनीत-भानमित्युच्यते ।'[29] अलौकिकप्रत्यक्षस्य त्रैविध्यमुक्तं विश्वनाथेनापि—

'अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥

आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥

29 Jñāna. lak. vic. p. 5-11 (Calcutta Sanskrit College Research S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षण: ।।
योगजो द्विविध: प्रोक्तो युक्तयुंजानभेदत: ।
युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपर: ।।'[30]

अत्रालौकिकपदं लौकिकभिन्नपरम् । सामान्यलक्षणादीनां संयोगादि-लौकिकसन्निकर्षभिन्नत्वादलौकिकत्वं बोध्यम् ।

प्राचीनन्यायमते तु सुरभिचन्दनमित्यादिस्थलेषु मानसप्रत्यक्षमेव । तथोक्तं जयन्तेन—'शब्दाद्युपायान्तरविरतौ च जायमानमनवद्यं ज्ञानं मानसं प्रत्यक्षं भवति—सुरभि केतककुसुमं, मधुरा शर्करेति ज्ञानवदित्यप्युक्तम् ।'[31]

सिद्धदर्शनरूपमप्यलौकिकं भिन्नं प्रमाज्ञानं केचिदिच्छन्ति । तन्मतं निराकृत्य तस्य प्रत्यक्षे अनुमाने वाऽन्तर्भाव उक्त: प्रशस्तपादेन—'सिद्धदर्शनं न ज्ञानान्तरम् । कस्मात् ? प्रयत्नपूर्वकमंजनपादलेप-खड्गगुलिकासिद्धानां दृश्य-द्रष्टॄणां सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु यद्दर्शनं तत् प्रत्यक्षमेव । अथ दिव्यान्तरिक्षभौमानां प्राणिनां ग्रहनक्षत्रसंचारादिनिमित्तं धर्माधर्मविपाकदर्शन-मिष्टं तदप्यनुमानमेव । ( ग्रहसंचारादीनामेव तत्र लिंगत्वात् ) । अथ लिंगानपेक्षं धर्मादिषु दर्शनमिष्टं तदपि प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूत-मिति ।'[32]

---

30 Bhā. pari. p. 272-82 (N. S.)
31 Nyā. mañ. I. p. 98 (chow.)
32 Pra. bhā, p. 629 (V. S. V.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



## साक्षिप्रत्यक्षम्

इदं तु प्रत्यक्षमद्वैतवेदान्तिनामेव विशेषतः सम्मतम् । वैष्णववेदान्तिनां सांख्यपातंजलानामपि अनुमतम् । 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशिति'[1]—इत्यादिश्रुतिरेव भोक्त्रतिरिक्तसाक्षिसद्भावे प्रमाणम् । भोक्तुः विकारवत्त्वात् स्वस्य स्वविकाराणां सुखदुःखादीनां ज्ञातृत्वायोगात् तज्ज्ञानार्थमपि अविकारि साक्षिचैतन्यं साक्षिप्रत्यक्षं चोपपद्यते । उक्तं च विद्यारण्येन पंचदश्याम्—

'अन्तःकरण-तत्वृत्तिसाक्षीत्यादावनेकधा ।
कुटस्थ एव सर्वत्र पूर्वाचार्यैर्विनिश्चितः ॥' इति ।
'वृत्तेस्साक्षितया वृत्तिप्रागभावस्य च स्थितः ।
बुभुत्सायास्तथाऽज्ञोऽस्मीत्याभाताज्ञानवस्तुनः ॥'[2]

इति च पंचदश्यामुद्धृतं शैवपुराणवचनम् ।

देहेन्द्रियादियुक्तस्य जीवाभासभ्रमस्य च ।
अधिष्ठानचितिः सैषा कूटस्थोऽत्र विवक्षिता ॥'[3]

इत्यत्रापि कूटस्थपदेन साक्षी अभिहितः । तथा साक्षिस्वरूपमुक्तं गंगाधरेन्द्रेण वेदान्तसूक्तिमञ्जर्याम्—

...'स्वाध्वस्तदेहयुग्मादेः साक्षीति प्रतिपादितः ॥
...नेशो जीवोऽप्यसौ तत्त्वदीपे ब्रह्मेति वर्णनात् ॥'[4]

तथा ह्यद्वैतमते घटादीनां बाह्यवस्तूनां प्रमातृजीवप्रत्यक्षविषयत्वेऽपि स्वान्तःकरणतद्धर्मज्ञानसुखादीनां साक्षात्साक्षिचैतन्यविषयत्वमेव न तु प्रमातृ-प्रत्यक्ष-

---

1 Muṇḍ. up. 3.1.1
2 Pañcadśi. 8.25 ; 8.55
3 Ibid. 8.43
4 Vedā. sū. mañ. 1.91-92.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



विषयत्वम् । तादृशसाक्षिज्ञानस्यापरोक्षत्वात् साक्षिप्रत्यक्षमित्यपि व्यपदेशो भवति । तथा स्वाज्ञान-तत्कार्यशुक्तिरजतादीनामपि साक्षिप्रत्यक्षविषयत्वमेव । तदुक्तं गंगाधरेन्द्रेण वेदान्तसिद्धान्तसूक्तिमञ्जर्याम्—

'अविद्याबुद्धितद्धर्मभासकांशेतरावृतिः ।
कल्प्यते वस्तुतस्तेषु संशयादेरदर्शनात् ॥'[5]

यद्यपि संसार-विषयस्पृहाद्युपपत्तये साक्षिण्यपि अविद्यावृतिः कल्प्यते, तथापि अज्ञान-ज्ञान-सुखादिसत्त्वे तेषु संशयविपर्ययादर्शनात् तत्भासकांशेतरांशे एव साक्षिणि आवृतिः कल्प्यते । अतः पूर्णानन्दस्वरूपांश एव साक्षिणः कथंचिद्-विद्ययाऽऽवृतः, न तु ज्ञानाज्ञानादिभासकः चिदंशः । तदुक्तं महादेवसरस्वत्या—'अनावृतसंवित् साक्षिचैतन्यम् । अन्तःकरणोपहितचैतन्यं साक्षी । तस्यावृतत्वे जगदान्ध्यप्रसंगः ।'[6]

ननु साक्षिणोऽनावृतत्वे तस्य आनन्दस्वरूपताऽपि भासेत इति चेन्न, तस्या भासनेऽपि न पूर्णरूपेण भासनमपि तु परिच्छिन्नरूपेणेति तदुक्तं तेनैव—

'स्याच्चेदनावृतः साक्षी भासेतस्य सुखात्मता ।
प्रेमास्पदत्वाद् भात्येव परिच्छेदादतृप्तता ॥

...सुखांशोऽस्यावृतो नास्ति न भातीत्यनुभूतितः ।
चिदंशो नावृतो वृत्या सौख्यव्यक्तिरितीतरे ॥[6a]

पातंजलेऽपि—'सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्'[7] इति सूत्रे पुरुषस्य चित्तवृत्तिसाक्षित्वमुक्तम् । चित्ततद्वृत्तीनां सदाज्ञातत्वात् प्रमाणजन्यज्ञानात् कादाचित्काद् विलक्षणमेव साक्षिणः सदातनं साक्षाज्ज्ञानमिति बोध्यम् ।

सांख्यदर्शनेऽपि 'साक्षात्सम्बन्धात् साक्षित्व'मिति सूत्रे[8] पुरुषस्य यत् साक्षित्वं तत् साक्षात् सम्बन्धादेव न तु परिणामादित्युक्तम् । उक्तं च तत्र

---

5 Ibid. 1.96
6 Tattvānu. 2. 30
6a Ved. sū. mañ. 1.97,99
7 Pāt. yo. sū. 4.18
8 Sām. sū. 1.161



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



विज्ञानभिक्षुणा—'पुरुषे च साक्षात्सम्बन्धः स्वबुद्धिवृत्तेरेव भवति अतो बुद्धेरेव साक्षी पुरुषोऽन्येषां तु द्रष्टृमात्रमिति शास्त्रीयो विभागः ।'[8a]

एवं सांख्यपातंजलयोरपि साक्षिणः पुरुषस्यापरिणामित्वेऽपि साक्षाज् ज्ञानम-परोक्षरूपं स्वीकृतम् ।

साक्षाद् बुद्धिवृत्तिग्रहणस्याविशेषेऽपि अद्वैतमतसिद्धसाक्षिप्रत्यक्षस्यास्ति विशेषः । बुद्धितद्वृत्तिवदज्ञान-तत्कार्यशुक्तिरजतादिप्रातिभासिकानां दिक्का-लाकाशादीनां चाद्वैतमते साक्षिप्रत्यक्षविषयत्वात् ।

अपि च सर्वमेव वस्तु ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य विषय इत्यद्वैतिनां राद्धान्तः । यथा वृत्तिरूपज्ञानस्य साक्षात् साक्षिविषयत्वात् वृत्त्यारूढस्य घटादेरपि साक्षिचैतन्यविषयत्वमेवमज्ञानविषयस्यापि घटादेः घटं न जानामीत्यादिरूपेण साक्षिचैतन्यविषयत्वम् । वृत्तिज्ञानस्थले 'ज्ञातो घट' इति ज्ञाततया विषयः, तदभावे 'अज्ञातो घट' इत्यत्राज्ञाततयेति विशेषः । वृत्तिज्ञानवदज्ञानस्यापि साक्षिवेद्यत्वं 'अहं न जानामि' 'अहमज्ञ' इत्याद्यनुभव-सिद्धम् । तदुक्तं विद्यारण्येन पंचदश्याम्—

'खादित्ये दीपिते कुड्ये दर्पणादित्यदीप्तिवत् ।
कूटस्थभासितो देहो धीस्थजीवेन भास्यते ।।

......घटैकाकारधीस्था चिद् घटमेवावभासयेत् ।...
घटस्य ज्ञातता ब्रह्मचैतन्येनावभासते ।।

अज्ञातत्वेन ज्ञातोऽयं घटो बुद्ध्युदयात् पुरा ।
ब्रह्मणैवोपरिष्टात् तु ज्ञातत्वेनेत्यसौ भिदा ।।

अज्ञातो ब्रह्मणा भास्यो ज्ञातः कुम्भस्तथा न किम् ।
ज्ञातत्वजननेनैव चिदाभासपरिक्षयः ।।'[9]

उक्तं च तेनैव विवरणप्रमेयसंग्रहे—'आश्रयविषयाज्ञानानि त्रीण्यप्येकेनैव साक्षिणा अवभास्यन्ते ।..... तस्मात् सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षि-चैतन्यस्य विषय एव ।......यद्वदज्ञानमज्ञातत्वधर्मं स्वविषये सम्पाद्य तस्य

---

8a Sā. sū. bhā. 1.161

9 Pañcadaśi. 8.1,4,5,7

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



साक्षिणा सम्बन्धं घटयति तद्वत् प्रमाणमपि ज्ञातत्वं धर्मं स्वविषये सम्पाद्य तस्य साक्षिणा सम्बन्धघटकम्...... ।'[10]

उक्तं हि साक्षिलक्षणं साक्षिनानात्वं च धर्मराजाध्वरीन्द्रेण—'तत्र जीवो नामान्तःकरणावच्छिन्नं चैतन्यम् । तत्साक्षि तु अन्तःकरणोपहितं चैतन्यम् । अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः । विशेषणं च कार्यान्वयि व्यावर्तकम् । उपाधिश्च कार्यानन्वयी व्यावर्तको वर्तमानश्च ।......अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते । प्रकृते चान्तःकरणस्य विषयमासकत्वायोगेन विषयभासकचैतन्योपाधित्वम् । अयं च जीवसाक्षी प्रत्यात्मं नाना । एकत्वे मैत्रावगते चैत्रस्याप्यनुसन्धानप्रसंगः ।'[11]

माध्वमते गोडीयवैष्णवमते च स्वस्वप्रक्रियानुसारेण वेदान्तसिद्धं साक्षिप्रत्यक्षं स्वीकृतमस्तीत्यनुसन्धेयम् ।

---

10 Viv. pra. saṃ. p. 55, 57 (Acyutagranthamālā)

11 Vedā. pari. p. 46-48 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( १३ )

## दिक्कालाकाशाभावजातीनां प्रत्यक्षनिरूपणम् ।

प्रत्यक्षस्वरूपं तस्य प्रकारभेदाश्च विस्तारेण निरूपिताः । अपरोक्षानुभवविशेषरूपं साक्षिप्रत्यक्षं निरूपितम् । इदानीं केषाञ्चित् पदार्थानां सन्दिग्धप्रत्यक्षविषयत्वानां मतभेदेन प्रत्यक्षविषयानां प्रत्यक्षप्रकारो निरूप्यते । तथा हि दिक्कालौ केषाञ्चित् मतेषु प्रत्यक्षगम्यौ, अपरेषामनुमानगम्यौ, केषाञ्चिदभावोऽनुपलब्धिप्रमाणगम्यः, अपरेषामिन्द्रियगम्य एव प्रत्यक्षविषयः । एवं विवादास्पदप्रत्यक्षविषयत्वानां पदार्थानां प्रत्यक्षमत्र निरूप्यते ।

यद्यपि बहूनां दार्शनिकानां मतेषु कालस्यानुमितिसिद्धत्वमेव नीरूपद्रव्यस्येन्द्रियविषयत्वायोगात्, तथापि भट्टमीमांसकमते कालस्य प्रत्यक्षविषयत्वमेव । 'न सोऽस्ति प्रत्ययो लोके कालो यत्र न भासते'[1] इति कालस्य सर्वप्रत्ययग्राह्यत्वप्रतिपादकः मीमांसकश्लोकः गौडब्रह्मानन्देन काश्मीरकसदानन्देन चोद्धृतो दृश्यते । उक्तं हि ब्रह्मानन्देन मीमांसाचन्द्रिकायाम्—'क्षणस्यातीन्द्रियत्वेऽपि ज्ञानसामान्यसामग्रीबलाज्ज्ञानमात्रविषयत्वे बाधकाभावात् । तदुक्तम्--न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते इति ।'[2]

भाट्टानां मते हि 'इदानीं घटः' 'तदानीं घटः' इत्यादि प्रत्यक्षंप्रतीतिबलेन विषयविशेषणतया कालस्यापि चाक्षुषप्रत्यक्षं सिध्यति । तदुक्तं मानमेयोदये भट्टनारायणेन--

'व्योमकालदिशामादौ प्रत्यक्षत्वं समर्थ्यते ।
अनिष्टं भट्टपादोक्तिमाधुर्यानभिलाषिणाम् ।।

दिक्कालाकाशाः प्रत्यक्षाः अमनस्के सति विभुत्वात्, आत्मवत् । अपि च दिक्कालाकाशा यदि न प्रत्यक्षाः, तर्हि तेषां स्वरूपमेव हीयेत, प्रत्यक्षव्यतिरेकेण

1 Quoted in Mīmāṃsācandrikā Laghucandrika, and Advaita Brahmasiddhi.

2 Mīmāṃsācandrikā—1.1.5

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तेषु प्रमाणाभावात् ।······युगपदादिप्रत्ययानामक्षजन्यत्वकालविषयत्वयोः स्थितत्वात् । अत प्रातःकालोऽयमित्यादिप्रत्ययानां·· सूर्योदयादिदर्शनानुगृहीतनयनजन्यत्वात् कालस्य प्रत्यक्षत्वं सिद्धम् । स च कालः षडिन्द्रियग्राह्य इति पूर्वमेवोक्तम् ।'[3] शास्त्रदीपिकायामपि विशेष उक्तः पार्थसारथिमिश्रेण—'कालो न स्वातन्त्र्येणेन्द्रियैर्गृह्यते, अथ च विषयेषु स्वेषु गृह्यमानेषु तद्विशेषणतया सर्वैरपीन्द्रियैर्गृह्यते'[4] इति । उक्तञ्च मधुसूदनसरस्वतीपादैरपि—'कालस्य च रूपादिहीनस्य मीमांसकादिभिः सर्वेन्द्रियग्राह्यत्वाभ्युपगमात्'[5] इति ।

उक्तञ्च जयन्तभट्टेन तन्मताभ्युपगमपूर्वकम्—

'प्रत्यक्षगम्यतामेव केचित् कालस्य मन्वते ।
विशेषणतया कार्यप्रत्यये प्रतिभासनात् ।।

क्रमेण युगपत् क्षिप्रं चिरात् कृतमितीदृशः ।
प्रत्यया नावकल्पन्ते कार्यमात्रावलम्बनाः ।।

न हि विषयातिशयमन्तरेण प्रतिभासातिशयोऽवकल्पते ।

अरूपो नन्वयं कालः कथं गृह्येत चक्षुषा ।
रूपमेव तवारूपं कथं गृह्येत चक्षुषा ।।

······न चानुद्घाटिताक्षस्य क्षिप्रादिप्रत्ययोदयः ।
तद्भावानुविधानेन तस्मात् कालस्तु चाक्षुषः ।।

स्वतन्त्र एव तर्हि घटादिवत् कस्मान्न गृह्यते काल इति चेत्, वस्तुस्वभाव एष न पर्यनुयोगार्हः, रूपिद्रव्यविशेषणतां गतस्य तस्य ग्रहणं न दण्डादिवत् स्वतन्त्रमपीति । अतएव प्रत्यक्षः कालः ; एवं समानन्यायत्वात् पूर्वापरादिप्रत्ययगम्या दिगपि प्रत्यक्षा वेदितव्येति ।'[6]

एवं भाट्टमते दिगाकाशावपि प्रत्यक्षगम्यौ इति बोध्यम् । उक्तं च मानमेयोदये—'किञ्च नयनोन्मीलनानन्तरमेवाबालवृद्धमध्यक्षतयाऽध्यवसीयमानस्या-

3 Mā me. p. 187, 90 (Adyar)
4 Śāstradīpikā 1.1.5
5 Advaitasiddhi, 1 (Paricchinnatva-hetu-vicāra)
6 Nyā. mañ. I. p. 124-25 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



काशस्याप्रत्यक्षत्वं वदन्तः प्राभाकरादयः करतलकलितमामलकफलमपि प्रत्यक्षानुपलभ्यमिति वदेयुरेव ।……एवं दिशोऽपि पूर्वापरादिप्रत्ययानां नेत्रमात्राधीनत्वात् दिग्विषयत्वाच्च प्रत्यक्षत्वं समर्थनीयम् ।'[7]

तार्किकानामन्येषां च प्राभाकरादीनां मतेन कालाकाशादीनां नीरूपद्रव्यत्वान्न कथञ्चिदपि वहिरिन्द्रियग्राह्यत्वं सम्भवति । अतीतादिव्यवहारासाधारणंकारणत्वेन कालस्य, शब्दरूपविशेषगुणाश्रयत्वेनाकाशस्य, प्राच्यादिव्यवहारासाधारणकारणत्वेन च दिशोऽनुमितिगम्यत्वमेव । 'कालः परापरव्यतिकरयौगपद्यचिरक्षिप्रप्रत्ययलिङ्गम्' इति वैशेषिकभाष्येणापि एतैर्लिङ्गैः कालस्यानुमेयत्वमुक्तम् । न्यायसूत्रभाष्ययोस्तु वर्तमानक्षणात्मककालस्य इन्द्रियग्राह्यत्वं समर्थितमिति भाति । यथोक्तम्—'उभयथा च वर्तमानः कालो गृह्यते, क्वचिदर्थसद्भावव्यङ्ग्यः, यथा—द्रव्ये द्रव्यमिति, क्वचित् क्रियासन्तानव्यङ्ग्यः, यथा—पचति छिनत्तीति ।'[8] अखंडविभुकालस्य तु अनुमानगम्यत्वमेव ।

पातञ्जलमते तु कालो वर्तमानक्षणात्मक एव, अतीतानागतकालयोर्बुद्धिनिर्माणमात्रत्वात् । यथोक्तं भाष्ये--'बुद्धिसमाहारो मुहूर्ताहोरात्रादयः । स खल्वयं कालो वस्तुशून्यो बुद्धिनिर्माणः शब्दज्ञातानुपाती लोकिकानां …वस्तु इवावभासते । क्षणस्तु वस्तुपतितः क्रमावलम्बी'[9] इति । उक्तं च विज्ञानभिक्षुणा तत्र योगवार्तिके—'इदानीं क्षणातिरिक्तः कालो नास्ति मुहूर्तादिरूपो महाकालपर्यन्त इति प्रसङ्गात् स्वशास्त्रसिद्धान्तमवधारयति ।'[9a] तत्रैव भाष्ये क्षणतत्क्रमयोः संयमात् तयोः साक्षात्करणम्' इत्युक्तिदर्शनाज् ज्ञायते यत् तादृशक्षणात्मकः कालो योगजप्रत्यक्षगम्य एव, न लौकिकप्रत्यक्षगम्यः । उक्तं हि कालसिद्धान्तदर्शिन्याम्—'एवञ्च पातञ्जलदर्शने वस्तुभूते क्षणरूपे काले स्वीकृतेऽपि तस्य योगजप्रत्यक्षविषयत्वकथनेन स्वमते लौकिकप्रत्यक्षाविषयत्वं सूचितम् ।'[9b] उक्तं च भोजवृत्तौ--'अनुभूतेषु क्षणेषु पश्चात् संकलनबुद्ध्यैव यो गृह्यते स क्षणानां क्रम उच्यते, न ह्यननुभूतेषु क्षणेषु क्रमः परिज्ञातुं शक्यः' इति ।'[10] अत्रापि संयमरूपयोगादेव क्षणतत्क्रमयोरनुभव उक्तः ।

---

7 Mā me. p. 188-190 (Adyar)
8 Nayā. sū. bhā. 2.1.40
9 Yo. bhā. 3.52
9a Yo. vār. 3.52
9b Kā. sid. dar. p. 7 (Calcutta)
10 Yo. su. Bhoja-vṛtti, 4.33

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



जैनमते कथञ्चित् कालस्य प्रत्यक्षविषयत्वं स्वीकृतम्। उक्तञ्च—'कालस्य घटिकादिवसादिकार्यं प्रत्यक्षेण दृश्यते।'[11]

निम्बार्कमते रामानुजमते वेदान्तपरिभाषाकाराद्यद्वैतिमते च भाट्टमताभ्युपगमेन कालस्य इन्द्रियवेद्यत्वं स्वीकृतम्। यथोक्तं—'न सोऽस्ति प्रत्ययो लोके कालो यत्र न भासते इति स्मृत्या ज्ञानमात्रे कालो विशेषणतया भासते।'[12] तथा च वेदान्तपरिभाषायाम्—'नीरूपस्यापि कालस्येन्द्रियवेद्यत्वाभुपगमेने'[13]त्यादि। रामानुजमतमपि यतीन्द्रमतदीपिकायामुक्तं—'केचित्तु तत्र कालो नास्तीति वदन्ति। अन्ये तु तामसो महान् काल इति। उभयेषामागमबाधः प्रत्यक्षबाधश्च। केचित्तु षडिन्द्रियवेद्यः काल इत्यप्याहुः। तेनानुमेयवादनिरासः।'[14] एवं रामानुजमते कालः प्रत्यक्षागमाभ्यां सिद्ध इति प्रतिभाति।

माध्वमते तु कालः साक्षिवेद्यः। तथोक्तं—'...तत्रातीन्द्रियाः पदार्था ज्ञाततयाऽज्ञाततया वा साक्षिविषयाः; आत्ममनःकालादयः साक्षादेव साक्षिणो विषयाः; शब्दादयस्तु बहिरीन्द्रियद्वारा।'[15]

अद्वैतमते हि यद्यपि कालस्य भाट्टवदिन्द्रियवेद्यत्वमभ्युपगतं तथापि साभासाविद्याया एव कालत्वात् तस्य साक्षिवेद्यत्वमेव युक्तम्। तदुक्तं—'कालस्त्वविद्यैव', 'अयं च साभासाविद्यारूप'[16] इत्यादि। अद्वैतमते दिक्पदार्थस्याप्याकाशानतिरिक्तत्वात् दिशोऽप्याकाशवदेव साक्षिप्रत्यक्षविषयत्वं वेदितव्यम्। कालस्यापि अविद्यारूपत्वात् अविद्यायाश्च श्रुतिगम्यत्वात् साक्षिवेद्यत्वाच्च कालस्यापि श्रुतिसिद्धत्वं साक्षिवेद्यत्वञ्चाभ्युपेयम्। एवमद्वैतमते कालस्याकाशस्य च साक्षिणैवापरोक्षानुभवः सम्भवति।

बौद्धमते तु 'कालाकाशयोरतिरिक्त-पदार्थत्वाभावाद् वस्तुत्वाभावाच्च कस्यचिद्भावस्य प्रत्यक्षमेव आकाशप्रत्यक्षं कालप्रत्यक्षं च। तथा हि प्रकाशतमसोः

---

11 Dravyasamgrahavṛtti, 21-22
12 Kāla. si. dar. p. 86 (Calcutta)
13 Vedā. pari p. 10-11 (chow.)
14 Yat. mat. dīp. p. 50–51 (Ananda Asram)
15 Padārtha-Samgraha, Indriya-prakaraṇa
16 Daśaśloki-Siddhāntabindu—Nyāyaratnāvali-śloka–8

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



राशेः प्रत्यक्षमेवाकाशप्रत्यक्षम् ; तथा क्षणिकभावप्रत्यक्षमेव कालप्रत्यक्षम्, क्षणातिरिक्तस्य कालस्याभावात् । तदुक्तं शान्तरक्षितेन—

'प्रकाशतमसो राशेस्तमेव व्योम मन्यते ।
प्रतिपत्ता यतोऽप्यस्य न सत्त्वं न च दर्शनम् ।'[17]

प्रकाशतमसोः राशेः प्रत्यक्षे तमेव व्योम मन्यते इत्यर्थः ।

## अभावप्रत्यक्षनिरूपणम्

तार्किकादीनां मते यस्य येन इन्द्रियेण प्रत्यक्षं भवति तदभावस्यापि प्रत्यक्षं तेनैव इन्द्रियेण भवति । यद्यपि प्राभाकराणां मते अभावो नातिरिक्तः किन्त्वधिकरणस्वरूप एव, तथापि अभावानां प्रत्यक्षं प्रतियोगिग्राहकेन्द्रियेणैव वक्तव्यमन्यथा कुसुमविशेषे गन्धविशेषाभावो जले वा गन्धाभावश्चक्षुषैव गृहीतः स्यात्, न तु तथा गृह्यते ।

तार्किकमते हि अभावानां प्रत्यक्षविषयत्वं वैशेषिकसूत्रेष्वेव दृश्यते । तथाहि—'असदिति भूतप्रत्यक्षाभावात् भूतस्मृतेर्विरोधिप्रत्यक्षव'[1]दितिसूत्रे ध्वंसाभावप्रत्यक्षं प्रतिपादितम् । तथा 'तथाऽभावे भावप्रत्यक्षाच्च'[2] इत्यनेन प्रागभावप्रत्यक्षम्, 'एतेनाघटोऽगौरधर्मश्च व्याख्यातः'[3] इत्यनेन सूत्रेणान्योन्याभावप्रत्यक्षम्, 'अभूतं नास्तीत्यनर्थान्तर'[4]मिति सूत्रेणात्यन्ताभावस्यापि प्रत्यक्षमाह कणादः । अभावानां प्रत्यक्षे प्रतियोगिस्मरणं तथा प्रतियोगिनो घटादेः योग्यानुलपब्धिरपि सहकारिकारणं वेदितव्यम् । तदुक्तं प्रथमोक्तवैशेषिकसूत्रटीकायां जयनारायणेन—'असन् घटः, नष्टो घटः, ध्वस्ता घट इत्यादिप्रत्यक्षं विरोधिप्रत्यक्षवत्—प्रतियोगिघटप्रत्यक्षवदनुभवसिद्धं लौकिकसन्निकर्षजन्यञ्चेत्यर्थः । तत्र च प्रतियोगिप्रत्यक्षं चक्षुरादिसंयोगजन्यं ध्वंसप्रत्यक्षन्तु चक्षुरादिसंयुक्तविशेषणताजन्यमिति विशेषः । अपरमपि विशेषमाह—भूतप्रत्यक्षाभावादिति भूतस्य अतीतस्य प्रतियोगिनो घटादेः प्रत्यक्षस्याभावात् योग्यानुपलम्भरूपात् कारणात् ।

---

17 Tattva. Sam. verse—1688 (Baroda)

1 Vai. sū. 8.1.6
2 Ibid, 8.1.7
3 Ibid. 8.1.8
4 Ibid. 8.1.9

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



भूतस्यातीतघटादेः स्मृतेः स्मरणात्मकात् प्रतियोगिज्ञानाच्च जायमानमिति पूरणीयम्। तथा च ध्वंसप्रत्यक्षं प्रतियोग्यानुलब्धिजन्यं, प्रतियोगिज्ञानजन्यं च; प्रतियोगिप्रत्यक्षं न तथा। इतोऽपि विशेष इति भावः। एवञ्च घटादयो यथा प्रत्यक्षसिद्धास्तथा ध्वसा अपीति भावः।'[5]

पुनश्चोक्तं तेनैव सूत्रान्तरटीकायाम्—'यथा ध्वंसे इन्द्रियसन्निकर्ष-योग्यानुपलब्धि-प्रतियोगिज्ञानैः प्रत्यक्षं जायते तथा प्रागभावेऽपीत्यर्थः। ननु प्रागभावस्यानादित्वात् कपालादिसंयोगजननादतिपूर्वमपि कथं न प्रागभावस्य प्रत्यक्षम्, उक्तानां कारणानां तदानीमपि सम्भवादित्यत आह—भावप्रत्यक्षादिति। भावश्चरमकारणसामग्री तेन प्रत्यक्षं यस्य तत्त्वात्, चरमकारणसामग्रीव्यङ्ग्यत्वादिति फलितार्थः। तथाचोक्तस्थले चरमकारण-सामग्र्यभावान्न प्रागभावप्रत्यक्षमिति भावः। अतीन्द्रियस्य वाय्वादेः प्रागभावस्य प्रत्यक्षवारणाय च-कारः, तेन च प्रतियोगियोग्यत्वं समुच्चितमिति मन्तव्यम्।'[6] 'अन्योन्याभावप्रत्यक्षप्रतिपादकसूत्रस्य टीकाया-माह—'अघटो पटः, अगौरश्वः, अधर्मः सुखमित्याद्याकारकोऽन्योन्याभाव-प्रत्ययोऽपि एतेन व्याख्यात इति समुदितार्थः। तथाऽन्योन्याभावप्रत्यक्षेऽपि इन्द्रियसम्बद्धविशेषणता प्रतियोग्यनुपलम्भः प्रतियोगिज्ञानञ्चैतानि कारणानि। इयान् परो विशेषो यत् संसर्गाभावग्रहे प्रतियोगियोग्यत्वं तन्त्रम्, अन्योन्याभावग्रहे त्वधिकरणयोग्यत्वमिति 'धर्मस्यातीन्द्रियत्वेऽपि सुखादौ योग्याधिकरणे तदन्योन्याभावस्य प्रत्यक्षं निराबाधमेव।......अत्यन्ता-भावस्यापि प्रत्यक्षमाह—अभूतमिति।' टीका तु स्पष्टार्था एव।

उक्तञ्च उदयनेनापि प्रत्यक्षत्वमभावानाम्—'प्रतिपत्तेरापरोक्षादिन्द्रिय-स्यानुपक्षयात्। अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः॥'[6a]—अभावग्रहस्य प्रत्यक्षत्वमिति शेषः। वैशेषिकनैयायिकमतयोरभावस्य प्रत्यक्षविषयत्वेऽपि वैशेषिकभाष्यकारप्रशस्तपादमते अभावानां प्रतियोग्यनुपलब्धिरूपलिङ्गगम्यत्वा-दनुमानप्रमाणगम्यत्वमभिप्रेतम्। तथोक्तम्—'अभावोऽप्यनुमानमेव, यथोत्पन्नं कार्यं कारणसद्भावे लिङ्गम्, एवमनुत्पन्नं कार्यं कारणासद्भावे लिङ्गम्।'[7]

---

5 Vai. sū. ṭikā, 8. 1. 6 (By Jayanarayan Tarkapanchanan, Calcutta)

6 Ibid. 8.1.7

6a Quoted in Manameyodaya, p. 137 (Adyar)

7 Pra. bhā. p. 542 (V.S.V.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



व्याख्यातञ्चैतदेवं श्रीधरेण न्यायकन्दल्याम्——'प्रमेयाभावप्रतीतौ भावग्राहकप्रत्यक्षादिपञ्चप्रमाणानुत्पत्तिरभावाख्यं प्रमाणान्तरं कैश्चिदिष्टम् ।...... ज्ञानकारणेषु सत्सु ज्ञानयोग्यस्य वस्तुनो ज्ञानानुत्पादोऽभावावगमनिमित्तम् ।......एतावता विशेषेण योग्यानुपलम्भो प्रतिपादको नापरः । एवं सति अभावो लिङ्गमेव स्यादविनाभावग्रहणसापेक्षत्वात्, तदनपेक्षत्वे त्वविशेषेण तस्याभावस्याभावबोधकत्वमिति दुर्निवारणप्रसङ्गः ।'[8] श्रीधरेण पुनः वैशेषिकसूत्राभिप्रायेणेन्द्रियगम्यत्वमेवाभास्योक्तम् । यथा——'अपि चेन्द्रियसन्निकर्षाद्युपलभ्यमाने भूतलेऽभावज्ञानमपि भवति—अघटं भूतलमिति ; तत्र भूतलस्येवाभावस्यापि प्रत्यक्षता किं नेष्यते ?......यथेन्द्रियान्वयव्यतिरेकानुविधायि कार्यं भावे दृश्यते तद्वदभावेऽपीति भाववदभावोऽपीन्द्रियग्रहणयोग्य एव । कार्यदर्शनादेव चास्येन्द्रियसम्बन्धोऽपि कश्चित् कल्पयिष्यते'[9] इति ।

नव्या अपि नैयायिका योग्यप्रतियोग्यनुपलब्धिसहकारेण प्रत्यक्षगम्यत्वमेवाभावानां कथयन्ति । उक्तं हि विश्वनाथेन—

'विशेषणतया तद्वदभावानां ग्रहो भवेत् ।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ।।'[10]

तद्वदिन्द्रियैरेव संयुक्तविशेषणतादिसन्निकर्षेणाभावानां प्रत्यक्षज्ञानं भवेदित्यर्थः । उक्तञ्च विश्वनाथेन तद्व्याख्याने मुक्तावल्याम्——'अत्र यद्यपि विशेषणता नानाविधा, तथाहि—भुतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते । संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया,......शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया......एवमन्यत्राप्यूह्यम्, तथापि विशेषणतात्वेन एकैव सा गण्यते...... । अत्राभावप्रत्यक्षे योग्यानुलब्धिः कारणम् । तथाहि भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते, तेनाभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम् । तत्र योग्यताऽप्यपेक्षिता ; सा च प्रतियोगिसत्त्वप्रसंजितप्रतियोगिकत्वरूपा । तदर्थश्च——प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसंजित उपलम्भरूपः प्रतियोगी यस्य (उपलम्भाभावस्य)

8 Nyā. kan. p. 542-44 (V.S.V.)

9 Ibid. p. 544 (V.S.V.)

10 Bhā. pari. 61-62 ; p. 261 (Nirnayasāgar)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सोऽभावप्रत्यक्षे हेतुः। तथाहि--यत्रालोकसंयोगादिकं वर्तते तत्र यद्यत्र घटः स्यात् तर्हि उपलभ्येतेत्यापादयितुं शक्यते, तत्र घटाभावादेः प्रत्यक्षं भवति; अन्धकारे तु नापादयितुं शक्यते, तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षम्। स्पार्शनप्रत्यक्षं तु भवत्येव, आलोकसंयोगं विनाऽपि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात्। गुरुत्वादिकं यदयोग्यं तदभावस्तु न योग्यः, तत्र गुरुत्वादि-प्रत्यक्षस्यापादयितुमशक्यत्वात्।......संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता, अन्योन्याभावप्रत्यक्षेऽधिकरणयोग्यताऽपेक्षिता, अतः स्तम्भादौ पिशाचभेदोऽपि चक्षुषा गृह्यते।'[11] एवं तार्किकादीनां मते योग्यप्रतियोग्यनुपलब्धिसहकृत-मिन्द्रियमेवाभावप्रत्यक्षे करणं प्रमाणं वा। अभावानुमित्यादौ तु यथायोग्यं व्याप्तिज्ञानादिकं प्रमाणं वेदितव्यम्।

भाट्टमीमांसका वेदान्तिनश्च नैवं मन्यन्ते। तेषां मते अभावाधिकरण-ग्रहार्थमिन्द्रियापेक्षायामपि अभावग्रहो नेन्द्रियप्रमाणजन्यः, अपि तु प्रतियोग्यनुप-लब्धिरूपाभावाख्यप्रमाणजन्य एव।

उक्तं हि भट्टनारायणेन मानमेयोदये—

'अथोपलम्भयोग्यत्वे सत्यप्यनुपलम्भनम्।
अभावाख्यं प्रमाणं स्यादभावस्यावबोधकम्॥'[12]

योग्यताऽपि तेन निपुणतया निरूपिता। यथोक्तं—

'विषयं तदधीनांश्च सन्निकर्षादिकान् विना।
उपलम्भस्य सामग्रीसम्पत्तिः खलु योग्यता॥
सा च ज्ञाततयाऽभावज्ञानस्य सहकारिणी।
अज्ञातोऽनुपलम्भस्तु सत्तामात्रेण बोधकः॥

अत्र हि अनुपलम्भः करणम्। तस्य च ज्ञानाभावरूपत्वादभावः प्रमाण-मित्युच्यते। ततश्च विषयभूतं घटं तदधीनांश्चेन्द्रियसन्निकर्षादीन् विना यच्चक्षुरुन्मीलनालोकसम्पातमनःप्रणिधानादिकं घटोपलम्भकारणं तत्सर्व-मिदानीमेव संजातमित्यवगमे सति तत्सहकृतः सन् घटानुपलम्भो घटाभावं बोधयतीत्येवं सर्वत्र द्रष्टव्यम्।'[13] पुनश्चोक्तं तेनैव—

11 Siddhāntamuktāvalī p. 261-71 (N. S.)
12 Mānameyodaya, p. 132 (Adyar)
13 Ibid. p. 132-33 (Adyar)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



'योग्यत्वावगमार्थं हि सूक्ष्मार्थभाववेदने ।
सूक्ष्मबोधकनेत्रांशुसम्पातार्थं प्रयत्यते ।।

तस्माद् योग्यत्वनिर्णयोऽत्र सहकारी ।'

'अनुपलम्भस्तु द्विविधः प्रमाणाभावरूपः स्मरणाभावरूपश्च । तत्र प्रत्यक्ष-प्रमाणाभावरूपादनुपलम्भात् घटाद्यभावज्ञानमुक्तम् । एवमनुमानगम्यार्थानाम-भावग्रहणे योग्यानुमानादयो बोधका द्रष्टव्याः । यथा, रूपदर्शनबोधकस्य चेष्टालिङ्गकानुमानस्यानुत्पत्तिरुलुकस्य दिवा रूपदर्शनाभावं बोधयतीत्युक्तं मनोरथमिश्रैः । एवमन्यप्रमाणेष्वपि ।'

'स्मरणाभावाद् यथा—प्रातरिह मैत्रो नासीदिति सायंकाले ज्ञानम् । तत्र हि प्रातःकालविशिष्टमैत्रस्य सायंकाले दर्शनयोग्यत्वाभावात् स्मरणयोग्यत्वे सति अस्मरणमेव तदानीं प्रातःकालविशिष्टमैत्राभावस्य बोधकमाश्रीयते इति ।'[14]

अत्र तार्किकाणामभिप्रायमप्यनूद्य तत्खण्डनं कृतम् । यथोक्तम्—'तार्किकास्त्वभावस्य प्रत्यक्षादिगम्यत्वमाचक्षाणा अनुपलम्भगम्यतां न सम्मन्यन्ते । तदयुक्तम् । तेऽपि हि सायंकालं प्रातःकालीनाभावज्ञानस्येन्द्रियजन्यत्वा-भावादुक्तप्रकारेणानुपलम्भजन्यत्वमेव बलादङ्गीकुर्वीरन् ।'

'ननु तत्र स्मरणाभावलिङ्गेन प्रातःकालीनाभावोऽनुमीयते एव । मैवम् । स्मरणाभावस्य ज्ञातुमशक्यत्वात् ।

स्मृत्यभावं मनोग्राह्यमिच्छन्ति किल तार्किकाः ।
तच्चायुक्तं वयं तावज्ज्ञानाप्रत्यक्षवादिनः ।।
मनःप्रत्यक्षगम्यत्वं ज्ञानानां वारयामहे ।
ततश्च तदभावोऽपि मनसा गृह्यते कथम् ।।'[15]

तथाऽद्वैतवेदान्तमतेऽपि षष्ठानुपलब्धिप्रमाणगम्य एवाभावपदार्थः । प्रमितेर्लक्षणानुसारेण 'भूतले घटो नास्ती'त्याद्यभावग्रहस्य प्रत्यक्ष-त्वेऽपि न तद्ग्राहकप्रमाणस्य प्रत्यक्षत्वम्, किन्तु प्रतियोग्युपलम्भाभावरूपानुप-लब्धित्वमेव । तथा चोक्तं धर्मराजाध्वरीन्द्रेण—'ज्ञानकरणाजन्याभावानुभवा-

14 Ibid. p. 134-35. (Adyar)
15 Ibid. p. 135-37 (Adyar)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



साधारणकारणमनुपलब्धिरूपं प्रमाणम्। अनुमानजन्यातीन्द्रियाभावानुभवहेतौ अनुमानादौ अतिव्याप्तिवारणाय अजन्यान्तं विशेषणम्।............ ननूक्तरीत्याऽधिकरणेन्द्रियसन्निकर्षस्थले ...... क्लृप्तेन्द्रियमेवाभावाकारवृत्तावधिकरणम्, इन्द्रियान्वयव्यतिरेकानुविधानादिति चेत्। न। तत्प्रतियोग्यनुपलब्धेरप्यभावग्रहे हेतुत्वेन क्लृप्तत्वेन करणत्वमात्रस्य कल्पनात्। इन्द्रियस्य चाभावेन समं सन्निकर्षाभावेनाभावग्रहाहेतुत्वात्।...ननु...भूतलावच्छिन्नचैतन्यवत् तन्निष्ठाभावावच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया घटाभावस्य प्रत्यक्षतैव सिद्धान्तेऽपीति चेत्। सत्यम्। अभावप्रतीतेः प्रत्यक्षत्वेऽपि तत्करणस्यानुपलब्धेर्मानान्तरत्वात्। न हि फलीभूतज्ञानस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति, दशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेऽपि तत्करणस्य वाक्यस्य प्रत्यक्षप्रमाणभिन्न-(शब्द-) प्रमाणत्वाभ्युपगमात्। फलवैजात्यं विना कथं प्रमाणभेद इति चेत्। न। वृत्तिवैजात्योपपत्तेः। तथा च घटाद्यभावाकारवृत्तिर्नेन्द्रियजन्या, इन्द्रियस्य विषयेणासन्निकर्षात्। किन्तु घटानुपलब्धिरूपमानान्तरजन्या।'[16] अत्रेदं बोध्यं यत् बाह्याभावानामनुपलब्धिगम्यत्वेऽपि ज्ञानसुखदुःखादिवत् तदभावोऽपि साक्षिप्रत्यक्षगम्य एव। तदुक्तं विद्यारण्येन पञ्चदश्याम्—'वृत्तेः साक्षितया वृत्तिप्रागभावस्य च स्थितः।'[16a]

बौद्धमते तु भावातिरिक्ताभाववस्त्वाभावात् अभावानां भावरूपत्वात् प्रत्यक्षप्रमाणगम्यत्वमेव। अतो नास्ति अभावाख्यं प्रमाणान्तरमभावानां ग्राहकम्। तदुक्तं शान्तरक्षितेन तत्त्वसंग्रहे —

'प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता॥

प्रमाभावाच्च वस्तूनामभावः संप्रतीयते।
चतुर्धा च विभिन्नोऽसौ प्रागभावादिभेदतः॥

---

16 Vedā. pari. p. 141–45 (chow.)
16a Pañcadaśī, 8.25

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मानं कथमभावश्चेत् प्रमेयं चात्र कीदृशम् ।
........... मेयो यद्वदभावो हि मानमप्येवमिष्यताम् ।।'[17]

....

तदनन्तरं स्वमतमप्युक्तम्––

'कार्यादीनामभावो हि भावो यः कारणादिना ।
... ..स चापरविविक्तात्मा प्रत्यक्षेणैव गम्यते ।।'[18]

घटादीनां कार्याणां यः प्रागभाव स कारणमृत्तिकादिरूपः भाव एव । स च स्वत एव इतरव्यावृत्तरूपः, अतः स भावरूपोऽभावः प्रत्यक्षेणैव गृह्यते इत्यर्थः । उक्तश्च कमलशीलेन पञ्जिकायां प्रयोगः––'यस्य यतो व्यतिरिक्तं प्रमेयं नास्ति, तत्ततो न प्रमाणान्तरम्, यथा सप्तमं प्रमाणम्, नास्ति च प्रमेयं प्रत्यक्षप्रमेयाद् व्यतिरिक्तमभावस्येति व्यापकानुपलब्धिः । अतो नाभावः प्रमाणान्तरमित्यर्थः ।'

पुनश्चोक्तं शान्तरक्षितेन—

'स्वरूपमेव वस्तूनां ननु व्यावृत्तमिष्यते ।
तेनात्मना सदेतच्च प्रत्यक्षममूनात्मना ।।

अर्थक्रियासमर्थं च सदन्यदसदुच्यते ।
समावेशो न चैकत्र तयोर्युक्तो विरोधतः ।।'[19]

वस्तूनां स्वरूपमेव व्यावृत्तमिति प्रागभावादिरूपमिति स्वरूपात्मा स्वत एव व्यावृत्तात्मना अभावरूपेण गृह्यते । न हि वस्तूनां स्वरूप-पररूपाभ्यां भावाभावात्मकत्वं भावात्मना प्रत्यक्षग्राह्यत्वमभावात्मना च अभावप्रमाण-ग्राह्यत्वं सम्भवति, अर्थक्रियासामर्थ्य-तदसामर्थ्यरूपभावत्वाभावत्वयोरेकत्र विरोधादित्यर्थः । तस्मादेकस्य भावस्य प्रत्यक्षमेकस्यान्यस्याभावज्ञानमिति नातिरिक्तोऽभावः, नापि प्रमाणान्तरमभावाख्यम् । तदुक्तं शान्तरक्षितेण,— 'तस्मादेकस्य या दृष्टिः सैवान्यादृष्टिरुच्यते ।'[20] ननु आकाशस्यावस्तुत्वात् कस्य एकस्य दष्टिराकाशे चन्द्राभावरूपेण गम्यते ? कथं वा क्वचित् प्रदेशे

17 Tattvā-saṃgraha, (Baroda) verse—1648, 1650, 1657
18 Ibid. verse—1671
19 Ibid. verse—1674-75
20 Ibid.—verse-1683

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



शब्दाभावग्रहः ? कालस्योपलम्भादित्यपि वक्तुं न शक्यते, यतः कालस्यापि अतिरिक्तपदार्थत्वाभावान्न कालोपलम्भः सम्भवतीति चेन्न । प्रकाशतमसोः राशेः संवित्तौ तमेव प्रतिपत्ता आकाशमिति मन्यते । प्रकाशतमसोः व्यतिरेकेणाकाशस्यासत्त्वात् ।[21] चक्षुरादिज्ञानानामुपलम्भात् श्रोत्रज्ञानस्य कार्यस्यानुपलब्ध्यैव शब्दाभावो गम्यते इति सिद्धमभावानां प्रत्यक्षगम्यत्वम ।

## जाति-प्रत्यक्षनिरूपणम्

नैयायिक-वैशेषिक-मीमांसकादिभिर्नित्यमेकमनेकसमवेतमनुवृत्तप्रत्ययकारणं सामान्यं स्वीक्रियते । स एव पदार्थो द्रव्यगुणाद्यतिरिक्तो जातिरित्यप्युच्यते । द्रव्यगुणकर्मसु विद्यमाना सत्ता परा जातिः परं सामान्यं वोच्यते । तदपेक्षया द्रवत्वादिजातिस्तु अपरा जातिरपरं वा सामान्यमुच्यते । जैनमाध्वैस्तु सामान्यस्वीकारेऽपि न तेषां नित्यत्वमनेकसमवेतत्वं वा स्वीक्रियते । अद्वैतिभिरपि सामान्यस्य नित्यत्वं समवेतत्वञ्च न स्वीक्रियते । सर्वथापि तेषां योग्यवृत्तीनां सामान्यानां प्रत्यक्षग्राह्यत्वं तार्किकमीमांसकवेदान्तिभिः सर्वैरेव स्वीकृतम् । तथा च यद्यपि प्रत्यक्षायोग्यवृत्तीनां परमाणुत्वधर्मत्वादिजातीनां न प्रत्यक्षग्राह्यत्वं तथापि गोत्वाश्वत्वमनुष्यत्वादिजातीनां हि इन्द्रियव्यापारेणैव ग्रहणात् प्रत्यक्षग्राह्यत्वमेव । उक्तञ्च विश्वनाथेन—

…'क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम् ।
गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः ।'[1]

उक्तञ्च तत्त्वसंग्रहे वैशेषिकमतानुवादेन—

'तत्रेयं द्विविधा जातिः परैरभ्युपगम्यते ।
सामान्यमेव सत्ताख्यं समस्तेष्वनुवृत्तितः ॥

---

21 Ibid.—verse-1687—1689 (with Pañjikā).

1 Bhā. pari. p. 242 (N.S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



द्रव्यत्वादि तु सामान्यं सद्विशेषोऽभिधीयते ।
स्वाश्रयेष्वनुवृत्तस्य चेतसो हेतुभावतः ।।

प्रत्यक्षतः प्रसिद्धास्तु सत्त्वगोत्वादिजातयः ।
अक्षव्यापारसद्भावे सदादिप्रत्ययोदयात् ।।

अनुमानबलेनापि सत्त्वमासां प्रतीयते ।
विशेषप्रत्ययो येन निमित्तान्तरभाविकः ।।'[2]

अत्र अनुमानप्रमाणेनापि सत्तादिजातिसिद्धिरुक्ता । दर्शितश्चः प्रयोगः कमलशीलेन पञ्जिकायां वैशेषिकमतानुसारेण—'प्रयोगः—यद्वस्त्वाकारविलक्षणो यः स तद्व्यतिरिक्तनिमित्तान्तरभावी, यथा वस्त्रचर्मकम्बलेषु रक्तादिप्रत्ययः, तथा चायं द्रव्यादिषु (द्रव्यगुणकर्मसु) सदादिप्रत्यय इति स्वभावहेतुं मन्यते परः ।'[3]

बौद्धैस्तु सामान्यरूपातिरिक्तपदार्थास्वीकारेण सामान्यस्य प्रत्यक्ष-गम्यत्वमपि नाङ्गीक्रियते । इतरव्यावृत्तिरूपापोहेनैवानुवृत्तप्रत्ययसम्भवात् सामान्यस्वीकारस्तर्कासह इति बौद्धमतमप्युक्तं संक्षेपेण तत्त्वसंग्रह-संग्रहे—

...'जातिः प्रत्यक्षगम्येति भ्रान्तानां खलु भाषणम् ।।

या नाम जात्युपहिता गौरश्वोऽयमितीह धीः ।
न सा चक्षुःसम्प्रयोगसमनन्तरभाविनी ।।

किन्तु संकेतसम्भूतसंस्काराहितसंस्मृतेः ।
सा हि व्यवहिता स्मार्ती तस्मात् सा कल्पनैव हि ।।

प्रत्यक्षं कल्पनापोढं विकल्पाः कल्पनात्मकाः ।
चक्षुषा स्पृष्टमात्रं तु निर्विकल्पकं हि गृह्यते ।।

न चागृहीतसंकेतः पिण्डमेकं विलोकयन् ।
नाम्ना जात्याऽपि तं वेत्ति, तत् सामान्यं न चाक्षुषम् ।।

---

2 Tattvasamgraha (Baroda), verse—709, 710, 714, 715
3 Ibid. pajñikā—715.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



धियोऽप्यनुगतत्वं यन्न जातिं समपेक्षते ।
धीः पाचकोऽयमिति या न सा जात्यानुगामिनी ।।'[4]

अक्षव्यापारानन्तरमेव सदादिप्रत्ययस्यासिद्धत्वात् न सत्ता जातिः प्रत्यक्षेण गृह्यते सदृशव्यापारवत्त्वेनापि अनुगतप्रत्ययसम्भवादित्यर्थः ।

तदुक्तं शान्तरक्षितेनापि—

'अक्षव्यापारसद्भावान्न ह्यनन्तरभाविनः ।
सदादिप्रत्ययास्सिद्धाः संकेताभोगस्तु ते ।।'[5]

गौरयं घटोऽयमित्यादिप्रत्यया गृहीतसंकेतस्यैव सम्भवात् संकेतसंस्कारजन्या इति वेदितव्यम् ।

पुनश्चोक्तं तेनैव—

'तादृक् प्रत्यवमर्शश्च विद्यते यत्र वस्तुनि ।
तत्राभावेऽपि गोजातेरगोऽपोहः प्रवर्तते ।।
अगोभिन्नं च यद्वस्तु तदक्षैर्व्यवसीयते ।
प्रतिबिम्बं तदध्यस्तं स्वसंवित्याऽवगम्यते ।।'[6]

गौर्गौरितिप्रत्ययो यत्र जायते तत्र वस्तुभूतगोजातेरभावेऽपि प्रतिबिम्बात्मा अगोऽपोहः प्रवर्तते । स्वलक्षणात्मा अपोह इन्द्रियैरेव गृह्यते, प्रतिबिम्बात्मा इतरव्यावृत्तिबुद्धिरूपापोहः बुद्धिस्वभावत्वात् बौद्धमत-प्रसिद्ध-स्वसंवेदन-प्रत्यक्षेण गृह्यते इत्यर्थः ।

———

4 Tattvasaṃgrahasaṃgraha (By Krisnamācarya)—verse, 2-7

5 Tattvasaṃgraha—verse, 722 (Baroda)

6 Ibid. verse—1060-61



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( १४ )

## प्रातिभज्ञानम्

पातंजलदर्शने योगजधर्मजन्योऽलौकिकज्ञानविशेषएव प्रातिभज्ञानमित्युच्यते। वैशेषिकदर्शने तदेव योगजज्ञानमार्षज्ञानं वा प्रातिभमुक्तम्; अपरं तु लौकिकमपि प्रातिभज्ञानं यथार्थं स्वीकृतम्। तथाहि पातंजले—'प्रातिभाद्वा सर्वम्' इति सूत्रव्याख्याने व्यासेनोक्तं—प्रातिभं नाम तारकम्, तद्विवेकजस्य ज्ञानस्य पूर्वरूपम्, यथोदये प्रभा भास्करस्य, तेन वा सर्वमेव जानाति 'योगी प्रातिभस्य ज्ञानस्योत्पत्ताविति।'[1] अन्यत्र चोक्तं तेनैव—'प्रातिभात् सूक्ष्मव्यवहितविप्रकृष्टातीतानागतज्ञानं, श्रावणाद् दिव्यशब्दश्रवण'[2]मित्यादि। उक्तं च तथैव प्रशस्तपादभाष्ये……'आत्ममनसोः संयोगात् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते। तत् तु प्रस्तारेण देवर्षीणाम्; कदाचिदेव लौकिकानाम्, यथा कन्यका ब्रवीति—श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयति।'[3]

इदानीं तदेवास्मदादीनां प्रसिद्धं लौकिकप्रातिभज्ञानं निरूप्यते। तत्रोक्तं श्रीधरेण न्यायकन्दल्याम्—'इन्द्रियलिंगाद्यभावे यदर्थप्रतिभानं सा प्रतिभा, प्रतिभैव प्रातिभमित्युच्यते तत्रभवद्भि'[4]रिति प्रातिभज्ञानस्य सामान्यलक्षणम्।

उक्तं च लौकिकस्य तस्यापि विवरणं प्रामाण्यं च जयन्तभट्टेन—

'अपि चानागतं ज्ञानमस्मदादेरपि क्वचित्।
प्रमाणं प्रातिभं श्वो मे भ्राताऽगन्तेति दृश्यते॥
नानर्थजं न सन्दिग्धं न बाधविधुरीकृतम्।
न दुष्टं कारणं चेति प्रमाणमिदमिष्यताम्॥

---

1 Yo. sū. bhā 3.33
2 Ibid. 3. 36
3 Pra. bhā p. 623 (V.S.V.)
4 Nyā. Kan. p. 628 (V.S.V.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



क्वचित् बाधकयोगश्चेदस्तु तस्याप्रमाणता ।
यत्रापरेद्युरभ्येति भ्राता तत्र किमुच्यताम् ॥
काकतालीयमिति चेन् न प्रमाणप्रदर्शितम् ।
वस्तु तत् काकतालीयमिति भवितुमर्हति ॥'[5]

एवं जयन्तादिप्राचीनतार्किकैर्लौकिकप्रातिभज्ञानस्यापि बाधकाभावे प्रामाण्यं प्रत्यक्षत्वं च स्वीकृतम् । भविष्यदर्थस्य 'ज्ञानकालेऽविद्यमानत्वात् बहिरिन्द्रिय-सन्निकर्षाभावेऽपि मानसप्रत्यक्षत्वमव्याहतम् । तथोक्तं जयन्तेन—'नन्वनर्थज-मिदं ज्ञानं भ्रातुस्तज्जनकस्य तदानीमसत्त्वात् । स्यादेतदेवं यदि तदाऽस्तित्वेन भ्रातरं गृह्णीयात्, किन्तु भाविनमेनं गृह्णाति, भावित्वं च तदस्यास्त्येवेति कथमनर्थजं तज् ज्ञानम ।......तद्देशसम्बन्धस्य तत्र प्रागभावो न तु धर्मिणः, स हि विद्यते एव प्राग्भावतः, स च कुतश्चिद् भोजनोत्कण्ठादेः कारणात् स्मरणपदवीमुपारूढः श्वस्तनागमनविशिष्टत्वेन प्रतिभातीति प्रातिभस्य स एव जनक इति । तस्मादनर्थजत्वाभावात् प्रमाणं प्रातिभम्, प्रमाणं च सत् प्रत्यक्षमेव न प्रमाणान्तरम्, शब्द-लिंग-सारूप्यनिमित्तानपेक्षत्वात् । ननु प्रत्यक्षमपि मा भूदिन्द्रियानपेक्षत्वात्, मैवम्, मनस एव तत्रेन्द्रियत्वात्, पूर्वोत्पन्नचाक्षुषविज्ञान-विशेषणस्य बाह्यस्य वस्तुनो मनो ग्राहकमिति नान्धाद्यभाव इत्युक्तम्, शब्दाद्यु-पायान्तरविरतौ च जायमानमनवद्यं ज्ञानं मानसं प्रत्यक्षं भवति ।......न च सिद्धदर्शनं प्रतिभा, अस्मदादेरपि भावात्, तस्मान्न प्रमाणान्तरं प्रातिभम्, अपि तु प्रत्यक्षमेव ।'[6]

एवं तस्यावर्तमानविषयत्वात् प्रत्यक्षत्वाभावत्वमपि निराकृत्योपसंहृतं जयन्तभट्टेन—'तस्मात् प्रत्यक्षमनागतग्राहि श्वो मे भ्राता आगन्तेति सिद्धम् ।'[7]

प्रकारान्तरेणापि प्रतिभा वाक्यार्थरूपा भर्तृहरिणा वाक्यपदीये निरूपिता । तन्मते बाह्यार्थाभावेऽपि शब्दादेव अर्थप्रतिभा उत्पन्ना सती अर्थस्फुरणात्मकेन तेनैव सर्वं व्यवहार उपपद्यते । अतः प्रतिभामात्रं जगत् शब्दविवर्त एव । तदुक्तं—

'शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥[7a]

5 Nyā. mañ. p. I. p. 90 (chow.)

6 Nyā. mañ p. I. p. 98-99 (chow.)

7 Ibid. p. I. p. 92 (chow.)

7a Vākyapadīya—Brahmakānda—118 (p. 92 chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अस्य विश्वस्य व्यवहारकारणभूता शक्तिः वाच्यवाचकभावरूपा शब्देषु एव आश्रिता इति । द्वितीयार्धो व्याख्यातस्तेनैव—'यः शब्दो नेत्रं ज्ञापकं यस्य स यन्नेत्रः, प्रतिभात्मा प्रतिभाविषयत्वात् प्रतिभात्मा अयं भेदरूपः व्यवहारः प्रतिपुरुषं प्रतीयते ।' शब्दरूपज्ञापकविशिष्टः सर्वोऽपि भेदव्यवहारः प्रतिभात्मक एव इति भावः । पुनश्चोक्तं तेनैव—'अत्रेदं बोध्यम्—बाह्यस्य वस्तुनोऽभावात् प्रतिभैव वाक्यार्थः । तथाहि—यथाऽवस्थिते वनितात्मनि बाह्येऽर्थे वासनानुसारेण कुणप इति कामिनीति भक्ष्यमिति प्रतिभा भवन्ति, तथा असत्यपि व्याघ्रागमने व्याघ्र आगत इत्युक्ते शूराणामुत्साह, कातराणां भयं भवतीति शब्दादर्थप्रतिभा भवतीति प्रतिभामात्रं जगत् । अत एवासत्यपि बाह्येऽर्थे—एष वन्ध्यासुतो याति, राहोः शिरः इत्यादिवाक्यतोऽर्थप्रतिभा इति शब्द एव तत्तदाकारेण विवर्तते ।'

एतदेव वैयाकरणमतं जयन्तेन न्यायमञ्जर्यामुल्लेखितं खण्डितं च । यद्यपि तत्तत्संस्कारानुयायिविभिन्नचित्तवृत्तिरूपा प्रतिभा जायते, सा तु अर्थज्ञानजन्या एव न तु शब्दजन्या इति न वाक्यार्थः प्रतिभा भवितुमर्हतीति जयन्ताभिप्रायः । तथोक्तं जयन्तेन—

'प्रतिभा खलु विज्ञानं तच्च शब्देन जन्यते ।
न तु शब्दस्य विषयो रूपधीरिव चक्षुषः ।।

बाह्यस्य विषयस्याभावात् सैव विषय इति चेन्न, तस्य (बाह्यार्थस्य) समर्थितत्वात् । योऽपि व्याघ्र आयात इत्युक्ते शूर-कातर-नराधिकरणनानाप्रकारकार्योत्पादः स बाह्येऽर्थे व्याघ्रागमनादौ प्रतिपन्ने वासनानुसारेण भवन् न प्रतिभामात्रहेतुको (अर्थरहितज्ञानमात्रहेतुको) भवति, तस्य हि ज्ञायमानोऽर्थः कारणं न तज्ज्ञानमात्रम् । अर्थस्तदानीं नास्तीति चेद् विप्रलम्भकवाक्यमिदमसत्यार्थं भविष्यति, न त्वबाह्यविषयं तत् । यथा अवस्थिते वनितात्मनि बाह्यार्थे वासनानुसारेण कुणप इति कामिनीति भक्ष्यमिति प्रतिभा भवन्ति, तथा शब्दार्थेऽपि व्याघ्रागमनेऽवगते शूराणात्साहः, कातराणां भयमित्यादिकार्यं भवति । न त्वेतावता प्रतिभा शब्दार्थो भवितुमर्हति ।'[8]

इयं तु प्रतिभा यद्यपि शब्देन जन्यते तथापि अर्थजन्यत्वात् अर्थज्ञानजन्यत्वाद्वा न वाक्यार्थः, अपि तु संस्कारानुयायिचित्तवृत्तिरूपा विजातीया बुद्धिरित्युक्तम् । इन्द्रियलिंगाद्यजन्यत्वाच्च प्रतिभा इत्यपि बोध्यम् ।

8 Nyā. mañ. p. I. 335-36 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



इन्द्रियलिंगाद्यजन्यं प्रातिभज्ञानं यथार्थं न्यायसूत्रभाष्यकारयोरपि सम्मतम् । उक्तं च वात्स्यायनेन—'प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते यौगपद्यप्रसंगः इत्यादिभाष्ये—'यत् खल्विदं प्रातिभमिव ज्ञानं प्रणिधानाद्यनपेक्षं स्मार्त-मुत्पद्यते कदाचित् तस्य युगपदुत्पत्तिप्रसंगो हेत्वभावात् ।……प्रातिभमिदानीं ज्ञानं युगपत्कस्मान्नोत्पद्यते ? यथोपभोगार्थं कर्म युगपदुपभोगं न करोति, एवं पुरुषकर्मविशेषः प्रतिभाहेतु र्न युगपदनेकं प्रातिभं ज्ञानमुत्पादयती'[9]-त्यादि । पुरुषस्य शुभादृष्टविशेष एव प्रातिभज्ञानं यथार्थं जनयतीति दृष्टान्त-विधयोक्तम् ।

मीमांसकमते तु प्रातिभज्ञानं शुभादृष्टवशेनोत्पन्नमपि न प्रमाणमर्थनिश्चाय-कत्वाभावात् । तथाचोक्तं श्लोकवार्तिके कुमारिलभट्टैः—

'लौकिकी प्रतिभा यद्वत् प्रत्यक्षाद्यनपेक्षिनी ।
न निश्चयाय पर्याप्ता तथा स्याद्योगिनामपि ।।'[10]

अतो यद्यपि न्याय-वैशेषिकमतयोः शुभादृष्टवशाज् जायमानं प्रातिभज्ञानं विषयाबाधे प्रमाज्ञानमेव मन-इन्द्रियरूपप्रमाणजन्यत्वादबाधितत्वाच्च, तथापि मीमांसकादिमते न तत् प्रमा नापि प्रत्यक्षम् । क्वचित् प्रतिभायाः विषया-बाधेऽपि भूयशो विसंवादान्न प्रतिभा विषयनिश्चायिका भवति । विद्यमान-सम्प्रयोगाभावाच्च न प्रत्यक्षत्वम् । तदुक्तं सुचरितमिश्रेण टीकायां योगज-प्रत्यक्षखण्डनमुखेन—'सिद्धानां खलु धर्मानुग्रहवशेनानागतादिविषया प्रतिभैव जायते । सा चाद्यत्वे क्वचिदस्मदादीनामप्युत्पद्यते, यथा—श्वो मे भ्राताऽ-गन्तेति ।……योगिनामृषीणां वा प्रतिभा नार्थनिश्चयाय प्रभवति प्रतिभात्वाद-स्मदादिप्रतिभावत् । अस्मदादीनां हि विसंवादभूयिष्ठा प्रतिभोपलभ्यते इति ।'[11] उक्तं च श्लोकवार्तिके—

'तेन सत्यपि विज्ञाने प्रतिभादेर्यथैव हि ।
स्यातन्त्र्यान्न प्रमाणत्वं ………… ।।'[12] इत्यादौ स्वातन्त्र्यात् अनियतनिमित्ताद्वस्तुतन्त्रत्वाभावाद् वा प्रतिभाया अप्राभाण्यम् ।

अद्वैतवेदान्तिना वाचस्पतिमिश्रेणापि प्रतिभाप्रत्ययस्य सन्दिग्धप्रामाण्यक-त्वोक्तया अप्रमात्वमेवोक्तम् । यथोक्तं भामत्यां भावनाधेयसाक्षात्कारस्या-

---

9 Nyā. bhā. 3. 2. 34
10 Ślo. Vār. ṭikā. 4. 32
11 Ślo. Vār. ṭikā. 4. 32
12 Ślo. Vār. 2. 25

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रामाण्योक्तिप्रसंगेन--'ततो (ब्रह्मसाक्षात्कारात्) भिन्नस्य च भावनाधेयस्य साक्षात्कारस्य प्रतिभाप्रत्ययवत् संशयाक्रान्तया प्रामाण्यायोगात् । तद्विधस्य तत्सामग्रीकस्य बहुलं व्यभिचारोपलब्धेः । न खल्वनुमानविबुद्धं वह्निं भावयतः शीतातुरस्य शिशिरभरमन्थरकायकाण्डस्य स्फुरज्ज्वालाजटिलानलसाक्षत्कारः प्रमाणान्तरेण संवाद्यते । विसंवादस्य बहुलमुपलम्भात् ।'[13]

अत्रापि दृष्टान्तविधया प्रतिभाप्रत्ययस्याप्रामाण्यमुक्तम् । शीतातुरस्य भावनाधेयवह्न्यादिसाक्षात्कारो य उक्तः स तु मानसी विभ्रान्तिरेव दोषजत्वाद् विसंवादाच्च ।

अत्रेदं चिन्तनीयम्—यद्यपि सर्वे दार्शनिकाः कण्ठतः योगजप्रत्यक्षाणि प्रातिभज्ञाने नान्तर्भावयन्ति, तथापि तानि सांख्य-पातंजल-वैशेषिक-जैन-बौद्ध-वेदान्तसम्मतानि फलतः प्रातिभज्ञानान्येव, इन्द्रियलिंगाद्यभावेऽपि साक्षात्कारिज्ञानत्वात् लौकिकप्रातिभज्ञानवदिति । अत एव पातंजला वैशेषिकाश्च योगजप्रत्यक्षानि प्रातिभानीति वदन्ति । तथाऽद्वैतवेदान्तसम्मतं साक्षिप्रत्यक्षमपीन्द्रियलिंगाद्यजन्यापरोक्षज्ञानरूपत्वात् प्रातिभज्ञानमेवेति सूक्ष्ममीक्षनीयम् । एतदपि योगजं प्रातिभज्ञानं प्रमाणमेवेति वैशेषिकादिमतानुसारेण बोध्यम् । प्रातिभस्याप्रामाण्यवादिमीमांसकादिमतेन तु नैतदेवमिति स्पष्टम् ।

रामानुजीयानां मते तु भूतभाविवस्तुसाक्षात्काररूपायाः प्रतिभायाः प्रत्यक्षेऽन्तर्भूतत्वात् यथार्थत्वमेव । उक्तं हि यतीन्द्रमतदीपिकायां—'पुण्यपुरुषनिष्ठा प्रतिभाऽपि प्रत्यक्षेऽन्तर्भूता ।'[14]

जैनमतेऽपि तत्त्वार्थवृत्तौ भास्करनन्दिनोक्तं—'तेनैवंप्रकारा एवमादिर्वा या प्रतीतिः सा सर्वा संगृहीता भवतीति । सा च प्रतिभा बुद्धिमेधाप्रज्ञादिः ।'[15] एतेन मतिज्ञानान्तर्भूतं यथार्थज्ञानमेव सांव्यवहारिकं प्रतिभा इति सूचितम् । तन्मतसिद्धान्यवधिमनःपर्ययकेवलज्ञानान्यपि योगजत्वात् प्रातिभान्येवेति स्वीकर्तव्यम् ।

13 Bhāmati 1. 1. 1

14 Yat. mat. dip. p. 8 (Ananda Asram)

15 Tattvā. vr. 1. 13

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अद्वैतमते यद्यपि लौकिकप्रातिभज्ञानानामप्रामाण्यमुक्तम्, तथापि योगजप्रत्यक्षाणामलौकिकानां संराधनजन्यब्रह्मसाक्षात्कारस्य[16] च प्रातिभज्ञानत्वं प्रामाण्यं चावश्यमेव स्वीकर्तव्यमिति ध्येयम्। साक्षिप्रत्यक्षमपि इन्द्रियव्याप्तिज्ञानाद्यजन्यत्वात् प्रातिभज्ञानमेव यथार्थम्।

---

16 Br. sū. Śā. bhā. 3. 2. 24

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( १५ )

## परोक्षज्ञाने मनस्तत्त्वम्

निर्विकल्पकसविकल्पकभेदभिन्नं प्रत्यक्षज्ञानं मतभेदेन सविस्तारं निरूपितम् । यथा मनुष्याणां लोकयात्रानिर्वाहे प्रत्यक्षज्ञानमपरिहार्यं तथा अनुमित्यादि परोक्षज्ञानमपि । अतः परोक्षज्ञानं नानाभेदभिन्नं तत्र तत्र चान्तःकरणप्रक्रिया ज्ञानप्रक्रिया वा निरूप्यते । परोक्षज्ञानावान्तरभेदे विप्रतिपत्तिसद्भावात् सर्वत्र व्यवहारे परोक्षज्ञानानामनुमितिशाब्दबोधयोरेव प्राधान्यात् तावेव निरूप्येते । परोक्षज्ञानमात्रस्य प्रत्यक्षसापेक्षत्वात् सामान्यावधारणात्मकत्वा[1]-न्निश्चयदार्ढ्यन्यूनत्वादवैशद्याद्वा[2] प्रत्यक्षज्ञानाद् दौर्बल्यमपकर्षो वा सर्वेषामेव सम्मतः ।

तथाहि बौद्धमते परोक्षज्ञानमनुमितिरूपं समारोपितसामान्यलक्षणविषयत्वेनार्थक्रियासमर्थस्वलक्षणविषयकप्रत्यक्षज्ञानादपकृष्टम् । विकल्परूपोऽनर्थ एव अनुमानस्य ग्राह्यः । अनुमानस्य प्रवृत्तिविषयस्तु अध्यवसितं स्वलक्षणमेव ।[3]

जैनमते परोक्षज्ञानं मतिश्रुतिरूपं विशिष्टवैशद्याभावात् प्रत्यक्षज्ञानादपकृष्टम् । तन्मते सांव्यवहारिकप्रत्यक्षाणामपीन्द्रियसापेक्षत्वादिन्द्रियव्यवहितत्वाच्च मतिरूपपरोक्षत्वमेव । यद्यपि संव्यवहारापेक्षया देशतो वैशद्यसम्भवादिन्द्रियज्ञानमपि प्रत्यक्षमिति व्यवह्रियते, तथापि मुख्यं प्रत्यक्षत्वं वैशद्यप्रकर्षयोगादिन्द्रियानपेक्षाणामवधि-मनःपर्यय-केवलज्ञानामेव ।[4] तस्मात् तन्मते इन्द्रिजन्यप्रत्यक्षसहितानां श्रुतादिपरोक्षज्ञानानां विशिष्टवैशद्याभावादेव प्रत्यक्षज्ञानान्न्यूनत्वं दौर्बल्यञ्च । तदुक्तम्—'विशदं प्रत्यक्षम्', 'अस्पष्टं परोक्षम्'[5] इत्यादौ । तत्र प्रतीत्यन्तराव्यवधानेन विशेषवत्त्वया वा प्रतिभासनं वैशद्यम्, तदभावः अस्पष्टत्वम् ।

---

1 Yo. sū. bhā. 1. 7

2 Pari. mu. su. 2. 3 ; Pra. na. tattvā 3. 1

3 Nyā. bin. ṭīkā p. 22-25 (chow.)

4 Tattvā. vṛ. 1. 12

5 Pari. mu. sū. 2. 3. ; Pra. na. tattvā. 3. 1

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तार्किकाणां नैयायिकवैशेषिकाणां मतयोरिन्द्रियसन्निकर्षजन्यत्वात् ज्ञाना-करणत्वाच्च प्रत्यक्षस्योत्कर्षवत्त्वादिन्द्रियसन्निकर्षाजन्यत्वाज् ज्ञानान्तरसापेक्षत्वाच्चैव परोक्षज्ञानानामपकर्षः ।

भाट्टमतेऽपि विषयेन्द्रियसम्प्रयोगाभावादेव परोक्षज्ञानामपकर्षः ।

प्राभाकरमते तु साक्षात्करोमीतिप्रतीतिसिद्धसाक्षादनुभूतित्वमेव प्रत्यक्षस्योत्कर्षहेतुत्वात्[6] साक्षात्त्वाभाव एव परोक्षज्ञानानां न्यूनत्वे हेतुः । परोक्षज्ञानानां ज्ञानान्तरसापेक्षत्वं तु सर्वेषामेवापकर्षहेतुर्बोध्यः ।

रामानुजमतेऽपि नेन्द्रियजन्यत्वमपि तु साक्षात्कारित्वमेव प्रत्यक्षत्वप्रयोजकम् । तेनेन्द्रियाजन्यमुक्तप्रत्यक्षेश्वरप्रत्यक्षाणामपि संग्रहः । तस्मात् साक्षात्कारित्वाभावादेव परोक्षज्ञानानां प्रत्यक्षज्ञानान्न्यूनत्वमिति बोध्यम् । अत्र साक्षात्त्वं न जैनमतवद् वैशद्यमपि तु लैङ्गिकत्वशाब्दत्वस्मृतित्वरहितज्ञानत्वमित्यपि बोध्यम् ।[7]

सांख्यपातञ्जलमतयोः परोक्षस्थले विषयदेशे विषयं व्याप्य चित्तवृत्तेरभावादन्तर्देशे एव चित्तवृत्तिजननात् सामान्यावधारणात्मकत्वादेव परोक्षज्ञानानां विशेषावधारणात्मकप्रत्यक्षाद्दौर्बल्यं न्यूनत्वञ्च । अत एवोक्तं योगभाष्ये— 'विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षम् ।'[8]

सांख्यसूत्रेऽपि 'यत् सम्बद्धं सत् तदाकारोल्लेखि विज्ञानं तत् प्रत्यक्ष'मित्यत्र बुद्धेरिन्द्रियद्वारा बाह्यार्थसन्निकर्षानन्तरं विषयाकारोल्लेखिज्ञानस्य प्रत्यक्षत्वकथनात्[9] बाह्यार्थ-वृत्तिसम्बन्धाभावाद् वृत्तौ विषयाकारानुल्लेख एव परोक्षज्ञानानामनुमितिशाब्दबोधानां प्रत्यक्षादपकर्षः । 'प्रत्यक्षसामान्ये बाह्यार्थसाधारणे बुद्ध्यर्थसन्निकर्ष एव कारणम् । इन्द्रियसन्निकर्षास्तु चाक्षुषादिप्रत्यक्षेषु विशिष्यैव कारणानि'[10] इत्युक्तं विज्ञानभिक्षुणा सांख्यसूत्रभाष्ये ।

अद्वैतवेदान्तमते तु विषयचैतन्यस्य वृत्त्यवच्छिन्नचैतन्याभिन्नत्वमेव प्रत्यक्षत्वप्रयोजकमतो 'विषयचैतन्यस्य वृत्तिचैतन्याभेदाभाव एव परोक्षज्ञानानां प्रत्यक्ष-

---

6 Pra. pañ. ch. 5. p. 146-47 (B. H. U)

7 Yat. mat. dīp. p. 4-5 (Ananda Asram)

8 Yo. sū. bhā. 1.7

9 Sā. sū. 1.89

10 Sā. sū. bhā. 1.91



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



ज्ञानाद्यपकर्षहेतुः । अनुमितिशाब्दबोधोपमित्यर्थापत्तिरूपपरोक्षज्ञानस्थले बुद्धिवृत्तेर्बहिर्विषयदेशे निर्गमनाभावान्न विषयचैतन्यस्य वृत्तिचैतन्याभिन्नत्वं भवति ।[11] तन्मते भाट्टमतवद्योग्यप्रतियोग्यनुपलब्धेरप्यभावग्राहकप्रमाणान्तरत्वेनाभावानुभवस्य इन्द्रियाकरणकत्वेऽपि न परोक्षज्ञानत्वमपि त्वपरोक्षत्वमेव ; तत्रापि अधिकरणप्रत्यक्षस्येन्द्रियजन्यत्वात् बुद्धिवृत्तेर्बहिर्निर्गमनेनाभावावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्येनाभेदात् । अभावानुमित्यादिपरोक्षस्थले तु नैवमभेद इति बोध्यम् ।

## अनुमितौ मनस्तत्त्वम्

ये पदार्था इन्द्रियग्राह्यत्वाभावात् प्रत्यक्षेण न गृह्यन्ते, ये चेन्द्रियग्राह्यत्वयोग्यत्वेऽपि कदाचिदिन्द्रियसन्निकर्षाद्यभावान्न प्रत्यक्षेण गृह्यन्ते, ते सर्वे कैश्चिल्लिङ्गैः साधनभूतैः साध्यत्वेनानुमातुं शक्यन्ते । लोकयात्रानिर्वाहे प्रत्यक्षवदनुमितेरप्यपरिहार्यत्वं दृष्टमेव । चार्वाकमेकं विहाय सर्वे एव वादिनोऽनुमितेः प्रामाण्यं स्वीकुर्वन्ति । बौद्धवैशेषिका हि शाब्दबोधमप्यनुमितौ अन्तर्भावयन्ति ।[1] केचिद्वा प्रत्यक्षमप्यनुमितावन्तर्भावयितुं दुःसाहसं कुर्वन्ति ।[2] सर्वथापि सर्वैरेव प्रेक्षावद्भिरनुमितेः प्रामाण्यं प्राधान्यञ्च स्वीकृतमेव । सेयं दीपज्वालेत्यादिस्थले प्रत्यक्षेणाभेदावगमेऽप्यनुमित्या ज्वालाभेदावगमात् क्वचित् प्रत्यक्षादपि प्राबल्यमनुमितेः स्वीकार्यमिति ।

ये तु चार्वाकाः स्वभाववादिनश्च अज्ञाते देशे काले वा व्यभिचारसम्भवात् व्यभिचारशङ्कया साध्यसाधनयोर्व्याप्तिनिश्चयस्यैवानुमितिकारणभूतस्यासम्भवादनुमितेरपि न सम्भवः कथञ्चिदनुमितिसम्भवेऽपि संशयात्मकत्वान्न तस्य प्रामाण्यमिति वदन्ति, ते घट्टकुट्टिप्रभातन्यायेन पुनरनुमितिमेव शरणं व्रजन्तः अनुमानप्रामाण्यमेव स्थापयन्ति । न हि प्रत्यक्षेण यावदनुमितिव्यक्तीनामनुत्पत्तिरप्रामाण्यं वा ज्ञातुं शक्यते । केनचिदनुमितिव्यक्तिनिदर्शनेन तैरन्यासामपि तदनुमितेः । अज्ञातदेशकालानाञ्चानुमित्यैवावगमादिति दिक् ।

---

11 Vedā. pari. p. 22, 23 (Chow.)

1 Tattva. Saṃ.--1515 ; Nyā. sū. 2.1. 49-51 (Ananda Asram)

2 Nyā. sū. bhā. 2.1.30

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रकारान्तरेणाप्यनुमितेरप्रमात्वमनुमानस्याप्रामाण्यं वा शङ्क्यते ; यथोक्तं न्यायसूत्रे—'रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाण'[3]मिति । उक्तञ्च तद्व्याख्यानं वात्स्यायनेन भाष्ये—रोधादपि नदी पूर्णा गृह्यते, तदा चोपरिष्टाद् वृष्टो देव इति मिथ्याऽनुमानम् । नीड़ोपघातादपि पिपीलिकाण्डसञ्चारो भवति, तदा च भविष्यति वृष्टिरिति मिथ्याऽनुमानमिति । पुरुषोऽपि मयूरवासित-(रुत-) मनुकरोति, तदापि सादृश्यान्मिथ्याऽनुमानं भवती'[4]ति । तथा च प्रायशः व्यभिचारादनुमानं न प्रमाणमिति भावः ।

आशङ्का च निराकृता सूत्रभाष्ययोः । तदुक्तं भाष्ये—'नायमनुमानव्यभिचारः । अननुमाने तु खल्वयमनुमानाभिमानः । कथम् ? नाविशिष्टो लिङ्गं भवितुमर्हति । पूर्वोदकविशिष्टं खलु वर्षोदकं शीघ्रतरत्वं स्रोतसो बहुतरफेन-फलपर्ण-काष्ठादिबहुलञ्चोपलभमानः पूर्णत्वेन नद्या उपरि वृष्टो देव इत्यनुमितिर्नोदकवृद्धिमात्रेणे'[5]त्यादि ।

भूत-वर्तमान-भविष्यत्पदार्थविषयत्वादनुमितिस्त्रिकालविषया वेदितव्या । लिङ्गमपि साधनरूपं अतीतवर्तमानानागतकालीनं त्रिविधमेव भवितुमर्हति । लिङ्गज्ञानं त्वनुमितिकारणतया अनुमितिपूर्ववर्तित्वेन वर्तमानमेवानुमितिं जनयतीति लिङ्गज्ञानमेवानुमितौ कारणमुक्तं न तु लिङ्गम्, अतीतानागतलिङ्गस्थले लिङ्गाभावादनुमित्यनुत्पत्तिप्रसङ्गात् ।[6]

एवं च कस्यचित् पुरुषस्य क्वचिद् धूमादिलिङ्गज्ञानान्तरं तेन लिङ्गेन अव्यभिचरितसाहचर्यरूपव्याप्तिसम्बन्धेन सम्बद्धस्याग्नेः तत्सम्बन्धस्य व्याप्तेश्च स्मरणं भवति—'यो यो धूमवान् स वह्निमानि'ति । सम्बन्धज्ञानवतः एकसम्बन्धिज्ञानमपरसम्बन्धिनः सम्बन्धस्य च स्मारकमिति नियमात् । तदनन्तरं वह्निव्याप्तिविशिष्टधूमवानयमिति तत्र ( पक्षे पर्वतादौ ) व्याप्तिविशिष्टलिंगपरामर्शो भवति । तदनन्तरं च पर्वतोऽयं वह्निमानिति तस्य स्वानुमिति र्भवति । तत्र लिङ्गदर्शनं लिङ्गज्ञानं वा प्रथमक्षणवर्ति कारणम् ; व्याप्तिस्मरणमेवासाधारणकारणत्वाल्लिङ्गपरामर्शरूपव्यापारवत्त्वाच्चाऽनुमितौ करणमनुमानप्रमाणमुच्यते । तादृशकरणजन्यलिङ्गपरामर्शो व्यापार उच्यते । कार्यं तु तत्रानुमितिरेवेति[7] तार्किकाणामनुमितिप्रक्रिया ।

---

3 Nyā. sū. 2. 1. 37

4 Nyā. sū. bhā. 2. 1. 37

5 Nyā. sū. bhā. 2. 1. 38

6 Bhā. pari. p. 284-87 (N. S.)

7 Sid. muk. p. 284-86 (N. S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



व्याप्तिज्ञानस्यैवानुमितावसाधारणकारणत्वाद् व्याप्तिग्रहोपायोऽपि ज्ञानप्रक्रियारूपत्वान्मनोविद्यायामालोचनीयः। भूयोदर्शनं नाम भूयः सहचारदर्शनमेव व्याप्तिग्रहहेतुरिति केचित् प्राचीना अवदन्। किन्तु सकृद्व्यभिचारदर्शने शतशः सहचारदर्शनमपि व्याप्तिज्ञानं न जनयतीति व्यभिचारज्ञानाभावसहकृतसहचारज्ञानमेव व्याप्तिग्रहे कारणमिति नवीनमतम्। व्यभिचारज्ञानाभावे सति क्वचित् सकृत् सहचारज्ञानमपि व्याप्तिज्ञानं जनयतीति सहचारदर्शनमात्रं कारणम्, सकृद् वा भूयो वेति नादरणीयम्। तदुक्तं गङ्गेशेनानुमानचिन्तामणौ व्याप्तिग्रहोपाये—'व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम्।'[8] उक्तञ्च विश्वनाथेन—

'व्यभिचारस्याग्रहोऽथ सहचारग्रहस्तथा।
हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः॥

क्वचिद् व्यभिचारशङ्काविधूननद्वारा भूयोदर्शनमप्युपयुज्यते। यत्र तु भूयोदर्शनादपि शङ्का नापैति तत्र विपक्षे बाधकस्तर्कोऽपेक्षितः।'[9]

यदि तु अज्ञाते देशे काले वा व्यभिचारशङ्का व्याप्तिग्रहं प्रतिबध्नीयात् तदा अनिष्टव्याप्यारोपेणानिष्टव्यापकारोपलक्षणस्तर्को व्यभिचारशङ्कानिवर्तको भवतीत्यर्थः। यदि व्यभिचारशङ्का नोदेति तदा तर्कोऽपि नापेक्ष्यते। यद्यपि सहचारदर्शनं न सकलवह्निधूमव्यक्तीर्विषयीकरोति तथापि 'धूमो वह्निव्याप्यः' इत्यादिव्याप्तिग्रहे सकलवह्निधूमानां भानं सामान्यलक्षणालौकिकसन्निकर्षेणैवेति नव्यनैयायिकानां मतम्।

जैनमते तु ऊहरूपेण मतिज्ञानेनैव कतिपयवह्निधूमसहचारदर्शनात् सकलवह्निधूमविषयकं व्याप्तिज्ञानं जायते। तदुक्तं भास्करनन्दिना तत्त्वार्थवृत्तौ—'देशान्तरे कालान्तरे च यावान् कश्चिद्धूमः सर्वोऽप्यग्निजन्मा, अनग्निजन्मा वा न भवतीति व्याप्तिग्रहणमूहाख्यं सम्यग्ज्ञानं कथ्यते।'[10]

यद्यपि लिङ्गज्ञान-व्याप्तिस्मरण-लिङ्गपरामर्शेभ्य एव स्वार्थानुमितिर्जायते, तथापि परं प्रत्याययितुं परार्थानुमितिः पञ्चावयवात्मकं न्यायप्रयोगमपेक्षते। तथाहि प्रथमं प्रतिज्ञावाक्यं (१) पर्वतो वह्निमानिति। द्वितीयं हेतुवाक्यं

---

8 Tattvacintāmani-Vyāptigrahopāya.
9 Bhā. pari ; muktā p. 489-91 (N. S.)
10 Tattvā. vṛ. 1.13

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



(२) धूमादिति। तृतीयमुदाहरणवाक्यं (३) यो यो धूमवान् स वह्निमान्, यथा महानसमिति। चतुर्थमुपनयवाक्यं (४) तथा चायमिति (वह्निव्याप्यधूमवानयं पर्वतः)। पञ्चमं निगमनवाक्यं (५) तस्मात् तथा (तस्मात् वह्निमान् पर्वतः)। एतेभ्यः पञ्चावयववाक्येभ्यः परोऽपि धूमेन लिङ्गेन पर्वते वह्निमनुमिनोतीति पञ्चावयववाक्यानि परस्यानुमितिहेतुर्भवन्ति। अत्रापि उदाहरणवाक्याज्जातं व्याप्तिज्ञानमेव करणम्; उपनयवाक्याज्जातः लिङ्गपरामर्शश्च व्यापार इति बोध्यमिति नव्यतार्किकाणां मतम्।

अद्वैतवेदान्तमते तु स्वार्थानुमितिस्थले लिङ्गदर्शनाद् व्याप्तिसंस्कारोद्बोधे सति तस्मादेव पर्वतो वह्निमानित्यनुमितिसम्भवे पूर्वभूतव्याप्तिज्ञानं करणं तत्संस्कारोऽवान्तरव्यापारः, लिङ्गदर्शनेन व्याप्तिसंस्कारोद्बोधश्च सहकारिकारणमित्यनुभवसिद्धं कारणत्वकल्पनालाघवञ्च। क्वचिद् व्याप्तिस्मृतिपरामर्शसत्त्वेऽपि सर्वत्रानुमितौ तदभावात् तयोः कारणत्वकल्पनं निरर्थकम्।[11] परार्थानुमितिस्थलेऽपि पञ्चावयववाक्यानां प्रेक्षावतां निष्प्रयोजनत्वेन प्रतिज्ञाहेतूदाहरणरूपस्योदाहरणोपनयनिगमनरूपस्य वाऽवयवत्रयस्यैव पर्याप्तत्वात् तेनैव व्याप्ति-पक्षधर्मताज्ञानसम्भवात् परस्यानुमितिर्जायते इति पञ्चावयवापेक्षाकल्पनं वस्तुस्थितिविरुद्धं गौरवदोषग्रस्तञ्च।[12] व्याप्तिग्रहश्च व्यभिचारादर्शने सति सहचारदर्शनादेव जायते। तच्च सहचारदर्शनं भूयोदर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः, सहचारदर्शनस्यैव प्रयोजकत्वात्।[13]

बौद्धानां मतेऽपि स्वार्थं परार्थं चेति द्विविधमनुमानम्। 'तत्र स्वार्थं त्रिरूपलिङ्गाद् यदनुमेये ज्ञानं तदनुमानम्'[14] इति धर्मकीर्तिनोक्तम्। उक्तञ्च धर्मोत्तरेण टीकायाम्—'त्रिरूपाल्लिङ्गाद् यदुत्पन्नमनुमेयालम्बनं ज्ञानं तत् स्वार्थमनुमानमिति।'[15] त्रैरूप्यं पुनर्लिङ्गस्य—'(१) लिङ्गस्यानुमेये(साध्यविशिष्टपक्षे) सत्त्वमेव। (२) सपक्षे एव सत्त्वम्। (३) असपक्षे चासत्त्वमेव निश्चितम्।'[16] एवं तन्मते लिङ्गस्य हेतोः सपक्षसत्त्व-विपक्षासत्त्व-(साध्यविशिष्ट) पक्षवृत्तित्वनिश्चयादेवानुमेये स्वार्थानुमिति र्भवति।

---

11 Vedā. pari. p. 78-81 (chow.)
12 Ibid. p. 92-93
13 Ibid. p. 83
14 Nyā bin. p. 29 (chow.)
15 Nyā bin. ṭikā p. 30
16 Nyā bin. p. 30-31

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अविनाभावनियमस्य व्याप्तेः स्वभावमूलकत्वात् कार्यकारणभावमूलकत्वाच्च नानवगतदेशकाले व्यभिचारशङ्का भवति। तदुक्तं––'कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्, अविनाभावनियमो'[17]...इत्यादि।

परार्थानुमानेऽपि त्रिरूपलिङ्गस्यैवाख्यानमपेक्षितम्। तदुक्तं धर्मोत्तरेण—'त्रीणि रूपाण्यन्वय-व्यतिरेक-पक्षधर्मत्वसंज्ञकानि यस्य तत् त्रिरूपम्।...... वचनेन हि त्रिरूपं लिङ्गमाख्यायते। परस्मै इदं परार्थम्।'[18]

जैनमते तु अल्पप्रज्ञानां व्युत्पत्त्यर्थमुदाहरणोपनयनिगमनरूपावयवत्रयस्य क्वचित् प्रयोगदर्शनेऽपि व्युत्पन्नानां वादे तेषामनुपयोगित्वान्नानुमितौ पञ्चावयवानामवयवत्रयस्य वा अपेक्षा, पक्ष-हेतुनिर्देशरूपादवयवद्वयादेव व्युत्पन्नस्यानुमितिसम्भवादवयवद्वयमेव अनुमितिहेतुत्वेनापेक्षितम्। उक्तञ्च माणिक्यनन्दिना परीक्षामुखसूत्रेषु, प्रमेयरत्नमालायां चानन्तवीर्येण—'पक्ष-हेतु-दृष्टान्त-भेदेन त्र्यवयवमनुमानमिति सांख्यः। प्रतिज्ञाहेतूदाहरणापनयभेदेन चतुरवयवमिति मीमांसकः। प्रतिज्ञाहेतूदाहरणोपयनिगमनभेदात् पञ्चावयवमिति यौगः। तन्मतमपाकुर्वन् स्वमतसिद्धावयवद्वयमेवोपदर्शयन्नाह'[19]—(सूत्राणि-) 'एतद्द्वयमेवानुमानाङ्गं नोदाहरणम्॥ न हि तत् साध्य-प्रतिपत्त्यङ्गं, तत्र यथोक्तहेतोरेव व्यापारात्॥ (न)तदविनाभावनिश्चयार्थं वा, विपक्षे बाधकादेव तत्सिद्धेः॥'[20] -सूत्रार्थास्तु स्पष्टा एव। 'ननु दृष्टान्तादिकमन्तरेण मन्दधियामवबोधयितुमशक्यत्वात् कथं पक्षहेतुप्रयोगमात्रेण तेषां साध्यप्रतिपत्तिरिति? तत्राह सूत्रम्—'बालव्युत्पत्त्यर्थं दृष्टान्तोपनयनिगमनत्रयाभ्युपगमे शास्त्र एवासौ न वादेऽनुपयोगात्॥'[21] बालानामल्पप्रज्ञानां व्युत्पत्त्यर्थं तेषामुदाहरणादीनां त्रयोपगमे शास्त्रे एवासौ तस्योपगमो न वादे। न हि वादकाले शिष्या व्युत्पाद्याः, व्युत्पन्नानामेव तत्राधिकारात्।'

एवं मतभेदेनानुमितिरूपपरोक्षज्ञाने बुद्धिप्रक्रिया ज्ञानप्रक्रिया वा प्रदर्शिता।

---

17 Sarva. dar. sam. (Bauddha)
18 Nayā. bin. ṭikā, 3. 1 (p. 61 chow.)
19 Pra. rat. mā. 3. 33
20 Pari. mu. sū. 3. 33, 34, 35
21 Pari. mu. sū. ; Pra. rat. mā. 3. 42

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## शाब्दबोधे मनस्तत्त्वम्

अनुमितावेवान्तर्भावसम्भवाच्छाब्दबोधो न पृथक् प्रमितिर्न वा तत्करणं पृथक् प्रमाणमिति बौद्ध-वैशेषिकाणां मतम्। वाक्यरूपलिङ्गज्ञानेन विवक्षाया अनुमितिसम्भवाद् वाक्यार्थज्ञानं न पृथक् प्रमितिः, अपि त्वनुमितिरेव। शब्दज्ञानस्य वाक्यज्ञानस्य वा पृथक् प्रमाणत्वे सङ्केतज्ञानाभावेऽपि शब्दो स्वार्थं प्रकाशयेत्।

तदुक्तं शान्तरक्षितेन तत्त्वसंग्रहे—

'भूतार्थद्योतने शक्तिः प्रकृत्यैव स्थिताऽस्य चेत्।
अज्ञातसमयस्यापि भवेदर्थगतिस्ततः॥
प्रकृत्या दीपको दीपो न सङ्केतमपेक्ष्यते।
समयान्तरभावे च न स्यादर्थान्तरे गतिः॥'[1]

तस्मात्—'न प्रमाणान्तरं शाब्दमनुमानात् तथा हि तत्।
कृतकत्वादिवत् स्वार्थमन्यापोहेन भाषते॥'[2]

अतएव—'...न द्वयादन्यत् प्रमाणमुपपद्यते।
प्रमाणलक्षणायोगाद् योगे चान्तर्गमादिह॥
...वचोभ्यो निखिलेऽभ्योऽपि विवक्षैवाऽनुमीयते।
प्रत्यक्षानुमानाभ्यां तद्धेतुः सा हि निश्चिता॥
विवक्षायां च गम्यायां विस्पष्टैव त्रिरूपता।
पुंसि धर्मिनि सा साध्या कार्येण वचसा यतः॥'[3]

कार्येण वचसा लिङ्गेन पुंसि धर्मिणि (पक्षे) विवक्षा (वाक्यार्थः) अनुमेया इति भावः। अपि च—

'द्वेषमोहादयो दोषा यथा मिथ्यात्वहेतवः।
कृपाप्रज्ञादयोऽप्येवं ज्ञाताः सत्यत्वहेतवः॥
तदाश्रयनराभावे न तयोरपि सम्भवः।
आनर्थक्यमतः प्राप्तं वचस्यपुरुषाश्रये॥'[3a]

इत्यादिनाऽपौरुषेयवाक्यस्य (वेदस्य) आनर्थक्यमुक्तम्।

---

1 Tattva. saṃ. (Baroda)—Verse 1505-6
2 Tattva. saṃ. Pañjikā,—1515
3 Tattva. saṃ. 1488 ; 1515, 1521
3a Ibid. 1502-3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तथा वैशेषिका अपि शाब्दबोधं लैङ्गिकज्ञाने अनुमितावन्तर्भावयन्ति। तथा चोक्तं कणादेन वैशेषिकसूत्रे—'एतेन शाब्दं व्याख्यात'मिति।[4] एतेन—लैङ्गिकज्ञानकथनेन शाब्दं शब्दज्ञानजन्यं ज्ञानमपि कथितमित्यर्थः। उक्तञ्च प्रशस्तपादेन भाष्ये—'शब्दादीनामप्यनुमानेऽन्तर्भावः समानविधित्वात्। यथा प्रसिद्धसमयस्यासन्दिग्धलिङ्गदर्शन-प्रसिद्धयनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेवं शब्दादिभ्योऽपि।'[5] व्याख्यातञ्च श्रीधरेण कन्दल्याम्—'यथा व्याप्तिबलेनानुमानं प्रवर्तते, तथा शब्दादयोऽपीत्यर्थः। शब्दोऽनुमानं व्याप्तिबलेनार्थप्रतिपादकत्वाद् धूमवत्।...पुरुषो धर्मी ककुदादिमदर्थविवक्षावान् गोशब्दोच्चारणकर्तृत्वादहमिवेति।'[6] एवं बौद्धवैशेषिकाणां मतयोः शाब्दज्ञानमनुमितिरेव, पुरुषे धर्मिणि तादृशशब्दोच्चारणकर्तृत्वेन हेतुना तादृशविवक्षाया अनुमितिसम्भवात्।

गौतमेन तु न्यायसूत्रकारेण तन्मतं न स्वीकृतम्। तदुक्तं सूत्रे—'आप्तोपदेशसामार्थ्याच्छब्दादर्थे सम्प्रत्ययः।'[7] व्याख्यातञ्च वात्स्यायनेन भाष्ये—'स्वर्गः, अप्सरसः, उत्तराः कुरवः, सप्त द्वीपाः, समुद्रः, लोकसन्निवेशः इत्येवमादेरप्रत्यक्षस्यार्थस्य न शब्दमात्रात् प्रत्ययः। किं तर्हि? आप्तैरयमुक्तः शब्दः, इत्यतः सम्प्रत्ययः। विपर्ययेण सम्प्रत्ययाभावात्। न त्वेवमनुमानम्।......अयमेव शब्दानुमानयोरुपलब्धेः प्रवृत्तिभेदः। तत्र विशेषे सति अहेतुर्विशेषाभावादिति।...अस्ति च शब्दार्थयोः सम्बन्धोऽनुज्ञातः, अस्ति च प्रतिषिद्धः।...प्राप्तिलक्षणस्तु शब्दार्थयोः सम्बन्धः प्रतिषिद्धः।'[8]

पुनश्चोक्तं वात्स्यायनेन—'न, सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्ये'[9]ति सूत्रभाष्ये—'न सम्बन्धकारितं शब्दार्थव्यवस्थानम्। किं तर्हि? समयकारितं यत् तदवोचाम ;...कः पुनरयं समयः? अस्य शब्दस्येदमर्थजातमभिधेयमित्यभिधानाभिधेयनियमनियोगः। तस्मिन्नुपयुक्ते शब्दादर्थसम्प्रत्ययो भवति। विपर्यये हि शब्दश्रवणेऽपि प्रत्ययाभावः' इति। एवञ्च स्वाभाविकसम्बन्धरूपव्याप्तेरभावात् साङ्केतिकसम्बन्धमात्रस्य च सद्भावान्न शब्दादर्थप्रतीतिरनु-

---

4 Vai sū. 9. 2. 3

5 Pra. bhā. p. 512 (Varanasi Sanskrit Viśvavidyalaya)

6 Nyā. Kan. p. 512, 515 (V. S. V.)

7 Nyā· sū. 2. 1. 50

8 Nyā. sū. bhā. 2. 1. 52

9 Nyā. sū. 2. 1. 55

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



मितिः, अपि तु पृथगेव प्रमितिः शाब्दबोध इति वेदितव्यम्। उक्तं हि वात्स्यायनेन—'सामयिकः शब्दार्थसम्प्रत्ययः, न स्वाभाविकः। ऋष्यार्यम्लेच्छानां यथाकामं शब्दविनियोगोऽर्थप्रत्यायनाय प्रवर्तते। स्वाभाविके हि शब्दस्यार्थप्रत्यायकत्वे यथाकामं न स्यात्; यथा तैजसस्य प्रकाशस्य रूपप्रत्ययहेतुत्वं न जातिविशेषे व्यभिचरती'ति।[10] स्वाभाविकसम्बन्धाभावश्चोक्तः सूत्रेण—'पूरण-प्रदाह-पाटनानुपलब्धेश्च सम्बन्धाभावः' इति।'[11] यदि शब्दानामर्थैः स्वाभाविकः सम्बन्धः स्यात् तदा अन्नाग्न्यसिशब्दोच्चारणे (उदर-)पूरणप्रदाह-पाटनानि गृह्येरन् इत्यर्थः।

नव्यास्तु नैयायिकाः शाब्दबोधप्रक्रियां प्राहुः—

'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥'[12]

पदसमूहरूपस्य वाक्यस्य ज्ञानमेव प्रायशः[13] प्रत्यक्षात्मकं शाब्दबोधस्यासाधारणं व्यापारवद्वा कारणं भवति। शक्तिलक्षणाऽन्यतरवृत्त्या पदजन्यपदार्थस्मृतिरेव तत्र व्यापारः। अत्रैव पदजन्यपदार्थस्मृतौ शक्तिज्ञानं सहकारितया कारणं भवति। पद-पदार्थसम्बन्धज्ञानरूपशक्तिज्ञानं विना पदार्थस्मृत्यसम्भवात्।

स च पदपदार्थसम्बन्धो न स्वाभाविकः, अपि तु अस्मात् पदादयमर्थो बोद्धव्य इति सङ्केतरूपः। मीमांसकमते तु शब्दस्य नित्यत्वात् नित्यशब्देन सह अर्थस्य जातेः सम्बन्धः स्वाभाविक एव नित्यः। सर्वथापि पदार्थानामन्वयबोधरूपशाब्दबोध एव तत्र परोक्षप्रमितिरूपं कार्यं भवति।

शब्दप्रमाणजन्यवाक्यार्थज्ञाने सन्निधियोग्यताकाङ्क्षाज्ञानमपि सहकारिकारणरूपेणापेक्षितम्। तथाहि—प्रहरे प्रहरे उच्चार्यमानानि गामानयेत्यादि पदानि सन्निधिज्ञानाभावान्न शाब्दबोधं जनयन्ति। तथा वह्निना सिञ्चतीत्यादिपदानि योग्यताज्ञानाभावात्, गां हस्ती दण्डेनेत्यादिपदान्याकाङ्क्षाज्ञानाभावान्न शाब्दबोधं जनयन्ति पदज्ञान-शक्तिज्ञान-सत्त्वेऽपि। यत्र द्व्यर्थबोधकशब्द-

---

10 Nyā. sū. bhā. 2. 1. 56 (Ananda Asram)

11 Nyā. sū. 2. 1. 53

12 Bhā. pari. p, 356 (N. S.)

13 द्वारमित्यादौ पिधेहीति अनुमितपदज्ञानादपि शाब्दबोधसम्भवात्।



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रयोगात् कारणान्तराद्वा वाक्यार्थे संशयस्तत्रतात्पर्यज्ञानमपि शाब्दबोधे हेतुः ; यथा सैन्धवमानय इत्यादि वाक्यं प्रकरणादिना तात्पर्यज्ञाने सति लवणमश्वं वा बोधयति तात्पर्यानुसारेण । सर्वत्रैव शाब्दबोधे तात्पर्यज्ञानं कारणमित्यपि केचिद् वदन्ति । तात्पर्यं हि तार्किकमते वक्तुरभिप्रायः, मीमांसकमते तादृशप्रतीतिजननयोग्यत्वं बोध्यम् ।

अत्र स्मृतानामर्थानां पदैरभिहितानामाकाङ्क्षायोग्यतादिवशात् युगपत् क्रमशो विशिष्टवैशिष्ट्यरीतया वा अन्वयबोधो भवतीति अभिहितान्वयवादिनां नैयायिकप्रभृतीनां मतम् ।[14] वृद्धव्यवहारात् कार्यान्वितस्वार्थे अन्वितस्वार्थे वा पदानां शक्त्यवधारणादन्वितानामेवार्थानां पदैः स्मरणात् तेनैव प्रकारेण सकलपदार्थानामन्वयबोध इत्यन्विताभिधानवादिनां मीमांसकादीनां मतम् ।[15]

ननु वर्णानां क्षणिकत्वेन (द्विक्षणस्थायित्वेन) क्रमश उच्चारितानामेकत्र समुदायासम्भवात्, प्रत्येकवर्णस्यार्थप्रत्यायकत्वे शेषवैयर्थ्यात्, क्रमभाविनीनां वर्णस्मृतीनामपि द्विक्षणस्थायित्वेन क्रमशो विनाशात् कथं पदज्ञानादर्थबोध इति चेन्न । तत्तद्वर्णसंस्कारसहितान्त्यवर्णप्रत्ययस्यैवार्थप्रत्यायकत्वान्न किञ्चिदनुपपन्नम् ।

## स्फोटवादे मनस्तत्त्वम्

केचित्तु पाणिनि-पतञ्जलि-भर्तृहरिप्रभृतयः तावद्वर्णाभिव्यङ्ग्यान् नादाभिव्यङ्ग्याद्वा स्फोटाद् बुद्धिग्राह्यादेवार्थप्रत्यय इति वदन्ति । तेषां मतं निरूप्यते । कस्तर्हि शब्दो योऽर्थं प्रत्याययति । 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः । अथवा प्रतीतपदार्थको लोके ध्वनिः, शब्द इत्युच्यते'[1] इति पाणिनीयमहाभाष्यकारमतम् । योगसूत्रभाष्येऽप्युक्तं व्यासेन—'वाक् वर्णेषु एवार्थवती, श्रोत्रं च ध्वनिपरिणाममात्रविषयम् । पदं

14 Nyā. mañ p. I. p. 364-5 (chow.)
15 Ibid. p. I. p. 368
1 Pāṇini-mahābhāṣya., 1. 1. 1

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पुनर्नादानुसंहारबुद्धिनिर्ग्राह्यम्'[2] —इति । वाचकं पदं न श्रोत्रग्राह्यमपि तु श्रोत्रग्राह्यवर्णाभिव्यङ्ग्यमेकत्वापादकबुद्धिमात्रग्राह्यमित्यर्थः । पुनश्चोक्तं तेनैव —'तदेतेषामर्थसंकेतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणां य एको बुद्धिनिर्भास-स्तत्पदं वाचकं वाच्यस्य संकेत्यते । तदेकं पदमेकबुद्धिविषयैकप्रयत्नाक्षिप्तम-भागमक्रमवर्णं बौद्धमन्त्यवर्णप्रत्ययव्यापारोपस्थापितम्……।'[3]

अयमेव बुद्धिनिर्ग्राह्योऽविभाज्योऽवर्णात्मकः वाचकशब्दः स्फोट इत्युच्यते । स तु तत्तद्वर्णसंस्कारसहितान्त्यवर्णप्रत्ययेन बुद्धौ अभिव्यज्यते । एकप्रयत्नाक्षिप्तशब्दस्फोटवत्तैः वाक्यस्फोटोऽपि स्वीक्रियते । तदुक्तं तत्रैव व्यासपादैः— 'सर्वपदेषु चास्ति वाक्यशक्तिर्वृक्ष इत्युक्तेऽस्तीति गम्यते… ।'

उक्तञ्च नागेशभट्टेन परमलघुमञ्जुषायां—'ननु कस्तर्हि वृत्त्याश्रयः शब्दः ? स स्फोटात्मक इति गृहाण ।……चतुर्विधा हि वागस्ति—परा पश्यन्ती मध्यमा वैखरी च । तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते । नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते । एतद्द्वयं वाग् ब्रह्मयोगिनां समाधौ निर्विकल्पक-सविकल्पकज्ञानविषय इत्युच्यते । ततो हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थवाचकस्फोटरूपा श्रोत्र-ग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिग्राह्या मध्यमा वागुच्यते । तत आस्यपर्यन्त-मागच्छता तेन वायुनोर्ध्वमाक्रमंता च मूर्धानमाहत्य परावत्य च तत्तत्स्थानेष्व-भिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते । तदाह—

'……वैखर्या हि कृतो नादः परश्रवणगोचरः ।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ।।'[4]

एतत् स्फोटतत्त्वं विस्तारेण निरूपितं श्रीधरेण न्यायकन्दल्यां पूर्व-पक्षरूपेण । तदुक्तं—'एके वदन्ति स्फोटोऽर्थं प्रतिपादयतीति ।……यदि हि वर्णानतिरिक्तं पदं पदानतिरिक्तं वाक्यम्, तदाऽर्थप्रत्यय एव न स्यादिति । तथा हि न वर्णाः प्रत्येकमर्थविषयां धियमाविर्भावयन्ति, शेषवर्णवैयर्थ्यात् । नित्य-समुदायश्च तेषां न सम्भवति, अन्त्यवर्णग्रहणसमये पूर्वेषामसम्भवात् । नित्य-त्वाद् वर्णानामस्ति समुदाय इति चेत् ? तथापि न तेषां प्रतीतिरनुवर्तते, अप्रतीयमानानां च प्रत्यायकत्वे सर्वदाऽर्थ तीतिप्रसङ्गः ।……पूर्वावगता वर्णाः

2 Yo. sū. bhā. 3. 17.

3 Ibid. 3. 17.

4 Paramalaghumañjuṣā p. 25-27 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust: Equipment Heritage Foundation, Jalgaon



स्मृत्यारूढाः प्रतीतिहेतव इति चेत् । यदि हि स्मृतिरपि क्रमभाविनी तदा नास्ति वर्णसाहित्यम्, तृतीयवर्णग्रहणकाले प्रथमवर्णस्मृतिविलोपात्, युगपदुत्पादस्तु स्मृतीनामनाशङ्कनीय एव, ज्ञानयौगपद्यप्रतिषेधात् ।.........इत्यनेन क्रमेणान्ते निखिलवर्णविषयसंस्कारो जातो निखिलवर्णविषयामेकामेव स्मृतिं युगपत् करोतीत्याश्रीयते, तदा क्रमो हीयेत । क्रमो हि पौर्वापर्यम्, तच्च देशनिबन्धनं कालनिबन्धनं वा स्यात् उभयमपि तद्वर्णेषु नावकाशं लभते, तेषां सर्वगतत्वान्नित्यत्वाच्च । बुद्धिक्रमनिबन्धनस्तु वर्णानां क्रमो भवेत्, स चैकस्यां स्मृतिबुद्धौ परिवर्तमानानां प्रत्यस्तमित इत्यक्रमाणामेव प्रतिपादकत्वम् । अतश्च सरो रसो वनं नवं नदी दीनेत्यादिषु अर्थभेदप्रत्ययो न स्याद् वर्णानामभेदात्, क्रमस्य प्रतीत्यनङ्गाच्च । अस्ति चायं प्रतीतिभेदः सवर्णेष्वनुपपद्यमानः, तर्हि अतिरिक्तं निमित्तान्तरमाक्षिपतीति स्फोटसिद्धिः ।'[5]

उक्तञ्च मण्डनमिश्रेण स्फोटसिद्धौ—'ननु वर्णा एवाभिधेयाधिगमनिमित्तं स्वाभिधेयाववोधावधिलब्धपरिच्छेदाः पदपरिकल्पनाभाजः (न तु स्फोटात्मा इति भावः), नैतत् सारम् । प्रत्येकमप्रत्यायकत्वात्, साहित्याभावात्, नियतक्रमवर्तिनामयौगपद्येन सम्भूयकारित्वानुपपत्तेः, नानावक्तृप्रयुक्तेभ्यश्च प्रत्ययादर्शनात् क्रमविपर्यये यौगपद्ये च । तस्माद् वर्णव्यतिरेकि वर्णेभ्योऽसम्भवन्नर्थप्रत्ययः स्वनिमित्तमुपकल्पयति ।'[6]

पुनश्चोक्तं तेनैव पदस्फोटस्य वाक्यस्फोटस्य च निर्भागत्वम्—

'नानेकावयवं वाक्यं पदं वा स्फोटवादिनाम् ।'
(एकत्वेऽपि त्वभिन्नस्य क्रमशो दर्शिता गतिः ।।)[7]

उक्तञ्च ऋषिपुत्रेण परमेश्वरेण गोपालिकायाम्—'शब्दो हि स्फोटः, ततोऽन्यानि शब्दान्तराणि वर्णादीनि व्यञ्जकध्वनि-सादृश्यात्तु तानि गृह्यन्ते'[8] इत्यादि ।

ननु तत्तद्वर्णजनितसंस्कारसहितान्त्यवर्णो वाचकः स्यादिति तादृशसंस्कारसहितचरमवर्णप्रत्ययस्यैव स्फोटाभिव्यञ्जकस्यार्थप्रत्यायकत्वे निरर्थिका स्फोट-

5 Nyā. Kan. p. 650-52 (V.S.V.)
6 Sphoṭasiddhi. p. 27-28. (Madras University)
7 Ibid-verse—29
8 Ibid. ṭīkā, p. 23 (Madras University)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



कल्पनेति चेन्न । संस्काराणां वाचकत्वासम्भवात् । तदुक्तं मण्डनमिश्रेण स्फोटसिद्धौ—

'संस्काराः खलु यद्वस्तुरूपप्रख्याप्रभाविताः ।
विज्ञानहेतवस्तत्र ततोऽर्थे धीर्न कल्पते ॥

संस्काराः खलु यद्वस्तूपलम्भसंभावितात्मानस्तत्रैव नियतनिमित्तलब्धप्रतिबोधा धियमाविर्भावयन्ति, नार्थान्तरे । न हि जातु गवग्रहप्रत्ययप्रभावितः संस्कारोऽश्वस्मरणमुपकल्पयती'ति ।[9]

एवमनुमितिशाब्दबोधयोः परोक्षज्ञानयोः ये बुद्धिपरिणामाः (ज्ञानप्रक्रिया वा) ते संक्षेपेण प्रदर्शिताः । अनुपलब्धिप्रक्रियाऽपि अभावप्रत्यक्षनिरूपणपरिच्छेदे आलोचिता । एवमुपमित्यर्थापत्तिसम्भवादीनां मतविशेषे यथायोग्यमनुमिति-शाब्दबोधयोरन्तर्भावसम्भवाद्ग्रन्थविस्तारभयाच्च न ते पृथगलोचिताः ।

---

9 Sph. si. p. 44-45 (Madras University)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( १६ )

## विपर्यये ख्यातिनिरूपणम्

कारणलक्षणसहितं विपर्ययनिरूपणं ज्ञाननिरूपणावसरे पूर्वमेव कृतम्। इदानीं यदनुक्तं संक्षेपेणोक्तं वा तत् किंचिदुच्यते । विपर्ययो हि भ्रमः सर्वेषामेव सम्मतः । अपि तु तस्य स्वरूपनिरूपणे विद्यते महती विप्रतिपत्तिः । विपर्यये जायते या मानसी बौद्धा वा प्रक्रिया तस्या अपि शास्त्रभेदेन दृष्टिभेदेन च प्रकारभेदो दृश्यते । भ्रमविषये ते प्रक्रियाभेदा विभिन्नाः ख्यातय इत्युच्यते । यथा ह्युक्तं प्राचीनैः —

'आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
तथाऽनिर्वचनीयख्यातिरित्येतत् ख्यातिपंचकम् ।।
योगाचारा माध्यमिकास्तथा मीमांसका अपि ।
नैयायिका मायिनश्च प्रायः ख्यातीः क्रमाज्जगुः ।।'

एवं सांख्या अख्यातिवादिनः सदसत्ख्यातिवादिनोवा, पातंजलास्तु विपरीतख्यातिवादिन एव ज्ञेयाः । रामानुजीयास्तु सत्ख्यातिवादिन इति प्रदर्श्यंते ।

वैशेषिकमते विपर्ययस्यातस्मिन् तद्बुद्धिरूपत्वात् यत्र यद्धर्मो विद्यते तत्र तद्धर्मविपरीतधर्मवत्त्वेन प्रतीतेरवभासनाद् विपरीतख्यातिरेव भ्रान्तिरित्युच्यते । तथा ह्युक्तं प्रशस्तपादेन—'प्रत्यक्षविषये तावत् प्रसिद्धानेकविशेषयोः पित्तकफानिलोपहितेन्द्रियस्यायथार्थालोचनात् असन्निहितविषयज्ञानजसंस्कारापेक्षादात्ममनसोः संयोगादधर्माच्चातस्मिंस्तदिति प्रत्ययो विपर्ययः, यथा गव्येव अश्व इति ।'[1] आत्ममनःसंयोगो हि ज्ञानमात्रं प्रति कारणत्वाद् विपर्ययेऽपि कारणम् । दोषयुक्तेन्द्रियसन्निकर्षः, सादृश्यम्, असन्निहितविषयज्ञानजसंस्कारः, अधर्मश्चेन्द्रियजविपर्ययस्य कारणं विशेषतो भवति । उक्तं च श्रीधरेण न्यायकन्दल्याम् —'अयमस्यार्थः—गोपिण्डसंयुक्तमिन्द्रियं गोत्वमगृह्णदपि तं पिण्डमश्वसादृश्यविशिष्टं गृह्णाति, सांशत्वाद् वस्तुनः । तेन च सादृश्यग्रहणेनाश्वविषयः

1 Pra. bhā. p. 423 (Varanasi Sanskrit Viśvavidyalaya)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



संस्कारः प्रबोध्यते । स च प्रबुद्धोऽश्वस्मृतिजनने प्राप्ते मनोदोषादिन्द्रियसंयुक्ते गवि अश्वसादृश्यानुरोधादनुभवाकारमश्वप्रतीतिं करोति, अतो न सर्वस्य सर्वत्रावभासः, सादृश्यसंस्कारयोः प्रतिनियमहेतुत्वात् । अत एव चेयं गुरुभिरिन्द्रियजा भ्रान्तिरुच्यते । एवं हीन्द्रियजा न स्याद् यदीयं संस्कारैकसामर्थ्यादसन्निहितमनधिकरणमश्वत्वमात्रमेव गृह्णीयात्, निरुद्धेन्द्रियव्यापारस्य वा भवेत्, व्याप्रियमाणे चक्षुषि तत्संयुक्तमेव तु गोपिण्डमश्वात्मना गृह्णतो यदीयं नेन्द्रियजा का तर्हीन्द्रियजा भविष्यति विपरीतख्यातिः ? अत एवान्यस्यारोपेण प्रतिभासनाद् योऽपि निरधिष्ठाने विपर्ययस्तत्रापि अवर्तमानोऽर्थः स्वरूपविपरीतेन वर्तमानाकारेण प्रतीयते इति विपरीतख्यातिरेव न त्वसत्ख्यातिः, स्वरूपतोऽर्थस्य सम्भवात्, असतो वाऽवभासनायोगात् । यत्र सदृशमर्थमधिष्ठाय विपर्ययः प्रवर्तते, तत्र सादृश्यं कारणम् ।'[2] एवं निरधिष्ठानमानसविपर्यये विपरीतख्यातिसद्भावेऽपि न सादृश्यं कारणम् । मानसभ्रान्तिनिरूपणे एतत् सर्वं विस्तारेण प्रतिपादयिष्यते । एवं यत्र निरूपाधिकभ्रमे देशान्तरीयरजतत्वादेरनुभवस्तत्रैव संस्कारपेक्षा । यत्र तु सोपाधिकभ्रमस्तत्र शङ्खादौ पीतज्ञानस्थले संस्कारोऽपि नापेक्ष्यते । उक्तं हि तत् न्यायकन्दल्यां तत्परिभाषया—'संस्कारोऽपि तत्रैव कारणं यत्र सविकल्पके भ्रमः, निर्विकल्पके त्विन्द्रियदोषस्यैव सामर्थ्यात् तद्भावभावित्वात् । यथा शङ्खे पीतज्ञानोत्पत्ताविति ।'[3]

एवं प्राचीननैयायिका भट्टमीमांसकाः पातंजला अन्येऽपि बहवो वैशेषिकवद् विपरीतख्यातिमेव विपर्ययं मन्यन्ते । नव्या अपि नैयायिका विपरीतख्यातिमेवान्यथाख्यातिमभिदधाना बुद्धिप्रक्रियायाः किंचित् पार्थक्यं दर्शयन्ति ।

आत्मख्यात्यादीनां मध्येऽख्यातेरत्यन्तविलक्षणत्वात् सैवेदानीं निरूप्यते । अनुभूतिः प्रमाणमिति वदतां प्राभाकरमीमांसकानां मते प्रत्ययमात्रस्यैव यथार्थत्वादयथार्थप्रत्ययासम्भवात् भ्रमव्यवहारस्थले विवेकाख्यातिरेव, न तु कस्याप्यन्यथाख्यातिः । तदुक्तं शालिकनाथेन प्रकरणपंजिकायाम्—'यद्यनुभूतिमात्रं प्रमाणं ततो रजतमिदमिति यद् भ्रान्तिविज्ञानं तदपि प्रमाणं स्यात् । अत्रोच्यते । रजतमिदमिति नेदमेकं विज्ञानम्, किन्तु द्वे एते विज्ञाने ग्रहणस्मरणरूपे । तत्र रजतमिति स्मरणं तस्यानुभवरूपत्वाभावान्न प्रामाण्य-

2 Nyā. kan. p. 424-26 (V. S. V.)

3 Ibid p. 426-27 (V. S. P.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रसंगः। इदमिति विज्ञानमनुभवरूपं प्रमाणमिष्यते एव। भ्रान्तिरूपता रजतज्ञानस्यैव ग्रहणव्यवहारप्रवर्तकतया व्यवहारे विसंवादकत्वात्।...यत्र तु व्यवहारविसंवादो नास्ति, तत्र भ्रान्तिरपि न व्यपदिश्यते, यथोष्णजलज्ञाने। तत्रापि न जलगतमौष्ण्यमनुभूयते, किन्तु वह्न्यवयवगतमेव।'[4]

अख्यातिवादस्यार्थः परिष्कृतो जयन्तभट्टैः—'नायमेकः प्रत्यय इदं रजतमिति, किन्तु द्वे एते ग्रहणस्मरणे, इदमिति पुरोऽवस्थितभास्वराकारधर्मिप्रतिभासः, रजतमिति तु भास्वररूपदर्शनप्रबोध्यमानसंस्कारकारणकं तत्साहचर्यादिवगत-रजतस्मरणम्। अतश्चेदं स्मरणं यतः प्रागनवगतरजतस्य न जायते, विदित-रजतस्यापि रजन्यामन्यदा वा सादृश्यदर्शनाद्विना न भवतीति। स्मरणमपि भवदात्मानं तथा न प्रकटयतीति प्रमुषितमुच्यते। स्वरूपेण चाप्रतिभासमानायां स्मृतौ, अनुभवस्मरणयोर्विवेको न गृहीतो भवतीत्यग्रहणमख्यातिरुच्यते।'[5] ग्रहणस्मरणयोस्तद्विषययोश्च भेदाग्रहात् पुरोवर्तिनि प्रवृत्तिरुपपद्यते, प्रवृत्ति-विसंवादाच्च भ्रमव्यवहार इति बोध्यम्।

तदेतदसहमानै नैयायिकैर्जयन्तभट्टैरुक्तं—'यदुक्तमिदं रजतमिति स्मरणानुभव-स्वभावे विवेकेनागृह्यमाने द्वे एते ज्ञाने इति तदसाम्प्रतम्, प्रत्यभिज्ञावदेकत्वेनैव संवेद्यमानत्वात्। यदेवेदं पुरोऽवस्थितं भास्वररूपाद्यधिकरणं धर्मिसामान्यं तदेव रजतमिति विशेषतः प्रतिपद्यते, यदिदमग्रतः स्थितं तद्रजतमिति सत्यरजत-प्रतीतिवत्। अनुभूततया हि न रजतमत्र प्रकाशते किं त्वनुभूयमानतया; अनुभूतताग्रहणं च स्मरणमुच्यते नानुभूयमानताग्रहणम्। स्वप्रकाशा च संवित्तिरिति भवतां दर्शनम्, तत्रैषा रजतसंवित्तिः केन रूपेण प्रकाशतामिति चिन्त्यम्। यदि स्मरणात्मना कः प्रमोषार्थः, अथानुभवात्मना तदेयं विपरीत-ख्यातिरेव स्मृतेरनुभवत्वेन प्रतिभासात्। अथ संविन्मात्रयैव प्रकाशते तदपि न युक्तम्, रजतविषयोल्लेखात स्मरणानुभवविशेषगहितायाश्च विषयसंवित्ते-रनुपपत्तेः।......रजताभिमानेनैव च रजतार्थी तत्र प्रवर्तते।.........यावद्धि दृश्यं गृहीतमिति न जातः प्रत्ययस्तावत् कथं दृश्यार्थिनस्तत्र प्रवृत्तिः, एवमिहापि यावद् रजतं गृहीतमिति न जातः प्रत्ययस्तावत् कुतस्तदर्थिनां प्रवृत्तिः; तस्मादस्ति रजतग्रहणं न तु तत्स्मरणप्रमोषमात्रम्।'[6] एवं हि

4 Pra. pañ. p. 126 (B. H. U.)

5 Nyā. mañ. Part I. p. 162 (chow.)

6 Ibid. Part I. p. 166-67 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



जयन्तभट्टेन प्रसिद्धयुक्तिभिरख्यातिवादं निराकृत्य विपरीतख्यातिः प्रतिष्ठापिता। शुक्तौ रजतग्रहणं हि विपरीतख्यातिरेव। एषैवान्यथा-ख्यातिरित्युच्यते। प्रसंगादसत्ख्यातिरपि माध्यमिकबौद्धानां निराकृता जयन्तेन —'असत्ख्यातिरपि नास्ति, एकान्तासतः खपुष्पादेः प्रतिभासायोगात्, देश-कालव्यवहितानुभूतपूर्वपदार्थविषय एव भ्रान्तोऽपि प्रत्ययः प्राणभृतां भवति न त्वत्यन्तासदर्थविषयः।'[7]

नव्यास्तु नैयायिका विपरीतख्यातिमेव विपर्ययं स्वीकुर्वन्तस्तामेवान्यथा-ख्यातिमाचक्षाणा विपर्यये बुद्धिप्रक्रियायां किंचिद् विशेषमाविष्कुर्वन्ति। अवर्त-मानस्येन्द्रियासम्बद्धस्य रजतत्वादेः रजतादेर्वा प्रत्यक्षे भानासम्भवात् कथमिदं रजतमित्यादिभ्रमेषु देशान्तरीयरजतत्वादेर्भानमित्याशंकायां ज्ञानलक्षणालौकिक-सन्निकर्षबलेनैव रजतत्वादेरुपनीतभानसम्भवान्न काचिदनुपपत्तिरिति समाधानं कुर्वन्ति। तथोक्तं ज्ञानलक्षणाविचाररहस्यटीकायां विमर्शिन्याम्—'तथाहि मन्दान्धकारचाक्चिक्यादिदोषमहिम्ना स्थलविशेषे पुरोवर्तिनि शुक्तिखण्डे इदं रजत-मिति चाक्षुषं प्रत्यक्षविज्ञानमस्माकमुत्पद्यते।...तदानीं च देशकालादिव्यवहितेन रजतेन चक्षुरादीन्द्रियाणां लौकिकः संयोगात्मकः सन्निकर्षो न सम्भवति। इन्द्रियैरसन्निकृष्टस्य च वस्तुन ऐन्द्रियकविज्ञाने भानं न सम्भवतीति तत्र पुरोवर्तिनि विशेषणतया रजतस्य भानार्थमवश्यं काचिदलौकिकी प्रत्यासत्तिरा-वश्यकीति सात्र ज्ञानलक्षणैव।......प्रोक्तं (दोषवशात्-) तत्त्वांशविनिर्मुक्तं रजतस्मरणमेवात्र विशेषणतया रजतसम्बद्धं सत् चक्षुषोऽलौकिकः सन्निकर्षः। तस्य च ज्ञानात्मकत्वात् सा ज्ञानलक्षणा प्रत्यासत्तिरित्यभिधीयते शास्त्रकृद्भिः। तया च प्रत्यासत्त्या प्रत्यासन्नं देशकालादिव्यवहितमपि रजतं पुनर्दर्शनकाले इदमंशे (शुक्तिखण्डे) प्रकारीभूय भासते इति।'[8]

रामानुजेन श्रीभाष्यकारेण यद्यपि ब्रह्मसूत्रभाष्ये अन्येभ्यः सर्वेभ्यः ख्याति-वादेभ्योऽन्यथाख्यातिरेव युक्तत्वादादरणीया दर्शिता, तथापि स्वारस्येन सत्ख्यातिरेव सिद्धान्ततया प्रतिष्ठापिता। तथाह्युक्तं श्रीभाष्ये—'अन्यथा-भानाभ्युपगमादेव ख्याति-प्रवृत्ति-बाध-भ्रमत्वानामुपपत्तेरत्यन्तापरिदृष्टकारणक-वस्तुकल्पनायोगात्।.........ख्यात्यन्तरवादिनां च सुदूरमपि गत्वाऽन्यथा-

7 Ibid. Part II. p. 110 (chow.)

8 Jñānalakṣaṇā-vicārarahasya-ṭikā. p. 20-21 (Calcutta Sanskrit College R. S.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



वभासोवश्यमाश्रयणीयः । असत्ख्यातिपक्षे सदात्मना, आत्मख्यातिपक्षे चार्थात्मना, अख्यातिपक्षेप्यन्यविशेषणमन्यविशेषणत्वेन ज्ञानद्वयमेकत्वेन च, विषयासद्भावेऽपि विद्यमानत्वेन ।'[9] पुनश्चोक्तं सिद्धान्तरूपेण—

'अथवा,——यथार्थं सर्वविज्ञानमिति वेदविदां मतम् ।
श्रुतिस्मृतिभ्यः सर्वस्य सर्वात्मत्वप्रतीतितः ।।

...बहु स्यामिति संकल्पपूर्वसृष्टयाद्युपक्रमे ।
तासां त्रिवृतमेकैकामिति श्रुत्यैव चोदितम् ।।

त्र्यात्मकत्वातु भूयस्तादिति तेनाभिधाभिदा ।
सोमाभावे च पूतीकग्रहणं श्रुतिचोदितम् ।।

...रूप्यशुक्त्यानिर्देशभेदस्तु भूयस्त्वहेतुकः ।।

रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते ।
अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः ।।

कदाचिच्चक्षुरादेस्तु दोषाच्छुक्त्यंशवर्जितः ।
रजतांशो गृहीतोऽतो रजतार्थी प्रवर्तते ।।

दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते ।
अतो यथार्थं रूप्यादिविज्ञानं शुक्तिकादिषु ।।

बाध्यबाधकभावोऽपि भूयस्त्वेनोपपद्यते ।
शुक्तिभूयस्त्ववैकल्यसाकल्यग्रहरूपतः ।।

नातो मिथ्यार्थसत्यार्थविषयत्वनिबन्धनः ।
एवं सर्वस्य सर्वत्वे व्यवहारव्यवस्थितिः ।।'[10]

एतैः श्रीभाष्यकारीयश्लोकैः पंचीकरणन्यायेन सर्वस्य सर्वात्मकत्वात् सत्ख्यातिवादः प्रतिपादितः । विपर्यये सत एव रजतादेः प्रतीतिरिति भावः ।

उक्तं च श्रीनिवासेन यतीन्द्रमतदीपिकायां—'सर्वं विज्ञानं यथार्थमिति वेदान्तविदां मतमित्युक्तत्वात् भ्रमादिप्रत्यक्षज्ञानं यथार्थमेव, अख्यात्यात्मख्यात्य-निर्वचनीयख्यात्यन्यथाख्यात्यसत्ख्यातिवादिनो निरस्य सत्ख्यातिपक्षस्वीकारात् । सत्ख्यातिर्नाम ज्ञानविषयस्य सत्यत्वम् । तर्हि भ्रमत्वं कथमिति चेद्विषय-व्यवहारबाधाद् भ्रमत्वम् । तदुपपादयामः—पंचीकरणप्रक्रियया पृथिव्यादिषु

9 Bṛ. sū. Rā. bhā. 1. 1. 1 (p. 181-82 ; Nirnayasagar)
10 Ibid. p. 183-84 (Nirnayasagar)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सर्वत्र सर्वभूतानां विद्यमानत्वात् । अत एव शुक्तिकादौ रजतांशस्य विद्यमानत्वाज्ज्ञानविषयस्य सत्यत्वम् । तत्र रजतांशस्य स्वल्पत्वात् तत्र न व्यवहार इति तज्ज्ञानं भ्रमः । शुक्त्यंशभूयस्त्वज्ञानाद्भ्रमनिवृत्तिः । स्वप्नादिज्ञानं तु सत्यमेव, तत्तत्पुरुषानुभाव्यतया तत्तत्कालावसानान् रथादीन् परमपुरुषः सृजतीति श्रुत्याऽवगम्यते । पीतः शंखेत्यादौ नयनवर्तिपित्तद्रव्यसंयुक्ता नायनरश्मयः शंखादिभिः सह संयुज्यन्ते । तत्र पित्तगतपीतिमाभिभूतः शंखगतशुक्लिमा न गृह्यते । अतः स्वर्णानुलिप्तशंखवत् पीतः शंख इति प्रतीयते । सूक्ष्मत्वात् पीतिमा स्वनयननिष्क्रान्ततया स्वेनैव गृह्यते न त्वन्यैः । ...मरीचिकायां जलज्ञानमपि पंचीकरणप्रक्रियया पूर्वोक्तवदुपपद्यते ।... दिग्भ्रमोऽपि तथैव, दिशि दिगन्तरस्य विद्यमानत्वात् ।'[11]

भट्टमीमांसकमतेऽपि विपरीतख्यातिरेव भ्रमोऽभिप्रेतः । तथाहि श्लोकवार्तिके प्रत्यक्षलक्षणघटकस्य सत्सम्प्रयोगशब्दस्य व्याख्यामुखेनोक्तं कुमारिलभट्टैः—

'सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः ।
प्रयोग इन्द्रियाणां च व्यापारोऽर्थेषु कथ्यते ॥
दुष्टत्वाच्छुक्तिकायोगो वार्यते रजतेक्षणात् ।'[12]

उक्तं च सुचरितमिश्रेण टीकायां—'तदयमर्थो भवति—विद्यमानसम्प्रयोगजन्यं प्रत्यक्षमिति ।......कः पुनरत्र दुष्प्रयोगः यः संशब्देन व्यावर्त्यते, अत आह—दुष्टत्वादिति । कथं पुनरसौ दुष्टः । प्रयोगस्य ह्यत्यासत्त्यादयो दोषाः । न च ते शुक्तिसम्प्रयुक्तचक्षुषो भ्राम्यतो दोषा भवन्ति । विषय एव तु तत्र सादृश्यदूषितो विपरीतख्यातिहेतुः । अत आह—रजतेक्षणादिति । अयमभिप्रायः—ज्ञानकारणं हि सम्प्रयोगः, स दुष्टोऽन्यदन्यदात्मना भासयति, कारणदोषाविनाभावात् कार्यदोषस्य ।......तदिह शुक्तौ रजतमिति गृह्यमानायां कार्यदोषात् शुक्तिकायोगो दुष्ट इत्यवगम्यते । अतोऽसौ सम्यगर्थवाचिना संशब्देन वार्यते इति ।'[13]

पातंजलमतेऽपि अन्यथाख्यातिरेवाभिप्रेता, 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठ'मित्यत्र अतद्रूपप्रतिष्ठमित्यनेन भासमानरूपाभाववद्विशेष्यकमित्यर्थबोधनात् ।

11 Yat. mat. dīp. p. 5-13 (Ananda Asram)
12 Ślokavārtika 4. 38-39
13 Ślo. vār. ṭikā—36, 39.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



भ्रमस्थले बुद्धिवृत्त्याकारस्यैव विषये आरोप इति योगसिद्धान्तः। उक्तं च विज्ञानभिक्षुणा योगवार्तिके—'अत्र च शास्त्रे अन्यथाख्यातिः सिद्धान्तो न तु सांख्यवदविवेकमात्रम्। अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येत्यागामिसूत्रात्। वैशेषिकाच्चात्रायं विशेषो यद्बाह्यरजतादेर्नारोपः किन्त्वान्तरस्यैव।'[14]

सांख्यमते तु बहुभिः सूत्रैरसत्ख्यात्यादिनिराकरणपूर्वकं सदसत्ख्यातिः समर्थिता दृश्यते। तथा हि—'नासतः ख्यानं नृश्रृंगवत्', 'न सतो बाधदर्शनात्', 'नानिर्वचनीयस्य, तदभावात्' 'नान्यथाख्यातिः स्ववचोव्याघातात्'[15] इत्यादिसूत्रैर्मतान्तरनिरसनपूर्वकं 'सदसत्ख्यातिर्बाधाबाधात्' इत्यनेन सदसत्ख्यातिः सिद्धान्तितोपलभ्यते। अनिरुद्धभट्टेनापि सूत्रवृत्तौ तादृशमेव व्याख्यानं कृतम्। यथोक्तं—'इदं रजतमिति पुरोवर्तिविषयतया सत्, अबाधनात्। रजतविषयतया त्वसत्, बाधात्। तस्मात् सदसतो तत्त्वम्।'[16] अनेन विपर्यये ज्ञानस्य सदसद्विषयकत्वमेवाभिहितं भाति। विज्ञानभिक्षुणाऽपि सदसत्ख्यातिर्बाधाबाधादिति सूत्रस्य भाष्योपसंहारे दृष्टान्तविधया एवमुक्तं—'यथा वा रजतं वणिग्वीथीस्थरूपेण सत्, शुक्त्यध्वस्तरूपेण चासत्'[17] इत्यादि। अनेनापि भ्रमे भासमानस्य रजतस्य सदसत्त्वमेवाभिप्रेतं भाति।

किन्तु, विज्ञानभिक्षुणा पूर्वोक्तसांख्यसूत्राण्यन्यथैव व्याख्यातानि, न तु ख्यातिवादपरतया व्याख्यातानि। अपि चान्यत्र सांख्यप्रवचनभाष्ये विवेकाग्रह एव विपर्यय इत्युक्तम्। यथा—'विपर्ययस्त्वस्माकं विवेकाग्रह एव, अन्यथाख्यातेर्निरास्यमानत्वात्।'[18] योगवार्तिकेऽपि विपर्ययसूत्रस्य यदभिहितं—'न तु सांख्यवदविवेकमात्रम्'[19] तत् पूर्वमेवोक्तम्। तस्माद् विज्ञानभिक्षुमतेन विवेकाग्रह एव भ्रम इति अख्यातिवाद एव सांख्यसिद्धान्त इति बोध्यम्।

अद्वैतवेदान्तमते त्वनिर्वचनीयख्यातिरेव विपर्यये प्रायशः अभिप्रेता। यत्र तु रक्तः स्फटिक इत्यादौ आरोप्यमिन्द्रियसन्निकृष्टं तत्र भ्रमे अन्यथाख्यातेरेव सम्भवान्नानिर्वचनीयख्यातिरिति ध्येयम्। यत्र त्वारोप्यमसन्निहितं तत्र प्रत्यक्षभ्रमेऽन्निहितस्य मानासम्भवाद् आरोप्यस्य रजतादेरनिर्वचनीयस्योत्पत्तिरवश्यं स्वीकार्या। न हि रजतादेरसन्निहितस्योपनीतमानं चाक्षुपादौ ज्ञान-

14 Yoga-vārtika, 1.8
15 Sāṃ. sū. 5.52–56.
16 Sāṃ. sū. vṛtti—5.56.
17 Sāṃ. sū. bhā.—5.56
18 Ibid. 2.33
19 Yoga-vārtika, 1.8

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



लक्षणप्रत्यासत्त्या सम्भवति, ज्ञानलक्षणाबलेनोपनीतमानस्वीकारे धूमादिलिंग-दर्शनेन वह्न्यादेः स्मरणात् ज्ञानलक्षणप्रत्यासत्त्या वह्न्यादेश्चाक्षुषत्वसम्भवेऽनुमित्युच्छेदापत्तेः। अत एव शुक्तौ रजतभ्रमस्थले शुक्तिविषयकाविद्या शुक्त्युपादानविद्या वा अनिर्वचनीयरजताकारेण तादृशरजतविषयकज्ञाना-(वृत्त्या-) कारेण च परिणमते। तस्यैवानिर्वचनीरजतस्य विपर्यये भानादनिर्वचनीय-ख्यातिरेव। उक्ता च धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायां विपर्ययेऽनिर्वच-नीयोत्पत्तिप्रक्रिया—'न च ज्ञानं तत्र प्रत्यासत्तिः। वह्न्यादेः ज्ञानस्य प्रत्यासत्तित्वे तत एव प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः। ननु रजतोत्पादकानां रजतावयवादीनामभावे शुक्तौ कथं तत्रापि रजतमुत्पद्यते इति चेत्। उच्यते, न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका, किन्तु विलक्षणैव। तथाहि —काचादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाक्चिक्याकारा च काचिदन्तःकरणवृत्तिरुदेति। तस्यां च वृत्ताविदमंशावच्छिन्नं चैतन्यं प्रतिबिम्बते। तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमनेनेदमंशावच्छिन्नं चैतन्यं वृत्त्य-वच्छिन्नचैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति। ततश्च प्रमातृचैतन्याभिन्नविषय-चैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाक्चिक्यादिसादृश्यसन्दर्शनसमुद्बोधित-रजतसंस्कारसध्रीचीना काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञाना-भासाकारेण च परिणमते।......अविद्यापरिणामरूपं च तद्रजतमविद्याऽधिष्ठाने इदमवच्छिन्ने चैतन्ये वर्तते।......चैतन्यमात्रस्य रजतं प्रत्यनधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेनेदमोऽवच्छेदकतया रजतस्य पुरोवर्तिसंसर्ग-प्रत्यय उपपद्यते इति।'[20] तस्माद् विपर्यये एतादृशानिर्वचनीयप्रातिभासिक-रजतस्य भासनादनिर्वचनीयख्यातिरेव।

आचार्यशंकरेणापि विपर्ययलक्षणमुक्तं ब्रह्मसूत्राणां प्रथमसूत्रभाष्ये—'कोऽयम-ध्यासो नामेति। उच्यते—स्मृतिरूपः परत्र पूर्वदृष्टावभासः।...सर्वथाऽपि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति'[21] —इति। परत्र सत्याधिष्ठाने, स्मृतिरूपः स्मृतिसदृशोऽन्निहितविषयकः संस्कारजन्यो वा, पूर्वदृष्टस्य इवावभास इत्यर्थः।

तथैवोक्तं पद्मपादेन पंचपादिकायां—'स्मृते रूपमिव रूपमस्य, न पुनः स्मृतिरेव। पूर्वप्रमाणविषयविशेषस्य तथाऽनवभासकत्वात्। कथं पुनः स्मृति-

20 Ved. pari. p. 54–59 (Chow.)

21 Br. sū. Śa. bhā. —1.1.1

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



रूपत्वम् ? पूर्वप्रमाणद्वार-(संस्कार-) समुत्थत्वात् ।'[22] उक्तं च तेनैव पुनः—'न हीन्द्रियज्ञानात् संस्कारजं स्मरणं पृथगेव स्मरणाभिमानशून्यं समुत्पन्नम् । किन्तु एकमेव संस्कारसहितादिन्द्रियात् । कथमेतत् ? उच्यते—कारणदोषः कार्यविशेषे तस्य शक्तिं निरुन्धन्नेव संस्कारविशेषमपि उद्बोधयति, कार्यगतत्वात् कारणदोषशक्तेः । अतः संस्कारदुष्टकारणसम्वलिता एका सामग्री, सा चैकमेव ज्ञानमेकफलं जनयति । तस्य····· शुक्तिगतमिथ्यारजतमालम्बनमवभासते । तेन मिथ्यालम्बनं ज्ञानं मिथ्याज्ञानम्, न स्वतो ज्ञानस्य मिथ्यात्वमस्ति, बाधाभावात् ।······दृश्यते हि लिंगज्ञानसंस्कारयोः सम्भूय लिंगिज्ञानोत्पादनम्, प्रत्यभिज्ञानोत्पादनं चाक्षसंस्कारयोः । तत्रादुष्टकारणारब्धत्वाद् यथार्थमेवावभासः । इह तु कारणदोषाद् अतथाभूतार्थावभास इति विशेषः ।'[23]

उक्तं च भाष्यव्याख्यानमारोपनीयस्य चानिर्वाच्यत्वं वाचस्पतिमिश्रेण भामत्याम्—'मिथ्याप्रत्ययश्चारोपविषयारोपनीयस्य मिथुनमन्तरेण न भवतीति पूर्वदृष्टग्रहणेनानृतमारोपणीयमुपस्थापयति । तस्य च दृष्टत्वमात्रमुपयुज्यते न वस्तुसत्तेति दृष्टग्रहणम् ।······तत्र पूर्वदृष्टं स्वरूपेण सदपि आरोपणीयतयाऽनिर्वाच्यमित्यनृतम् । आरोपविषयं सत्यमाह—परत्रेति । परत्र शुक्तिकादौ परमार्थसति । तदनेन सत्यानृतमिथुनमुक्तम् ।......स्मृतेः रूपमिव रूपमस्येति स्मृतिरूपः । असन्निहितविषयत्वं च स्मृतिरूपत्वम्, सन्निहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः ।······न चारोपितं रूपं वस्त्वन्तरम् । तद्धि मरीचयो वा भवेत्, गंगादिगतं तोयं वा ? पूर्वस्मिन् कल्पे मरीचय इति प्रत्ययः स्यान्न तोयमिति । उत्तरस्मिंस्तु गंगायां तोयमिति स्यान्न पुनरिहेति । देशभेदास्मरणे तोयमिति स्यान्न पुनरिहेति । न चेदमत्यन्तमसत् निरस्तसमस्तस्वरूपमलीकमेवास्तु इति साम्प्रतम् । तस्यानुभवगोचरत्वानुपपत्तेरित्युक्तमधस्तात् । तस्मान्नासत्, नापि सदसद् परस्परविरोधात्—इत्यनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयम् । तदनेन क्रमेणाध्यस्तं तोयं परमार्थतोयमिव, अत एव पूर्वदृष्टमिव । वस्तुतस्तु न तोयं न च पूर्वदृष्टं किन्त्वनृतमनिर्वाच्यम् । ······अन्यस्यान्यधर्मकल्पना अनृतता, सा चानिर्वचनीयता-इत्यधस्तादुपपादितम् । तेन सर्वेषामेव परीक्षकानां मते अन्यस्यान्यधर्मकल्पना अनिर्वचनीयता अवश्यम्भाविनीत्यनिर्वचनीयता सर्वतन्त्रसिद्धान्त इत्यर्थः ।'[24]

---

22 Pañcapādikā, p. 40–41 (Madras Government)

23 Ibid. p. 51

24 Bhāmatī, 1.1.1

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उक्तं च मधुसूदनस्वामिनाऽनिर्वचनीयस्याज्ञानोपादानकत्वं तत्त्वज्ञाननाश्यत्वं च । यथोक्तं—'तच्चानिर्वचनीयमज्ञानोपादानकम्, तत्त्वज्ञानेन नाश्यं च । नन्वेवं रूप्यमुत्पन्नं नष्टं चेति धीप्रसङ्गः, त्रैकालिकनिषेधप्रतीतिश्च न स्यादिति चेन्न । अत्यन्ताभावग्रहस्यैव प्रतियोगिग्रहे इव तदुत्पादविनाशग्रहेऽपि प्रतिबन्धकत्वात् । न हि कुत्रापि कदापि अत्यन्ताभावाधिकरणत्वेन प्रतीते उत्पादविनाशप्रतीतिरस्ति । ……व्यधिकरणधर्मावच्छिन्नप्रतियोगिको ह्ययमभावः, तत्प्रतीतौ च न विशिष्टप्रसक्तिरुद्देश्या, प्रत्येकप्रसक्त्यैव तत्प्रतीत्युपपत्तेः । यद्वा, लौकिकपारमार्थिकरजतस्यैव तत्र त्रैकालिकनिषेधः'[25] इति ।

आत्मख्यातिवादीनां योगाचारबौद्धानां मते कल्पिते बाह्ये शुक्त्यादौ रजतादीनां विज्ञानाकाराणामेव भासनादात्मनः—विज्ञानस्यैव ख्यातिर्विपर्यये । तन्मतमनुदितं जयन्तभट्टेन—

'विज्ञानमेव खल्वेतद् गृह्णात्यात्मानमात्मना ।
बहिर्निरूप्यमानस्य ग्राह्यस्यानुपपत्तितः ॥
बुद्धिः प्रकाशमाना च तेन तेनात्मना बहिः ।
तद्वहत्यर्थशून्यापि लोकयात्रामिहेदृशीम् ॥'[26]

सौत्रान्तिकबौद्धनये यद्यपि बाह्यार्थमस्ति, तथापि विपर्ययस्थले विज्ञानाकारस्यैव बाह्ये आरोपादात्मख्यातिरेव । तदुक्तं सर्वतन्त्रस्वतन्त्रेण वाचस्पतिना भामत्याम्—'तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति ।—अन्यधर्मस्य ज्ञानधर्मस्य रजतस्य, ज्ञानाकारस्येति यावत् । अध्यासोऽन्यत्र बाह्ये । सौत्रान्तिकनये तावद्बाह्यमस्ति वस्तु सत्, तत्र ज्ञानाकारस्यारोपः । विज्ञानवादिनामपि यद्यपि न बाह्यं वस्तुसत् तथाप्यनाद्यविद्यावासनाऽऽरोपितमलीकं बाह्यम्, तत्र ज्ञानाकारस्यारोपः । उपपत्तिश्च—यद् यादृशमनुभवसिद्धं रूपं तत्तादृशमेवाभ्युपगन्तव्यमित्युत्सर्गः, अन्यथात्वं पुनरस्य बलवद्बाधकप्रत्ययवशात्, नेदं रजतमिति च बाधस्येदन्तामात्रबाधेनोपपत्तौ न रजतगोचरता उचिता, रजतस्य धर्मिणो बाधे हि रजतं च तस्य च धर्म इदन्ता बाधिते भवेताम्, तद्वरमिदन्तैवास्य धर्मो बाध्यतां न पुना रजतमपि धर्मि । तथा च रजतं बहिर्बाधितमर्थादान्तरे ज्ञाने व्यवतिष्ठते इति ज्ञानाकारस्य बहिरध्यासः सिध्यति ।'[27]

---

25 Advaitasiddhi—p. 648 (Nirṇayasagar)

26 Nyā. mañ.—Part I. p. 164 (Chow.)

27 Bhāmati 1. 1. 1

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उक्तं च विद्यारण्येन विवरणप्रमेयसंग्रहे आत्मख्यातिवादानुवादपूर्वकम्— 'अस्तु तर्हि आत्मख्यातिः। विमतं रजतं बुद्धिरूपं सम्प्रयोगमन्तरेणापरोक्षत्वात् बुद्धिवत्।……कथं विज्ञानस्य रजताकार इति चेत्, संस्कारसामर्थ्यादिति ब्रूमः।……अनादिसिद्धज्ञानसन्ततौ यदा कदाचित् पूर्वं रजतज्ञानमुत्पन्नं तदेव संस्कार इत्यंगीकारात्। यद्यपि संस्कारो विजातीयानेकज्ञानव्यवहितस्तथापि कदाचित् सजातीयं रजतज्ञानमुत्पादयति।……(अथवा) पूर्वरजतज्ञानजन्यज्ञान-सन्तान एव संस्कारोऽस्तु। एवं पूर्वरजतज्ञानमपि पूर्वरजतज्ञानादुत्पद्यते। ततोऽनादिवासनाप्रापितं रजतबुद्धिरूपमेव सत् भ्रान्त्या वहिर्वदवभासते इति।'[28] उक्तं च शान्तरक्षितेन तत्त्वसंग्रहे—

'अस्वस्थलोचनैर्दृष्टं तथा पीताद्यवेक्ष्यते।
निष्कृष्टं ग्राहकांशाच्च संवेद्यं न, तथा परम्॥'[29]

व्याख्यातं च कमलशीलेन पंजिकायां—'यथा पीतः शंख इत्यादिस्थले न विज्ञानातिरिक्तं पीतादि तथा पराभिमतपीतादिस्थलेऽपि न विज्ञानातिरिक्तं पीतादित्यर्थः।'[30] तथा प्रतिविम्बस्थलेऽपि न स्वमुखं ग्राह्यमित्याह—

नाभिमुख्येन तद्दृष्टेः स्वमुखादेस्तथेक्षणम्।
प्रमाणदेशभेदादिदृष्टेश्चान्यपदार्थवत्॥'[31]

असत्ख्यातिस्तु माध्यमिकानां शून्यवादिवौद्धानां सम्मता। सा त्वेवं व्याख्याता माधवाचार्येण बौद्धप्रक्रियायां सर्वदर्शनसंग्रहे—'एवं शून्यं शून्यमित्यपि भावनीयम्। स्वप्ने जागरणे च न मया दृष्टमिदं रजतादि इति विशिष्टनिषेधस्योपलम्भात्। यदि दृष्टं सत् तदा तद्विशिष्टस्य दर्शनस्य इदन्ताया अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादेः सत्त्वं स्यात्। न चैतदिष्टं कस्यचिद् वादिनः। न चार्धजरतीयमुचितम्।………तस्मादध्यस्ताधिष्ठान-तत्सम्बन्धदर्शनद्रष्टृणां मध्ये एकस्यानेकस्य वाऽसत्त्वे निषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति भगवतोपदिष्टे माध्यमिकास्तावदुत्तमप्रज्ञा इत्यमचीकथन्—भिक्षुपादप्रसारणन्यायेन क्षणभंगयभिधानमुखेन स्थायित्वानुकूलवेदनीयत्वानुगतत्व-सर्वसत्यत्वभ्रमव्यावर्तनेन सर्वशून्यतायामेव पर्यवसानम्। अतस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव।……दृष्टार्थव्यवहारश्च

28 Vivaraṇaprameyasaṃgraha, p. 123-24 (Acyutagranthamālā Benares)
29 Tattvā-saṃ. verse 2075 (Baroda)
30 Tattvā. saṃ. ṭikā, 2075
31 Tattvā. saṃ. 2081

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



स्वप्नव्यवहारवत् सवृत्या संगच्छते'[32] इति। अत्र शून्यमेव तत्त्वमित्युपपादनप्रसंगेन शुक्तिरजतादिभ्रमे दृष्टं रजतं न सदित्युपपादनेनासत एव ख्यातिर्भ्रम इत्युक्तम्।

उक्तं च मधुसूदनस्वामिना माध्यमिकमतानुवादेन—'असद्भाने असदेव रजतमभादिति प्रत्यक्षं मानम्,·········विमतमसत् सत्त्वानधिकरणत्वात् शशश्रृंगवत्, विमता अप्रमा असद्विषयिनी सत्त्वानधिकरणविषयकत्वात्, सन्मात्राविषयकत्वे सति सविषयकत्वात् नृश्रृंगमसदित्यादिवाक्यजन्यपरोक्षवत् इत्यनुमानं तत्र मानम्।'[33]

---

32 Sar. dar. saṃ. Bauddha, p. 11-12 (Ananda Asram)

33 Advaitāsiddhi, p. 645 (Nirnayasagar)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## ( १७ )

# मानसभ्रान्ति-कल्पनानिरूपणम्

विस्तारेण निरूपितो विपर्ययः ।...स एव भ्रान्तिरित्यप्युच्यते । भ्रान्तिर्हि पुनर्द्विविधा सम्भवति—(१) बाह्येन्द्रियजा, (२) मानसी च । यथोक्तं जयन्तभट्टेन—

'कामशोकाभयोन्मादचौरस्वप्नाद्युपद्रुताः ।
अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव ।।'[1]

इयमेव मानसी भ्रान्तिः विभ्रान्तिरित्युच्यते । बाह्येन्द्रियजा भ्रान्तिरिन्द्रियदोषजन्या विषयदोषजन्या वा सम्भवति । मानसी भ्रान्तिरन्तःकरणदोषजन्या । बाह्येन्द्रियजा भ्रान्तिरधिष्ठानसन्निकर्षादधिष्ठानदेशे एव भवति । मानसी भ्रान्तिस्तु सादृश्याद्यभावेऽपि कामरोगादिवशेन यत्र कुत्रचिदेव सम्भवति ।

तदुक्तं जयन्तभट्टेन न्यायमंजर्याम्—'तथाहि द्विविधा भ्रान्तिर्बाह्येन्द्रियजा मानसी च । तत्र बाह्येन्द्रियजे भ्रमज्ञाने विषयदोषाद् इन्द्रियदोषाद् वा समुत्पद्यमाने न क्वचिन्निरालम्बनता दृश्यते'[2] इति । पुनश्च—'भास्वररूपसादृश्येन हि विषयदोषेण शुक्तिका रजतमिति परिस्फुरति, मरुस्थलपतितोत्फलितं सावित्रं तेजः तरलतरंगसारूप्येण पय इति चकास्ति । इन्द्रियदोषादपि पित्तोपहतरसनस्य तिक्ततया शर्कराऽवभासते, तिमिरसीमन्तितनयनवृत्तेश्चन्द्रमण्डलमेकमपि द्विधा प्रतिभाती'[3]त्यादिना ग्रन्थेन विषयदोषजेन्द्रियदोषजान् भ्रमान् निरूप्य मानसीं भ्रान्तिमाह जयन्तः —

'अन्तःकरणदोषेण विभ्रमो यस्तु जायते ।
असत्यपि महेलादौ पुष्पेषु मुषितात्मनाम् ।।
सोऽपि कश्चिद् विषयदोषजा भवति कुत्रचित् ।
कोमलानिलकल्लोलवेल्लिते बालपल्लवे ।।

1 Nyāyamañjarī. Part I. p. 97 (chow.)
2 Ibid. Part II. p. 110-11
3 Ibid. Part II. p. 111

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अनपेक्षिततत्तुल्यपदार्थस्यैव या पुनः ।
मानसी मन्मथोन्मादमहिम्ना मानिनीमतिः ।।

तस्यामपि रोगादिवासनावलोपप्लवमानसंवृत्याद्युपस्थापितदेशकालव्यवहितोपलब्धपूर्वपुरन्ध्रिरूपस्य समुल्लेखो न त्वेकान्तासतः खरविषाणादेरिव।'[4] अत्र मानसभ्रान्तावपि नासतः भानमित्युक्तम् ।

तदेवोक्तं श्रीधरेणापि न्यायकन्दल्याम्—'अत एवान्यस्यारोपेण प्रतिभासनाद् योऽपि निरधिष्ठाने विपर्ययस्तत्राप्यवर्तमानोऽर्थः स्वरूपविपरीतेन वर्तमानाकारेण प्रतीयते इति विपरीतख्यातिरेव न त्वसत्ख्यातिः, स्वरूपतोऽर्थस्य सम्भवात्, असतो वाऽवभासनायोगा'[5]दिति । अत्र निरधिष्ठानविपर्ययो मानसभ्रान्तिरेव, तत्रापि विपरीतख्यातिरित्युक्तम् । पुनरप्युक्तं तत्रैव—'यत्र सदृशमर्थमधिष्ठाय विपर्यय प्रवर्तते तत्रैव सादृश्यं कारणम्, निरधिष्ठाने तु विभ्रमे मनोदोषमात्रानुबन्धिनि नास्य सम्भवः, यथा हि कामातुरस्य इतस्ततो भाविनि स्त्रीनिर्भासे विज्ञाने ।'[6]

एषा हि मानसी भ्रान्तिः सर्वेषामेव सम्मता ; अप्रामाण्यं च तस्याः सर्वेषामेव सम्मतम् । यश्च भावनाधेयदेवतादिसाक्षात्कारस्तस्यापि प्रायशः मानसभ्रान्तिरूपत्वेमेवास्थेयम्, विसंवादान्निरधिष्ठानत्वाच्च, शीतातुरस्य वह्निसाक्षात्कारवत् । उक्तं हि वाचस्पतिमिश्रेण भामत्याम्........'भावनाधेयस्य साक्षात्कारस्य प्रतिभाप्रत्ययवत् संशयाक्रान्ततया प्रामाण्यायोगात् । तद्विधस्य तत्सामग्रीकस्य बहुलं व्यभिचारोपलब्धेः । न खल्वनुमानविबुद्धं वह्निं भावयतः शीतातुरस्य शिशिरभरमन्थरतरकायकाण्डस्य स्फुरज्ज्वालाजटिलानलसाक्षात्कारः प्रमाणान्तरेण संवाद्यते । विसंवादस्य बहुलमुपलम्भात् ।'[7] तत्र पातंजलादयः प्राहुः—यद्यपि भावनाधेयदेवतादिसाक्षात्कारः चाक्षुषादिरूपः विसंवादान्मानसभ्रान्तिरूपस्तथापि देवादीनां दिव्यरूपिणां मनःकरणकः मानससाक्षात्कारः सम्भवत्येव । अतएव—'स्वाध्यायादिष्टदेवता-

4 Ibid. Part II. p. 111
5, 6 Nyāyakandalī, p. 426 (Varanasi Sanskrit Viśvavidyalaya)
7 Bhāmatī, 1. 1. 1

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



संप्रयोगः'[8] इत्यादिपातंजलसूत्रे देवादीनां साक्षात्कारो यथार्थ उक्तः। यथोक्तं नैयायिकेनापि जयन्तभट्टेन—

मनःकरणकं ज्ञानं भावनाभ्याससम्भवम्।
भवति ध्यायतां......................॥'[9]

मानसभ्रान्तिकारणान्यपि बहुविधानि प्रसिद्धानि। उक्तानि च कारणानि उत्कटकाम-शोक-व्याध्युन्माद-चौरोपद्रव-स्वप्नोपद्रवरूपाणि।[10]

## कल्पनानिरूपणम्

अपरश्च विपर्ययप्रकारः कल्पनं नाम उच्यते। तदेव मनोराज्यमित्यप्युच्यते। साधारणस्तु विपर्ययो न पुरुषेच्छया कर्तुम कर्तुमन्यथाकर्तुं वा शक्यः। कल्पनन्तु पुरुषेण स्वेच्छया येन केनापि प्रकारेण कर्तुमकर्तुं वा शक्यम्, यथा मनोराज्यादिकम्। ध्यानमप्यारोपरूपमद्वैतिनां मतेन कल्पनमेव, स्वेच्छया कर्तुमकर्तुमन्यथाकर्तुं वा शक्यत्वात्। तथोक्तं विद्यारण्येन—'ध्यानं त्वनुभूते नानुभूते वा धर्माणां निरङ्कुशं कल्पनं यल्लोके मनोराज्यमिति प्रसिद्धम्।...स्वेच्छामनोभ्यां विना साधनान्तरानपेक्षत्वात्।......न हि मनोराज्यं राजादिना शास्त्रेण वा निवारयितुं शक्यते। परन्तु शास्त्रोक्तध्याने (कल्पने) फलविशेषो भवति नेतरत्र।'[1] पुनश्चोक्तं शास्त्रोक्तकल्पन-ध्यानविषये तेनैव—तदेवं...वस्तुविषयं प्रमाणजन्यं ज्ञानं, जन्यफलं वस्तुनिरपेक्षं पुरुषेच्छाप्रयत्नमात्रजन्यं ध्यानम्।'[2]

अपरश्चायं विशेषः कल्पनायाः,—कल्पना न साधारणविपर्ययवदधिष्ठानविशेषमपेक्षते, यत्र कुत्रापि स्वेच्छया कल्पनस्य सम्भवात्। न च

8 Pā. yo. sū. 2. 44.
9 Nyā. mañ. Part I. p. 97 (chow.)
10 Ibid. Part I. p. 97 (chow.)
1 Viv. pra. saṃ. P. 826-27 (acyuta-granthamālā)
2 Ibid. 836-37 (acyuta-granthamālā)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



कल्पनं मानसभ्रान्तिवदिन्द्रियसंप्रयोगमपेक्षते। चक्षुषी निमीलितयाऽपि रूपादिकल्पनस्य सम्भवात्। यथा च मानसभ्रान्तिर्दोषबलादापतति न तु तत्र पुरुषेच्छाऽपेक्षा, कल्पनन्तु पुरुषस्य स्वेच्छया सम्भवतीत्यादिर्विशेषो बोध्यः।

बौद्धमतेन तु वस्तुनि स्वलक्षणे नामाजात्यादिज्ञानमपि कल्पनमेव। न हि वस्तुनि नामजात्यादिकं किञ्चित् पारमार्थिकमस्ति, बुद्धिनिर्माणं कल्पनं हि तदिति।

---

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( १८ )

# जाग्रदाद्यवस्थानिरूपणम्

जीवात्मनोऽन्तःकरणविशिष्टस्य जाग्रत्स्वप्नाद्यवस्थावत्त्वं श्रूयते उपलभ्यते च। प्रश्नोपनिषदि तावत्—'भगवन् एतस्मिन् पुरुषे कानि स्वपन्ति, कान्यस्मिन् जाग्रति, कतर एष देवः स्वप्नान् पश्यति, कस्यैतत् सुखं भवती'[1]त्यादौ अवस्थात्रयस्योल्लेखो दृश्यते। प्रश्नोत्तरे च—'एवं ह वै तत् सर्वं परे देवे मनस्येकीभवति। तेन तर्ह्येष पुरुषो न शृणोति......न विसृजते नेयायते स्वपितीत्याचक्षते।'[2] इत्यत्र सुषुप्तिवर्णनं कृतम्। पुनश्च 'प्राणाग्नय एवैतस्मिन् पुरे जाग्रति'[3] इत्युक्त्या इन्द्रियाणां व्यापारकालीनाऽवस्था जाग्रदिति सूचितम्। 'अत्रैष देवः स्वप्ने महिमानमनुभवति, यद्दृष्टं दृष्टमनुपश्यति, श्रुतं श्रुतमेवार्थमनुशृणोति......दृष्टं चादृष्टं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति'[4] इत्यादौ जीवात्मनः स्वप्नावस्थामभिधाय तत्र इह जन्मनि अदृष्टानामननुभूतानामपि स्थूलसूक्ष्माणां संस्कारवशाद् दर्शनमुक्तम्। 'स यदा तेजसाऽभिभूतो भवत्यत्रैष देवः स्वप्नान् न पश्यत्यथ तदैतस्मिञ्छरीरे एतत्सुखं भवति। स यथा सोम्य वयांसि वासो वृक्षं संप्रतिष्ठन्ते एवं ह वै तत्सर्वं पर आत्मनि संप्रतिष्ठते'[5] इत्यादौ पुनस्तस्यैव देवस्यात्मनः सम्प्रसादरूपा सुषुप्तिर्वर्णिता। तामेवाभिप्रेत्य च 'मनो ह वाव यजमान... स एनं यजमानमहरहर्ब्रह्म गमयती'[6]त्यप्युक्तम्। ऐतरेयेऽपि 'त्रयः स्वप्नाः'[7] इत्यनेनावस्थात्रयमेवोक्तम्।

---

1 Pra. up. 4. 1
2 Ibid. 4. 2
3 Ibid. 4. 3
4 Ibid. 4. 5
5 Ibid. 4. 6-7
6 Ibid. 4. 4
7 Aitar. up. 3. 12

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



उपनिषदि यद्यपि प्रधानतः अवस्थात्रयमेव सर्वत्राम्नायते तेषामेवात्मपलब्ध्युपयोगित्वात् तथापि मूर्च्छामरणरूपमवस्थान्तरद्वयमपि लोके शास्त्रे चोपलभ्यते ।[8] तयोरपि निरूपणं यथाक्रमं क्रियते मनस्तत्त्वविज्ञाने उपयोगित्वादिति ।

## जाग्रन्निरूपणम

कैवल्योपनिषदि जाग्रत्स्वप्नसुषुप्त्यवस्थानां पृथक् श्लोकैर्निरूपणं श्रूयते । तत्र सकारणसफलजाग्रन्निरूपणमेवं कृतम्—

> 'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् ।
> स्त्री-अन्नपानादिविचित्रभोगैः स एव जाग्रत् परितृप्तिमेति ।।'[9]

अत्र ह्युपनिषन्मतानुसारेण स्वरूपतः शुद्धस्य जीवस्य जाग्रदाद्यवस्थालाभहेतुं मायाग्रस्तान्तःकरणपरिच्छेदं शरीरावलम्बनञ्चोक्त्वा स्त्र्यन्नादिबाह्यभोगावस्थाया एव जाग्रत्त्वमभिहितम् । तथा माण्डुक्योपनिषदि जागरितावस्थाविशिष्टस्य वैश्वानरस्य विश्वस्य च जीवस्य बहिःप्रज्ञत्वमेकोनविंशतिमुखत्वं स्थूलभोक्तृत्वञ्चोक्तम् ।[10] एतेन जाग्रदवस्थायाः लक्षणमपि सूचितम् । व्याख्यातञ्च तत् शङ्कराचार्येणैवम्—'जागरितं स्थानमस्येति जागरितस्थानः । बहिःप्रज्ञः स्वात्मव्यतिरिक्तविषये प्रज्ञा यस्य ;······तथैकोनविंशति मुखान्यस्य बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च दश, वायवश्च प्राणादयः पञ्च, मनोबुद्धग्रहंकारश्चित्तमिति मुखानि तान्युपलब्धिद्वाराणीत्यर्थः । स एवं विशिष्टो वैश्वानरो यथोक्तैर्द्वारैः शब्दादीन् स्थूलान् विषयान् भुङ्क्ते इति स्थूलभुक् ।'[11] एतेन जाग्रदवस्थाया अपि विवरणं कृतम् । इन्द्रियादिजन्यविषयज्ञानावस्था जाग्रदिति सूचितम् ।

---

8 Tattvanu. 1 (p. 89 Asiatic So.); Paingalopaniṣad. 1
'शरीरत्रयतादात्म्यात् कर्तृत्वभोक्तृत्वमगमत् । जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणधर्मयुक्तो घटीयन्त्रवदुद्विग्नो जातो मृत इव कुलालचक्रन्यायेन परिभ्रमति ।' (पैङ्गलोपनिषत्—१)

9 Kaiv. up. 1. 12

10 Māṇḍ. up. 1. 3

11 Māṇḍ. Sā. bhā. 1. 3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तथैवाद्वैतवादिभिरप्युपनिषन्मतानुसारेणैव जाग्रल्लक्षणं कृतम् । उक्तं हि धर्मराजाध्वरीन्द्रेण––'स च (जीवः) जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान् । तत्र जाग्रद्दशा नाम, इन्द्रियजन्यज्ञानावस्था । अवस्थान्तरे इन्द्रियाभावान्नातिव्याप्तिः । इन्द्रियजन्यज्ञानं चान्तःकरणवृत्तिः ।'[12] अत्रेदं बोध्यं यत्–– स्मृतिज्ञानकाले जाग्रति स्मृतिविषये इन्द्रियजन्यज्ञानाभावात् मनसश्चेन्द्रियत्वास्वीकारे तत्राव्याप्तिः स्यादिति तत्वारणाय इन्द्रियजन्येत्यस्य इन्द्रियव्यापारकालीनेत्यर्थो बोध्यः । तेन शुक्तिरजतादिभ्रमकाले पुरोवर्तिविषयकचाक्चिक्याकारेन्द्रियजन्यज्ञानसत्त्वात् रजतज्ञानस्येन्द्रियजन्यत्वाभावेऽपि नाव्याप्तिः । अद्वैतसिद्धान्ते भ्रमविषयरजतस्य तद्रजतज्ञानस्य चाविद्यापरिणामरूपत्वात् प्रातिभासिकरजतज्ञानस्य नेन्द्रियजन्यत्वं न वान्तःकरणवृत्तिरूपत्वमपि तु अविद्यावृत्तिरूपत्वमेवेति बोध्यम् । तथा जाग्रल्लक्षणमुक्तं मधुसुदनसरस्वत्या सिद्धान्तबिन्दौ––'एवं स्थिते जागरणादिव्यवस्था उच्यते । इन्द्रियवृत्तिकालीनार्थोपलम्भो जागरणम् । ······शुक्तिरजतादिज्ञानानामप्रामाणिकत्वात् तद्विषयस्याव्यावहारिकत्वेऽपीन्द्रियव्यापारकालीनत्वात् जागरणत्वोपपत्तिः ।'[13] अत्रापि जागत्भोगजनककर्माणि कारणं बोध्यम् । अतएव तेनैव स्वप्नलक्षणे एवमुक्तम्––'एवं जाग्रद्भोगजनककर्मक्षये स्वाप्नभोगजनककर्मोदये च सति ।'[13]

उक्तञ्च मूर्च्छामरणयोरप्यन्तर्भावेन महादेवसरस्वत्या तत्त्वानुसन्धाने–– 'तस्यैवाभिमानिनो जीवस्यावस्थाः पञ्च जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणभेदात् । दिगाद्यधिष्ठातृदेवतानुगृहीतैरिन्द्रियैः शब्दादिविषयानुभवावस्था जाग्रदवस्था ।'[14] जाग्रत्भोगप्रदकर्माणि जाग्रदवस्थाया अदृष्टं कारणमिति बोध्यम् ।

सांख्यमतेऽपि जाग्रल्लक्षणमुक्तं विज्ञानभिक्षुणा 'सुषुप्ताद्य-साक्षित्व'[15]मिति सूत्रभाष्ये । तत्र 'सुषुप्ताद्यस्यावस्थात्रयस्य बुद्धिनिष्ठस्य साक्षित्वमेव पुंसि' इत्यभिधाय जाग्रल्लक्षणमुक्तं––'तत्र जाग्रन्नामावस्थेन्द्रियद्वारा बुद्धे विषयाकारपरिणामः ।'[16] एतन्मते स्मृतिमानसभ्रमादीनामपि मनोरूपेन्द्रियजन्यत्वान्न तत्काले जाग्रत्त्वानुपपत्तिः ।

---

12 Vedā. pari. p. 183-84 (chow.)
13 Siddhānta-bin. p. 105-6 (B. O. R. 1)
14 Tattvānu 1. (p. 89. Asiatic So.)
15 Sā. sū. 1. 148
16 Sā. pra. bhā. 1. 148

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पातञ्जलेऽप्येवमेव जाग्रल्लक्षणं बोध्यम् । उक्तञ्च भोजराजेन—'तत्र प्रमाणविपर्ययविकल्पा जाग्रदवस्था' इति ।[17]

तार्किकाणामपि लक्षणमेवमेव ऊहनीयम् । तेषां मतेऽपि जाग्रत्-सुखादिज्ञानानां जाग्रन्मानसभ्रमानाञ्च मन-इन्द्रियजन्यत्वान्नाव्याप्तिः । चाक्षुषादिभ्रमकाले तु बहिरिन्द्रियव्यापारसत्त्वादेव जागत्त्वम् ।

रामानुजमाध्वादिवैष्णवदर्शनमते तु सर्वासामेवावस्थानां परमेश्वरकृतत्वात् सर्वासामेवावस्थानां तासूपलब्धविषयानाञ्च सत्यत्वमेव । तथाचोक्तं जयतीर्थेन तत्त्वप्रकाशिकायाम्—'देहाभिमानेन या स्थितिर्जीवस्य जाग्रदवस्था साऽपि पराभिध्यानादेव, न कालतः, तस्याचेतनत्वेनास्वातन्त्र्यादिति भावः ।'[18] उक्तञ्च मध्वाचार्येण पूर्णप्रज्ञभाष्ये—'देहयोगेन वासौ जाग्रदपि ; तत एव जागरिते स्थापयति स स्वप्ने'[19] इत्यादि । उक्तञ्च रामानुजेन श्रीभाष्ये—'एवं कर्मानुरूपगमनागमनजन्मादियोगेन जाग्रतो जीवस्य दुःखित्वं स्थापितम्'। इदानीमस्य स्वप्नावस्था परीक्ष्यते ।'[20]

## स्वप्ननिरूपणम्

उपनिषदि बहुत्रैव स्वप्नविवरणं दृश्यते । माण्डुक्ये तावत् आत्मनो द्वितीयपादस्य तैजसस्योपन्यासस्थले स्वप्नस्थानस्य तस्यान्तःप्रज्ञत्वं प्रविविक्त-भोक्तृत्वञ्चाभिहितम् ।[1] एतेन स्वप्नावस्थायाः लक्षणपि सूचितम् । व्याख्यातञ्च तत् शङ्कराचार्येणैवम्—'जाग्रत्प्रज्ञाऽनेकसाधना बहिर्विषयैवावभासमाना मनः-स्पन्दनमात्रा सती तथाभूतं संस्कारं मनसि आधत्ते । तन्मनस्तथा संस्कृतं चित्रित इव पटो बाह्यसाधनानपेक्षमविद्याकामकर्मभिः प्रेर्यमानं जाग्रद्वदवभासते । तथा चोक्तम्—अस्य लोकस्य सर्वावतो मात्रामादायेति[2] । तथा परे देवे मनस्येकी-भवतीति प्रस्तुत्य—अत्रैष देवः स्वप्ने महिमानमनुभवतीत्याथर्वणे ।[3] इन्द्रिया-

---

17 Yo. sū. bho. vṛ. 1. 11
18 Br. sū. Madhva-bhā. ṭikā—3.2.6
19 Br. sū. Madhva-bhā.—3.2.6.
20 Br. sū. Rā. bhā. 3.2.1

1 Maṇḍ. up. 1.4.  2 Bṛ. up. 4.3.9.  3 Praśna. up. 4.5.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पेक्षयाऽन्तःस्थत्वान्मनसस्तद्वासनारूपा च स्वप्ने प्रज्ञा यस्येत्यन्तःप्रज्ञः। विषयशून्यायां प्रज्ञायां केवलप्रकाशरूपायां विषयित्वेन भवति तैजसः। विश्वस्य सविषयत्वेन प्रज्ञायाः स्थूलाया भोज्यत्वम्। इह पुनः केवला वासनामात्रा प्रज्ञा भोज्येति प्रतिविक्तो भोग इति।'[4] अत्रापि व्याख्याने स्वप्नावस्थाया जाग्रद्वासनामयत्वं चित्रितपटवत् संस्कारविशिष्टस्य मनसः स्वप्नेऽवस्थानं तथा विषयशून्यत्वमित्याद्यभिहितम्। इन्द्रियाजन्यवासनामयविषयभोगावस्था स्वप्न इत्यपि सूचितम्।

तथा बृहदारण्यकोऽपि स्वप्ने जीवस्यान्तःशरीरे महिमानुभवं वर्णयति––'स यत्रैतत् स्वप्नया चरति ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मणः ······स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्ततैवमेवैष एतत् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते।'[5] तथा स्वप्ने आत्मनो जाग्रत्संस्कारैः स्वाप्नविषयाणां स्वयंनिर्मातृत्वं ज्योतिरन्तरविविक्तञ्च स्वयंज्योतिष्ट्वं प्रदर्शितम्––'स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति, अत्रायं पुरुषः स्वयंज्योतिर्भवति।'[6] स्वप्ने बाह्यविषयाभावेऽपि तेषां स्वयंनिर्मातृत्वमेवाह––'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते, न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान् मुदः प्रमुदः सृजते, न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान् पुष्करिणीः स्रवन्तीः सृजते, स हि कर्ता।'[7] अत्र स्वप्ने रथादीनामभावकथनात् न हि तत् स्वयंनिर्माणं वास्तवी सृष्टिः, अपितु प्रातिभासिकसृष्टिरेव बोध्या। यत्तु तत्रैव ––'यानि ह्येव जाग्रत् पश्यति तानि सुप्त इत्यत्रायं पुरुष स्वयंज्योतिर्भवती'[8]-त्युक्तं तदपि 'न तत्र रथाः' इत्याद्यनुरोधेन स्वयं-ज्योतिष्ट्वकथनाच्च जाग्रत्संस्कारजन्यानि जाग्रत्सदृशानि सुप्तः पश्यतीत्यर्थं बोधयति। जाग्रत्कालीनव्यावहारिकपदार्थानामेव तत्र सद्भावे विविक्त-स्वयंज्योतिष्ट्वप्रदर्शनं स्वप्ने न सङ्गच्छते। अन्यत्र च बृहदारण्यके––'ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य हरितस्य लोहितस्य पूर्णाः, अथ यत्रैनं घ्नन्तीव जिनन्तीव···गर्तमिव पतति यदेव जाग्रत् भयं

4 Mand up. Śā. bhā. 1.4
5 Bṛ. up. 2.1.18
6 Ibid. 4.3.9
7 Ibid. 4.3.10.
8 Ibid. 4.3.14

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पश्यति तदत्राविद्यया मन्यते'[9] इत्युक्त्वा स्वाप्नज्ञानस्य स्वप्नवहनाडीयोगः अविद्याजन्यत्वञ्चाभिहितम् ।

तस्मात् कल्पिता एव स्वाप्नसृष्टिर्जीवस्य तत्राभिहिता···'सृजते, स हि कर्ता' इति । स्पष्टं च तदुक्तं कैवल्योपनिषदि—'स्वप्ने स जीवः सुखदुःखभोक्ता स्वमायया कल्पितजीवलोके ।'[9a] अत्र स्वमायया कल्पितत्वोक्तेः स्पष्टमेव स्वाप्न-विषयाणां जीवकल्पितत्वमिति ।

उपनिषन्मतानुसारेणैवाद्वैतवेदान्तिनां प्रक्रियारचनादनन्तरं तन्मतमेव प्रदर्श्यते । शङ्करकृतं माण्डुक्यभाष्यं हि स्वप्नविषयकं पूर्वमेवोपन्यस्तम् । पुनश्च स्वप्नविषयकं ब्रह्मसूत्रभाष्यमुपन्यस्यते । तथा हि—'सन्ध्ये सृष्टिराह हि' 'निर्मातारं चैके पुत्रादयश्च'[10] इति पूर्वपक्षसूत्रद्वये···'रथयोगान् पथः सृजते' 'कामं कामं पुरुषो निर्मिमाणः'[11] 'यानि ह्येव जाग्रत् पश्यति तानि सुप्तः'[11a] इत्यादिश्रुत्यवष्टम्भेन स्वाप्नसृष्टे र्वास्तवत्वमाशङ्क्य 'मायामात्रं तु कार्त्स्नेनानभिव्यक्तस्वरूपत्वा'दिति[12] सिद्धान्तसूत्रस्य भाष्ये उक्तमाचार्येण—'मायैव सन्ध्ये सृष्टि र्न परमार्थगन्धोऽप्यस्ति । न हि कार्त्स्नेन परमार्थवस्तु-धर्मेणाभिव्यक्तस्वरूपः स्वप्नः । किं पुनः कार्त्स्नमभिप्रेतम् ? देशकाल-निमित्तसम्पत्तिरबाधश्च । न तावत् स्वप्ने रथादीनामुचितो देशः सम्भवति । न हि संवृते (संकुचिते) देहदेशे रथादयोऽवकाशं लभेरन् । स्यादेतत्—बहिर्देशं देहात् स्वप्नं द्रक्ष्यति देशान्तरितद्रव्यग्रहणात् । दर्शयति च श्रुति बहिर्देहात् स्वप्नम्—बहिष्कुलायादमृतश्चरित्वा, स ईयतेऽमृतो यत्र कामम् ।[13]······ नेत्युच्यते । न हि सुप्तस्य जन्तोः क्षणमात्रेण योजनशतान्तरितं देशं पर्येतुं विपर्येतुं च ततः सामर्थ्यं सम्भाव्यते । क्वचिच्च प्रत्यागमनवर्जितं स्वप्नं श्रावयति—कुरुष्वहमद्य शयानो निद्रयाऽभिप्लुतः स्वप्ने पाञ्चालान-भिगतश्चास्मिन् प्रतिवुद्धश्चेति ।······यथाभूतानि चायं देशान्तराणि स्वप्ने पश्यति न तानि तथाभूतान्येव भवन्ति ।······दर्शयति च श्रुतिरन्त-रेव देहे स्वप्नम्-स यत्रैतत् स्वप्नया चरतीत्युपक्रम्य—स्वे शरीरे यथाकामं परिवर्तते ।[14]···कालविसंवादोऽपि च स्वप्ने भवति, रजन्यां सुप्तो वासरं

---

9 Ibid. 4.3.20
9a Kaiv. up. 1.13
10 Bṛ. sū. 3. 2. 1, 2
11 Kaṭha. up. 5. 8
11a Bṛ. up. 4. 3. 14
12 Br. sū. 3. 2. 3 , Śā. bhā.
13 Bṛ. up. 4. 3. 13
14 Ibid. 2. 1. 18

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



भारते वर्षे मन्यते । तथा मुहूर्तमात्रवर्तिनि स्वप्ने कदाचित् बहुवर्षपूगानतिवाहयति । निमित्तान्यपि च स्वप्ने न बुद्धये कर्मणे वोचितानि विद्यन्ते ।... स्वप्ने एव चैते सुलभबाधा भवन्ति, आद्यन्तयोर्व्यभिचारदर्शनात् ।...स्पष्टं चाभावं रथादीनां स्वप्ने श्रावयति शास्त्रम्—न तत्र रथा न रथयोगा न पन्थानो भवन्ती[15]त्यादि । तस्मात् मायामात्रं स्वप्नदर्शनम् ।'[16] अत्र भाष्ये शङ्कराचार्येण स्वाप्नसृष्टेः स्वाप्नविषयाणाञ्च मिथ्यात्वं स्थापितम् । 'स हि कर्ता' इत्यनेन स्वाप्नसृष्टेर्जीवकर्तृकत्वमप्युक्तम् । न सा सृष्टिर्जीवस्य सङ्कल्पपूर्विका वास्तवी सृष्टिः ; अपि त्वविद्याकल्पिता जाग्रत्प्रभववासनाजन्या । तथैवोक्तं भाष्ये—'अतश्च न सांकल्पिकी जीवस्य स्वप्ने रथादिसृष्टिर्घटते । यदि सांकल्पिकी स्वप्ने रथादिसृष्टिः स्यान्नैवानिष्टं कश्चित् स्वप्नं पश्येत् । न हि कश्चिदनिष्टं संकल्पयते । यत् पुनरुक्तं जागरितदेशश्रुतिः[17] स्वप्नस्य सत्यत्वं स्थापयतीति न तत् साम्यवचनं सत्यत्वाभिप्रायम्, स्वयंज्योतिष्ट्वविरोधात्, श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात् । जागरितप्रभववासनानिमित्तत्वात्तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायं तत् । तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम् ।'[17a]

एतद्भाष्यविवरणानुसारेणैव शङ्करमतानुवर्तिनोऽद्वैतवादिनः स्वाप्नविषयाणां प्रातिभासिकत्वादविद्यापरिणामरूपत्वं मुख्यसिद्धान्तरूपेण स्वीकुर्वन्ति । यदपि कैश्चित् वेदान्तपरिभाषाकारादिभिः स्वाप्नपदार्थानां रथादीनामन्तःकरणपरिणामत्वमुक्तं तन्न मुख्यसिद्धान्तरूपमिति बोध्यम् । स्वाप्नविषयाणां मनोगतसंस्कारजन्यत्वेन वाऽन्तःकरणपरिणामत्वव्यपदेशः । तथैवोक्तं मधुसूदनसरस्वत्या सिद्धान्तबिन्दौ स्वप्नावस्थाया विवरणं लक्षणञ्च—'एवं जाग्रद्भोगजनककर्मक्षये स्वाप्नभोगजनककर्मोदये च सति निद्राख्यया तामस्या वृत्त्या स्थूलदेहाभिमाने दूरीकृते सर्वेन्द्रियेषु देवतानुग्रहाभावात् निर्व्यापारतया लीनेषु विश्वोऽपि (जाग्रज्जीवोऽपि) लीन इत्युच्यते । तदा च स्वप्नावस्था । तत्रान्तःकरणगतवासनानिमित्त इन्द्रियवृत्त्यभावकालीनोऽर्थोपलम्भः स्वप्नः । तत्र मन एव गजतुरगाद्यर्थाकारेण विवर्तते (परिणमते), अविद्यावृत्त्या च ज्ञायते इति केचित् । अविद्या एव शुक्तिरजतादिवत् स्वप्नार्थाकारेण परिणमते ज्ञायते चा विद्यावृत्त्या इत्यन्ये ।...(वस्तुतस्तु) अविद्याया एव

15 Bṛ. up. bhāṣya 4. 3. 10
16 Br. sū. Śā. bhā. 3. 2. 3
17 Bṛ. up. 4. 3. 14
17a Br. sū. Śā. bhā. 3. 2. 6

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सर्वत्रार्थाध्यासज्ञानाध्यासोपादानत्वेन क्लृप्ततया, मनोगतवासनानिमित्तत्वेन च क्वचिन् मनःपरिणामत्वव्यपदेशात् ।...ननु तदा मनसः दृश्याकारपरिणामानभ्युपगमे द्रष्टृत्वसम्भवेनात्मनः (स्वप्ने) स्वयंज्योतिष्ट्वासिद्धिरिति चेन्न । बहिरिन्द्रियजन्यवृत्त्यभावेन तदानीं मनसोऽग्राहकत्वात् तत्सहकारेणैव तस्य ग्राहकत्वनियमात् सवृत्तिकान्तःकरणावच्छिन्नस्यैव चैतन्यस्य प्रमातृत्वनियमात् तदा अन्तःकरणसत्त्वेऽपि प्रमात्रभावः ।...स हि कर्ता इति च जीवकर्तृत्वश्रुतेः राकाशादिप्रपञ्चवत् सर्वसाधारण्यापत्तेश्च (स्वाप्नार्थानां) न मूलाज्ञानावच्छिन्नं ब्रह्मचैतन्यमधिष्ठानम् (किन्तु मनोऽवच्छिन्नं जीवचैतन्यमेव) ।...स्वप्ने तु गज-इत्याकारवत् अयम्-इत्याकारोऽपि कल्पित एव । उभयाकारबाधेऽपि अधिष्ठानभूतचैतन्याबाधान्न शून्यवादप्रसङ्गः । जाग्रद्दशायामपि शुक्तीदंकारविलक्षणस्य प्रातीतिकस्यैव रजतेदंकारस्य भानाभ्युपगमाच्च । अध्यस्तमेव परिस्फुरति भ्रमेषु[17b] इति न्यायात् । (मतान्तरेण) शुक्तीदमंशभानपक्षेऽपि नेदमंशसत्यत्वमध्यासे प्रयोजकम्, किन्तु अधिष्ठानसत्यत्वम् । अधिष्ठानं च तत्राज्ञातं शुक्तिचैतन्यमिवात्रापि साक्षिचैतन्यं विद्यते एव'[18] इति ।

उक्तञ्च महादेवसरस्वत्याऽपि—'जाग्रत्भोगप्रदकर्मोपरमे सतीन्द्रियोपरमे जाग्रदनुभवजन्यसंस्कारोद्भूतविषयतज्ज्ञानावस्था स्वप्नावस्था'[1]इति ।[19]

इदमत्रावधेयम्—स्वप्ने अविद्यावृत्त्यैव स्वाप्नार्थानामनुभवात् तेनैवान्तःकरणे अविद्यायां वा संस्कारजननात् स्वाप्नार्थानां तदुत्तरप्रबोधकाले अविद्यावृत्त्यैव स्मरणोपपत्तिः ।

जाग्रद्भ्रमकालेऽप्यविद्यावृत्त्यैव शुक्तिरजताद्युपलब्धेरन्तकरणे मूलाविद्यायां वा भ्रमविषयाणां संस्कारजननात् तैरेव संस्कारैर्बाधज्ञानानन्तरमपि भ्रमविषयाणां शुक्तिरजतादीनामविद्यावृत्त्यैव स्मरणोपपत्तिः ।

अपि च, उक्तं हि विद्यारण्येन—'संप्रयोगो हि जागरणे बाह्यशुक्तीदमंशादिगोचरान्तःकरणवृत्त्युत्पादकः, अन्तःकरणस्य देहाद् बहिरस्वातन्त्र्यात् । स्वप्ने तु देहस्यान्तर् अन्तःकरणं स्वतन्त्रत्वात् स्वयमेव प्रवर्तिष्यते इति नास्ति संप्रयोगापेक्षा । ततो जागरणे इव स्वप्नेऽप्यन्तःकरणवृत्तिरेव (दोष-

17b Saṃkṣepa-Śarīraka, 1. 37

18 Siddhānta. bin. p. 107-19 (B. O. R.I.)

19 Tattvānu. 1 (p. 89, Asiatic Society, Cal.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



संस्कारातिरिक्तं) तृतीयं कारणम्। अधिष्ठानमपि सर्वत्र वृत्त्यवच्छिन्नमेव। ......तथा स्वप्नेऽपि देहस्यान्तरन्तःकरणवृत्तौ निद्रादिदोषोपप्लुतायामभिव्यक्ते वृत्त्यवच्छिन्नचैतन्ये स्थिताऽविद्या अदृष्टोद्बोधितनानासंस्कारसहिता प्रपञ्चाकारेण विवर्तताम्।'[19a] एतन्मते स्वप्नेऽपि स्वतन्त्रान्तःकरणवृत्तिरस्त्येव। तदवच्छिन्नं चैतन्यमेव स्वप्नाधिष्ठानम्। स्वाप्नार्थाश्च वृत्त्यवच्छिन्नचैतन्यनिष्ठाविद्या-परिणामा एव। उक्तञ्च शङ्करेण बृहदारण्यकभाष्ये—'सा (अन्तःकरणवृत्तिः) हि तत्र विषयभूता सर्ववासनामयी प्रकाशते। सा तत्र स्वयंभा उच्यते; स्वेन भासा विषयभूतेन, स्वेन च ज्योतिषा तद्विषयिना......अलुप्तदृक्-स्वभावेन तद्भारूपं वासनात्मकं विषयीकुर्वन् प्रस्वपिति।'[19b]

यत्तु वाचस्पतिमिश्रेण भामत्यां स्वप्नस्य स्मृतिविभ्रमरूपत्वमुक्तं तत्तु न्यायमताभ्युपमेनैवेति बोध्यम्। तथा ह्युक्तं तेन—'स्वप्नज्ञानस्यापि स्मृति-विभ्रमरूपस्यैवंरूपत्वात्। तत्रापि स्मर्यमाने पित्रादौ निद्रोपप्लववशादसंन्नि-धानापरामर्शे तत्र तत्र पूर्वदृष्टस्यैव सन्निहितदेशकालत्वस्य समारोपः'[20] इति।

अतएव स्वप्नस्य स्मृतिरूपत्वं निराकृत्य तस्य भ्रमरूपत्वमुक्तं महादेवा-नन्देन तत्त्वानुसन्धाने—'स्वप्नोऽपि आभ्यन्तरः सोपाधिकभ्रम एव, न तु स्मृतिः। तथाहि—जाग्रत्भोगप्रदकर्मोपरमे सति स्वप्नभोगप्रदकर्मोद्रेके सकल-विषयेन्द्रियादिवासनावासितं निद्रादोषोपप्लुतमन्तःकरणं रथादिविषयाकारेण ग्राहकेन्द्रियाकारेण रथादिविषयाकारवृत्त्याकारेण च परिणमते।......एवं स्वप्नोऽनुभवरूप एव न स्मृतिः, अन्यथा रथं पश्यामीत्यनुभवविरोध-प्रसङ्गात्। स्वप्नपदार्थानामन्तःकरणमायाद्वारा शुद्धचैतन्याध्वस्तत्वेन इदानीं तत्साक्षात्काराभावेन बाधाभावेऽपि सोपाधिकतया उपाधिनिवृत्त्या तन्निवृत्ति-रिति न जाग्रदवस्थायामनुवृत्तिः। कर्म-निद्रोपद्रुतमन्तःकरणमुपाधिः।...... केचित्तु स्वप्नाध्यासं निरुपाधिकं वदन्ति। तत्र विरोधिजाग्रत्प्रत्ययेन तन्निवृत्तिः।......स्वप्नादिरन्तकरणवृत्तिरूपः रजतादिभ्रमोऽविद्यावृत्तिरूपः। (संशयस्तु अविद्यावृत्तिरेव)।'[20a] एतन्मते तु स्वाप्नार्था अन्तःकरणवृत्तिरूपा इति स्पष्टम्।

---

19a Viv. pra. saṃ. p. 142-43 (acyutagranthamālā-Kashi)

19b Bṛ up. Sā. bhā. 4. 3. 9

20 Br. sū. bhāmatī 1. 1. 1

20a Tattvānu. p. 290-201 (Asiatic Society)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



इदानीं स्वप्नविषये तार्किकमतान्युच्यन्ते। तत्र वैशेषिकास्तावत्—'तथा स्वप्नः'[21] इति सूत्रे स्मृतौ यथा आत्ममनसोः संयोगविशेषः संस्कारश्च कारणं तथा स्वप्नसंज्ञकमानसज्ञानेऽपि। आत्ममनःसंयोगविशेषात् पूर्वानुभवजनित-संस्काराच्च स्वप्नो मानसज्ञानविशेषो भवति। अत्र संयोगे विशेषो मेध्यामनःसंयोगात्मकदोषविशिष्टत्वम्। अत एव तदानीं भ्रम एव भवति। ......अत्र च मानसं ज्ञानं ज्ञानलक्षणालौकिकसन्निकर्षाद् भवति।[22]

उक्तञ्च शङ्करमिश्रेण कणादरहस्ये—'अथ स्वप्नः। स च सिद्धोप-युक्तान्तःकरणजन्यं ज्ञानम्; सिद्धा च निद्रा, यदा स्वप्नवहनाडीमध्यवर्ति मनस्तदा बहिरिन्द्रियसम्बन्धविरहात् स्वप्नज्ञानानि जायन्ते।'[23]

उक्तञ्च शिवादित्येन—'निद्रादुष्टान्तःकरणजं ज्ञानं स्वप्नः। योगज-धर्माननुगृहीतस्य मनसो निरिन्द्रियप्रदेशावस्थानं निद्रा'[24]इति। व्याख्यातञ्च मितभाषिण्यां माधवसरस्वत्या—'निद्रादोषेण दुष्टं यदन्तःकरणं मनः तज्जन्यं ज्ञानं स्वप्न इत्यर्थः। जागरे घटादिज्ञानव्युदासायान्तःकरणेति। जागरे सुखादिज्ञानव्युदासाय दुष्टेति। जाग्रत्मानसकर्मव्युदासाय निद्रेति। केयं निद्रा नामेत्यत आह—योगजेति। योगाभ्यासेन जनितो धर्मो योगजः, तेनान-नुगृहीतस्यासहकृतस्य मनसो निरिन्द्रियप्रदेशे बाह्येन्द्रियसम्बन्धरहिते स्थले वर्तनं निद्रा। समाधावतिव्याप्तिवारणाय योगजधर्माननुगृहीतस्येति।'[24] निरिन्द्रियप्रदेश इत्यनेन मेध्यानाम्नी (हितानाम्नी वा) स्वप्नवहा नाडी बोध्या। उक्तं च टीकायामशेषानन्देन—'निरिन्द्रियप्रदेशः स्वप्नवहा नाडी-त्याहुः।'[25] उक्तञ्च बलभद्रेणापि—'स्वप्नवहनाडीसंयोगोऽभिमतस्तत्सहायेना-न्तःकरणेन मनसा जनितं ज्ञानं स्वप्न इत्यर्थः। निरिन्द्रियप्रदेशः स्वप्नवह-नाडी।'[26]

---

21 Vai. sū. 9. 2. 7
22 Vide vai. sū. tīkā (2. 2. 7) by Jaynarayan Tarkālankar.
23 Kaṇāda-rahasya p. 120 (chow.)
24 Sap. pad. p. 82 (Calcutta Metropolitian Series)
24 Mita. bhā. p. 82 (C. M. S.)
25 Sap. pad. tīkā p. 141 (C. M. S.)
26 Sap. pad. ṭikā p. 158 (C. M. S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



चरके तु आयुर्वेदे मनोवहानां स्रोतसामपि वातपित्तश्लेष्मदोषजन्यदारुणस्वप्नस्थानत्वमुक्तम् । यथा—

'मनोवहानां पूर्णत्वाद्दोषैरतिबलैस्त्रिभिः ।
स्रोतसां दारुणान् स्वप्नान् काले पश्यति दारुणे ।।
नातिप्रसुप्तः पुरुषः सफलानफलानपि ।
इन्द्रियेशेन मनसा स्वप्नान् पश्यत्यनेकधा ।।'[26a]

'मनसा' इत्यनेन स्वप्नज्ञानस्य मानसत्वमप्युक्तम् ।

उक्तं हि माधवसरस्वत्या अन्यत्र—'...स्वप्नस्तु गगनलक्षणाद्यविद्यमानं विद्यमानत्वेन असन्निहितं गजादि सन्निहितत्वेन दर्शयन् विपर्यय एव तल्लक्षणाक्रान्तत्वात् ।'[27]

प्रशस्तभाष्येऽपि विस्तारेण स्वप्नविवरणमुक्तम् । तथा हि—'उपरतेन्द्रियग्रामस्य प्रलीनमनस्कस्येन्द्रियद्वारेणैव यदनुभवनं मानसं तत् स्वप्नज्ञानम् । कथम् ? यदा बुद्धिपूर्वादात्मनः शरीरव्यापारादहनि खिन्नानां प्राणिनां निशि विश्रामार्थमाहारपरिणामार्थं वाऽदृष्टकारितप्रयत्नापेक्षादात्मान्तःकरणसम्बन्धान्मनसि क्रियाप्रबन्धादन्तर्हृदये निरिन्द्रिये आत्मप्रदेशे निश्चलं मनस्तिष्ठति तदा प्रलीनमनस्क इत्याख्यायते । प्रलीने च तस्मिन्नुपरतेन्द्रियग्रामो भवति, तस्यामवस्थायां प्रबन्धेन प्राणापानसन्तानप्रवृत्तावात्ममनःसंयोगविशेषात् स्वापाख्यात् संस्काराच्चेन्द्रियद्वारेणैव (मनसा) असत्सु विषयेषु प्रत्यक्षाकारं स्वप्नज्ञानमुत्पद्यते ।'[28]

कारणभेदात् स्वप्नानां त्रैविध्यमप्युक्तं प्रशस्तपादेन । यथोक्तं—'तत्तु त्रिविधम्—संस्कारपाटवात्, धातुदोषात्, अदृष्टाच्च । तत्र संस्कारपाटवात् तावत् कामी क्रुद्धो वा यदा यमर्थमादृतश्चिन्तयन् स्वपिति तदा सैव चिन्तासन्ततिः प्रत्यक्षाकारा सञ्जायते । धातुदोषाद् वातप्रकृतिस्तद्दूषितो वा आकाशगमनादीन् पश्यति । पित्तप्रकृतिः पित्तदूषितो वाग्निप्रवेशकनकपर्वतादीन् पश्यति । श्लेष्मप्रकृतिः श्लेष्मदूषितो वा सरित्समुद्रप्रतरणहिमपर्वतादीन् पश्यति । यत् स्वयमनुभूतेष्वननुभूतेषु वा प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा यत्शुभावेदकं गजारोहणछत्रलाभादि तत् सर्वं संस्कार-

26a Caraka. 5. 5. 40-41
27 Mita. bhā. P. 32 (C.M.S.)
28 Pra. bhā. p. 436-39 (Varanasi Sanskrit Viśva-Vidyalaya)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



धर्माभ्यां भवति । विपरीतं च तैलाभ्यञ्जन-खरोष्ट्रारोहणादि तत् सर्वमधर्म-संस्काराभ्यां भवति । अत्यन्ताप्रसिद्धार्थेऽवदष्टादेव भवति ।'[29]

'स्वप्नान्तिक'[30]मितिवैशेषिकसूत्रस्य तात्पर्यमप्युक्तं प्रशस्तपादेन—'स्वप्नान्तिकं यद्यप्युपरतेन्द्रियग्रामस्य भवति, तथाप्यतीतस्य ज्ञानप्रबन्धस्य प्रत्यवेक्षणात् स्मृतिरेवेति ।'[31] एतस्यापि परिष्कार उक्तः कन्दलीकारेण श्रीधरेण—'कदाचित् स्वप्नदृष्टस्यार्थस्य स्वप्नावस्थायामेव प्रतिसन्धानं भवति —अयं मया दृष्ट इति ; तच्च पूर्वानुभूतस्य स्वप्नस्यान्तेऽवसाने भवतीति स्वप्नान्तिकमुच्यते ।……स्वप्नान्तिकं यद्यपि उपरतेन्द्रियग्रामस्य भवति, तथाप्यतीतस्य पूर्वानुभूतस्य स्वप्नज्ञानप्रबन्धस्य प्रत्यवेक्षणादनुसन्धानात् स्मृतिरेवेति ।'[32] एतेन स्वप्नज्ञानस्य मानसविपर्ययरूपस्य स्वप्नावस्थायामेव स्मृतिरपि सम्भवतीत्युक्तम् ।

उक्तञ्च कन्दलीकारेण स्वप्नविवरणे—'उपरतः स्वविषयग्रहणाद्विरतः,… उपरतेन्द्रियग्रामो भवति, अन्तःकरणानधिष्ठितानामिन्द्रियाणां विषयग्रहणाभावात् । ……आत्ममनःसंयोगात् स्वापाख्यात्—स्वाप इति नामधेयात्, संस्काराच्च पूर्वानुभूतविषयात्, असत्सु देशकालव्यवहितेषु विषयेषु प्रत्यक्षाकारमपरोक्ष-संवेदनाकारं स्वप्नज्ञानमुत्पद्यते ।……चन्द्रादित्यभक्षणादिषु ज्ञानं तददृष्टादेव, अननुभूतेषु संस्काराभावात् । यद्यपि संस्कारपाटवात् धातुदोषाददृष्टाद्वा समारोपितवाह्यस्वरूपः स्वप्नप्रत्ययो भवन्नतस्मिंस्तदिति भावाद्विपर्ययः तथाप्यवस्थाविशेषभावित्वात् पृथगुक्तः ।'[33] एतेन मानसविपर्ययरूपत्वमेव स्वप्नस्योक्तम् ।

गौतमीयन्यायसूत्रेषु यद्यपि स्वप्नाद्यवस्थालक्षणं न कृतं तथापि सूत्रेषु[34] दृष्टान्तरूपेण स्वप्नस्योल्लेखः भाष्ये किञ्चिद्विवरणं च लभ्यते । उक्तं च वात्स्यायनेन भाष्ये—'यथा च स्वप्ने न विषयाः सन्ति, अथ चाभिमानो भवति ; स्वप्नान्ते विषयाभिमानवत् प्रमाणप्रमेयाभिमानः, कश्चित् स्वप्नो मयोपसंहितः,

---

29 Ibid. p. 439-41 (V. S. V.)
30 Vai. sū. 9. 2. 8
31 Pra. bhā. p. 441. (V. S. V.)
32 Nyā. kan. p. 441-42 (V. S. V.)
33 Ibid p. 467-69 ; 441 (V. S. V.)
34 Nyā. sū. 4. 2. 31-35



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



कश्चित् प्रमोदोपसंहितः, कश्चिदुभयविपरीतः, कदाचित् स्वप्नमेव न पश्यतीति निमित्तवतस्तु स्वप्नविषयाभिमानस्य निमित्तविकल्पाद् विकल्पोपपत्तिः ।...... तथा स्वप्ने विषयग्रहणं पूर्वोपलब्धविषयं न तस्य प्रत्याख्यानाय कल्पते ; एवं दृष्टविषश्च स्वप्नान्तो जागरितान्तेन ; यः सुप्तः स्वप्नं पश्यति स एव जाग्रत् स्वप्नदर्शनानि प्रतिसन्धत्ते--इदमद्राक्षमिति ।'[35] अत्र स्वप्नज्ञानस्य भ्रमरूपत्वं तथा जाग्रत्संस्कारजन्यत्वं प्रबोधे च स्वाप्नपदार्थानां प्रतिसन्धानमित्यादिकं स्पष्टमुक्तम् । तथा अदृष्टादिनिमित्तभेदात् स्वप्नानां भयप्रमोदाद्युपसंहित-त्वमप्युक्तम् । अतः वैशेषिकमते प्राचीनन्यायमते च स्वप्नज्ञानस्य मानसभ्रम-रूपत्वमेव बोध्यं पूर्वानुभवजन्यसंस्कारजन्यत्वञ्च । न तु स्मृतिरूपत्वम् ।

जयन्तभट्टेन हि स्वप्ने पूर्वदृष्टानामेवार्थानामन्यत्र भानमित्युक्तं न त्वत्यन्ता-सताम् । तदुक्तम्--'प्रतिभानिद्रादिमनोदोषजन्मनि स्वप्नेऽपि पूर्वदृष्टस्यैव तस्याकारोल्लेखः ।

ज्वलज्जल-गलद्वह्निद्रवद्रव्यादिदर्शने ।
रूपमन्यस्थमन्यत्र वेत्ति न त्वसदेव तत् ।।
तदेवं कान्तबोधेषु नास्त्यत्यन्तासतां प्रथा ।
देशकालान्यथात्वं तु केवलं भाति वस्तुनः ।।'[36]

अन्यत्र च--'स्वप्नज्ञानमवरतेन्द्रियग्रामस्य भवत् कथं न मानस'मिति ।[37]

केशवमिश्रेण तु तर्कभाषायां स्वप्नस्यायथार्थस्मृतिरूपत्वमभिहितम् । तथा ह्युक्तम्—'स्वप्ने तु सर्वमेव ज्ञानं स्मरणमयथार्थं च । दोषवशेन तदितिस्थाने इदमुदयात् ।'[38] इदमेव नव्यतार्किकानां मतं यत् स्वप्नस्य स्मृतिविभ्रमरूपत्वम् । संस्कारात् स्मर्यमाने रथादौ दोषवशेनासन्निधानापरामर्शात् दोषवशादेव उपनीत-भानबलेन सन्निहितत्वादिभानात् ।

सांख्यमते हि 'सुषुप्त्याद्यसाक्षित्व'मिति सूत्रभाष्ये विज्ञानभिक्षुणोक्तम्— 'सुषुप्त्याद्यस्यावस्थात्रयस्य बुद्धिनिष्ठस्य साक्षित्वमेव पुंसीत्यर्थः । तदुक्तम्—

जाग्रत् स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः ।
तासां विलक्षणो जीवः साक्षित्वेन व्यवस्थितः ।।'[39]

35 Nyā. sū. 4. 2. 29, 31, 32 (Ananda Asram)
36 Nyā. man. II. p. 111
37 Ibid. II. p. 69
38 Tark. bhā. p. 190 (chow.)
39 Sā. pra. bhā. 1. 148

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



एतेन पुरुषस्य बुद्धिनिष्ठस्वप्नावस्थासाक्षित्वमुक्तम् । स्वप्नावस्था हि संस्कारमात्रजन्यो बु `विंषयाकारपरिणाम इति तत्रैवोक्तम् । अतः स्वाप्नोर्थानां संस्कारमात्रजन्यबुद्धिपरिणामरूपत्वमेव । तज्ज्ञानस्य , अर्थासन्निधानात् अतादृशे तद्बुद्धिरूपत्वाच्च स्मृतिविपर्ययरूपत्वमेव बोध्यम् । पुरुषस्य स्वप्नादिसाक्षित्वं तु तादृशबुद्धिवृत्तीनां स्वप्रतिबिम्बितानां प्रकाशनमिति विज्ञानभिक्षुमतम् । वाचस्पतिमिश्रेमते तु पुरुषस्य बुद्धिवृत्तौ प्रतिबिम्बनेनैव तत्प्रकाशकत्वात् साक्षित्वम् ।

पातञ्जलमतेऽपि स्वप्नस्य स्मृतिविपर्ययरूपत्वमेव । तदुक्तं स्मृतिसूत्रस्य व्यासभाष्ये—'ग्राह्याकारपूर्वा स्मृतिः, सा च द्वयी स्वप्ने भावितस्मर्तव्या, जाग्रत्समये त्वभावितस्मर्तव्येति ।'[40] उक्तञ्च वाचस्पतिमिश्रेण तद्व्याख्याने—'तदनेन वृत्त्यन्तरविषयीकृतगोचरा स्मृतिरित्युक्तं भवति ।...... नन्वस्ति स्मृतेरपि सम्प्रमोषो (अनुभूताधिकविषयावगाहित्वं), दर्शयति हि पित्रादेरतीतस्य देशकालान्तराननुभूतचरदेशकालान्तरसम्बन्धं स्वप्ने इत्याह—सा च द्वयीति, भावितः कल्पितः स्मर्तव्यो यया सा तथोक्ता ; अभावितः अकल्पितः पारमार्थिक इति यावत् । नेयं स्मृतिरपि तु विपर्ययः तल्लक्षणाक्रान्तत्वात्, स्मृत्याभासतया स्मृतिरुक्ता प्रमाणाभासमिव प्रमाणमिति भावः ।' तस्मात् वाचस्पतिना स्मृत्याभ्यासरूपत्वमेव स्वप्नस्योक्तं पातञ्जलमतानुसारेण ।

विज्ञानभिक्षुणा 'स्वप्ने भावितस्मर्तव्ये'ति भाष्यस्यान्यथा व्याख्यानेऽपि कथञ्चित् स्मृतिविपर्ययरूपत्वमेव स्वप्नस्य स्वीकृतम् । तदुक्तम्—'भावितः उद्भावितः सूचितः स्मर्तव्यार्थो ययेति भावितस्मर्तव्या, तद्भिन्ना चाभावितस्मर्तव्या,......स्वप्नदर्शनं हि भाव्यर्थसूचकतया शास्त्रे सिद्धं न तु जाग्रत्कालीना स्मृतिरिति । ननु स्वप्ने पूर्वदृष्टत्वास्मरणात् संस्कारमात्रजन्यत्वाभावाच्च कथं स्मृतित्वमिति चेत्, न अंशतस्तदुभयरूपत्वस्य स्वप्नज्ञानेष्वपि सत्त्वात् तादृशस्य स्वप्नांशस्यैवात्रोपन्यासादिति ।'

उक्तञ्च भोजराजेन वृत्तौ—'तत्र प्रमाणविपर्ययविकल्पा जाग्रदवस्था, ते एव तदनुभवबलात् प्रत्यक्षायमानाः स्वप्नाः ।'[41] तदनूभवबलादित्यस्य तदनुभवजन्यसंस्कारबलादित्यर्थः । प्रत्यक्षायमानत्वञ्च स्मृतिरूपत्वमेव बोधयति ।

---

40 Yo. sū. bha. 1. 11 (with Tattva-vai. ; yo. vār.)—1. 11

41 Bhoj. vṛ. 1. 11

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



रामानुजादिवैष्णवमते तु स्वाप्नार्थानां तज्ज्ञानस्य च सत्यत्वमेव। उक्तं हि श्रीनिवासेन यतीन्द्रमतदीपिकायाम्—'स्वाप्नादिज्ञानं तु सत्यमेव। तत्तत्-पुरुषानुभाव्यतया तत्तत्कालावसानान् रथादीन् परमपुरुषः सृजतीति श्रुत्याऽवगम्यते।'[42] विवृतं च रामानुजेनैव ब्रह्मसूत्रश्रीभाष्ये स्वाप्नार्थानां सत्यत्वम्। तथा ह्युक्तम्—'स्वप्ने रथपुष्करिण्याद्यर्थजातं मायामात्रं परमपुरुषसृष्टमित्यर्थः। मायाशब्दो हि आश्चर्यवाची। अथ रथान् रथयोगान् पथः सृजते—स्वप्न-दृगनुभाव्यतया तत्कालमात्रावसानान् सृजते इत्याश्चर्यरूपत्वमेवाह। एवं-विधाश्चर्यरूपा सृष्टिः सत्यसङ्कल्पस्य परमपुरुषस्यैवोपपद्यते, न जीवस्य ;… कामं कामं पुरुषो निर्मिमाणः—इति च परमपुरुषमेव निर्मातारमाह,…सृजते स हि कर्ता—इति च तया श्रुत्यैकार्थत्वात् परमपुरुषमेव कर्तारमाह।'[43]

उक्तं च मध्वाचार्येणापि—'अनादिमनोगतांश्च संस्कारान् स्वेच्छामात्रेण दर्शयति…। ब्रह्माण्डे च—

मनोगतांस्तु संस्कारान् स्वेच्छया परमेश्वरः।
प्रदर्शयति जीवाय स स्वप्न इति गीयते॥' इति।[44]

प्राभाकराणां मते यद्यपि शुक्तिरजतादिभ्रमस्थले अनुभवस्मरणयोर्विवेका-ग्रहणं स्वप्ने तु सर्वं ज्ञानं स्मरणरूपमेव। तदुक्तं न्यायमञ्जर्यां तन्मतानु-वादेन—'नन्वेवमिदं रजतमित्यादौ स्मरणानुभवयोर्भवतु विवेकाग्रहणं स्वप्ने तु कथमेतत् भविष्यति ?—

विवेकेन न गृह्यते स्मरणानुभवौ क्वचित्।
स्वप्ने तु स्मृतिरेवैका तथात्वेन न गृह्यते॥ …

सदृशदर्शनादि विना स्मृतिरेव कुतस्त्येति चेन्न, नानाकारणकत्वात् स्मरणस्य निद्राकषायितमप्यन्तःकरणं स्मरणकारणं भवत्येव'[45] इति।

उक्तञ्च शालिकनाथेन प्रकरणपञ्जिकायां—

एवं स्वप्नेऽपि वस्तूनि स्मर्यमाणानि सन्त्यपि।
अनुभूतांशमोषेण भासन्ते गृह्यमानवत्॥

42 Yat. mat. dip. p. 12 (Ananda Asram)
43 Br. sū. Rā. bhā. 3. 2. 3
44 Br. sū. Madhva-bhā. 3.2.3
45 Nyā. Mañ. I. p. 165 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



संस्कारोद्बोधहेतुश्च तत्रादृष्टं प्रकल्प्यते ।
विपरीतख्यातिपक्षेऽप्येषा तुल्या हि कल्पना ।।'[46]

उक्तञ्च नारायणभट्टेन टीकायां (न्यायसिद्धौ)—'स्वप्ने स्मर्यमाणान्यपि वस्तून्यननुभूतांशप्रमोषेण गृह्यमानवदवभासन्ते इति। स्वप्ने तु यदि स्मृतिः, तर्हि कथं गृह्यमानवद्भासनम्, अन्यथाख्यातिप्रसङ्गादित्यत्राह—ग्रहणस्य विशेषो हीति । ननु स्मृतौ गृहीतग्रहणं तर्हि अत्र गृहीततया ग्रहणं स्यादित्यत्राह—सा गृहीतांशेति । ननु कस्यात्र संस्कारोद्बोधकत्वमित्यत्राह—संस्कारोद्बोधेति । पूर्वानुभूतचिन्तासम्भवे तस्याः संस्कारोद्वोधकत्वम्, यत्र न चिन्ता सम्भाविता तत्रादृष्टं कल्प्यताम्, अवश्यं चादृष्टव्यापृतिः स्वप्नेऽङ्गीकार्या सुखदुःखदर्शनात् । तथाचार्याः—क्षुद्रकर्मनिमित्ता स्वप्नावस्था ।'[47] तस्मात् प्रभाकरमते स्वप्नज्ञानं यथार्थं स्मृतिरूपमेवेति बोध्यम् ।

## स्वप्नसूचनम्

श्रुतावपि छान्दोग्योपनिषदि स्वप्नस्य मिथ्याभूतस्यापि सत्यसूचकत्वमाम्नायते । यथोक्तम्—

'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने ।।'[1]

व्यासदेवेनापि स्वप्नस्य सूचकत्वमुक्तं ब्रह्मसूत्रे—'सूचकश्च हि श्रुतेराचक्षते तद्विदः'[2] इत्यत्र ।

व्याख्यातञ्चैतत् सूत्रमेवं शङ्कराचार्येण—'सूचकश्च हि स्वप्नो भवति भविष्यतोः साध्वसाधुनोः । तथाहि श्रूयते—यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति (इत्यादि) । तथा—पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्तीत्येवमादिभिः स्वप्नैरचिरजीवित्वमावेद्यते इति श्रावयति । आचक्षते च स्वप्नाध्यायविदः—कुञ्जरारोहणादीनि स्वप्ने धन्यानि खरयाना-

46 Pra. pañ. 4. 44, 46
47 Nyāyasiddhi p. 55 (Benaras Hindu University)

1 Chā. up. 5. 2. 9
2 Bṛ. sū. 3. 2. 4

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



दीन्यथन्यानीति। मन्त्रदेवताद्रव्यविशेषनिमित्ताश्च केचित् स्वप्नाः सत्यार्थगन्धिनो भवन्तीति मन्यन्ते।'[3]

रामानुजाचार्येणापि श्रीभाष्ये समर्थितं तत्; यथोक्तम्—'...यतः स्वप्नः अभ्युदयानभ्युदययोः सूचकः श्रुतेरवगम्यते' इति।

एवं पुराणादिष्वपि स्वप्नफलानि शुभाशुभानि निर्दिष्टानि यथा—

'आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम्।
आरुह्य नौकां प्रतिगृह्य वीणां भुक्त्वा रुदित्वा ध्रुवमर्थलाभः॥'[4]

इति भाविशुभसूचकाः स्वप्नाः। तथा केचित् स्वप्ना अशुभसूचका अपि पठिताः—

'कृष्णाम्बरधरा नारी कृष्णगन्धानुलेपना।
उपगूहति य स्वप्ने तस्य मृत्युर्न संशयः॥'[5] इत्यादि।

एवं यथा केचित् स्वप्ना भाविफलसूचका उक्ताः, तथा केचित् भूतसूचका अपि सन्ति। धातुदोषात् ये स्वप्ना भवन्ति ते भूतं धातुविशेषाधिक्यं सूचयन्ति। यथा स्वप्ने आकाशगमनादिदर्शनं स्वप्नद्रष्टुर्वाताधिक्यं सूचयति तथा चाग्निप्रवेश-कनकपर्वतादिदर्शनं पित्तदोषाधिक्यं सूचयति। स्वप्ने सरित्-समुद्रप्रतरण-हिमपर्वतादिदर्शनं द्रष्टुः श्लेष्मदोषाधिक्यं सूचयति।[6] एतेषु हि पूर्वभूताः शारीरदोषा अन्तःकरणसंस्काराणां सहकारिणः सन्तः स्वप्नान् तादृशान् वातादिदोषसूचकान् जनयन्तीति स्पष्टम्। शुभाशुभानि भाविफलानि कथं स्वप्नान् प्रभावयन्ति, कथं वा तान् निर्दिष्टाकारं ददति तत्तु चिन्त्यम्। अथवा, पूर्वकृतकर्मजन्यादृष्टमेव भाविसूचकस्वप्नानुभवे भाविफलानुभवादौ च कारणम्। यथोक्तः बृहदारण्यके भूतभाविजन्मान्तरीयफलभोगः स्वप्ने 'सन्ध्यं तृतीयं स्वप्नस्थानम्, स एतस्मिन् सन्ध्ये तिष्ठन् उभे लोके पश्यति' इत्यादौ; शांकरभाष्ये च 'तस्मिन् सन्ध्ये स्वप्नस्थाने...वर्तमान एते उभे स्थाने पश्यति। के ते उभे? इदञ्च परलोकस्थानञ्च।...अयं पुरुषः परलोकस्थाने प्रतिपत्तव्ये निमित्ते यथाक्रमो भवति—यादृशेन परलोकप्रतिपत्तिसाधनेन विद्याकर्मपूर्वप्रज्ञालक्षणेन युक्तो भवति...तमाक्रमं परलोकस्थानायोन्मुखीभूतं प्राप्ताङ्कुरीभावमिव बीजं तमाक्रममाक्रम्यावष्टभ्याश्रित्योभयान् पश्यति

3 Br. sū. Sā. bhā. 2, 3. 4
4 .. ..
5 ... ..

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



......पापफलानि दुःखानि......आनन्दांश्च धर्मफलानि सुखानि......तानुभयान् पाप्मनः आनन्दांश्च पश्यति जन्मान्तरदृष्टवासनामयान्, यानि च प्रतिपत्तव्य-जन्मविषयानि क्षुद्रधर्माधर्मफलानि धर्माधर्मप्रयुक्तो देवतानुग्रहाद्वा पश्यति।'[7] अत्र धर्माधर्मरूपादृष्टप्रयुक्त एव भूतभाविजन्मविषयानि क्षुद्रफलानि पश्यतीत्युक्तम् ।

आयुर्वेदेऽपि चरके वातपित्तादिदोषजन्याः स्वप्नाः, अन्यविधाश्च षड् विधाः स्वप्ना वर्णिताः । तथोक्तम्—

'मनोवहानां पूर्णत्वाद्दोषैरतिबलैस्त्रिभिः ।
स्रोतसां दारुणान् स्वप्नान् काले पश्यति दारुणे ॥
नाति प्रसुप्तः पुरुषः सफलानफलानपि ।
इन्द्रियेशेन मनसा स्वप्नान् पश्यत्यनेकधा ॥
दृष्टं श्रुतानुभूतं च प्रार्थितं कल्पितं तथा ।
भाविकं दोषजं चैव स्वप्नं सप्तविधं विदुः ॥'[8]

एवमत्र दोषजसहितः सप्तविधः स्वप्नः कथितः । दृष्टं चक्षुषा, श्रुतं श्रोत्रेण, अनुभूतं शेषेन्द्रियज्ञातम् । कल्पितमिति मनसा भावितमुक्तम् । प्रार्थितं याच्ञाविषयकृतम् । भाविकमिति भाविशुभाशुभफलसूचकम् । दोषजमिति वातातिदोषजन्यं पूर्वमेवोक्तमिति सप्तविधं स्वप्नं विदुः स्वप्नविद इत्यर्थश्चक्रपाणिना कृतः । तत्रापि केचित् स्वप्ना भूतदोषादिसूचकाः । केचित् भूतभावना-याच्ञादिसूचकाः,—यथोक्तं पञ्चतन्त्रेऽपि विष्णुशर्मणा—

'यद् वाञ्छति दिवा मर्त्यो वीक्षते वा करोति वा ।
तत् स्वप्नेऽपि तदभ्यासाद् ब्रूते वाऽथ करोति वा ॥
शुभं वा यदि वा पापं यन्नृणां हृदि संस्थितम् ।
सुगूढमपि तज्ज्ञेयं स्वप्नवाक्यादथो मदात् ॥'[9] इति ।

अपरे स्वप्ना भाविशुभाशुभफलसूचका इत्युक्तम् । अपरे अफला अपि स्वप्ना भवन्ति । यथोक्तं पञ्चतन्त्रे—

'व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना ।
कामार्तेनाथ मत्तेन दृष्टः स्वप्नो निरर्थकः ॥'[10] इति ।

---

7 Pra. bhā. p. 440-41
8 Caraka, 5. 5. 40-42
9 Pañcatantra-Mitrabheda, 144-45
10 Pañcatantra, 5. 11

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तथा चरकेऽपि––

'तत्र पञ्चविधं पूर्वमफलं भिषगादिशेत् ।
दिवास्वप्नमतिह्रस्वमतिदीर्घञ्च बुद्धिमान् ।।'[11]

इति निरर्थका अपि वहवः स्वप्नाः भवन्तीति ।

एवं पुराणेषु स्वप्नाध्याये बहवः श्लोका विद्यन्ते विचित्रस्वप्नानां विभिन्नफलसूचकत्वज्ञापकाः । परन्तु ते सर्वे प्रवादमूलकाः प्रामाणिका न्वेति निर्णयो दुःशकः । यथोक्तमग्निपुराणे––

'स्वप्नं शुभाशुभं वक्ष्ये दुःस्वप्नप्रहरणन्तथा ।
नाभिं विनान्यत्र गात्रे तृणवृक्षसमुद्भवः ।।...
वराहाश्वखरोष्ट्राणां तथा चारोहणक्रिया ।...
हानिश्चैव स्वगात्राणां विरेको वमनक्रिया ।।
...इत्यधन्यानि स्वप्नानि तेषामकथनं शुभम् ।।'[12]

इत्यादौ बहवश्चान्ये दोलारोहणसर्पमारणप्रभृतीनां स्वप्ना अशुभा धनहानिसूचका उक्ताः । तेषां स्वप्नानामनन्तरं पुनः स्वपनं विधेयम्, जागरणे च तेषामकथनं स्नानार्चनादिकञ्च दोषप्रशमनार्थं विधेयम् ।

पुनश्चोक्तं तत्रैव—

एकस्यामथ चेद् रात्रौ शुभं वा यदि वाऽशुभम् ।
पश्चाद्दृष्टस्तु यस्तत्र तस्य पाकं विनिर्दिशेत् ।।
तस्मात्तु शोभने स्वप्ने पश्चात् स्वापो न शस्यते ।'[13]

इत्यत्र एकस्यां सुषुप्तौ पश्चाद् दृष्टस्य स्वप्नस्यैव सफलत्वमुक्तमिति शुभस्वप्नदर्शनानन्तरं पुनः स्वपनं न कार्यमिति युक्तमुक्तम् ।

शुभस्वप्नाश्च तत्रैवोक्ताः—

'शैलप्रासादनागाश्च वृषभारोहणं शुभम् ।
प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा द्विजः ।
अम्भसा चाभिषेकस्तु गवां शृङ्गयुतेन च ।।
चन्द्राद् भ्रष्टेन वा राम ! ज्ञेयं राज्यप्रदं हि तत् ।'[14]

पुनश्च—

'यस्तु पश्यन्ति स्वप्नान्ते राजानं कुञ्जरं हयम् ।
हिरण्यं वृषभाङ्गाञ्च कुटुम्बस्तस्य वर्धते ।।' इत्यादि ।[15]

11 Caraka-indriyasthāna, 5
12 Agnipurāṇa, Ch. 229. 1, 5, 10, 14
13 Ibid. Ch. 229. 18-19
14 Ibid. Ch. 229. 19, 27, 28
15 Ibid. Ch. 229. 32

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## सुषुप्ति-निरूपणम्

सुषुप्तिस्तत्कारणेन सह सामान्यतो वर्णिता चरके—

'यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः ।
विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः ।।'[1]

न्यायवैशेषिकादितार्किकमते सुषुप्तौ ज्ञानसामान्याभावात् तस्याः अवस्थायाः पुरुषार्थानुपयोगित्वान्न पुरुषार्थनिरूपके शास्त्रे सा निरूपणमर्हति । तथापि प्रसङ्गतः क्वचित् किञ्चित् यदुक्तं तेन ज्ञायते यत्—ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगस्य चर्ममनःसंयोगस्य वा कारणत्वात् भोगजनकादृष्टाभावात् सुषुप्तिकाले मनसः त्वचं त्यक्त्वा पुरीतन्नाडीप्रवेशेन त्वङ्‌मनःसंयोगाभावात् किञ्चिदपि ज्ञानं न जायते । तदुक्तं शङ्करमिश्रेण कणादरहस्ये—'...तत्रापि त्वगिन्द्रियस्यापि सम्बन्धविरहे सुषुप्तिः । तदुक्तं—यदा त्वचमपि परिहृत्य मनः पुरीतति वर्तते तदा सुषुप्तिरिति ।'[2] उक्तं च विश्वनाथेन—'त्वचो योगो मनसा ज्ञान-कारण'[3]मिति । 'त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः । किं तत्र प्रमाणम् ? सुषुप्ति काले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननमिति ।...अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात्, विषयत्वक्संयोगस्य त्वङ्मनसंयोगस्य च सत्त्वात्, परस्परप्रतिबन्धादेकमपि वा न स्यादिति । अत्र केचित् पूर्वोक्तयुक्त्या त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्वार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात् कल्प्यते । अन्ये तु सुषुप्त्यनुरोधेन चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न त्वाचप्रत्यक्षमिति वदन्ति ।'[4]

विज्ञानभिक्षुणा तु सांख्यमतेन सुषुप्तौ बुद्धेर्वृत्तिसद्भावो वृत्त्यभावं च स्वीकृत्य सुषुप्तावस्थाया द्वैविध्यमुक्तम् । तदुक्तं 'सुषुप्ताद्य-साक्षित्व'मिति सूत्रभाष्ये—'सुषुप्त्यवस्था च द्विविधा—अर्ध-समग्रलयभेदेन । तत्रार्धलये विषयाकारा वृत्ति-

1 Caraka-Sūtrasthāna, 21
2 Kaṇada-rahasya, p. 120 (chow.)
3 Bhā. pari. p. 243 (Nirnaya-sagar)
4 Sid. muktā. p. 246-48 (N. S.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



र्न भवति—किन्तु स्वगतसुखदुःखमोहाकारैव बुद्धिवृत्तिर्भवति । अन्यथोत्थितस्य सुखमहमस्वाप्समित्यादिसुषुप्तिकालीनसुखादिस्मरणानुपपत्तेः । तदुक्तं व्यासेन—मुग्धेऽर्धसम्पत्तिः परिशेषात् । समग्रलये तु बुद्धे वृत्तिसामान्याभावो मरणादाविव भवति । अन्यथा—समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपतेत्यागामिसूत्रानुपपत्तेरिति । सा च समग्रसुषुप्तिर्वृत्त्यभावरूपेति पुरुषः तत्साक्षी न भवति । पुरुषस्य वृत्तिमात्रसाक्षित्वात् । अन्यथा संस्कारादेरपि बुद्धिधर्मस्य साक्षिभास्यतापत्तेः । सुषुप्त्यादिसाक्षित्वं तु तादृशबुद्धिवृत्तीनां स्वप्रतिबिम्बितानां प्रकाशनमिति वक्ष्यामः ।'[5]...

पातञ्जले तु निद्रायाः सुषुप्तेर्वृत्तिमध्ये परिगणनाद्‌बुद्धिवृत्तित्वमेव । न तु वृत्त्यभावरूपत्वम् । तदुक्तं 'सूत्रे—'अभावप्रत्ययालम्बना वृत्तिर्निद्रा ।'[6] उक्तं च व्यासेन भाष्ये—'सा च संप्रबोधे प्रत्यवमर्शात् प्रत्ययविशेषः; कथं ? सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे विशारदीकरोति, दुःखमहस्वाप्सं स्त्यानं मे मनो भ्रमत्यनवस्थितं, गाढं मूढोऽहमस्वाप्सं गुरूणि मे गात्राणि क्लान्तं मे चित्तमलसं मुषितमिव तिष्ठतीति । स खल्वयं प्रबुद्धस्य प्रत्यवमर्शो न स्यादसति प्रत्ययानुभवे'[7] इति । जाग्रत्स्वप्नवृत्त्यभावकारणस्य तमसः सुषुप्तिकालेऽननुभवे सुप्तोत्थितस्य तादृशस्मरणं न स्यादित्यर्थः ।

उक्तं च वाचस्पतिमिश्रेण तत्त्ववैशारद्याम्—'निद्रायास्तु वृत्तित्वे परीक्षकाणामस्ति विप्रतिपत्तिरिति वृत्तित्वं विधेयं...इति पुनर्वृत्तिग्रहणम् (सूत्रे) । जाग्रत्स्वप्नवृत्तीनामभावस्तस्य प्रत्ययः कारणं बुद्धिसत्त्वाच्छादकं तमः, तदेवालम्बनं विषयो यस्याः सा तथोक्ता वृत्ति निद्रा । बुद्धिसत्त्वे हि त्रिगुणे यदा सत्त्वरजसी अभिभूय समस्तकरणावरकमाविरस्ति तमस्तदा बुद्धेर्विषयाकारपरिणामाभावाद् उद्भूततमोमयीं बुद्धिमवबुध्यमानः पुरुषः सुषुप्तोऽन्तःसंज्ञ इत्युच्यते ।'[8]

विज्ञानभिक्षुणाप्युक्तं योगवार्तिके—'जाग्रत्स्वप्नवृत्तीनामभावस्य प्रत्ययः प्रतिसंक्रमस्थानं कारणमिति यावत् । तच्च चित्तसत्त्वाच्छादकं तमोद्रव्यमन्धकारादिवत् तदेवालम्बनं विषयो यस्याः सा तथा तादृशी वृत्तिर्निद्रेत्यर्थः ।......

---

5 Sā. pra. bhā. 1. 148
6 Pāt. yo. sū. 1. 10
7 Yo. sū. bhā. 1. 10
8 Tattva-vai. 1. 10

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



(यदा) तम आविर्भवति तदा मलिनस्य चित्तसत्त्वस्य तमआकारैव वृत्तिः स्वपिमीत्याकारा जायते ।'[9]

उक्तं हि नागोजीभट्टेनापि योगवृत्तौ—'पुनर्निद्रापदं निद्राया वृत्तित्वे वहूनां विप्रतिपत्तेस्तद्दाढर्याय । जाग्रत् स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तय इति स्मृतेश्च ।…न च वृत्त्यभाव एवास्तु, सुखमहमस्वाप्सम्, अकर्मण्यं मे मनो यतो भ्रमत्यनवस्थितम्, मूढोऽहमस्वाप्सम्, गुरूणि मे गात्राणि, अलसमिव मे चित्तमिति सुप्तोत्थितस्य स्मरणानुभवात् । अनुभवाभावे हि कथं स्मृतिः स्यात् तदन्यतमग्रहणे नियामकं त्वदृष्टाद्येवेति बोध्यम् ।…यत्तु सुषुप्तौ तमः साक्षिभास्यमेवेति । तन्न । साक्षिणोऽपरिणामित्वेन संस्कारस्मृत्योरसम्भवात् । एषा (निद्रा) एकाग्रतुल्यापि तामसत्वात् योगपरिपन्थिनीति । यत्तु त्वङ्-मनोयोगरूपकारणाभावात् सुषुप्तौ ज्ञानसामान्याभाव इति । तन्न । इन्द्रियाद्युत्पत्तेः प्रागेव हिरण्यगर्भस्य ज्ञानोत्पत्त्या ज्ञानसामान्ये तस्य हेतुत्वाभावात् । गाढतमोरूपदोषेण सर्ववृत्त्यभावस्यास्माभिरप्यङ्गीकारात् ।'[10] इति । एवं नागोजीभट्टेन विज्ञानभिक्षुणा इव सर्ववृत्त्यभावरूपा सुषुप्तिरपि स्वीकृता ।

उपनिषत्सु हि सुषुप्तौ सान्तःकरणजीवस्य कारणलयाभिधानान्न तत्रान्तःकरणवृत्तेः सम्भवः । तथापि सुषुप्तौ आनन्दभोक्तृत्वादिकथनेन न ज्ञानसामान्याभावः । सति कारणे ईश्वरे सुषुप्तस्य लय उक्तश्छान्दोग्ये—'यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति ।'[11] अज्ञानावरणं चोक्तम्—'…एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढाः ।'[12] सुषुप्तिकाले सर्वेन्द्रियाणामुपरमः अन्तर्हृदये आकाशे कारणात्मके जीवस्य लयश्चोक्तः बृहदारण्यके—'यत्रैष एतत् सुप्तोऽभूद् य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते, तानि यदा गृह्णात्यथ हैतत् पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीता वाक् गृहीतं चक्षु र्गृहीतं श्रोत्रं गृहीतं मनः ।'[13] सुषुप्तिकाले जीवस्य सान्तःकरणस्य पुरीतति नाड्यामेव हृदयाकाशे लयो बोध्यः । तदुक्तं तत्रैव—'अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते ।'[14]

---

9 Yo. Vār. 1. 10
10 Nāgojibhaṭṭa-vṛ. 1. 10
11 Chā. up. 6. 8. 1
12 Ibid. 8. 3. 2
13 Bṛ. up. 2. 1. 17
14 Ibid. 2. 1. 19

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



जाग्रत्स्वाप्नज्ञानानामभावस्तु तत्रान्तःकरणाद्यभावात् सिद्ध एव। ततश्च निष्कामं पापवर्जितमभयं रूपमस्य जीवस्य भवति। तदप्युक्तं बृहदारण्यके—'तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपम्।...एवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्।'[15] तदा तस्य सुखरूपत्वं कैवल्योपनिषद्युक्तम्—'सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेती'ति।[16] माण्डुक्ये च सुखभोक्तृत्वमप्युक्तम्, यथा—'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः।'[17] व्याख्यातञ्चैतदाचार्यशङ्करेणैवम्—'स्थानद्वयप्रविभक्तं मनःस्पन्दितं द्वैतजातम्। तथारूपापरित्यागेनाविवेकापन्नं नैशतमोग्रस्तमिवाहः सप्रपञ्चमेकीभूतमित्युच्यते। अतएव स्वप्नजाग्रन्मनःस्पन्दनानि प्रज्ञानानि घनीभूतानीव सेयमवस्था अविवेकरूपत्वात् प्रज्ञानघन उच्यते। यथा रात्रौ नैशेन तमसाऽविभज्यमानं सर्वं घनमिव तद्वत् प्रज्ञानघन एव। एव-शब्दात् न जात्यन्तरमज्ञानव्यतिरेकेणास्तीत्यर्थः। मनसो विषयविषय्याकारस्पन्दनायासदुःखाभावादानन्दमय आनन्दप्रायो नानन्द एव, अनात्यन्तिकत्वात्। यथा लोके निरायासस्थितः सुख्यानन्दभुगुच्यते। अत्यन्तानायासरूपा हीयं स्थितिरनेनानुभूयते इत्यानन्दभुक्। एषोऽस्य परम आनन्द—इति श्रुतेः। स्वप्नादिप्रतिबोधचेतः प्रति द्वारीभूतत्वाच्चेतोमुखः।'[18] एतेन चैतन्यप्रदीप्तानन्दमयाज्ञानावस्था सुषुप्तिरिति सूचितम्। यस्तु माण्डुक्ये आत्मनश्चतुर्थपाद उक्तस्तुरीयाख्यो न स आत्मनोऽवस्थाविशेषः, तस्यैव पारमार्थिकात्मस्वरूपत्वात, 'स आत्मा स विज्ञेयः' इत्यभिधानादिति ध्येयम्।

उपनिषन्मतानुसारेणैवाद्वैतिनोऽपि सुषुप्तिनिरूपणं कुर्वन्ति। 'तदभावो नाडीषु तच्छ्रुतेरात्मनि च'[19] इति सुषुप्तिनिरूपकब्रह्मसूत्रस्य भाष्येऽपि शङ्कराचार्येणोक्तम्—'तस्य प्रकृतस्य स्वप्नदर्शनस्याभावः सुषुप्तमित्यर्थः। नाडीष्वात्मनि चेति समुच्चयेनैतानि नाड्यादीनि स्वप्नाय उपैति न विकल्पेनेत्यर्थः। तदा नाडीषु सुप्तो भवति—(छाः ८।६।३), ताभिः प्रत्यवसृप्य पुरीतति शेते—(बृहः २।१।१९), य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते—(बृहः २।१।१७)

15 Ibid. 4. 3. 21
16 Kaivalyopanisad, 1. 13
17 Māṇḍ up. 1. 5
18 Mānd. Sā. bhā. 16
19 Br. sū. 3. 2. 7

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सता सोम्य तदा सम्पन्नो भवति—(छाः ६।८।१) यथा प्रासादे शेतं पर्यङ्के शेते इत्येवमादिषु तथेहापि नाडीषु पुरीतति ब्रह्मणि च स्वपितीत्येतदुपपद्यते समुच्चयः ।···तस्मादात्मैव सुषुप्तिस्थानम् ।'[20]

महादेवसरस्वत्या हि तत्त्वानुसन्धाने सुषुप्तिलक्षणमुक्तम्—'जाग्रत्स्वप्नोभयभोगप्रदकर्मोपरमेण स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वारा विशेषविज्ञानोपरमात्मिका बुद्धेः कारणात्मनावस्थितिः सुषुप्तिः ।'[21]

आनन्दभुक्-इत्यस्योपपत्त्यर्थं सुप्तोत्थितस्य 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिष'मित्यादिपरामर्शस्योपपत्त्यर्थञ्च सुषुप्तिकाले अन्तःकरणाद्यभावेऽपि तत्कारणभूताविद्याया वृत्तिरवश्यं स्वीकार्या' इत्यद्वैतमतम् । तदुक्तं धर्मराजाध्वरीन्द्रेण—'सुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्यवस्था । जाग्रत्स्वप्नयोरविद्याकारवृत्तेरन्तःकरणवृत्तित्वान्न तत्रातिव्याप्तिः ।'[22]

मधुसूदनसरस्वत्या हि विस्तारेण सिद्धान्तबिन्दौ सुषुप्तिनिरूपणं कृतम् । उक्तं हि—'एवं जाग्रस्वप्नभोगद्वयेन श्रान्तस्य जीवस्य तदुभयकारणकर्मक्षये ज्ञानशक्त्यवच्छिन्नस्य सवासनान्तःकरणस्य कारणात्मना अवस्थाने सति विश्रामस्थानं सुषुप्त्यवस्था । न किञ्चिदवेदिषमिति कारणमात्रोपलम्भः सुषुप्तिः । तत्र जाग्रत्स्वप्नभोग्यपदार्थज्ञानाभावेऽपि साक्ष्याकारं सुखाकारमवस्थाऽज्ञानाकारं चाविद्याया वृत्तित्रयमभ्युपेयते । अहंकाराभावाच्च नैका विशिष्टवृत्तिः सुषुप्त्याभावप्रसङ्गाच्च ।······सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति सुप्तोत्थितस्य परामर्शात्, अननुभवे च परामर्शानुपपत्तेः । अन्तःकरणोपरागकालीनानुभवजन्यत्वाभावाच्च न तत्तोल्लेखाभावेऽपि स्मरणत्वानुपपत्तिः । स्मरणे तत्तोल्लेखनियमाभावाच्च । जाग्रद्दशायामस्वाप्समित्यनुभवानुपपत्तेः, लिङ्गाभावेनाश्रयासिद्ध्या चानुमानासम्भवात् । अहंकारस्तु उत्थानसमये एवानुभूयते । सुषुप्तौ लीनत्वेन तस्याननुभूतत्वात् स्मरणानुपपत्तेः ।······ अहङ्काराश्रयतया साक्षिचैतन्यस्य स्मरणाश्रयात्वात् अहमस्वाप्समिति सामानाधिकरण्यप्रतीतिः, न पुनरहं सुखीतिवदाश्रयतया । स्मृतिसंशयविपर्ययानां साक्षिचैतन्याश्रयत्वनियमात् अहंकारस्य च प्रमाणजन्यज्ञानाश्रयत्वनियमात् प्रमात्वेनैव

20 Bṛ. sū. Sā. bhā. 3. 2.7
21 Tattvanu. 1. (p. 90 Asiatic Society)
22 Vedā. pari. P. 189 (chow.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तत्कार्यतावच्छेदकत्वात्, अप्रमात्वावच्छेदेन चाविद्याया एव कारणत्वात्। अतएवानाप्तवाक्यजन्यपरोक्षभ्रमोऽप्यविद्यावृत्तिरेवेत्यभ्युपगमो वेदान्तविदाम्। तत्रान्तःकरणवृत्तिजनकसामग्रीसम्भवेऽपि प्रमात्वाभावावरोधेनान्तःकरणस्यासामर्थ्यात्। नामादिषु ब्रह्माध्यासस्त्विच्छाधीनतया भ्रमप्रमाविलक्षणा मनोवृत्तिरेव कामादिवत्। तदुक्तं—अतएव चोदनाजन्यत्वात् मानसी क्रियैव सा, न ज्ञानमिति ( ब्रः सूः शाः भाः १. १. ४ )। एतेन तर्कस्यापि मनोवृत्तित्वं व्याख्यातम्'[23]—इत्यादिना सन्दर्भेणाद्वैतिनां मनस्तत्त्वनिरूपणे एष विशेषः लभ्यते यत् स्मृति-संशय-विपर्ययरूपाप्रमास्थले नान्तःकरणवृत्तिः सम्भवति, अपि त्वविद्यावृत्तिरेव भवति। प्रमास्थले इच्छाप्रयोज्याहार्यभ्रमस्थले च तर्कारोपादौ त्वन्तःकरणवृत्तिरेवेति।

पुनश्चोक्तं तेनैव—'तदेवं सुषुप्त्यवस्थायामस्त्यानन्दभोगः, तद्भोक्ता च सुषुप्त्यभिमानी प्राज्ञ इत्युच्यते।...तदा चान्तःकरणस्य लयेऽपि तत्संस्कारेणावच्छेदान्न जीवाभावप्रसङ्गः, न वा सार्वज्ञ्यापत्तिः। ईश्वराभेदप्रतिपादनं च शरीरेन्द्रियाद्यभिमानरहितत्वेनोपचारात्। तत्संस्कारस्य च निमित्तकारणत्वेन साक्ष्याश्रितकार्योपादानकोटावप्रवेशान्न तत्भेदेऽपि साक्षिभेदः। जागरणे त्वन्तःकरणस्य प्रमात्राश्रितकार्योपादानकोटौ प्रवेशात् तद्भेदेन प्रमातृभेद एव। साक्षिण एवाधिकोपाधिविशिष्टस्य प्रमातृत्वान्न प्रतिसन्धानानुपपत्तिरिति।'...

'ननु दुःखमहमस्वाप्समिति कस्यचित् कदाचित् परामर्शात् सुषुप्तौ दुःखानुभवोऽप्यस्तु ? न, तदानीं दुःखसामग्रीविरहेन तदभावात्। सुखस्य चात्मस्वरूपत्वेन नित्यत्वात्, शय्यादेरसमीचीनत्वेन च दुःखमित्युपचारात् दुःखमहमस्वाप्समिति प्रत्ययोपपत्तिः। अथवा, अवस्थात्रयस्यापि त्रैविध्याङ्गीकारात् सुषुप्तावपि दुःखमुपपद्यते। तथाहि—प्रमाज्ञानं जाग्रज्जाग्रत्, शुक्तिरजतादिविभ्रमः जाग्रत्स्वप्नः, श्रमादिना स्तब्धीभावो जाग्रत्सुषुप्तिः। एवं स्वप्ने मन्त्रादिप्राप्तिः स्वप्नजाग्रत्, स्वप्नेऽपि स्वप्नो मया दृष्ट इति बुद्धिः स्वप्नस्वप्नः, जाग्रद्दशायां कथयितुं न शक्यते स्वप्नावस्थायां च यत्किञ्चिदनुभूयते तत् स्वप्नसुषुप्तिः, एवं सुषुप्तावस्थायामपि सात्त्विकी या सुखाकारा वृत्तिः सा सुषुप्तिजाग्रत्, तदनन्तरं सुखमहमस्वाप्समिति परामर्शः। तत्रैव राजसी वृत्तिः सा सुषुप्तिस्वप्नः, तदनन्तरमेव दुःखमहमस्वाप्समिति परामर्शोपपत्तिः।

---

23 Siddhāntabindu, p. 119-27 (B. O. R. I.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तत्रैव या तामसी वृत्तिः सा सुषुप्तिसुषुप्तिः, तदनन्तरं—गाढं मूढोऽहमस्वाप्समिति परामर्शः ।'[24]

अद्वैतमते सुषुप्तावन्तःकरणाभावेपि तत्कारणभूताविद्यारूपान्तःकरणबीजमस्त्येव ।। उक्तं हि नृसिंहाश्रमेणद्वैतदीपिकायाम्—'न चान्तःकरणस्य सुषुप्तौ विनाशादिना अन्तरानुभूतं नानुसन्दध्यादिति वाच्यम् । सुषुप्तावन्तःकरणस्यैव विलीनघृतवद् विद्यमानत्वात् अन्यथा तदाश्रितधर्मादिरप्यभावात् पुनरुत्थानाभावप्रसङ्गात् । पिण्डीभूतान्तःकरणस्यैवाहमनुभवविषयत्वात् द्रवीभूतान्तःकरणसत्त्वेऽपि विशेषविज्ञानाभावात् सुषुप्तिसम्भवाच्च ।'[24a]

रामानुजार्योऽपि ब्रह्मसूत्रानुसारेण नाडीद्वारैः पुरीतति ब्रह्मणि जीवस्य सुषुप्तिरित्यङ्गीकरोति । तथैवोक्तं श्रीभाष्ये—'इदानीं सुषप्तिस्थानं परीक्ष्यते ।...एवं नाड्यः पुरीतत् ब्रह्म च सुषप्तिस्थानत्वेन श्रूयन्ते ।... तदभावः स्वप्नाभावः सुषप्तिः नाडीषु पुरीतति आत्मनि च भवति, एषां स्थानानां समुच्चय इत्यर्थः ।...तत्र नाडीपुरीततौ प्रासादखट्वास्थानीयौ, ब्रह्म तु पर्यङ्कस्थानीयम् । अतो ब्रह्मैव साक्षात् सुषप्तिस्थानम् ।'[25] रामानुजमते अहमर्थस्यैवात्मत्वात् आत्मनश्च स्वभावत एव ज्ञातृत्वात् सुषुप्तिकालेऽपि स्वसंवेद्यस्यात्मनः ज्ञानाभावरूपाज्ञानसाक्षितया विद्यमानत्वात् सुप्तोत्थितस्य 'मूढोऽहमस्वाप्सं न किञ्चिदवेदिष'मिति परामर्शे अहमर्थस्यापि स्मृतिरेव, न त्वद्वैतिमतवत् अहमंशस्यानुभव इति बोध्यम् ।

भाट्टमते तु आत्मनो जडबोधरूपत्वात् सुषप्तावपि प्रकाशाप्रकाशसत्त्वात् प्रकाशांशेन जडांशस्याज्ञानरूपस्यानुभवात् सुप्तोत्थितस्य 'न किञ्चिदवेदिष'मिति परामर्शः ।

प्राभाकरमते तार्किकमत इव सुषुप्तौ ज्ञानसामान्याभावादेव न तादृशः परामर्शः स्मृतिरूपः सम्भवत्यननुभूतस्य स्मृत्ययोगात् । किन्तु, अनुमितिरेवेतितज्ज्ञानमतीतज्ञानाभावविषयकम् ।

---

24 Ibid. pp. 134-39 (B. O. R. I.)

24a Advaitadīpikā, p. 134 (Medical Hall Press, Benares)

25 Śrī-bhāṣya, 3. 2. 7 (N. S.)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## मूर्च्छानिरूपणम्

मूर्च्छावस्थाया विरलत्वात् पुरुषार्थनिरूपणे अनुपयोगित्वाच्च न तस्य शास्त्रेषु प्रायः निरूपणं दृश्यते। क्वचित् क्वचित् यदुक्तं तदेवालोच्यते। केचित्तु जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयातिरिक्तावस्थाऽनङ्गीकारात् सुषुप्तिवद् विशेषज्ञानाभाच्च सुषुप्तावेव मूर्च्छाया अन्तर्भावं वदन्ति।[1] विशेषज्ञानाभावतुल्यत्वेऽपि सन्ति बहवो विशेषाः मूर्च्छायामतः पृथगेवालोचनीयेयमवस्था इत्याचार्या मन्यन्ते।

उक्तं हि महादेवसरस्वत्या तत्त्वानसन्धाने—'मुद्गरप्रहारादिजनितविषादेन विशेषविज्ञानोपरमावस्था मूर्च्छावस्था। तदुक्तं—'मुग्धेऽर्धसम्पत्तिः परिशेषा'दिति।[2]

'मुग्धेऽर्धसम्पत्तिः परिशेषा'[3]दिति ब्रह्मसूत्रस्य विद्यमानत्वात् मूर्च्छाविषये आचार्याणां किञ्चित् किञ्चिद् वचनं लभ्यते। उक्तं हि तत्राचार्येण रामानुजेन श्रीभाष्ये—'मुग्धे पुरुषे या तस्यावस्था सा मरणाय अर्धसम्पत्तिः। कुतः, परिशेषात्—न तावत् स्वप्नजागरौ ज्ञानाभावात्; निमित्तवैरूप्यादाकारवैरूप्याच्च न सुषुप्तिमरणे। निमित्तं हि मूर्च्छाया अभिघातादि। पारिशेष्यान् मरणार्धसम्पत्तिर्मूर्च्छा। मरणं हि सर्वप्राणदेहसम्बन्धोपरतिः; सूक्ष्मप्राणदेहसम्बन्धावस्थिति मूर्च्छा।' उक्तं च तट्टीकायाम्—'सुषुप्तौ प्राणभूयिष्ठमुपलभ्यते, मूर्च्छायामल्पं किञ्चिदुपलभ्यते, मृतौ न किञ्चिदपि। बाह्यवायुना भूयिष्ठमाप्यायितः सुषुप्तौ, मूर्च्छायां किञ्चिदाप्यायितः, अनाप्यायितस्य प्राणस्य उपलम्भानर्हत्वा'दिति।[4]

मध्वाचार्येण परमेश्वरे अर्धप्राप्तिरुक्ता तत्रैव—'मोहावस्थायां परमेश्वरेऽर्धप्राप्ति र्जीवस्य। वराहपुराणवचनमप्युद्धृतं तेन—

'हृदयस्थात् पराज् जीवाद् दूरस्थो जाग्रदेष्यति।
समीपस्थस्तथा स्वप्नं स्वपित्यस्मिल्लयं व्रजन्॥

---

1 Vedā. pari. p. 189 (chow.)
2 Tattvānu. p. 90 (Asiatic Society of Bengal)
3 Br. sū. 3. 2. 10
4 Śrībhāṣya-ṭīkā. 3. 2. 10

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



यत एवं त्रयोऽवस्था मोहस्तु परिशेषतः ।
अर्धप्राप्तिरिति विज्ञेयो दुःखमात्रप्रतिस्मृतेः ।।

इति च वाराहे ।'[5]

'मूर्च्छा प्रबोधनं चैव यत एव प्रवर्तते ।
स ईशः परमो ज्ञेयः परमानन्दलक्षणः ।।'

इति कूर्मपुराणवचनमप्युद्धृत्य ईश्वरस्यैव सर्वावस्थाप्रवर्तकत्वमुक्तम् ।[6]

शङ्कराचार्येण तु शारीरकभाष्ये मूर्च्छावस्थायां न ब्रह्मणि अर्धसम्पत्तिरुक्ता, अपि तु सुषुप्तावस्थायामर्धसम्पत्तिरेव सूत्रार्थ इत्युक्तम्, मूर्च्छावस्थायाः सुषुप्तपक्षे अर्धान्तिभाव इति यावत् । तथा चोक्तम्—'मुग्धस्य तु देहो धरण्यां पतति, तस्मान्न जागर्ति ; नापि स्वप्नान् पश्यति निःसंज्ञकत्वात् । नापि मृतः प्राणोष्मणोर्भावात् ।......पुनरुत्थानाच्च न दिष्टं गतः । अस्तु तर्हि सुषुप्तः निःसंज्ञकत्वादमृतत्वाच्च ; न, वैलक्षण्यात् । मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथुरस्य देहो भवति, भयानकं च वदनं विस्फारिते नेत्रे ।...... पाणिपेषणमात्रेण च सुषुप्तमुत्थापयन्ति, न तु मुग्धं मुद्गरघातेनापि । निमित्तभेदश्च मोहस्वापयोः, मुषलपातादिनिमित्तत्वान्मोहस्य, श्रमादिनिमित्तत्वाच्च स्वापस्य ।........परिशेषादर्धसम्पत्तिः मुग्धतेत्यवगच्छामः । निःसंज्ञत्वात् सम्पन्नः, इतरस्माद् वैलक्षण्यादसम्पन्न इति ।......न ब्रूमो मुग्धेऽर्धसम्पत्तिर्जीवस्य ब्रह्मणा भवतीति । किं तर्हि ; अर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वम्, अर्धेनावस्थान्तरपक्षस्येति ब्रूमः ।......कादाचित्कैयमवस्था न प्रसिद्धा स्यात् । प्रसिद्धा चैषा लोकायुर्वेदयोः, अर्धसम्पत्त्यभ्युपगमाच्च न पञ्चमी गण्यते इत्यनवद्यम् ।'[7]

---

5 Br. sū. Madhva-bhāṣya 3. 2. 10

6 Ibid. 3. 2. 10

7 Br. sū. Sā, bhā. 3. . 10



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# मरण-निरूपणम्

वैशेषिकमतेन मरणलक्षणमुक्तं शङ्करमिश्रैः कणादरहस्ये—'ज्ञानाजनक-मनःसंयोगजनकस्पन्दजन्यविभागजन्यज्ञानजनकमनःसंयोगध्वंसो मरणम् ।'[1] अयं भावः—ज्ञानजनकमनःसंयोगध्वंस एव मरणम् स हि विभागविशेषेण जन्यते । स विभागः पुनः स्पन्देन जन्यते । स च स्पन्दः अदृष्टविशेषजन्यो ज्ञाना-जनक-मनःसंयोगस्य जननार्थमुत्पद्यते । अतः मरणावस्थायां सुषुप्तिवत् किमपि ज्ञानं नोत्पद्यते ।

मरणावस्थालक्षणमुक्तं महादेवसरस्वत्या तत्त्वानुसन्धाने—'एतच्छरीर-भोगप्रापक-कर्मोपरमेण द्विविधदेहाभिमाननिवृत्त्या संपिण्डितकरणग्रामावस्था भाविशरीरप्राप्तिपर्यन्तं मरणावस्था । केचित्त्वस्या उक्तावस्थाऽवन्तर्भावं वदन्ति । अत्र श्रुतिस्मृतिपुराणप्रमाणानि प्रसिद्धानि'[2]—इति । जीवात्मनो नित्यत्वादेव देहापातानन्तरमपि जीवस्य सद्भावात् मरणस्य जीवावस्था-विशेषत्वमिति स्पष्टम् । अन्यथा देहपाते जीवात्मनोऽभावे कस्यावस्थाविशेषः मरणं स्यात् ? तथा न्यायवैशेषिकमीमांसकादिमतेषु मनसो मनःसम्बन्धस्य वा नित्यत्वात्, जैनमतेऽपि भावमनसो नित्यत्वात्, सांख्यवेदान्तादिमतेन मनसो-ऽनित्यत्वेऽपि मोक्षपर्यन्तस्थायित्वाद् जीवानां मरणावस्थायामपि समनस्कत्वं सिद्धम् । सुतरां मनस्तत्त्वनिरूपणे मरणावस्थाया आलोचनं सङ्गच्छते ।

उपनिषद्यपि कोषीतक्यां देहपातानन्तरं जीवस्य अवस्थाविशेषे समनष्कत्वं श्रूयते । तथाह्युक्तं—'स आगच्छति विजरां नदीं तां मनसैवात्येती'[3]ति ।

बौद्धा अपि देहपातानन्तरं क्षणिकत्वात् सन्ततिरूपेण मनोबुद्धेरनुवृत्तिं स्वीकुर्वन्ति । तदुक्तं तत्त्वसंग्रहे—

> 'तद्देहस्य विनाशेऽपि मनोधीस्तदाश्रया ।
> स्वोपादानबलेनैव वर्तमानाऽविरोधिनी ।'[4]

---

1 Kaṇādarahasya p. 57 (chow.)
2 Tattvānu. p. 90. (Asiatic So.)
3 Kauṣī. up. 1. 4
4 Tattva. Saṃ. verse 1936 (Baroda)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



न्यायसूत्रभाष्ययोः प्रेत्यभावस्य मरणानन्तरपुनर्जन्मस्य आलोचितत्वेऽपि न मरणावस्थायाँ विवरणं लभ्यते ।

सांख्यदर्शने मरणानन्तरं सूक्ष्मदेहस्य इन्द्रियमनोबुद्धिसमन्वितस्य अवस्थानं सांख्यसूत्रमते आतिवाहिकाख्यदेहान्तरस्य च अवस्थानं आलोचितं लभ्यते ।[4a] गीतायां चोक्तं––'मनषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ।।

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ।।'[4b]

मरणोत्तरकाले मनसः सत्त्वेऽपि तस्य सम्मूर्च्छितत्वात् तदवस्थाया विशेषानां जीवद्भिर्ज्ञातुमशक्यत्वात् जीवतां तज्ज्ञानस्य निष्प्रयोजनत्वाच्च मुमूर्षुजीवस्यावस्थाया वर्णनमेवाधिकं शास्त्रेषु दृश्यते । मुमूर्षु विषये उक्तं वृहदारण्यके—'एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ।। स यत्रायमात्माऽवल्यं नेत्य संमोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति, स यत्रैष चाक्षुषः पुरुष पराङ पर्यावर्ततेऽथारूपज्ञो भवती'[5]ति । अत्र हि मृत्युकाले पुरुषस्य प्राणानां चक्षुरादीनामनुग्राहकदेवतावियोगात् हृदये जीवात्मनि लयः रूपादिज्ञानाभावश्च कथितः ।

पुनश्चोक्तं तत्रैव—'एकीभवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते, तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूक्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति, सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति । तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च । तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमक्रमामाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्य अविद्यां गमयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरती'[6]ति । पुनश्चात्र मुमूर्षोः बाह्यज्ञानाभावेऽपि हृदयाग्रे प्रद्योतनं नाम किञ्चिदन्तर्ज्ञानमुक्त्वा उत्क्रान्तिर्वर्णिता । जीवात्मानमनु प्राणस्य तदनु च प्राणानामुत्क्रमणं कथितम् । जीवात्मनश्चोत्क्रमणं समनस्कमेव बोध्यम्, स्थूलतराणामिन्द्रियाणामप्युत्क्रमणश्रवणात् सविज्ञानोत्क्रमणश्रवणाच्च । विद्याकर्मणां देवतादिविज्ञानरूपाणां इष्टापूर्तादिकर्मसूक्ष्मरूपाणाञ्च पूर्वप्रज्ञाया अपि संस्काररूपायाः सहगमनश्रवणात् तस्य समनस्कत्वं स्पष्टमेव ।

4a Sam. sū. 5. 103 ; 3. 11, 12
4b Gītā 15. 7-8
5 Bṛ up. 4. 4. 1
6 Ibid. 4. 4. 2-3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अत्र तृणजलायुकावदवक्रमणविषये संक्षेपेणोक्तं ब्रह्मसूत्रशांकरभाष्ये—'जीवो मुख्यप्राणसचिवः सेन्द्रियः समनस्कोऽविद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यते इत्येतदवगतम्'।...देहान्तरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः सम्परिष्वक्तो रंहति गच्छतीत्यवगन्तव्यम् ।......तद्यथा तृणजलायुका इति, तत्रापि अप्परिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावना-दीर्घीभावमात्रं जलुकयोपमीयते इत्यविरोधः।'[7] अत्र मुमूर्षोः हृदयप्रद्योत-नेनान्त्यप्रत्ययरूपेण कर्मलभ्यभाविदेहविषयकसंस्कारोद्बोध एव भाविदेहाक्रमणं जीवस्य कल्प्यते, न तु वस्तुत एव देहान्तराश्रयणमिति बोध्यम् ।

मुमूर्षोः प्राणानां एकीभवनं हृदयप्रद्योतनादिकं च सर्वं व्याख्यातं बृहदारण्यकशाङ्करभाष्ये—'एकीभवति करणजातं स्वेन लिङ्गात्मना...... करणानाञ्च हृदये एकीभावः। तत्र हृदये उपसंहृतेषु करणेषु योऽन्तर्व्यापारः स कथ्यते-—......हृदयस्य हृदयच्छिद्रस्येत्येतत्, अग्रं नाडीमुखं निर्गमनद्वारं प्रद्योतते, स्वप्नकाले इव स्वेन भासा तेजोमात्रादानकृतेन, स्वेनैव ज्योतिषा आत्मनैव च ; तेनात्मज्योतिषा प्रद्योतेन हृदयाग्रेण एष आत्मा विज्ञानमयो लिङ्गोपाधिः, निर्गच्छति निष्क्रामति ।......स्वप्ने इव विशेषविज्ञानवान् भवति कर्मवशात्, न स्वतन्त्रः। स्वातन्त्र्येण हि सविज्ञानत्वे सर्वः कृत्यकृत्यः स्यात्,[8] नैव तु तल्लभ्यते ; अत एवाह व्यासः—सदा तद्भावभावित इति । कर्मणा तु उद्भाव्यमानेन अन्तःकरणवृत्तिविशेषविज्ञानोद्भासितमेवेत्यर्थः। तस्मात् तत्काले स्वातन्त्र्यार्थं योगधर्मानुसेवनं परिसङ्ख्यानाभ्यासश्चा...अप्रमत्तैः कर्तव्य इति ।'......

'तं परलोकगच्छन्तमात्मानं विद्याकर्मणी......विद्या सर्वप्रकारा विहिता प्रतिषिद्धा च, अविहिता अप्रतिषिद्धा च। तथा कर्म—विहितं प्रतिषिद्धञ्च, अविहितमप्रतिषिद्धञ्च —समन्वारभेते.. ...अनुगच्छतः, पूर्वप्रज्ञा च—पूर्वानु-भूतविषया...अतीतकर्मफलानुभववासनेत्यर्थः ।......न हि तया वासनया विना कर्म कर्तुं फलञ्चोपभोक्तुं शक्यते ; न ह्यनभ्यस्तविषये कौशलमिन्द्रियाणां भवति, पूर्वानुभववासनाप्रवृत्तानां त्विन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुप-पद्यते। दृश्यते च केषाञ्चित् कासुचित् क्रियासु चित्रकर्मादिलक्षणासु विने-

---

7 Br. sū. Śā. Bhā. 3. 1. 1

8 'यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेवर'मित्यादिन्यायात् मरणसमये ब्रह्मात्मादि-स्मरणं कृत्वा इति भावः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



वेहाभ्यासेन जन्मत एव कौशलम्, कासुचिदत्यन्तसौकर्ययुक्तास्वप्यकौशलं केषाञ्चित् । तथा विषयोपभोगेषु स्वभावत एव केषाञ्चित् कौशलाकौशले दृश्येते'[9] इति । पुनश्चोक्तं तत्रैव भाष्ये शङ्करेण--'एवं विद्यादिसम्भारसम्भृतो देहान्तरं प्रतिपद्यमानः (जीवः) मुक्त्वा पूर्वं देहं पक्षीव वृक्षान्तरं देहान्तरं पतिपद्यते ? अथवा (सांख्यमतवत्) आतिवाहिकेन शरीरान्तरेण कर्मफलदेशं नीयते ?...किं वा मनोमात्रं वैशेषिकसमय इव दहान्तरारम्भे देशं प्रति गच्छति ? किं वा कल्पनान्तरमेव वेदान्तसमये इति ?...सर्वात्मकानि तावत् करणानि सर्वात्मकप्राणसंश्रयाच्च । तेषामाध्यात्मिकाधिभौतिकपरिच्छेदः प्राणिकर्मज्ञानभावनानिमित्तः ।...तत्र वासना पूर्वप्रज्ञाख्या विद्या कर्मतन्त्रा जलुकावत् सन्ततैव स्वप्नकाले इव कर्मकृतं देहान्तरमारभते हृदयस्थैव ।... अयमात्मा यः प्रकृतः संसारी इदं शरीरं पूर्वोपात्तं निहत्य—स्वप्नं प्रतिपित्सुरिव पातयित्वा—अविद्यां गमयित्वा अचेतनं कृत्वा स्वात्मोपसंहारेणान्यमाक्रमं तृणान्तमिव तृणजलुका शरीरान्तरं गृहीत्वा प्रसारितया वासनया आत्मानमुपसंहरति, तत्रात्मभावमारभते—यथा स्वप्ने देहान्तरमारभते स्वदेहान्तरस्थ एव शरीरान्तरारम्भदेशे आरभ्यमाने देहे...तत्र च कर्मवशात् करणानि लब्धवृत्तीनि संहन्यन्ते, बाह्यञ्च कुशमृत्तिकास्थानीयं शरीरमारभ्यते ।'[10]

भगवद्गीतायाञ्चान्त्यप्रत्ययविषये उक्तम्—

'यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ।।'[11]

इति । एतेन दीर्घकालादरानुष्ठितभावनाया अन्त्यप्रत्ययजनकत्वमन्त्यप्रत्ययस्य च भाविजन्मनियामकत्वमुक्तम् ।

छान्दोग्ये चोक्तम्—'क्रतुमयः पुरुषः, यथाक्रतुरस्मिल्लोके भवति तथेह प्रेत्य भवति' इत्यादि ।[12]

वृहदारण्यके च—'काममय एवायं पुरुष इति । स यथाकामो भवति तत्क्रतुर्भवति, यत्क्रतुर्भवति तत्कर्म कुरुते, यत् कर्म कुरुते तदभिसम्पद्यते ।'[13]

---

9 Bṛ. up. Śā. bhā. 4. 4. 2-3
10 Ibid. 4. 4. 2-3
11 Gitā, 8. 6
12 Chā. up. 3. 4. 1
13 Ibid. 4. 4. 5

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



वेदबाह्या अपि जैना बौद्धाश्च देहाद्यतिरिक्तस्य आत्मनः विज्ञानस्य वा वासनावशात् जन्मान्तरं देहात् देहान्तरप्राप्तिं च स्वीकुर्वन्ति। तथा चोक्तं भास्करनन्दिना—'यस्य द्रव्यकर्मण उदयवशादात्मा भवान्तरं प्रत्यभिमुखो व्रज्यामास्कन्दति सा गतिरित्युच्यते। सा चतुर्विधा—नरकगतिस्तिर्यग्गतिर्मनुष्यगतिर्देवगतिश्चेति।'[14]

उक्तञ्च शान्तरक्षितेन तत्त्वसंग्रहे—

'स्वतन्त्रा मानसी बुद्धिश्चक्षुराद्यनपेक्षणात्।
स्वोपादानबलेनैव स्वप्नादाविव वर्तते॥
प्रसुप्तिकाद्यवस्थासु शरीरविकृतावपि।
नान्यथात्वं मनोबुद्धेस्तस्मान्नेयं तदाश्रिता॥
तद्देहस्य विनाशेऽपि मनोधीरतदाश्रया।
स्वोपादानबलेनैव वर्तमानाऽविरोधिनी॥
केवलाऽपि मनोबुद्धि र्यदेवमविरोधिनी।
नातोऽन्यदेहसद्भावसिद्धये यत्निनो वयम्॥
भिन्नदेहाश्रितत्वेऽपि तद्विशेषानुकारतः।
एकसन्ततिसम्बद्धं प्राच्यज्ञानं प्रबन्धवत्॥
अपि च स्तनपानादावभिलाषे प्रवर्तते।
उद्वेग उपघाते च सद्योजन्मभृतामपि॥
रुदितस्तनपानादिकार्येणासौ च गम्यते।
स च सर्वो विकल्पात्मा स च नामानुषङ्गवान्॥
न नामरूपमभ्यस्तमस्मिन् जन्मनि विद्यते।
तेषां चान्यभवाभावे तदुच्छेदः प्रसज्यते॥
रागद्वेषादयश्चामी पटवोऽभ्यासयोगतः।
अन्वयव्यतिरेकाभ्यां भवन्तः परिनिश्चिताः॥
इहत्याभ्यासरहितास्ते ये प्रथमभाविनः।
को हेतुर्जन्मनस्तेषां यदि न स्याद् भवान्तरम्॥'[15]

———

14 Tattvā. Vṛ. 8.. 11

15 Tattva. saṃ. verse 1930, 1934, 1936-42, 1948-49 (Baroda)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( १८ )

## मानसिकप्रकारभेदनिरूपणम्

सत्त्वरजस्तमसामुत्कर्षापकर्षभेदेनान्तःकरणस्य बुद्धेर्मनसो वोत्कर्षापकर्षानुसारेण बुद्धेः प्रकारभेदो दृश्यते। बुद्धेः प्रकारभेदात् तद्वतां पुरुषाणामपि प्रकारभेदः शास्त्रेषु लोके च दृश्यते। स एव मनुष्याणां मनुष्यचित्तानां वा प्रकारभेदोऽत्र आलोच्यते।

भगवद्गीतायां तावत् सामान्यतो मनुष्याणां भेदो वर्णितः—दैवसम्पदभिजात आसुरसम्पदभिजातश्चेति। संक्षेपेण तावेव दैव आसुरश्चेति उच्यते। यथोक्तम्—

'द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।'[1]

उक्तञ्च गीतायां प्रथमप्रकारस्य लक्षणम्—

'अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्तं मार्दवं ह्रीरचापलम्॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत॥'[2]

ततश्चासुरसम्पदभिजातस्यासुरस्य वा चरित्रगतं लक्षणमुक्तं तत्रैव गीतायाम्—

'दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्॥
...प्रवृत्तिञ्च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥

---

1 Gita 16. 6

2 Ibid. 16. 1-3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ।।
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ।।
...चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ।।
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ।।
इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।।
...अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।।'[3]

एवं विस्तारेण दैवानामासुराणाञ्च मनुष्यानां लक्षणमुक्त्वा अभिहितम्—'दैवी सम्पद् विमोक्षाय निबन्धायासुरी मता ।'[4] दैवसम्पद्युक्तस्य चेतसः क्रमशः शुद्धिज्ञानद्वारा आत्यन्तिकदुःखनिवृत्ति-परमानन्दप्राप्तिरूपो मोक्षो जायते । आसुरसम्पद्युक्तस्य तु चेतसः क्रमशोऽ-अशुद्धिविकारा वर्धमाना ऐहिकपारमार्थिकपुरुषार्थसम्पादनायोग्यत्वं भवति ।

एवं सामान्यतो द्विप्रकारं श्रेणीविभागं कृत्वा सत्त्वादिगुणत्रयभेदेन पुनस्त्रयमपि सात्त्विक-राजस-तामसरूपं प्रकारभेदं प्राहुर्व्यासपादाः । यथोक्तम्—

'ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
...बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।'[5]

ते च त्रिप्रकारभेदा एवमुक्ता गीतायाम्—

'मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ।

3 Ibid. 16. 4, 7-9, 11-13, 18
4 Ibid 16. 5.
5 Ibid 18. 19, 29

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



…प्रवृत्तिञ्च निवृत्तिञ्च कार्याकार्ये भयाभये ।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ।।'[6]

—इति सात्त्विककर्तृ-बुद्धिनिरूपणेन मनुष्याणां मनुष्यान्तःकरणानां वा सात्त्विकः प्रकारभेद उक्तः । तथा राजसोऽपि प्रकारभेद उक्तः—

'रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ।।
…यया धर्ममधर्मञ्च कार्यञ्चाकार्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ।।'[7]

एवं तामसोऽप्युक्तः—

'अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ।।
…अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ।।
…यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पञ्च तत् (ज्ञानं) तामसमुदाहृतम् ।।'[8]

प्रकारान्तरेणापि गीतायां स्वभावप्रभवगुणभेदैर्मनुष्याणां चतुर्धा प्रकारभेद उक्तः, यमाश्रित्य भारतवर्षे वैदिकसमाजे वर्णभेदः प्रवर्तितः । वस्तुतस्तु सर्वत्रैव मनुष्यसमाजे एतादृशश्चतुर्धा प्रकारभेदो मनुष्याणां दृश्यते । तदुक्तं गीतायाम्—

'ब्राह्मणक्षत्रियविशां शूद्रानाञ्च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ।।
शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम् ।।
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ।।

6. Ibid. 18. 26, 30.
7. Ibid. 18. 27, 31.
8. Ibid. 18. 28, 32, 22.



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



कृषिगोरक्षवानिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ।।'[9]

एवं मानसिकप्रकारभेदानुसारेण तत्तत्कर्मसु तेषां ब्राह्मणक्षत्रियवैश्यशूद्राणां स्वाभाविक्येव प्रवृत्तिर्भवतीत्युक्तम् । तथा निजस्वभावानुसारेण तत्तत् स्वाभाविककर्तव्यानुष्ठानेनैव मनुष्याणां चित्तशुद्धिसत्त्वोत्कर्षद्वारा सिद्धिर्जायते इत्यपि उक्तम्--'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः'[10] इत्यादि ।

अलङ्कारशास्त्रे श्रव्यकाव्यानां दृश्यकाव्यानाञ्चालम्बनविभावरूपान् नायकान् नायिकाश्चाश्रित्य ये प्रकारभेदाः प्रदर्शितास्तेऽपि फलतो मनुष्य-विशेषाणां मानसिकप्रकारभेद एव ।

तथाहि साहित्यदर्पणे विश्वनाथेन प्रथमतो नायकस्य नेतृपुरुषस्य सामान्य-लक्षणमुक्तम्—

'त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्धशीलवान्नेता ।।'[11]

एते धर्माः काव्ये नायकस्य नेतृस्थानीयमनुष्यस्य वा सामान्यलक्षणम् । तेषु बहवो मानसधर्मा एव । ततो नायकानां चतुर्धा भेदमाह—

'धीरोदात्त-धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्ययमक्तः प्रथमश्चतुर्भेदः ।।'[12] इति

धीरोदात्तस्य नायकस्य लक्षणमाह—

'अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ।।'[13]

श्रीरामतर्कवागीशेन च व्याख्यातं टीकायाम्—'अविकत्थनोऽनात्मश्लाघाकरः । महासत्त्वो हर्षशोकानभिभूतस्वभावः । निगूढमानो विनयच्छन्नगर्वः । दृढव्रतो-ऽङ्गीकृतनिर्वाहकः, यथा रामयुधिष्ठिरादि'रिति ।[14]

---

9 Ibid. 18. 41—44
10 Ibid. 18. 45
11 Sāhitya-darpaṇa. 3. 36
12 Ibid. 3. 37
13 Ibid. 3. 38
14 Sā. dar. ṭikā, 3. 38

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



धीरोद्धतनायकलक्षणमाह—

'मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः ।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥'[15]

भीमसेनादिरेवास्य पौराणिकदृष्टान्तः ।

धीरललितस्यापि लक्षणमुक्तम्—

'निश्चिन्तो मृदुरनिशं कलापरो धीरललितः ॥'[16]

तथा धीरप्रशान्तस्यापि लक्षणमुक्तम्—

'सामान्यगुणैर्भूयान् द्विजातिको धीरप्रशान्तः स्यात् ॥'[17]

नायकस्य सामान्यगुणैः त्यागित्व-कृतित्वादिभिरतिशयितैर्युक्तो नायको धीरप्रशान्त इत्यर्थः । एतैर्नायकभेदैर्मनुष्यविशेषाणामेव मानसिकप्रकारभेदा उक्ताः ।

पुनस्तेषामेव नायकानामवान्तरभेद उक्तः साहित्यदर्पणे—

'एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडषधा ॥'[18]

धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्तरूप-नायकचतुष्प्रकाराणां प्रत्येकस्य पुनर्दक्षिणधृष्टानुकूलशठभेदेन चतुर्धाभेदात् षोडशधा नायका भवन्ति । अत्रेदं बोध्यं यत् शृङ्गारे एव एते दक्षिणधृष्टादिभेदेन षोडशधा नायकाः, वीरादिरसान्तरे तु पूर्वोक्ताश्चतुर्धैव नायकाः ।

शृङ्गारे नायकानामुक्ता दक्षिणाद्यवान्तरभेदाः प्रदर्श्यन्ते—

'तेषु त्वनेकमहिलासु समरागो दक्षिणः कथितः ॥
कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः ।
दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः ॥'[19]

कृतागा कृतापराध इत्यर्थः । एवं दक्षिणधृष्टयो र्नायकयो र्लक्षणमुक्त्वाऽनुकूलनायकस्य लक्षणमुक्तम्—

15 Ibid. 3. 39.
16 Ibid. 3. 40.
17 Ibid. 3. 41.
18 Ibid. 3. 42
19 Ibid. 3.43, 44

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



'अनुकूल एकनिरतः ॥'[20] एकस्यामेव नायिकायामासक्तोऽनुकूलनायक इत्यर्थः। तथा—

…'शठोऽयमेकत्र बद्धभावो यः।
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति ।'[21]

स एव शृङ्गारे शठनायको य एकस्यां नायिकायां व्यसक्तः तस्यां बाह्यतो दर्शितानुरागोऽपि रहसि अन्याया नायिकाया विशेषप्रियमाचरति। एवं नायक-चतुष्टयस्य शृङ्गारे तेषामप्यवान्तरभेदचतुष्टयस्य मानसिकप्रकारभेदाद् भेदो वर्णितः।

इदानीं नायिकानां तादृशो भेदो अलङ्कारशास्त्रानुसारेण वर्ण्यते। काव्ये नायिकानां प्राधान्येन शृङ्गाररसालम्बनरूपेणैवावतारात् रतिविषये तासां मानसिकप्रकारभेदानुसारेणैव नायिकानां भेद उक्त इति बोध्यम्। न तु एते एव नारीणां काव्याश्रितनायिकानां वा मानसिकप्रकारभेदाः, त्यागि-धीर-ललितनारीणामपि दर्शनात्। अतएव विश्वनाथेनाप्युक्तम्—

'अथ नायिका त्रिविधा स्वाऽन्या साधारणी स्त्रीति।
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता ॥'[22]

नायिका अपि यथासम्भवैर्नायकगुणैस्त्यागित्व-कृतित्व-तेजोवैदग्धादिभिर्युक्ता भवतीत्यर्थः। नायिकानां सामान्यभेदस्त्रिविध उक्तः—स्वा स्त्री, अन्या स्त्री, साधारणी स्त्री चेति। विवाहिता साध्वी स्त्री स्वा भवति।

अन्येन ऊढा, अनूढा चेति द्विविधा अन्या स्त्री भवति। सर्वोपभोग्या वेश्यादिः साधारणी स्त्री। एते भेदा नायिकानां नायकसम्बन्धितयैव कृता इति त्वत्र ध्येयम्। स्वालक्षणमुक्तम् विश्वनाथेन—

'विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया।'[23]

---

20 Śā. dar. 3. 45
21. Ibid. 3. 46
22 Ibid. 3. 69
23 Ibid. 3. 70

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अत्रापि मानसिकव्यापारप्रकारभेदात् स्वीयाया अपि त्रयः प्रकारभेदा उच्यन्ते ।—

'सापि कथिता त्रिभेदा मुग्धा मध्यमा प्रगल्भेति ।।'[24]

मुग्धा मध्यमा प्रगल्भा चेति स्वीयानामेव नायिकानां भेदा उक्ताः । ते च पुनर्नानाभेदैर्लक्ष्यन्ते—

'प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ।।
मध्या विचित्रसुरता प्ररूढस्मरयौवना ।
ईषत्प्रगल्भवचना मध्यमव्रीडिता मता ।।
स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भाऽऽक्रान्तनायका ।।'[25]

रतौ वामा, मृदुश्च माने, समधिकलज्जावतीत्यादिविशेषणेनावगम्यते यत् मुग्धा रतिविषये निष्क्रिया तिष्ठति। मध्याऽपि मध्यमव्रीडिता ईषत्प्रगल्भवचना अर्धनिष्क्रिया भवति । प्रगल्भा तु स्मरान्धा आक्रान्तनायका इति रतिविषये स्वयं सक्रिया भवति ।

मध्याप्रगल्भयोः पुनर्भेदान्तराण्याह—'ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे ।'[26] प्रत्येकं धीरा अधीरा धोराधीरा चेति त्रिविधभेदात् ते मध्याप्रगल्भे षड्विधे इत्यर्थः ।

एवं स्वीयानां नायिकानां नानाभेदा ज्ञातव्या उक्ताः । इदानीमन्यासां परकीयानां नायिकानां लक्षणं भेदाश्चोच्यन्ते ।—

'परकीया द्विधा प्रोक्ता परोढा कन्यका तथा ।' [27]

तत्र परोढा परकीया नायिका हि कुलटा एव लज्जादिरहिता । तदुक्तम्—'यात्रादिनिरताऽन्योढा कुलटा गलितत्रपा ।'[28] कन्यकारूपा नायिकाऽपि पित्र्यधीनत्वात् परकीया एव, अपि तु न कृतविवाहा । उदुक्तम्—'कन्या त्वजातोपयमा सलज्जा नवयौवना ।'[29]

24 Ibid. 3. 71.
25 Ibid. 3. 72-74
26 Ibid 3. 75
27 Sāhityadarpaṇa, 3. 82
28 Ibid, 3. 82
29 Ibid. 3. 83

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तदनन्तरं सर्वोपभोग्या साधारणी स्त्री सामान्या वा नायिका लक्ष्यते--

'धीरा कलाप्रगल्भा स्याद् वेश्या सामान्यनायिका ।।
निर्गुणानपि न द्वेष्टि न रज्जति गुणिष्वपि ।
वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः ।।
काममङ्गीकृतमपि परिक्षीणधनं नरम् ।।
मात्रा निष्क्रामयेदेषा पुनः सन्धानकाङ्क्षया ।।
एषाऽपि मदनायत्ता क्वापि सत्यानुरागिणी ।'[30]

वित्तमात्रानुरागिणी ह्येव प्रायशः साधारणी स्त्री वेश्या भवति । क्वचित् काऽपि सत्यमेव पुरुषविशेषे अनुरागिणी भवति । एतेन साधारणीनां स्त्रीणामपि भेदः प्रदर्शितः । एवं स्वीयानां परकीयानां साधारणीनाञ्च नायिकानां लक्षणानि भेदाश्च वर्णितानि ।

पुनश्च सर्वेषामपि नायिकानां मानसिकावस्थाभेदादष्टौ भेदा उच्यन्ते । ते चावस्थाभेदाः नायकसम्बन्धितयैव नायिकानां मानसिकावेगात्मकभावविशेषा इति अन्यत्र विशेषत आलोचनीया इत्यत्रोद्देशमात्रं क्रियते । तदुक्तम्--

'अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः ।
स्वाधीनभर्तृका तद्वत् खण्डिताऽथाभिसारिका ।।
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
अन्या वासकसज्जा स्याद् विरहोत्कण्ठिता तथा ।।'[31]

इति । त्रयोदशविधा स्वीया, द्विविधा परकीया, साधारणी चेति षोडशभेदिताः स्त्रियः पुनः सर्वा मानसिकावस्थाभेदैरष्टधा भवन्तीति ।

यद्यपि एते सर्वे प्रकारभेदाः काव्याश्रितानां नायकनायिकानामेव वर्णितास्तथापि नराणां नारीणाञ्चापि प्रायशः एतादृशा एव मानसिकप्रकारभेदा दृश्यन्ते इत्यत्र ते आलोचिता इति ध्येयम् ।

आयुर्वेदेऽपि अग्निवेशेन सात्त्विक-राजस-तामस भेदेन मनुष्यबुद्धेः सत्त्वस्य त्रैविध्यमुक्तम् । तत्तदभेदानसारेण च बुद्धेः धर्मभेदा गुणभेदाश्च उक्ताः ।

---

30 Ibid. 3. 84

31 Ibid. 3. 85.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तदुक्तं चरके--'तत् ( मनः ) त्रिविधमाख्यायते शुद्धं ( सात्त्विकं ) राजसं तामसञ्चेति । येनास्य मनो भूयिष्ठं तेन ( गुणेन ) द्वितीयायाभाजातौ सम्प्रयोगो भवति । यदा तु तेनैव शुद्धेन संयुज्यते तदा जातेरतिक्रान्तायाश्च स्मरति । स्मार्तं हि ज्ञानमात्मनस्तस्यैव मनसोऽनुबन्धादनुवर्तते, यस्यानुवृत्तिं पुरस्कृत्य पुरुषो जातिस्मर इत्युच्यते--इति सत्त्वमुक्तम् ।'[32]

पुनश्च तेषां सात्त्विक-राजस-तामस-सत्त्वानां बहुविधानवान्तरभेदानाह तेषां नामभेदान् धर्मभेदांश्च । तत्र सात्त्विकसत्त्वस्य शुद्धस्य कल्याणांशत्वाददोषस्य ब्राह्मार्षैन्द्रयाम्यवारुणकौवेरगान्धर्वभेदात् सप्तविधा अवान्तरभेदा उक्ताः । तथा राजसस्य सत्त्वस्यासुरराक्षसपैशाचसार्पप्रैतशाकुनभेदेन षड्विधा अवान्तरभेदाः । तामसस्य तु पाशव-मात्स्य-वाणस्पत्यभेदेन त्रिविधा एव भेदाः । एते सर्वे षोडषविधा भेदा मानसिकप्रकारभेदा एव । तेषां प्रत्येकस्य धर्मभेदेन लक्षणभेदोऽपि बोध्यः । तदुक्तं चरके--'त्रिविधं खलु सत्त्वं शुद्धं राजसं तामसमिति । तत्र शुद्धमदोषमाख्यातं कल्याणांशत्वात् । राजसं सदोषमाख्यातं रोषांशत्वात् । तथा तामसमपि सदोषमाख्यातं मोहांशत्वात् । तेषान्तु त्रयाणामपि सत्त्वानामेकैकस्य भेदाग्रमपरिसंख्येयं तरतमयोगाच्छरीरयोनिविशेषेभ्यश्चान्योन्यानुविधानाच्च ।......तद् यथा--(१) शुचिं सत्याभिसन्धं जितात्मानं संभागिनं ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्नं स्मृतिमन्तं कामक्रोधलोभमानमोहेर्ष्याऽपेतं समं सर्वभूतेषु ब्राह्मं विद्यात् ।

(२) इज्याध्ययनव्रतहोमब्रह्मचर्यपरमतिथिव्रतमुपशान्तमदमानरागद्वेषमोहलोभरोषं प्रतिभावचनविज्ञानोपधारणशक्तिसम्पन्नमार्षं विद्यात् ।

(३) ऐश्वर्शवन्तमादेयवाक्यं यज्वानं शूरमोजस्विनं तेजसोपेतमक्लिष्टकर्माणं दीर्घदर्शिनं धर्मार्थकामाभिरतमैन्द्रं विद्यात् ।

(४) लेखास्थवृत्तं प्राप्तकारिणमसंहार्योत्थानवन्तं स्मृतिमन्तमैश्वर्यावलम्बिनं व्यपगतरागेर्ष्याद्वेषमोहं याम्यं विद्यात् ।

(५) शूरं धीरं शुचिमशुचिविद्वेषिणं यज्वानमम्भोविहाररतिमक्लिष्टकर्माणं स्थानकोपप्रसादं वारुणं विद्यात् ।

(६) स्थानमानोपभोगं परिवारसम्पन्नं सुखविहारं धर्मार्थकामनित्यं शुचिं व्यक्तकोपप्रसादं कौवेरं विद्यात् ।

---

32 Caraka-śārīra-sthāna, 3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



(७) प्रियनृत्यगीतवादित्रोल्लासकं श्लोकाख्यायिकेतिहासपुराणेषु कुशलं गन्धमाल्यानुलेपनवसनस्त्रीविहारकामनित्यमनसूयकं गान्धर्वं विद्यात् ।—इत्येवं शुद्धसत्त्वस्य सप्तविधं भेदांशं विद्यात् कल्याणांशत्वात् । तत्संयोगात्तु ब्राह्ममत्यन्तशुद्धं विद्यात् ।'[33]

एवं सप्तविधान् सत्त्वप्रधानबुद्धिभेदानभिधाय षड्विधान् रजःप्रधानबुद्धिभेदान् कथयति—'शूरं चण्डमसूयकमैश्वर्यवन्तमौदरिकं रौद्रमननुक्रोशकमात्मपूजकमासुरं विद्यात् । अमर्षिणमनुबन्धकोपं छिद्रप्रहारिणं क्रूरमाहारातिमात्ररुचिरमामिषप्रियतमं स्वप्नायासबहुलमीर्ष्युं राक्षसं विद्यात् । महाशनं स्त्रैणं स्त्रीरहस्कामशुचिं शुचिविद्वेषिणं भीरुं भीषयितारं विहारशीलं पैशाचं विद्यात् । क्रुद्धशूरमक्रुद्धभीरुं तीक्ष्णमायासबहुलं मन्त्रसुगोचरमाहार विहारपरं सार्पं विद्यात् । आहारकाममतिदुःखशीलाचारोपचारमसूयकमविभागिनमतिलोलुपमकर्मशीलं प्रैतं विद्यात् । अनुषक्तकाममजस्रमाहारविहारपरमनवस्थितममर्षिणमसञ्चयं शाकुनं विद्यात् ।—इत्येवं खलु राजसस्य सत्त्वस्य षड्विधं भेदांशं विद्यात् रोषांशत्वात् ।'[34]

तदनन्तरं तमःप्रधानसत्त्वस्य त्रिविधत्वमाह चरकेऽग्निवेशमुनिः—'निराकरिष्णुमधमवेशं जुगुप्सिताचाराहारविहारमैथुनपरं स्वप्नशीलं पाशवं विद्यात् । भीरुमबुधमाहारलुब्धमनवस्थितमनुषक्तकामक्रोधं सरणशीलं तोयकामं मात्स्यं विद्यात् । अलसं केवलमभिनिष्टमाहारे सर्वबुद्ध्यङ्गहीनं वानस्पत्यं विद्यात् ।—इत्येवं खलु तामसस्य सत्त्वस्य त्रिविधं भेदांशं विद्यान्मोहांशत्वात् ।'

'इत्यपरिसंख्येयभेदानां खलु त्रयाणामपि सत्त्वानां भेदैकदेशो व्याख्यातः । शुद्धस्य सत्त्वस्य सप्तविधो ब्रह्मर्षिशक्रवरुणयमकुवेरगन्धर्वसत्त्वानुकारेण । राजसस्य षड्विधो दैत्यराक्षसपिशाचसर्पप्रेतशकुनिसत्त्वानुकारेण । तामसस्य त्रिविधः पशु-मत्स्य-वनस्पतिसत्त्वानुकारेण ।'[35] एवं सत्त्वानां मनुष्यबुद्धीनां षोडशप्रकारभेदा आयुर्वेदसम्मता उक्ताः ।

वायुपित्तश्लेष्मरूपाणां शारीरदोषाणां प्राधान्यभेदादपि मानसिकधर्मभेदेन प्रकारभेदाः लक्ष्यन्ते । यथा, वायुप्रधानशरीरे मनसः (सत्त्वस्य) लघुत्वं वचस्वित्वं

---

33 Caraka-Sārīrasthāna, 4

34 Ibid. 34

35 Ibid 4

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



आकाशगमनादिविलक्षणस्वप्नद्रष्टृत्वं ज्ञानप्रवणत्वञ्च जायते। तथा पित्त-प्रधानशरीरे मनसो भयममर्षित्वं क्रुद्धत्वमग्निप्रवेशादिविलक्षणस्वप्नद्रष्टृत्वं तथा श्लेष्मप्रधानशरीरे मनसो गुरुत्वमालस्यं जलमज्जनादिविलक्षणस्वप्नद्रष्टृत्वं मोह एवमादीनि जायन्ते,[36] इत्येतेऽपि सत्त्वभेदा आयुर्वेदसम्मता एव।

रामानुजीयदर्शने भक्तिशास्त्रानुसारेण मनुष्याणां मानसिकप्रकारभेदात् त्रैविध्यमुक्तम्। यथोक्तं श्रीनिवासेन यतीन्द्रमतदीपिकायाम्—'स जीवः त्रिविधः—बद्ध-मुक्त-नित्यभेदात्। तत्र बद्धा नामानिवृत्तसंसाराः…… ब्रह्मादिकीटपर्यन्ताश्चेतनविशेषाः।……ते (बद्धाः) द्विविधाः—शास्त्रवश्याः तदवश्याश्चेति। तयोर्मध्ये करणायत्तज्ञानानां बद्धानां (मनुष्याणामित्यर्थः) शास्त्रवश्यताऽस्ति। (तिर्यक्स्थावरादीनां तन्नास्ति)। शास्त्रवश्या द्विविधाः। बुभूक्षवो मुमुक्षवश्चेति। तत्र बुभुक्षवस्त्रैवर्गिकपुरुषार्थनिष्ठाः पुरुषाः। ते द्विविधाः—अर्थकामपरा धर्मपराश्चेति। केवलार्थकामपरा देहात्माभिमानवन्तः। धर्मपराश्च—अलौकिकश्रेयसाधनं धर्मः, चोदनालक्षणोऽर्थो धर्मः इतिलक्षण-लक्षितयज्ञदानतपस्तीर्थयात्रादिनिष्ठाः। धर्मपरा द्विविधाः—देवतान्तरपरा भगवत्पराश्चार्तो जिज्ञासुरर्थार्थीत्युक्तरीत्याऽधिकारिणः। आर्तो भ्रष्टैश्वर्य-कामः। अर्थार्थी त्वपूर्वैश्वर्यकामः।'

'मुमुक्षवो द्विविधाः—कैवल्यपरा मोक्षपराश्चेति। कैवल्यं नाम ज्ञानयोगात् प्रकृतिवियुक्तस्वात्मानुभवरूपोऽनुभवः।…मोक्षपराश्च द्विविधाः, भक्ताः प्रपन्ना-श्चेति। भक्ता द्विविधाः—साधनभक्तिनिष्ठाः साध्यभक्तिनिष्ठाश्चेति। व्यासादयः साधनभक्तिनिष्ठाः। श्रीपराङ्कुशादयः साध्यभक्तिनिष्ठाः।'

'मुक्तो नामोपायपरिग्रहानन्तरं…सुषुम्णाख्यनाड्यां प्रविश्य ब्रह्मरन्ध्रान्नि-ष्क्रम्य…श्रीवैकुण्ठाख्यं दिव्यनगरं प्रविश्य…उत्तरावधिरहितब्रह्मानुभववान् यः स मुक्तो इष्यते।…अतो मुक्तो भगवत्संकल्पायत्तस्वेच्छया सर्वत्र सञ्चरति।'

'नित्या नाम कदाचिदपि भगवदनभिमतविरुद्धाचरणाभावेन ज्ञानसंकोच-प्रसङ्गरहिता अनन्त-गरुड-विष्वक्सेनादयः। तेषामधिकारविशेषा ईश्वरस्य नित्येच्छयैवानादित्वेन व्यवस्थापिताः।'[37] एवं मनुष्याणामेव शास्त्रवश्यता,

36 Vide Caraka-sūtrasthāna, 12

37 Yat. mat. dīp. p. 75-78 (Ananda Asram)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तेषामपि बुभुक्षुमुमुक्षुभेदः, बुभुक्षूणामपि केवलार्थकामपरत्वं धर्मपरत्वञ्च। एते प्रकारभेदा मनुष्यानां मानसिकप्रकारभेदादेवेति प्रसंगेनोल्लिखिताः ।

एवं गौडीयवैष्णवदर्शनमतेऽपि केचिज् जीवा अनादित एव भगवदुन्मुखाः नित्यमुक्ताः, अपरे अनादित एव भगवद्विमूखा ये मायाशक्त्या संसारबन्धने आनीता इति[38] सामान्यतो द्विविधः प्रकारभेद उक्तः । विशेषतस्तु पञ्चविध मानसिकप्रकारभेद उक्तः श्रीजीवेन भक्तिरसामृतसिन्धुटीकायाम्—'तत्र तावत् पञ्चविधा जनाः परामृश्यन्ते—भाव्यभक्ता भावकभक्ताः प्राज्ञा अज्ञाः ग्राम्याश्चेति ।'[39] भाव्यभक्ता इति लीलापरिकराः, भावकभक्ताः साधकभक्ताः । प्राज्ञाः शास्त्रज्ञाः, अज्ञाः शास्त्रज्ञानरहिताः, ग्राम्याश्च पशुभावापन्नाः विषयासक्ता जना इत्यर्थो बोध्यः ।

पातञ्जले सत्त्वरजस्तमसामुत्कर्षापकर्षभेदेन मनुष्यचित्तस्य प्रकारभेदात् तानपि निरूपयति व्यासपादः योगभाष्ये--'चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम् । प्रख्यारूपं हि चित्तसत्वं रजस्तमोभ्यां संसृष्टमश्वर्यविषयप्रियं भवति । तदेव तमसाऽनुविद्धमधर्माज्ञानावैराग्यानैश्यर्योपगं भवति; तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति । तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगं भवति ।'[40]

---

38 Paramātma-sandarbha.

39 Bhaktirasāmṛtasindhu-ṭikā, 2.5.123

40 Yo. sū. bhā. 1.2

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



# विद्याचारशिक्षाविषयकमनस्तत्त्वम्

अतिप्राचीनकालादेव भारते वर्षे तपःसंयमब्रह्मचर्यादीनां विद्याऽङ्गत्वमुपलभ्यते। ऋग्वेदेऽपि ऋषिमुनीनां तथा विप्र-कवि-मनीषिणां नानाविधविदुषामुल्लेखा दृश्यन्ते।[1] ऋषीणां तपस्यमानत्वोल्लेखात् तेषां ऋषित्वे सत्यद्रष्टृत्वे वा तप एव मुख्यं प्रयोजकमिति ज्ञायते। 'तपः उत्तमं मनः' इत्यादिना मानसिक उत्कर्ष एव तत तपःशब्दस्य मुख्यार्थो बोध्यः।

तथा चान्तेवासिनां विद्यार्थिनामुपनयनब्रह्मचर्यादिकमपि श्रुयते तत्र तत्र ऋङ्मन्त्रेषु।[2] तेन तत्राप्युपनयनव्रतचरणादीनां विद्यालाभाङ्गत्वमवगम्यते। सतीर्था विद्यार्थिनस्तत्र सखिरूपेण वर्णिताः—'सखायो मनोजवेष्वसमा'[3] इत्यादौ। एतेन विद्यार्थिनां परस्परसौहार्द्यं सूचितम्।

यद्यपि तत्र तत्राक्षरप्रशंसनात् पाठाभ्यासविधानाच्च[4] शास्त्राणामावृत्तिः प्रशस्यते, उक्तञ्च प्राचीनै'रावृत्तिसर्वशास्त्राणां बोधादपि गरीयसी'त्यादि तथापि तत् प्राथमिकप्रयत्नरूपेण मानवकानामेव विहितमिति बोध्यम्। अतएवार्थज्ञानरहितवेदमन्त्राभ्यासस्यापि बहुशो निन्दा दृश्यते। यथोक्तं ऋङ्मन्त्रे एव—'ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः। यस्तन्न वेद किम् ऋचा करिष्यति'[5] इत्यादौ। अन्यत्र च मण्डुकशब्दाः व्रतचारिणां वेदपाठध्वनिना तुलिताः।'[6] तेषां भावग्रहरहितानां वाचमफलामपुष्पाञ्चाह ऋङ्मन्त्रेषु।[7] तथा यास्कीयनिरुक्तावपि—

'स्थाणुरयं भारहारः किलाभूद्
अधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते
नाकमेति ज्ञानविधूतपाप्मा॥'[8]

---

1 Ṛg. 1.127.1 ; III. 8. 4 ; 1.164. 45
2 Ibid X. 109. 5 ; III. 8. 4 ; 7. 103. 1
3 Ibid X. 71. 7
4 Ṛg. 1. 164. 41 ; Pāṇini-Śikṣā, V. 52 Pūrva-mīmāṃ. sū. 1.2.32
5 Ṛg. 1. 164. 39
6. Ibid. VII. 103. 1
7 Ibid. X. 71. 5
8 Yāska, 1

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पुनश्च तत्रैव—

'यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।।'[9]

न च सर्वेषां विद्यार्थिनां समाना योग्यता अर्थग्रहणे मर्मावधारणे च विद्यते । केषाञ्चिदर्थग्रहः अगभीरः, केषाञ्चिद् वा गभीरो गभीरतरो वा भवति, न कथञ्चिदपि समानाः । तदुक्तम् ऋङ्मन्त्रे—'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः । आदघ्नास उपकक्षास उत्वे ह्रद इव स्नात्वा उत्वे ददृशे ।'[10] ये तु पुनरत्यन्तमन्दबुद्धित्वात् नार्थग्रहणसमर्थाः न च यथायथरूपेण वाग्ग्रहणसमर्थास्ते लाङ्गलचालनाय तन्तुवयनाय वा प्रेष्यन्ते इत्यवगम्यते । तदुक्तं तत्रैव मन्त्रे—

'इमे ये नार्वाङ् न परश्चरन्ति न ब्राह्मणासो न सुकेतवासः ।
ते एते वाचमभिपद्य पापया सिरिस्तन्त्रं तन्वते अप्रयज्ञयः ।'[11]

ऋग्वेदवर्णितकालेष्वपि परविद्या-वेदविद्याव्यतिरिक्ता नाना लौकिक्य विद्याः उल्लिखिता दृश्यन्ते शिल्पविद्याश्च । यथोक्तम्—

'नानानं वा उ नो धियो वि व्रतानि जनानाम् ।
तक्षा रिष्टं रुतं भिषग् ब्रह्मा सुन्वन्तमिच्छति··· ।।'
तथा—'कारुरहं ततो भिषगुपलप्रक्षिणी नना ।'[12]

तक्षा भग्नद्रव्यं भिषग् रुग्नजनं ऋत्विग् यजमानमिच्छतीत्यर्थः । अहं मन्त्रकारः, मम पिता (पुत्रो वा) भिषक्, माता (कन्या वा) मे उपलप्रक्षिणीत्यादिना विद्याशिल्पनानात्वं तत्र जनानां व्यापृतिश्चावगम्यते ।

मनुष्यभाषाविषये च एवमुक्तं ऋङ्मन्त्रे यत् चतुर्विभागविशिष्टाया वाचः एकामेव मनुष्या वदन्ति, अन्ये त्रिभागा गुहायां मनुष्यहृदये निहितास्तिष्ठन्ति । यथोक्तम्—

'चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचा मनुष्या वदन्ति ।'[13]

9 Ibid. 1
10 Ibid. X. 71. 7
11 Ibid. X. 71. 9
12 Ibid. IX. 112. 1, 3
13 Ibid. 1. 164. 45

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अत्रैव शाब्दिकतान्त्रिकादीनां परा-पश्यन्ती-मध्यमा-वैखरीरूपेण वाग्विभागस्य सूचनं दृश्यते ।

तथा ऋग्वेदे नार्य अपि रोमषा-लोपामुद्राऽपालाप्रभृतयो मन्त्रद्रष्ट्र्य उल्लिख्यन्ते । रथकारनिषादादिहीनजातीयानामपि वैदिकोनुष्ठानमन्त्रविशेषेष्वधिकारो दृश्यते । अथर्ववेदे "कन्यानामपि ब्रह्मचर्यं विधीयते ।[14] यजुर्वेदे सर्वेषां जनानां वेदश्रवणं वर्ण्यते । तदाम्नातम्—'यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्राह्मणराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय ।'[15] तथोक्तमापस्तम्बीयधर्मसूत्रे—'सा निष्ठा या विद्या स्त्रीषु शूद्रेषु च'[16]—इति, या विद्या स्त्रीषु शूद्रेषु च गता सैव विद्याया निष्ठा पूर्णता इत्यर्थः ।

तथापि विद्याशिक्षायामधिकारभेद आर्याणां ऋग्वेदीयकालादेव स्वीकृत इति पूर्वमेव प्रदर्शितम् । किन्तु मानसिकोत्कर्षभेद एव तदानीमधिकारभेदे मुख्यं प्रयोजकमासीदिति ज्ञायते ।

यद्यपि श्रुतिस्मृतिदर्शनशास्त्रेषु सहजातप्रकृतेरतीतज्ञानकर्मजनितवासनायाः प्राबल्यं स्वीक्रियते, यथोक्तं—'सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यती'[17]ति, तथापि पुरुषकाररूपायाः प्रचेष्टाया अपि सर्वार्थसाधकत्वमभिहितम् । तत्रैव हि पुरुषकारे वर्तमानकर्मणां विद्याभ्यासस्य सर्वविधशिक्षणस्य चोपयोगः । सर्वाणि च विधिप्रतिषेधशास्त्राणि तत्रैवार्थवन्ति । अतएवोक्तम्—'स्वाध्यायोऽध्येतव्यः'[18] 'ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्त्वतः'[19] 'द्वे विद्ये वेदितव्ये...परा चैवापरा चेती'[20]त्यादि । यथा अतीतज्ञानकर्मणां वर्तमानप्रकृतिरूपेण सफलत्वं जातं तथैव वर्तमानज्ञानकर्मणामपि पुरुषकाररूपाणां भविष्यतीति भावः ।

'तं विद्याकर्मणी समन्वारभेते, पूर्वप्रज्ञा चे'[21]त्यत्रातीतजन्मसम्पादितानां विद्याकर्मणां पूर्वानुभवजनितवासनानां च वर्तमानजन्मनि सहजातप्रकृतिरूपेणानुवर्तनं श्रूयते । 'तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्'[22] 'पूर्वाभ्यासेन तेनैव ह्रियते

14 Atharva-Ve. XI. 5
15 Yajur.-Ve. XXVI. 2
16 Apastambadharma-sū. 2. 11. 29. 11
17 Gītā, 3. 33
18 Taitti. āraṇyaka., 2. 15
19 Br. bin. up. 18 ; Tripuratāpana. up. 18
20 Muṇḍ. up. 1. 4
21 Br. up. 4. 4. 2
22 Gita, 8. 42

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



ह्यवशोऽपि स:'[23] इत्यादि । पूर्वविद्याकर्मवासनानां वर्तमानबुद्धौ आगमनं तासाञ्च प्रबलत्वं स्मर्यते ।

परन्तु तासामपि वासनानां विद्याकर्मज्ञानजनितत्वात् वर्तमानजन्मनि क्रियमाणानामपि विद्याकर्मज्ञानानां तथैव दृष्टादृष्टद्वारा फलजनकत्वात् पुरुषार्थ-साधकत्वम् । तदुक्तम्—'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।'[24] कर्मणा स्वाभाविकासङ्गरूपं मृत्युं तीर्त्वा इत्यर्थः । या तु विद्या अमृतत्व-लाभहेतुत्वेन व्यपदिश्यते सा उपासनात्मिका विद्या, परा वा ब्रह्मविद्या वेदितव्याः। ते च यथाक्रमेणापेक्षिकामृतत्वमुख्यामृतत्वसाधनं भवतः । सहजात-प्रकृतिरूपात् स्वभावाद्विद्याभ्यासादीनामतिशयजनकत्वमाह—'जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते । वेदपाठाद् भवेद् विप्रो ब्रह्म जानाति ब्राह्मणः ।'

एवं विद्याभ्यासस्योपयोगित्वे स्थिते सति विद्याया भेदोऽपि ज्ञातव्यः । तथा हि—'द्वे विद्ये वेदितव्ये—परा चैवापरा चेति ।'[25] परा विद्या हि ब्रह्मविद्या आत्मविद्या वा—अथ परा 'यया तदक्षरमधिगम्यते ।'[26] तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ।'[27]

एवमपराऽपि विद्या लौकिकालौकिकभेदेन द्विविधा । विद्याभेदाश्छान्दोग्ये नारदसनत्कुमारसंवादे विस्तारेण वर्णिताः । तदुक्तम्—'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्र-विद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्येमि, सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्, श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति ।'[28] एवं च लौकिक-विद्याभिः वेदवेदाङ्गरूपापरविद्याभिश्च अनात्मरूपाणि रहस्यतत्त्वान्येवाधिभौति-काध्यात्मिकाधिदैविकानि ज्ञायन्ते इति मन्त्रविदेव भवति नात्मवित् । आत्मज्ञान-मन्तरेण च न शोकतरणं सम्भवति । आत्मज्ञानञ्च ब्रह्मात्मज्ञानमेव ।

एवञ्च ब्रह्मात्मज्ञानमेव सर्वात्मभावरूपं पराया विद्यायाः प्रयोजनम् । तथैव सर्वशोकतरणं सर्वानर्थनिवृत्तिश्च । उक्तञ्च मन्त्रवित्त्वमेवापरविद्यायाः

---

23 Ibid.—8. 43

24 Iśopaniṣad, 11

25 muṇḍ. up. 1. 4

26 Ibid. 1. 5

27 Ibid. 1. 5

28 Ibid. 7. 3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



लौकिकविद्यायाश्च प्रयोजनम् । तयाऽपि आपेक्षिकदुःखनिवृत्तिः सामयिकानर्थ-प्रतीकारश्च भवत्येव । तदर्थमेव लौकिकविद्याऽपि विधीयते धर्मार्थकाम-कामानां तत्तत्पुरुषार्थलाभाय । यथा,—

'त्रयी चान्वीक्षिकी चैव वार्ता च भरतर्षभः ।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः ॥'[29]

विद्यादियोगात् सर्वकर्मणां सामान्यफलं वीर्यवृद्धिरूपमुक्तं छान्दोग्योपनिषदि—'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवती'ति ।[30] एतेन विद्यया कृतेरेव वीर्यवत्तरत्वकथनात् बाह्ये आन्तरे वा कर्मणि विद्यया शक्तिवर्धनेन तस्य कर्मणः सफलत्वमेव विद्यायाः सामान्यफलमिति सूचितम् । अतो विद्यायाः पुरुषार्थसाधने एव विनियोगोऽभिप्रेतः, न तु पुरुषार्थाद्विच्छिन्ना विद्याभारा आदरणीया इति भावः ।

अन्यच्च विद्यासामान्यफलं नीतिशास्त्रे उक्तम्—

'विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मस्ततः सुखम् ।'[31]

विनयलाभ एव विद्याया प्राथमिकफलत्वेनोक्तत्वात् यत्र विद्यया औद्धत्य-द्रोहगर्वादि वर्धमानं दृश्यते, न सा विद्योपादेया । पात्रतालाभोऽपि सर्वजन-प्रियताऽर्जनरूपो लौकिकमेव विद्याफलमुक्तम् । एताभ्यां फलाभ्यां पुनस्तादृशो धनागमो भवति येन स विद्वान् कर्तव्यनिष्ठो धर्मनिष्ठश्च भवति, ततश्च कर्तव्य-निष्ठाधर्मनिष्ठाजनितसुखवान् भवति । धनं हि अधर्मसहचरितं स्वस्य परस्य चानर्थाय भवति । अतो यशोधनादिलाभार्थं लौकिकविद्याभ्यासोऽपि धर्मा-विरोधेन धर्मनिष्ठाजनितैहिकपारत्रिकसुखलाभोद्देश्येनैव करणीय इति बोध्यम् ।

अथवा, सर्वानर्थनिवृत्तिरानन्दप्राप्तिश्चात्मविद्यारूपपरविद्यायाः प्रयोजनम् । धर्माधर्म-सदसद्-विचारशक्त्युत्कर्ष एव साङ्गोपाङ्गवेदविद्यारूपालौकिकापर-विद्यायाः प्रयोजनम् । देहेन्द्रियबुद्धीनां चिन्तासु कर्मशिल्पकलादिषु च संस्कार-दार्ढ्यात् कौशलवृद्धिरेव लौकिकविद्याभ्यासस्य प्रयोजनमिति ध्येयम् । तदुक्तं शङ्करेण बृहदारण्यकभाष्ये—'न ह्यनभ्यस्तविषये कौशलमिन्द्रियाणां भवति, पूर्वानुभव-वासनाप्रवृत्तानां त्विन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुपपद्यते'[32] इत्यादि ।

29 Mahābhārata, Śānti. 59, 33
30 Chā. up. 1. 1. 10
31 Hitopadeśa-prastāvikā, 6
32 Br, up. Śā. bhā 4. 4. 3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



धर्मशास्त्रेषु उपनयनसंस्कारान्ते गुरुगृहे विद्यारम्भो विहित इति दृश्यते। उपनयनं हि शिष्यस्य गुरोः समीपे विद्यासमीपे वा नयनं सावित्री-दीक्षादानान्तरम्। अतएवोक्तम्—

'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते॥'[33]

उपनयनसंस्कार-सावित्रीदीक्षानन्तरविद्यारम्भविधानादवगम्यते यत् प्रयोजन-ज्ञानपूर्वक विद्यालाभे एव विद्या सफला भवति, नेतरथा। शैशव-कालीनविद्याभ्यासे तदसम्भवेऽपि कैशोरागमे विद्यार्जनस्य उद्देश्यज्ञानपूर्वको विद्याभ्यासः कार्यः। अन्यथा प्रयोजनज्ञानरहितविद्याभ्यासे कौशलवृद्धया सामर्थ्योपचयेऽपि सामर्थ्यस्यापप्रयोगेन स्वपरानर्थमेव जायते।

शैशवादेव शिशोः शिक्षणमारभ्यते। पञ्चवर्षपर्यन्तं लालनसहितं पित्रोः स्वाचरणेन शिक्षणं कर्तव्यम्, न तु किञ्चिदपि ताडनं कर्तव्यम्। तदनन्तरं विद्यारम्भे सति दशवर्षाणि ताडनमपि नियमनदण्डादिरूपं आवश्यके सति कर्तव्यम्। तदनन्तरं पित्रा गुरुणा वा मित्रवदेव विद्याचरणेषु शिक्षनीयः पुत्रः शिष्यो वा। तदुक्तम्—

'लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्॥'[34]

अतः शिशोः शिक्षणे पित्रोरेवाचरणकौशलं प्रधानतो हेतु र्भवति।

विहितनानाविधसंस्कारद्वारा च भवति शिशूनां किञ्चिदतिशयाधान-मदृष्टद्वारेण दृष्टद्वारेण च। तदुक्तं जातकर्मणि जातस्य कर्णयोः मेधाजननं जपकर्म आश्वलायनगृह्यसूत्रे—'कर्णयोरुपनिधाय मेधाजननं जपति। मेधां ते देवः सविता, मेधां देवी सरस्वती। 'मेधां ते अश्विनौ देवावाधत्तां पुष्कर-स्रजाविति।'[35] बालस्य मेधाजननार्थं च पेयं विहितमग्निपुराणे—

'सयष्टि-सैन्धवं बालः प्रातर्मेधाकरं पिबेत्।
देवदारुमहाशिग्रुफलत्रयपयोमुचाम्॥'[36]

---

33 Manusaṃhitā—2. 140.

34 Garuḍapurāṇa, 114. 59

35 Āśvalāyana-gṛhya-sūtra 1. 15. 2

36 Agnipurāṇa, 283. 5

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तथा चोक्तं चूडाकर्म मनुना—

'चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः ।
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ।।'[37]

बालस्य प्रथमे तृतीये वा वर्षे चूडाकर्म नाम संस्कारो विधेय इत्यर्थः । तत उपनयनात् प्रागपि प्राप्ते पञ्चमे वर्षे अक्षरग्रहणरूपो विद्यारम्भो विधीयते । ततश्च विहिते काले कैशोरे एव उपनयनं विहितं येन मानवको ब्रह्मचर्यव्रते वेदवेदाङ्गादिविद्याभ्यासे च प्रवर्तितो भवेत् । आचार्ये श्रद्धा सौहार्दञ्च विद्याग्रहणे आवश्यकतया वर्ण्यते । तथैवोपनयनकाले आचार्य-वाक्यं दृश्यते आश्वलायनगृह्यसूत्रे—'मम व्रते हृदयं ते दधामि, मम चित्तमनु-चित्तं तेऽस्तु । मम वाचमेकव्रतो जुषस्व, वृहस्पतिष्ट्वा नियुनक्तु मह्यम् ।'[38] कठानां शान्तिपाठेऽपि—'सह वीर्यं करवावहै···मा विद्विषावहै'—इत्यादि ।

उपनयनस्योर्धतनं वयोऽपि वर्णभेदेन निरूपितम् । यथा—

'आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते ।
आ द्वाविंशात् क्षत्रबन्धोराचतुर्विंशते विंशः ।।'[39]

प्राचीनभारतीयसामाजिकव्यवस्थानुसारेण वर्णभेदेन मानसिकसामर्थ्य-प्रवृत्त्यादिभेदस्य प्रायिकत्वात् तदनुसारेण व्यवस्थाभेद इति बोध्यम् ।

इदन्तु विशेषतः बोद्धव्यं यत्—इन्द्रियसंयमब्रह्मचर्यादि व्रतमेव विद्या-भ्यासस्य प्रधानाङ्गत्वेन स्वीकृतं विहितञ्च । यथोक्तम्—

'इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।
संयमे यत्नमातिष्ठेद् विद्वान् यन्तेव वाजिनम् ।।
इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।
संनियम्य तु तान्येव ततः सिद्धिं नियच्छति ।।'[40]

तथापि बलादिन्द्रियाणां निरोधो विषयाणामसेवनं वा न सम्यक् संयमोपायः, अपि तु विहितपरिमितविषयसेवासहितं सर्वदा ज्ञानविचारेण असंयमस्य दोष-

37 Manu. saṃ. 2. 35
38 Āsvalāyana-gṛhyasūtra, 1. 21. 7
39 Manu. saṃ. 2. 38
40 Ibid. 2. 88. 93



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



दर्शनं संयमस्य च गुणदर्शनमेव सम्यगुपाय इन्द्रियसंयमस्य। तदपि मनुनोक्तम्—

'न तथैतानि शक्यन्ते संनियन्तुमसेवया।
विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ॥'[41]

भगवद्गीतायामपि—

'कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥
यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥
...एवं बुद्धे परं बुद्ध्वा संस्तभ्यात्मानमात्मना।
जहि शत्रुं महाबाहो कामरूपं दुरासदम्।
...विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसोवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥'[42]—इत्यादि।

अध्यापनयोग्यान् दशविधान् छात्रानप्याह—

'आचार्यपुत्रः शुश्रूषु र्ज्ञानदो धार्मिकः शुचिः।
आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः ॥'[43]

स्वजनरूपश्छात्रोऽप्यध्यापनयोग्य इत्यर्थः।

तथाप्यजिज्ञासवो नैवाध्याप्याः। यतो विद्यालाभस्तेषामपरिपाकात् भारस्वरूप एव भवति, औद्धत्यहेतु र्वा। तदुक्तं मनुना—

'नापृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छतः।
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥'[44]

विशेषतः दार्शनिकज्ञाने परतत्त्वज्ञाने चाजिज्ञासवो नैवाधिक्रियन्ते, विद्यादानेऽपि तेषां ज्ञानोदयासम्भवात्। अतएवोक्तम्—'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया' इति। 'श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।'[45] इति च।

---

41 Ibid. 2. 96
42 Gitā, 3. 6-7, 43 ; 2. 59
43 Manu. saṃ. 2. 109
44 Ibid. 2. 110
45 Gitā, 4. 34, 39

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



विद्यार्थिलक्षणमप्युक्तं प्राचीनैः—

'काकचेष्टो वकध्यानी श्वाननिद्रस्तथैव च।
अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणः ॥'

शैशवे मातृपितृद्वारा लालनेन विद्याशिक्षालाभस्य श्रेयस्करत्वेऽपि तदनन्तरं स्वगृहत्यागेन गुरुगृहे विद्यालाभ एव श्रेयस्करो विहितश्च।

छात्राणां शिष्याणां वा यानि कर्तव्यान्याचरणानि यैराचरणैस्तेषां चारित्र्यस्योत्कर्षो भवति विद्याग्रहणविद्याभ्यासयोश्च फललाभो भवति तान्युच्यन्ते—

'अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तथा ॥
...लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ॥'[46]

लौकिकज्ञानदातुः पूर्वं वैदिकज्ञानदातारं तत्पूर्वमप्याध्यात्मिकज्ञानदातारमभिवादयेदित्यर्थः। गुरुवृद्धाभिवादनस्य प्रयोजनमपि सहेतुकमाह—

'उर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविरे आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि संप्रवर्धन्ते आयुर्विद्या यशो बलम् ॥'[47]

तथा—

'हीनान्नवस्त्रवेशः स्यात् सर्वदा गुरुसन्निधौ।
उत्तिष्ठेत् प्रथमञ्चास्य चरमञ्चैव संविशेत् ॥'[48]

गौतमीयधर्मसुत्रेषु चान्तेवासिनामाचारा विधीयन्ते—'निष्ठीवितहसितविजृम्भितावस्फोटनानि' (वर्जयेदिति शेषः), 'द्युतं हीनसेवामदत्तादानं हिंसाम्।' (वर्जयेत्), 'अधःशय्यासनी पूर्वोत्थायी जघन्यसंवेशी', 'वाग्बाहूदरसंयतः।' "गच्छन्तमनुगच्छेत्' 'युक्तः प्रियहितयोः' इत्यादिः।[49] एतान्याचरणानि अन्तःकरणभावविशेषस्य सूचकानि तथाऽन्तःकरणभावानाञ्च विद्याग्रहण-तत्फलोदयोपयोगिनां जनकानीति विद्याशिक्षामनस्तत्त्वनिरूपणे आलोचितानीति ज्ञेयम्।

46 Manu. sam. 2. 149 ; 117
47 Ibid 2. 120, 121
48 Ibid. 2. 194.
49 Gautamdharmasūtra, 1. 2. 21, 23, 25, 26, 29, 36, 36

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अभिलषितविद्याग्रहणे परविद्याग्रहणे वा गुरोरुच्चनीचादिभेदज्ञानं नैव कर्तव्यम् । तदुक्तं मनुना—

'श्रद्दधानः शुभां विद्यामाददीतावरादपि ।
अन्त्यादपि परं धर्ममि'त्यादि ।।[50]

धर्मशास्त्रैरन्यत्र: वर्णभेदप्रावल्यप्रदर्शनेऽपि विद्याग्रहणे तन्न प्रदर्श्यते । निम्न-वर्णीयाचार्यस्याप्यनुगमनं शुश्रूषादिकञ्च विहितं दृश्यते । तथोक्तम्—

'अब्राह्मणादध्ययनमापत्काले विधीयते ।
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ।।'[51]

श्रद्धया शुश्रूषया सेवया च यदा आचार्यस्य प्रसन्नता जायते तदैवाचार्याद् विद्याप्रवाहः शिष्यहृदये सञ्चारितो भवति । तदुक्तं मनुना—

'यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ।।[52]

विद्यालाभस्य कालपरिमाणमपि ऊर्ध्वतनाधस्तनरूपं निर्णीतं मनुना—

'षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ।
तदधिकं पादिकं वा ग्रहणान्तिकमेव वा ।।'[53]

गुरुगृहे षट्त्रिंशत् वर्षाणि तदर्धमष्टादश वर्षाणि वा तदर्धं नव वर्षाणि वा वेदाद्यध्ययनं कार्यमित्यर्थः ।

एवं ब्रह्मचर्यपूर्वकविद्यालाभानन्तरं मनुष्याणां साधारणतः गृहस्थाश्रम एव विहितः । तदुक्तम्—

'वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ।। '[54]

परन्तु केचिन्मनुष्या विद्यैकानुरागा आचार्यानुरक्ता वा दृश्यन्ते । तेषां यावज्जीवं गुरुगृहे अध्ययनं विहितम् । यथोक्तं मनुना—

'यदि त्वात्यन्तिकं वासं रोचयेत गुरोः कुले ।
युक्तः परिचरेदेनमाशरीरविमोक्षणात् ।।'[55]

---

50 Ibid. 2. 238.
51 Ibid. 2. 241.
52 Ibid. 2. 218.
53 Ibid. 3. 1.
54 Ibid. 3. 2.
55 Ibid. 2. 243

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अतएव विद्यार्थिनां ब्रह्मचारिणां द्वैविध्यमवगम्यते—उपकुर्वाणो नैष्ठिकश्च। उपकुर्वाणो ब्रह्मचर्यविद्यालाभानन्तरं गृहस्थो भवेत्; नैष्ठिकस्तु यावज्जीवं गुरुगृहे ब्रह्मचर्यपूर्वकं विद्यामभ्यसेत्। यदुक्तमुपनिषदि—'ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्'[56] इत्यादि। गौतमधर्मसूत्रे च—'आचार्याधीनत्वमान्तम्'; आन्तम् आदेहपातमित्यर्थः।[57]

छात्रशब्दस्यापि निर्वचनं पाणिनि-महाभाष्याद्यौ एवं दृश्यते यत्—गुरुणा छत्रवत् य आच्छाद्यते आश्रयदानेन दोषाच्छादनेन च स छात्रः। अथवा, येन छत्रवत् गुरुराच्छाद्यते सेवया दोषाच्छादनेन च स छात्रः। उभयथापि आचार्यशिष्ययोः परस्परं सौहार्दं सूचितम्। श्रद्धया अनुरागेण चैव विद्याग्रहणं सफलं भवति।

आचार्यस्य च कर्तव्यं विहितं शास्त्रैः। यथाविधि उपसन्नायान्तेवासिने विद्यादानमाचार्यस्याप्यवश्यमेव कर्तव्यम्। तथा चोक्तमुपनिषदि ब्रह्मविद्याविषये—

'तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय
प्रोवाच तां तत्त्वतो ब्रह्मविद्यां
येनाक्षरं पुरुषं वेद सत्यम्।'[58]

मनुनाऽपि तत् सूचितम् 'अध्यापनं ब्रह्मयज्ञः'[59] इत्यादिना। अपि चान्तेवासिनं स्वपुत्रवत् स्नेहं कुर्यात्।[60] स्वार्थकार्येषु नियोगेनान्तेवासिनोऽध्ययनविघ्नं न कर्तव्यम्। तदुक्तमापस्तम्बेन—'न चैवमध्ययनविघ्नेनात्मार्थेषूपरुन्ध्यादनापत्सु'[61] इत्यादौ। अध्यापनाभावे अध्यापनशैथिल्ये वा आचार्यत्वस्याप्युपरमः आपस्तम्बेन चोदितः। यथोक्तम्—'आचार्योऽप्यनाचार्यो भवति श्रुतात् परिहरमाणः।'[62] अन्तेवासिनमाचार्यः स्वपुत्रवदनुकाङ्क्षन् विद्यां ग्राहयेदित्यपि विहितमापस्तम्बेन। यथोक्तम्—'पुत्रमिवैनमनुकाङ्क्षन् सर्वधर्मेष्वनपच्छादयमानः सुयुक्तो विद्यां ग्राहये'दिति।[63] सतीर्थानां विद्यार्थिनामपि परस्परं सौहार्द्यं

56 Chā. up. 2, 23. 1
57 Gautama-dharma-sū. 1. 3. 5
58 Muṇḍ. up. 2. 13
59 Manu. saṃ. 3. 70
60 Baudhāyana-dh. sū. 1. 2. 48
61 Āpastamba-dh.sū. 1. 2. 8. 25
62 Ibid. 1. 2, 8. 27
63 Ibid. 1. 2. 8.24

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सूचितं आपस्तम्ब-गौतम-धर्मसूत्रैः। यथोक्तम्—'विप्रोष्य च समध्ययनं तदहः'[64]इत्यत्र सब्रह्मचारिप्रोवासे तदहः अध्ययननिषेधः।

तस्मादवगम्यते यदाचार्योऽपि धर्मनिष्ठः कर्तव्यपरायणः स्नेहयुक्तः स्यात् तथा विद्यार्थ्यपि श्रद्धायुक्तः सन् स्वेच्छया निर्विलासो संयतो नियमानुवर्तनं विद्याङ्गत्वेन स्वीकुर्यात्। आपस्तम्बीयधर्मसूत्रेषु विद्यार्थिधर्माः सर्वे सुष्ठु संगृहीताः। तदुक्तम्—'यस्माद्धर्ममाचिनोति स आचार्यः।' 'तस्मै न द्रुह्येत् कदाचन।' 'स हि विद्यातस्तं जनयति।' 'तत् श्रेष्ठं जन्म।'[65] इत्यादि। पुनश्च आचार्यगृहवासादयो धर्मा विहिताः—'न ब्रह्मचारिणो विद्यार्थस्य परोपवासोऽस्ति।' 'आचार्याधीनः स्यादन्यत्रः पतनीयेभ्यः।' 'अदिवास्वापी।' 'उत्सन्नश्लाघः।' 'स्त्रीभिर्यावदर्थभाषी।' 'मृदुः; शान्तः; दान्तः; ह्रीमान्; दृढधृतिः; अग्लांस्तुः; अक्रोधनः; अनसूयुः।' इत्यादयः।[66] पुनश्च 'आत्मप्रशंसां परगर्हामिति च वर्जयेत्।' 'अथाहरहराचार्यं गोपायेद् धर्मार्थयुक्तैः कर्मभिः।'[67]

आचार्यस्य स्खलनेऽपि कर्तव्यमुक्तम्—'प्रमादादाचार्यस्य बुद्धिपूर्वं वा नियमातिक्रमं रहसि बोधयेत्।' 'अनिवृत्तौ स्वयं कर्माण्यारभेत।' 'निवर्तयेद्वा।'[68] एतैः सूत्रैर्विद्यार्थिधर्माः सम्यग् वर्णिताः, तेषामवलम्बनीया मनोभावाश्च सम्यग्रूपेण सूचिता भवन्ति।

चाक्षुषदृष्टान्ताहरणेन तत्त्वोपदेशः विद्यादानञ्चोपनिषदि बहुत्रोपलभ्यते। छान्दोग्ये—'न्यग्रोधफलमाहरेति'[69] इत्यादौ, 'लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथे'[70]त्यादौ च तथा चाक्षुषदृष्टान्ताहरणमवगम्यते। बृहदारण्यके च अजातशत्रुबालाकिसंवादे[71] 'तं पाणावादायोत्तस्थौ तौ ह पुरुषं सुप्तमाजग्मतु'-रित्यादिस्थलेऽपि चाक्षुषदृष्टान्तप्रयोगेन विद्यादानमुपलभ्यते। एवं ज्ञायते यत् प्राचीने भारते एवंरीत्या विद्योपदेश आदृत आसीत्।

तथा आख्यायिकाकथनेन उपदेशप्रदानं विद्यादानञ्च ब्राह्मणोपनिषत्सु चातिप्रसिद्धमेव। पञ्चतन्त्रहितोपदेशप्रभृतिषु नीतिशास्त्रीय-

---

64 Ibid. 1. 3. 11. 11
65 Ibid. 1. 1. 1. 14-17
66 Ibid. 1. 1. 2. 17-24
67 Ibid. 1. 2. 7. 24 ; 1. 1. 4. 23
68 Ibid. 1. 1. 4. 25-27
69 Chā. up. 6. 12. 1
70 Ibid. 6. 13. 1
71 Bṛ. up. 2. 1. 15

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



ग्रन्थेषु चाख्यायिकाद्वारैव नीतीनामुपदेशो दृश्यते। दृष्टान्तप्रदर्शनेनाख्यायिका-रूपकथाद्वारेण च तत्त्वोपदेशे विद्यादाने वा तत् तत्त्वमनायासेन श्रोतॄणां विद्यार्थिनाञ्च हृदयङ्गमं भवतीति सर्वेषामनुभवसिद्धम्। उक्तञ्च—

'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्।
कथाच्छलेन बालानां नीतिस्तदिह कथ्यते ।।'[72]

यद्यपि प्राचीने भारते तक्षशीलानालन्दास्था महान्त विश्वविद्यालया आसन् तथापि धर्मनिष्ठस्य विदुष आचार्यस्य गृहे स्वल्प-मध्यमायतना विद्यालया एवादृता आसन्। तत्रैवान्तेवासिनां पुत्रनिर्विशेषेण पालनं विद्यादानं च सम्भवति स्म।

यद्यपि च स्मृतिशक्तेर्बहुधा प्रशंसनं शास्त्रेषूपलभ्यते, यथा छान्दोग्ये—स्मरो वावाकाशाद् भूयः···स्मरेण वै पुत्रान् विजानाति स्मरेण पशुन्'[73]-इत्यादौ स्मृतेः प्रशंसनं सर्वकार्यनिर्वाहकत्वञ्च श्रूयते, तथापि ग्रन्थार्थावधारणशक्ति-रूपाया मेधाया एव श्रेष्ठत्वं स्वीकृतम्। अतएव छान्दोग्ये—'पण्डितो मेधावी'[74] त्याद्युक्त्या मेधाविन एव तत्त्वसाक्षात्कारयोग्यता उक्ता। महा-भारतादावपि स्मृतिशक्तिजन्यात् श्रुतज्ञानात् निजायाः प्रज्ञाया मेधाजन्यायाः एवोत्कर्षः प्रदर्शितः। यथोक्तम्—

'यस्य नास्ति निजा प्रज्ञा केवलं तु बहुश्रुतः।
न स जानाति शास्त्रार्थ'मित्यादि।[75]

उत्तमानां विदुषाञ्च सङ्गोऽपि श्रेष्ठबुद्धिलाभे हेतुरुक्तः। यथोक्तम्—

'बुद्धिश्च हीयते पुंसां नीचैः सह समागमात्।
मध्यमैर्मध्यमतां याति श्रेष्ठतां याति चोत्तमैः ।।'[76]

सांख्यशास्त्रे ज्ञानप्राप्तिहेतुत्वेन काश्चित् सिद्धय उक्ताः। ताश्च गौण्यः सिद्धयः—ऊहः, शब्दोऽध्ययनं, सुहृत्प्राप्तिः दानञ्च। तदुक्तं विज्ञानभिक्षुणा सांख्यभाष्ये—'तत्रोहो यथा—प्राग्भवीयाभ्यासवशात् तत्त्वस्य स्वयमूहनम्। शब्दस्तु यथा—अन्यदीयपाठमाकर्ण्य स्वयं वा शास्त्रमाकलय्य यज्ज्ञानं जायते

72 Hitopodeśa-prastāvikā, 8
73 Chā. up. 7. 13. 1
74 Ibid. 6. 14. 2
75 Mahābhārata.sabhā. 53. 5, 1
76 Ibid. Vana. 5. 30

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तदिति। अध्ययनं च यथा—शिष्याचार्यभावेन शास्त्राध्ययनाज् ज्ञानमिति। सुहृत्प्राप्तिर्यथा—स्वयमुपदेशार्थं गृहागतात् परमकारुणिकाज्ज्ञानलाभ इति। दानं यथा—धनादिदानेन परितोषिताज्ज्ञानलाभ इति।'[77] एते एव गौणसिद्धिरूपेण वर्णिता विद्यालाभोपायाः पुनस्तार-सुतारादिशब्दैरभिधीयन्ते—इत्युक्तं वाचस्पतिमिश्रैस्तत्त्वकौमुद्याम्। परन्तु ऊहादीनामन्यथाव्याख्यानं तैरभिहितम्। यथोक्तम्—'विधिवत् गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमा सिद्धिस्तारमुच्यते। तत्कार्यं शब्दः, शब्द इति पदं शब्दजनितमर्थज्ञानमुपलक्षयति, कार्ये कारणोपचारात्। सा द्वितीया सिद्धिः 'सुतार'मुच्यते। पाठार्थाभ्यां तदिदं द्विधा श्रवणम्। ऊहस्तर्कः, आगमाविरोधिन्यायेनागमार्थपरीक्षणम्। परीक्षणञ्च संशय-पूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थापनम्। तदिदं मननमाचक्षते आगमिनः। सा तृतीया सिद्धि'स्तारातार' मुच्यते। सुहृत्प्राप्तिः। न्यायेन स्वयं परीक्षितमप्यर्थं न श्रद्धत्ते, न यावद् गुरुशिष्यसब्रह्मचारिभिः सह संवाद्यते। अतः सुहृदां गुरुशिष्य-सब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः। सा सिद्धिश्चतुर्थी 'रम्यक'मुच्यते। दानं च शुद्धिर्विवेकज्ञानस्य,…सा च सवासनसंशय-विपर्यासानां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहे स्थापनम्। सा च न विनाऽदरनैरन्तर्यदीर्घकालसेविताभ्यासपरिपाकाद् भवतीति दानेन विवेकख्यातया कार्येण सोऽपि संगृहीतः। सेयं पञ्चमी सिद्धिः 'सदामुदित'मुच्यते।'[78]

एते गौण्यः सिद्धयो वस्तुगत्या ज्ञानोपाया एव मानसव्यापाररूपा इति मनस्तत्त्वनिरूपणे आलोचिताः।

न्यायसूत्रेष्वपि[79]गौतमेन ज्ञानप्राप्त्युपायाः प्रदर्शिताः। तथोक्तं—'ज्ञान-ग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः' इति, 'तं शिष्यगुरुसब्रह्मचारिविशिष्ट-श्रेयोऽर्थिभिरनसूयिभिरभ्युपेया'दिति च। उक्तञ्च वात्स्यायनेन तत्र भाष्ये—'ज्ञानमध्यात्मविद्याशास्त्रम्, तस्य ग्रहणमध्ययनधारणे, अभ्यासः सततक्रियाऽध्ययन-श्रवणचिन्तनानि। तद्विद्यैश्च सह संवाद इति ज्ञानपरिपाकार्थम्, परिपाकस्तु संशयच्छेदनमविज्ञातार्थबोधोऽध्यवसिताभ्यनुज्ञानमिति। समयवादः (सिद्धान्ता-लोचनम्) संवादः'—इत्यादि।

77 Sāmkhya-pra. bhā. 3. 44

78 Sāmkhya-tattva-Kaumudi, 51

79 Nyā. sū. 4. 2. 45-46

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



नीतिशास्त्रेषु च विद्याविषये बहवः श्लोका विद्यन्ते केचिन्मनस्तत्त्वद्योतका अपि । यथोक्तम्—

'जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ।।'[41]

अन्यच्च—

'अनन्तपारं किल शब्दशास्त्रं
स्वल्पं तथायुर्बहवश्च विघ्नाः ।
सारं ततो ग्राह्यमपास्य फल्गु
हंसैर्यथा क्षीरमिवाम्बुमध्यात् ।।'[42]

इत्यादि । उपनिषद्यपि सारग्रहणमादृतम्—

'ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्त्वतः ।
पलालमिव धान्यार्थी त्यजेद् ग्रन्थमशेषतः ।। [43]

यास्कीयनिरुक्तौ विद्यादानविषयकानि मनस्तत्त्वद्योतकानि कानिचिद् वाक्यानि दृश्यन्ते, यथा—'नावैयाकरणाय नानुपसन्नायानिदंविदे वा ।'[44] व्याकरणज्ञानरहिताय तथा वाक्यार्थज्ञानासमर्थाय विद्याविशेषप्रदाने व्यर्थश्रमः स्यादिति भावः । तथा वैयाकरणायापि सम्यक् शिष्यभावेनोसन्नायैव ब्रूयात् । तथा वैयाकरणायापि इदंवेदितुमसमर्थाय नैव ब्रूयात् । कथमेतत् ? इत्याह- 'नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया ।'[45]

यो हि न विजानाति स सदैव निजं दोषमाचार्ये एवारोपयन् तं विद्वेष्टि । तस्मात्—'उपसन्नाय तु निर्ब्रूयाद् यो वाऽलं विज्ञातुं स्यान् मेधाविने तपस्विने वा ।'[46]—इत्यत्रापि मेधायास्तपसश्च विद्याग्रहणे प्राधान्येनाङ्गत्वमवगम्यते । अत उक्तं तत्रैव—

'विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि ।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवतीत तथा स्याम् ।।'[47]

41 Hitopadeśa-suhṛdbheda, 10.
42 Pañcatantra-kathā-mukha, 9.
43 Br. bin. up.—18
44-47 Yāska, 2. (p. 71-72, Sanskrit Pustakalaya, Delhi.)



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पुनश्चाह तत्रैव छात्राणां चिन्तनीयम्—

'य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं सम्प्रयच्छन् ।
तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत् कतमच्चनाह ।।
अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।।
यथैव तेन गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ।।'[४८]

एतैर्ज्ञायते यत् गुरुशिष्ययोः सौदार्दं शिष्यस्य श्रद्धा, मेधा, कृतस्वीकारश्च विद्याप्रदानग्रहणयोः प्रधानत आवश्यकः ।

———

48 Ibid. 2 (p. 72-73)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( २१ )

## मनस्तत्त्वद्योतकसुभाषितानि

पञ्चतन्त्रहितोपदेशादिनीतिशास्त्रेषु धर्मशास्त्रेषु च बहूनि वाक्यानि सन्ति यानि मनस्तत्त्वमूलकत्वात् सुगभीरमनस्तत्त्वद्योतकानि भवन्ति। तेषामालोचनेन तदन्तर्निहितं मनस्तत्त्वमपि ज्ञातुं शक्यते, तथा व्यवहारादिषु नैपुण्यं प्राज्ञत्वं च लब्धुं शक्यते इति तेषां संक्षेपेणालोचनं क्रियते।

मनुष्याणां तृष्णाग्रस्तानां दारिद्र्यविषये अनुपशान्तिविषये च उच्यन्ते—

'अधोऽधः पश्यतः कस्य महिमा नोपचीयते।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥'[1]

तथा— 'इच्छाति शती सहस्रं सहस्री लक्षमीहते।
लक्षाधिपस्तथा राज्यं राज्यस्थः स्वर्गमीहते ॥'[2]

अन्यच्च— 'जीर्यते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः।
जीर्यतश्चक्षुषी श्रोत्रे तृष्णैका तरुणायते ॥'[3]

उक्तं च मनुना—

'न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥'[4]

सामान्यकामविषये चोक्तं तेनैव क्रियामूलत्वं कामस्य—

'अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित्।
यद् यद्धि कुरुते किञ्चित् तत्तत्कामस्य चेष्टितम् ॥'[5]

वाक्यालापविषये मनुना यद्यप्युक्तम्—

'नापृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छतः।
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥'[6]

---

1 Hitopodeśa-suhṛdbhheda, 2
2 Pañcatantra, 5. 83
3 Ibid. 5. 84
4 Manu. saṃ. 2. 94
5 Ibid. 2. 4
6 Ibid. 2. 110

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तथापि तस्य प्रतिप्रसवमपि अचिन्तयत् नीतिशास्त्रम्—

'आपद्युन्मार्गगमने कार्यकालात्ययेषु च ।
कल्याणवचनं ब्रूयादपृष्टोऽपि हितो नरः ।।'[7]

तथा सुमन्त्रिणा मित्रेण चापृष्टेनापि किञ्चित् भाषणं न दूषणमपि तु कर्तव्य-मेव । तदुक्तं—

'अपृष्टेनापि वक्तव्यं सचिवेनात्र किञ्चन ।
पृष्टेन तु ऋतं पथ्यं वाच्यञ्च प्रियमप्रियम् ।।'[8]

सचिवेन मित्रेण च पृष्टेन त्वप्रियमपि सत्यं हितञ्च वक्तव्यमिति भावः ।

परेषां मनोगतभावानां ज्ञानमेव धीमद्भिर्विधेयमित्याह तत्रैव—

'उदीरितोऽर्थः पशुनापि गृह्यते
हयाश्च नागाश्च वहन्ति चोदिताः ।
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः ।।
आकारै रिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः ।।'[9]
यस्य यस्य हि यो भावस्तेन तेन समाचरेत् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ।।'[10]

स्वभावस्य सर्वोपरि प्राबल्ये उक्तं हितोपदेशे—

'न धर्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवात्र तथाऽतिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः ।।'[11]

तथा— 'सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः ।
अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते ।।'[12]

---

7 Hitopadeśa-suhṛdbheda, 124
8 Pañcatantra, 3. 4
9 Pañcatantra-Mitrabheda, 44-45
10 Ibid. 74
11 Hito. Mitralābha, 17
12 Ibid. 20

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



अन्यत्र च— 'यो यस्य स्वभावो हि स्यात् (यः स्वभावो हि यस्यास्ति)
तस्यासौ दुरतिक्रमः । (सो नित्यं दुरतिक्रमः)
श्वा यदि क्रियते राजा
स किं नाश्नात्युपानहम् ॥'[13]

जरावस्थायां मानसिकभावानाह विष्णुपुराणम्—
'प्रक्षीणाखिलशौचश्च विहाराहारसंस्पृहः ।
हास्यः परिजनस्यापि निर्विन्नाशेषबान्धवः ॥
अनुभूतमिवान्यस्मिन् जन्मन्यात्मविचेष्टितम् ।
संस्मरन् यौवने दीर्घं निश्वसित्यभितापितः ॥'[14]

बुभुक्षायाः सर्व-(गुण-)नाशकत्वं सर्वदोषजनकत्वञ्चोक्तं शास्त्रवाक्येषु—
'काव्येन हन्यते शास्त्रं काव्यं गीतेन हन्यते ।
गीतं हन्ति स्त्रीविलासः सर्वं नष्टं बुभुक्षया ॥'[15]

अन्यच्च— 'त्यजेत् क्षुधार्ता महिला स्वपुत्रं
खादेत् क्षुधार्ता भुजगी स्वमण्डम् ।
बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ॥'[16]

तस्मात्— 'धर्मः शास्त्रं सुरगुरुमतिः शौचमाचारचिन्ता ।
पूर्णे सर्वे जठरपिठरे प्राणिनां सम्भवन्ति ॥'[17]
'यथा हि मलिनैर्वस्त्रै र्यत्र तत्रोपविश्यते ।
एवं चलितवित्तस्तु वित्तशेषं न रक्षति ॥'[18]

सामान्यतो वस्तुस्थितयश्च कथ्यन्ते—
'प्रायेण भूपतयः प्रमदाः लताश्च
यः पार्श्वतो वसति तं परिवेष्टयन्ति ।'[19]
'घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।
तस्माद् घृतं च वह्निं च नैकत्र स्थापयेत् बुधः ॥'[20]

13 Hito. Vigraha, 58
14 Viṣṇupurāṇa, 6. 5. 34-35
15 प्राचीनसुभाषितम्
16 Hitopadeśa-sandhi, 55
17 Pañcatantra, 5.98.
18 Ibid. 4.30
19 Hito. Suhṛdveda 28
20 Hito. Mitralābha, 118

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



'यावतः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान् ।
तावन्तोऽपि निखन्यन्ते हृदये शोकशङ्कवः ।।'[21]
'अकाण्डपातजातानां गात्रानां मर्मभेदिनाम् ।
गाढशोकप्रहाराणामचिन्तैव महौषधम् ।।'[22]
'पयःपानं भुजाङ्गानां केवलं विषवर्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।।'[23]
'निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै
कथं जनस्तं परितोषयति ।।'[24]

प्रीतिलक्षणानि चोक्तानि—

'ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ।।'[25]

अन्यच्च— दूरादवेक्षणं ह्रासः सम्प्रश्नेष्वादरो भृशम् ।
परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु ।।
असेवके चानुरक्तिर्दानं सप्रियभाषणम् ।
अनुरक्तस्य चिह्नानि दोषेऽपि गुणसंग्रहः ।।'[26]

दुर्जनविषये खलविषये चोक्तं तेषां परिहाराय—

'परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ।।'[27]
'प्राक्पादयो पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ।।'[28]

---

21 Hito. Sandhi, 72
22 Ibid. 83
23 Hito. Vigraha, 4
24 Hito. Suhṛdbheda, 159
25 Pañcatantra, 2. 51
26 Hito. Suhṛbhed, 59-60
27 Hito. Mitralābha, 76
28 Ibid, 80

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



तथा महात्मनां वैपरीत्येन—

'मनस्यन्यद् वचस्यन्यत् कार्यमन्यद् दुरात्मनाम् ।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।।'[29]

तथा— 'आमरणान्ताः प्रणयाः कोपास्तत्क्षणभङ्गुराः ।
परित्यागश्च निःसङ्गा भवन्ति हि महात्मनाम् ।।'[30]
'निर्विशेषं यदा स्वामी समं भृत्येषु वर्तते ।
तत्रोद्यमसमर्थानामुत्साहः परिहीयते ।।'[31]
'शिरसा विधृता नित्यं स्नेहेन परिपालिताः ।
केशा अपि विरज्यन्ते निःस्नेहा किं न सेवकाः ।।'[32]
'सुहृदि निरन्तरचित्ते गुणवति भृत्येऽनुवर्तिनि कलत्रे ।
स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति ।।'[33]
'भये वा यदि वा हर्षे संप्राप्ते यो विमर्शयेत् ।
कृत्यं न कुरुते वेगान् न स सन्तापमाप्नुयात् ।।'[34]
'शपथैः सन्धितस्यापि न विश्वासे व्रजेद् रिपोः ।
राज्यलोभोद्यतो वृत्रः शक्रेण शपथै र्हतः ।।'[35]

दान-भोगरहितं धनं निरर्थकमेवेत्युच्यते—

'दानोपभोगहीनेन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ।।'[36]
'यद्ददाति यदश्नाति तदेव धनिनो धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ।।'[37]
'यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ।।'[38]

अन्यच्च—क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम् ।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम् ।।'[39]

---

29 Ibid. 100
30 Ibid. 188
31 Pañca. Mitrabheda, 86.
32 Ibid. 90
33 Ibid. 110
34 Ibid. 118
35 Ibid. 125
36 Hito.Mitralābha, 157
37 Ibid. 164
38 Ibid. 165
39 Hito. Suhṛdbheda, 180

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



यो हि पराक्रान्तः स समबलेष्वेव पराक्रमं प्रकाशयति कोपं करोति वेत्युक्तं—

'तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
स्वभाव एवोन्नतचेतसामयं
महान् महत्स्वेव करोति विक्रमम् ।।
गण्डस्थलेषु मदवारिषु बद्धराग-
मत्तभ्रमद्भ्रमरपादतलाहतोऽपि ।
कोपं न गच्छति नितान्तबलोऽपि नाग-
स्तुल्ये बले तु बलवान् परिकोपमेति ।।'[40]

त्रिभिर्ज्ञातस्य मन्त्रस्य गुप्तिर्न सम्भवतीति गुप्तिमिच्छता द्वितीयेन मन्त्रः कार्य इत्याह—

'षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णः स्थिरो भवेत् ।
तस्मात् सर्वप्रयत्नेन षट्कर्णं वर्जयेत् सुधीः ।।'[41]

सकृदपि विरुद्धभावापन्नं दुष्टं मित्रं सर्वथा वर्जनीयम्—

'सकृद्दुष्टन्तु यो मित्रं पुनः सन्धातुमिच्छति ।
स मृत्युमेव गृह्णाति गर्भमश्वतरी यथा ।।'[42]

नीचस्वभावोऽप्युक्तो हितोपदेशे—

'अविचारयतो युक्तिकथनं तुषखण्डनम् ।
नीचेषूपकृतं राजन् बालुकास्विव मूत्रितम् ।।
नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ।।'[43]

अन्यच्च बन्धुप्रीतिविषये—

'येनेच्छेद् विपुलां प्रीतिं तेन सार्धमरिन्दम ।
न कुर्यादर्थसम्बन्धं दारसन्दर्शनन्तथा ।।'[44]

---

40 Pañca. Mitrabheda, 133-34

41 Pañca. Mitrabheda, 108

42 Hitopadeśa-suhṛdbheda, 148

43 Hitopadeśa.Sandhi, 13-14

44 Viṣṇudharmottara, 2. 89. 86 (Quoted in Udvāha-tattva, p. 42. Sanskrit College, Calcutta)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



दारसन्दर्शने (बन्धुदारैः सम्पर्काधिक्ये) ईर्ष्यासंशयादिभिः प्रीतिं नश्यति इति भावः ।

नारीष्वासक्तिः पुरुषाणामतिवश्यताकारणं भवतीत्युक्तम्—

'यो मोहान्मन्यते मूढो रक्तेयं मम कामिनी ।
स तस्या वशगो नित्यं भवेत् क्रीडाशकुन्तवत् ।।
...अलक्तको यथा रक्तो निष्पीड्य पुरुषस्तथा ।
अबलाभिर्बलाद् रक्तः पादमूले निपात्यते ।।'[45]

साधारणव्यवहारविषये नीतिरूपेण उक्तानि मनस्तत्त्वद्योतकानि वाक्यानि प्रदर्श्यन्ते—

'अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान् न प्रकाशयेत् ।।'[46]
'मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति ।
अपि निर्वाणमायाति नानलो याति शीतताम् ।।'[47]
'शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ।।'[48]
'महताप्यर्थसारेण यो विश्वसिति शत्रुषु ।
भार्यासु च विरक्तासु तदन्तं तस्य जीवनम् ।।'[49]
'मतिर्दोलायते सत्यं सतामपि खलोक्तिभिः ।
ताभिर्विश्वासितश्चासौ म्रियते चित्रकर्णवत् ।।'[50]
'त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ।।'[51]

तथा च मित्रलाभे उक्तं विद्यालाभविषये—

'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन च ।।'[52]

---

45 Pañcatantra-Mitrabheda, 150, 156
46 Hitopadeśa-Mitralābha, 128
47 Ibid. 131
48 Ibid. 87
49 Ibid. 90
50 Hito. Sandhi, 54
51 Hito. Mitralābha, 82
52 Ibid. 1

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



'इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ।।
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति ।।'[53]
'संसारविषवृक्षस्य द्वे एव रसवत्फले ।
काव्यामृतरसास्वादः सङ्गमः सुजनैः सह ।।'[54]
तथा—'प्राणा यथाऽत्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्म्यौपम्येन भूतेषु दयां कुर्वन्ति साधवः ।।'

अन्यच्च—'असम्भवं हेममृगस्य जन्म
तथापि रामो लोलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले
धियोऽपि पुंसां मलिना भवन्ति ।।'[55]

मित्रदोषाश्चोक्तास्तत्रैव—

'रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ।।'

अन्यानि च सन्तोषविषये—

'सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ।।'
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनाशा पृष्ठतो कृत्वा नैराश्यमवलम्बितम् ।।'[56]

भावनानुसारेण फललाभो भवति यत्र तदुक्तं—

'मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ।।'[57]

---

53 Ibid. 8-9
54 Ibid. 152
55 Ibid. 13, 28
56 Ibid. 97 ; 142 ; 144
57 Pancatantra, 5. 103

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



संसारे समाजे च मानवानां मनसि मधुरवाक्यानां प्रियवाक्यानाञ्च सत्यात् हितादपि समादराधिक्यं दृश्यते । तस्मात् लोकव्यवहारेषु सर्वदा प्रियमेव वक्तव्यं नाप्रियम् । तथोक्तं--'सत्यं ब्रूयात् प्रियं ब्रूयान्मा ब्रूयात् सत्यमप्रियम्' इति । तथाऽनिष्टाचरणेऽपि प्रियवदनं सर्वेभ्यो रोचते इति सर्वदैव प्रियवदनं कार्यमित्युक्तं--

'प्रहरिष्यन् प्रियं ब्रूयात् प्रहृत्यापि प्रियोत्तरम् ।
अपि चास्य शिरश्छित्वा रुद्यात् शोचेत् तथापि च ।।'[58]

अन्ये च श्लोकाः—

'वेदाभ्यासेन सततं शौचेन तपसैव च
अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम् ।।'[59]
'प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् ।
प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति ।।'[60]
'योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते ।
स पापकृत्तमो लोके स्तेन आत्मापहारकः ।।'[61]

---

58 Mahābharata-Santiparva, 174. 39
59 Manu. sam. 4. 418
60 Ibid. 4. 186
61 Ibid. 4. 225

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

( २२ )

## मनःपर्यवेक्षणम्

अत्र मनःपदमन्तःकरणपरं बुद्ध्यहंकारादिगर्भम् । तस्य स्वरूपादिविषये विभिन्नदार्शनिकानां ये मतभेदास्तान् विभज्य त्रिविधत्वेन वक्तुं शक्यन्ते ।

येषां दार्शनिकानां न्याय-वैशेषिक-मीमांसकादीनां मतेन अणुपरिमाणं मनः इन्द्रियमात्रं बहिरिन्द्रियैरात्मनः परम्परया संयोजकमात्रं ते "यान्त्रिकचित्तवादिनः" इति वक्तुं शक्यते । येषां पुनः मतेन मध्यपरिमाणं मनः त्रिगुणविशिष्टं परिणामि चिच्छायायोगात् चित्तादात्म्याद्वा चेतनायमानं ते सांख्य-पातञ्जल-वेदान्ताः "ज्ञातृचित्तवादिनः" इति वक्तुं शक्यते । ये तु पुनः शैवागमाः शाक्तागमाः योगवाशिष्ठाश्च* चितिमेव चेत्यसङ्कोचिनीं चलां वा चित्तमिति कथयन्ति, ते "चितिचित्तवादिनः" इति अभिधातुं शक्यते । एतेषां त्रिविधा दृष्टिरपि यथाक्रमेण 'यान्त्रिकदृष्टिः', 'ज्ञातृचैत्तिकदृष्टिः,' 'चितिचैत्तिकदृष्टि'—रित्येवमभिधातुं शक्यते । एतेषां मतानां सारग्रहणाय उत्प्रेक्षायोगेन यथासम्भवं सामञ्जस्यं दर्शयितुमिदानीं यत्यते । चित्तस्य विभिन्नाः सूक्ष्मधर्माः पूर्वमालोचिता अनालोचिता वा विश्लेषणपूर्वकं च प्रदर्श्यन्ते ।

यदा तु मनः अन्तरिन्द्रियमात्ररूपेण ज्ञानकारणं भवति, बहिरिन्द्रियेण परम्परया आत्मनः सम्बन्धविशेषजनकं वा भवति, तदा तार्किकादिसम्मतस्याणुपरिमाणस्य मनस एव युक्तिसिद्धत्वं प्रतीयते । परन्तु, तत्र मध्यपरिमाणस्याप्यन्तःकरणस्यातिसूक्ष्माकारेण संकोचनेनापि तदुपपत्तेः, ज्ञानसुखादिपरिणामस्यान्तःकरणधर्मतयाऽनुभवात् श्रुतिसिद्धत्वाच्च संकोचविकाशशालिमध्यपरिमाणवत्त्वमेवान्तःकरणस्य समीचीनम् । मनसो विभुपरिमाणवादिनामपि भाट्ट-पातञ्जलानां देहेन्द्रियाद्यवच्छेदेनैव मनसो वृत्तिलाभस्वीकारात् फलतो मध्यपरिमाणमेव स्वीकृतम् । श्रुतावपि मनसः उत्पत्तिकथनेन तस्य मध्यपरिमाणवत्त्वमेवाभिप्रेतम् ।

यत्तु तार्किक-मीमांसक-रामानुजप्रभृतिभिरहंरूपत्वमात्मनो मन्यते सगुणात्मस्वीकारात्, तत्तु 'अहं'रूपं वस्तुतोऽन्तःकरणस्यैव इत्यपरोक्षानुभवात् सांख्य-

---

* Utpattiprakaraṇa, 96. 3 ; 100. 14

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पातञ्जल-वेदान्तादिशास्त्रैश्चावगम्यते । वृहदारण्यकेऽपि मनसोऽन्तःकरणस्य अहंकारस्य चोत्पत्तिर्वर्णिता। तत्र तावत् प्राण एवाशनायारूपेण विद्यमानः सन् 'आत्मन्वी स्या'मिति समनस्कत्वाय मनोऽसृजत । तदुक्तं—'मृत्युनैवेदमावृतमासीत्, अशनायया । अशनाया हि मृत्युः, तन्मनोऽकुरुतात्मन्वी स्यामिति ।' पुनश्च मनसो मननादिव्यापारनिर्वाहार्थं करणान्तराकाङ्क्षया स एव प्राणाभिमानी[1] मनसा मिथुनरूपेण वाचमसृजत, येन वाङ्मनसोर्मिथुनेन मननादिव्यापारः सम्भवति। तदुक्तं वृहदारण्यके—'सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचं मिथुनं समभवदशनाया मृत्युः ।'[2] अहमुत्पत्तिविषये चोक्तं वृहदारण्यके यदेवं वाङ्मनसोरुत्पत्त्यनन्तरं तस्य पुरुषस्य मननसामर्थ्ये जातेऽपि यस्मात् नान्यदात्मनोऽपश्यत् तस्मात् स पुरुषः 'अहमस्मि' इत्यग्रे उच्चारितवान् येन स अहंनामाभवत् । तदुक्तम्—'सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत् सोऽहमस्मीत्यग्रे व्यहरत् ततोऽहंनामाभवत् ।'[3] एवं सृष्टत्वादन्तःकरणस्य मध्यपरिमाणवत्त्वं सिद्धम् । 'अन्नमयं सोम्य मनः'—इति छान्दोग्यश्रुतेरपि मनसोऽन्नपुष्टत्वकथनात् मनसो मध्यपरिमाणं सिद्धम् । अहंकारस्य च बुद्धिविशेषरूपत्वाद् बुद्धिपरिणामरूपत्वाद्वा अन्तःकरणरूपत्वमेवेत्यौपनिषदं मतम् । ततश्च यदैवात्माऽहंबुद्ध्याऽहंभावेन वा परिच्छेदं प्राप्तस्तदैव पुनरहंरूपेणैव स्वप्रसारार्थं बहुभवनकामनामकरोत्—'बहु स्याम् प्रजायेयेति ।'[4] अतः अविद्ययाऽहंभावसंकोचितस्यात्मनः पुनरहंरूपेणैव बहुभवनकामना एव अहमात्मनः मूलकामना । वस्तुतस्तु अज्ञानावृतस्वरूपगतपूर्णानन्दप्राप्तिकामना एव परिच्छिन्नाहंभावस्य बहुभवनकामनारूपेणाभिव्यज्यते । अतएव विद्यया स्वरूपज्ञाने एवाहंभावस्यापि बहुभवनकामनायाः परिसमाप्तिर्घटते सर्वात्मभावलाभेन ; यदुक्तं—'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात् तत् सर्वमभवदिति ।'[5] तस्मात् बहुभवनकामना अपि मूलतः आनन्दकामना एव । तदुक्तं—'को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् ।'[6] 'सुखमेव लब्धा करोति'[7] इत्यादि ।

पातञ्जलेऽपि भ्रमसंस्काररूपाया अविद्यायाः प्राथमिकं कार्यमस्मितेत्युक्तम् । ततः रागद्वेषादिकं प्रवर्तते । इयञ्चास्मिता बुद्धिपरिणामस्याहंकारस्यैव कार्यं यतः 'अहमस्मि' 'अहमस्मि' इत्येवं प्रतीतिः सदा जायते ।

1 Br. up. 1. 2. 1
2 Ibid. 1. 2. 4
3 Ibid. 1. 4. 1
4 Chā up. 6. 2. 3
5 Br. up. 1. 4. 10
6 Tai. up. 2. 7
7 Chā. up. 7. 12. 1

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



सांख्यमते यद्यपि निश्चयात्मकत्वेनान्तःकरणेषु बुद्धेरेव प्राधाण्यमुक्तम्, तथापि तन्मते अहंकारस्यैवानुकूलत्वप्रतिकूलत्वनिर्णायकत्वेन बुद्धिसहकारित्वात् सर्वप्रवृत्तिनिवृत्तिमूलत्वमव्याहतमेव। सांख्यमते अहंकार एव 'ममेदमनुकूलम्' 'ममेदं प्रतिकूलम्' इत्येवं सर्वपदार्थानां मूल्यनिर्धारणपूर्वकं बुद्धेस्तत्र त्यज्यताग्राह्यता-निश्चयं जनयति। अहंकारस्य प्रकृतिपरिणामत्वमनात्मत्वं त्रिगुणात्मकत्वञ्च प्रसिद्धमेव। सांख्यपातञ्जलमतयो बुद्धेरहङ्कारः, अहंकाराच्च मनः उत्पद्यते। बुद्धिरहंकारो मनश्चैतत्त्रयमन्तःकरणं भवति।

यच्च शाक्तागमेषु शैवागमेषु च 'चला चितिर्मनोनाम्नी' 'चितिरेव...... चेत्यसङ्कोचिनो चित्त'मित्यादौ मनस चिद्रूपत्वं चित्परिणामविशेषरूपत्वं वा घोषितं तदपि दृष्टिविशेषेण कथञ्चित् समर्थनीयम्। सांख्य-पातञ्जल-वेदान्तिभिरपि चित्प्रतिबिम्बनेन चित्तादात्म्याभिमानाद्वा मनसो बुद्धेश्चेतनायमानत्वं स्वीकृतमेव। 'तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।'[8] एवं यदि बुद्धेर्मनसो चेतनत्वं कथञ्चित् सम्पादनीयमेव तदा वरं तस्य चित्विशेषरूपत्वमिति आगमिनामभिप्रायः।

एवं मनसोऽपूर्वत्वात् यक्षत्वाच्च[9] विचित्ररूपस्य तस्याणुत्वेनेन्द्रियत्वम्, तथा मध्यपरिमाणवत्त्रिगुणात्मकविकारिद्रव्यत्वेन परिणामित्वम्, तथा चेतनायमानत्वात् चित्परिणामविशेषत्वञ्च सर्वमेव दृष्टिभेदेन कथञ्चित् समर्थनीयमेवेत्यस्मामिरविरोधस्थापनचेष्टितम्।

अद्वैतवेदान्तमते चिदाभासयुक्तमन्तःकरणमेव अहंरूपेण भासमानं कर्तृभोक्तृ-स्वरूपमिति स्वीकारात् तस्यैव मुख्यतोऽहंशब्दवाच्यत्वम्। अपरो गर्वात्मकान्तः-करणवृत्तिविशेषोऽपि अहंकाररूपः स्वीक्रियते। उभयत्रापि प्राकृतान्तःकरण-योगात् त्रैगुण्यमव्याहतमेव। त्रैगुण्याच्चान्तःकरणमहंपदवाच्यं भोक्ता कर्ता वा सात्त्विक-राजस-तामसभेदेन त्रिधा विभागमर्हति। यथोक्तं गीतायाम्—

'ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः।'[10]

रामानुजादिवैष्णवमतेषु यद्यपि तार्किकमतवदात्मन एव वास्तवाहन्ता

8 Sā Kā. 20
9 'यदपूर्वं यक्षमन्तः प्रजानाम्'—Yajur Veda
10 Gitā, 18. 19

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



स्वीकृता तथापि आभिमानिकप्राकृताहंकारोऽपि अपरः अन्तःकरणवृत्तिरूपः स्वीकृतः। वास्तवाहंभावस्तु आत्माश्रितः स्वाभाविक एव न तु प्राकृतः। आभिमानिकाहंकारः प्राकृतत्वात् गुणविकारः।

उक्तमतानां पर्यालोचनेन प्रतीयते यल्लोकिकव्यवहारकाले अन्तःकरणमेवास्माभिर्मुख्यतोऽहमित्याकारेणानुभूयते उल्लिख्यते च। तच्चाहंपदवाच्यमन्तःकरणं सत्त्वरजस्तमोरूपत्रिगुणात्मकं त्रिगुणविशिष्टं वा ज्ञेयम्। एकमेवान्तःकरणमहंपदबोध्यं गुणत्रयप्राधाण्येन विभागात् सात्त्विकं राजसं तामसञ्च सम्पद्यते। गुणभेदाच्च तेषां स्वभावभेदाः वृत्तिभेदाश्च जायन्ते।

भगवद्गीतायामपि एतमेवाहंपदाभिधेयं कर्तृशब्देनोल्लिख्य कर्तृणां तद्-बुद्धिज्ञानानाञ्च सात्त्विकादिभेदेन त्रैविध्यमुक्तमिति पूर्वमेवोक्तम्।[11]

तस्मादेकमेवान्तःकरणमहंकर्ता वा सत्त्वरजस्तमोगुणभेदेन यथार्थायथार्थसर्वप्रत्ययानां शुभाशुभसर्वधर्मानां शुभाशुभसर्वप्रवृत्तीनाञ्चाश्रयो भवति। अहंप्रत्ययसाक्षी तु चिदात्मा असङ्गत्वात् सर्वगुणातीतः सर्वधर्मातीतश्च भवति। चिदाभासयुक्तमन्तःकरणमन्तःकरणोपहितो वा चिदात्मा एवाहंप्रत्ययविषयः अन्तःकरणस्थसत्त्वादिगुणभेदेन सात्त्विकादिरूपाण्यासाद्य निखिलसंस्काराश्रयो निखिलप्रवृत्त्याश्रयश्च भवति।

तथाहि—तामसबुद्धिरधर्मं धर्ममित्येवं मोहवशात् सर्वार्थान् विपरीतान् मत्वा, हेतुं विनैव किञ्चित् क्षुद्रविषयं कृत्स्नवत् 'इदमेव सर्व'मिति दुराग्रहान्मत्वा दीर्घसूत्रितालस्य-प्रमाद-शाठ्य-नैष्कृतिकत्व-विषादादिविचित्रहीनसंस्काराणामाश्रयस्तदनुरूपप्रवृत्तीनाञ्चाश्रयो भवति। पश्चाद्भाविफलानां स्वकीयपरकीयक्षतीनाञ्च चिन्तनं विनैव तेषां प्रवृत्तिर्भवति। राजसाहंकर्तुः राजसबुद्धिर्पुनः यद्यपि सर्वं विपरीतमेव न जानाति, तथापि राग-द्वेष-हर्ष-शोक-लोभादिजनितचाञ्चल्यवशात् यथावत् विविक्तरूपेन धर्माधर्मं कार्याकार्यं वा न जानाति। राजसबुद्धेरव यद्यपि कार्याकार्यनिर्णये धर्माधर्मनिर्णये च यत्यते कर्तृभिस्तथापि रजोगुणजनितचाञ्चल्यात् रागद्वेषलोभादिदुष्टतया च न ते यथावत् निर्णीयन्ते, अपितु विकृतरूपेणांशिकरूपेण वा निर्णीयन्ते। राजसकर्तृणां फलाकाङ्क्षावशादनुबन्धादिचिन्तनसद्भावेऽपि रजोगुणप्रसूतहिंसालोभादिवशात् यथार्थरूपेण तेषां निश्चयो न भवति। तेषां चिन्ता तु सर्वदा अहं-

11 Gita 18. 20—32

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



काररागद्वेषादिदोषपक्षपातेनैव प्रवर्तते इति यथार्थं स्वरूपज्ञानं कर्तव्यादीनां न भवति। भेदबुद्धिप्रबलत्वात् सर्वभूतेषु नानापदार्थान् पृथग्भावेन विरुद्धतया च पश्यन् राजसबुद्धिः न तेष्वैक्यं सामञ्जस्यं वा आविष्कर्तुं शक्नोति।

राजसकर्तुः रजोगुण एव तमोमिश्रितः सर्वप्रवृत्तीनां तन्मूलभूतसंस्काराणाञ्च मूलं भवति। यथोक्तं—

'लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥'[12]

तथा तमोगुणोऽपि अंशतः केषाञ्चित् हीनप्रवृत्तीनामीर्ष्याशाठ्यनैष्कृतिकत्वादीनां मूलं भवतीति बोध्यम्।[13] रजोगुणस्य कामादिमूलत्वं पुनरप्युक्तं गीतायाम्—

'काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।'[14] इत्यादि।

तस्मात् रजस्तमसी एव तेषां हीनप्रवृत्तीनामशुभप्रवृत्तीनाञ्च हेतुर्भवतः।

सात्त्विकबुद्धिस्तु सत्त्वगुणजनितप्रकाशानन्दप्रधानत्वात् तृष्णा-राग-द्वेषादिकृतचाञ्चल्यरहितत्वाच्च सर्वं यथावज्जानाति, विभक्तेषु नानाभावेषु सामञ्जस्यमविरोधरूपं पश्यति, एकमव्ययं भावमात्मरूपं वा आविष्करोति। कार्याकार्यं धर्माधर्मं च यथार्थरूपेण जानाति। सात्त्विककर्ता धृत्युत्साहसमन्वितकर्तृत्वसत्त्वेऽपि फलाकाङ्क्षारहितत्वात् सिद्ध्यसिद्ध्योर्निर्विकारोऽनहंवादी च भवति। यत्र प्रवृत्तिः कार्या यतश्च निवृत्तिस्तत् सर्वम्, कार्यमकार्यञ्च भयहेतुमभयहेतुञ्च सकारणं बन्धं मोक्षं च सर्वं सात्त्विकबुद्धिर्यथावद् जानाति। सात्त्विकबुद्धिरेव सत्त्वगुणप्रभावात् शास्त्रोज्ज्वलत्वाच्चाकार्याद् भयकारणाद् बन्धकारणाच्च निवारयति, कर्तव्ये कर्मणि अभयकारणे मोक्षकारणे च प्रवर्तयतीति भावः।

इदमत्रावश्यमवधेयं यत्—व्यक्तिभेदेन सात्त्विकादिबुद्धिभेदेऽपि सत्त्वादिगुणानां प्राधान्यमेव तत्र तत्र विवक्षितम्। न त्वेकान्तत एव सात्त्विकत्वं राजसत्वं वा अहंकर्तुः सम्भवति। सर्वेषामेव बुद्धीनामहंकर्तॄणां वा त्रिविध-

12-13 Gitā, 14, 12 ; 18 : 28. 14 Ibid. 3. 37 ; 14. 7.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



गुणाश्रयत्वेऽपि न्यूनाधिकभावेन सत्त्वगुण-रजोगुण-तमोगुणाश्रयत्वात् त्रिविधत्वं त्रिविभागवत्त्वं वा सिध्यति । तदुक्तं गीतायामेव—

'न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥'[15]

एभिस्त्रिभिगुणैर्मुक्तं सत्त्वं प्राणी बुद्धिर्वा नास्तीत्यर्थः । तस्मात् प्रत्येक-स्यान्तःकरणस्याहंकर्तुः न्यूनाधिकरूपेण उक्तशुभाशुभसंस्कार-प्रवृत्त्याश्रयत्वं तामसत्वं राजसत्वं सात्त्विकत्वञ्च सिध्यतीति बोध्यम् । तस्मादेकस्यैवान्तः-करणस्य कालभेदेनापि सत्त्वादिगुणप्राधान्यं सम्भवति । एककालेऽपि न्यूनाधिक-तया गुणप्रधानभावेन वा त्रिगुणस्यैवैकस्मिन् अन्तःकरणे बुद्धौ वा विद्यमानत्वात् सत्त्वरजस्तमोगुणानामतिशयानामेव परस्परविरोधः । गुणसामान्यस्य गुणान्त-रातिशयेन न कश्चिद्विरोधः । तदुक्तं योगभाष्ये व्यासेन—रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते, सामान्यानि त्वतिशयैः सह प्रवर्तन्ते ।'[16]

प्रकारान्तरेण स्थूलसूक्ष्मकारणभेदेन बुद्धेरन्तःकरणस्यावस्थात्रयं जाग्रत्-स्वप्नसुषुप्तिकालीनमस्तीति बोध्यम् । तत्र जाग्रत्काले इन्द्रियार्थसन्निकर्षजन्य-ज्ञानावस्थायां स्थूलविषयभोगादभिव्यक्तरागद्वेषाद्याश्रयत्वाच्च बुद्धेः स्थूलावस्था जाग्रच्चित्तमित्यभिधानयोग्या भवति । स्मृतिभ्रमादिकाले तद्विषयसन्निकर्षा-भावेऽपीन्द्रियव्यापारसत्त्वात् तत्रापि जाग्रच्चित्तमेवेति बोध्यम् ।[17]

स्वप्नकाले तु सकलेन्द्रियव्यापारोपरमात् संस्कारमयसूक्ष्मविषयभोगाद् बुद्धेरपि वासनामयसूक्ष्मावस्था स्वाप्नचित्तमित्यभिधानार्हा भवति ।

पुनश्च यदा सुषुप्तौ चित्तवृत्त्या तमोमात्रविषयकं ज्ञानमविद्याविषयका-विद्यावृत्तिर्वा जायते तदा चित्तस्य तमोऽवलम्बनात्[18] कारणभूताविद्यालीनत्वाद् वा कारणावस्था भवतीति सुप्तचित्तमित्यभिधातुं शक्यते । इयं चित्तस्या-वस्था सांख्यपातञ्जलादिमते चित्तवृत्तिरेवातिसूक्ष्मा । अद्वैतवेदान्तमते तु बुद्धिकारणभूताविद्यावृत्तिरूपेति विशेषः ।

---

15 Gitā, 18.40
16 Yo. su. bhā. 2.15
17 Siddhā. bin. p. 106 (B. O. R. I.)
18 Pāt. yo. sū. 1.10



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



प्रकारान्तरेणापि बुद्धिरन्तःकरणं तत्स्थग्राह्यग्राह्यधर्मभेदेन उक्तस्थूल-सूक्ष्मकारणावस्थाभेदेन च त्रिविभागा त्रिस्तरा वा भवति। यथा—ग्राह्यसुख-दुःखज्ञानरागद्वेषादि-धर्मवत्त्वेन समुदाचरद्वृत्तिरूपा[19] अभिव्यक्तवृत्तिधर्मा वा। यथा सुखि चित्तम्, क्रुद्धं चित्तम्, स्मृतिमच्चित्तमित्यादि। इदमेव जाग्रच्चित्तं समुदाचरद्वृत्तिधर्मं फ्रयेडीयाधुनिकमनोवैज्ञानिकैः 'कन्शास्'-इत्याख्यया अभिधीयमानमनःस्तरेण तुलनीयं भवति। एष बुद्धिस्तरः जाग्रत्-काले प्रकटस्तिष्ठति।

अतीन्द्रियवासनामयं भाविस्मृति-क्लेश-भोगाद्याश्रयचित्तम् अनभिव्यक्त-वृत्तिक्लेशं विच्छिन्नक्लेशं[20]वा उच्यते। यथा—स्मृतिहेतुसंस्कारसत्त्वेऽपि कश्चित् क्रीडाकाले वेदमन्त्रान् न स्मरति, उद्बोधकाभावाद्वा किञ्चित् न स्मरति, रागद्वेषसंस्कारसत्त्वेऽपि कश्चित् अन्यव्यग्रत्वाद् विषयविस्मरणाद् रागं द्वेषं वा नानुभवति, अथवा 'दोषविशेषस्य दोषान्तरेणाभिभवात् यथा एकस्यां स्त्रियां रक्त इति अन्यासु रागं नानुभवतीत्यादिं[21]स्थलेषु तत्तत्कार्याभावेऽपि संस्कारमयं चित्तं तिष्ठत्येव। एतत् वासनामयं चित्तं स्वप्नकाले प्रकटीभवन् बाह्यार्थाभावेऽपि वासनामयानर्थान् उपस्थापयति।

इयमेव वासनावासितबुद्धिरतीन्द्रियाः संस्कारा वा वासनारूपाः फ्रयेडीयैरा-धुनिकमनोवैज्ञानिकैः 'प्रिकन्शास्' 'सावकन्शास्' इत्याख्याभ्यामभिधीयमानेन मनःस्तरेण तुलनीया भवन्ति। वासनाश्च संस्काराख्याः स्मृतिहेतवः रागद्वेषादि-क्लेशहेतवः भोगहेतवश्च भवन्ति। ताश्च उपेक्षाऽनात्मकादादरसहिताद्वा पूर्वानु-भवात् जायन्ते। ज्ञानानन्तरमाशेरते इति ज्ञानसूक्ष्मरूपाः संस्कारा ज्ञानाशया इत्यप्यभिधीयते। उक्तञ्च ( इन्द्रियाजन्यत्वे सति ) संस्कारजन्यं ज्ञानं स्मृतिरिति। 'सुखानुशयी रागः' 'दुःखानुशयी द्वेषः' इत्यादि च।[22] सुखानु-भवजन्यसंस्कारजन्यो दुःखानुभवजन्यसंस्कारजन्यश्च रागो द्वेषश्च यथाक्रमो भवतीत्यर्थः। भ्रमसंस्काररूपाविद्यासत्त्वे एव भोगा भवन्ति। केचित् संस्कारा भोगकाले अभिव्यक्ता भोगानुकूला अपि भवन्ति।[23] तदग्रे स्पष्टी-भविष्यति।

---

19 Pāt. yo. sū. 2. 4
20 Ibid. 2. 4
21 Yoga-bhāṣya, 2. 4
22 Pāt. yo. sū. 2. 7. 8
23 Ibid. 4. 8

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पुनश्च ये तु कर्मानन्तरमाशेरते कर्मसूक्ष्मरूपा कर्माशयास्ते अदृष्टमित्यभिधीयते। तेऽपि ह्यतीन्द्रियाश्चित्तधर्मा बुद्धौ विद्यमानाः साक्षाद् विपाकहेतवो भवन्ति। विपाकद्वारा च कर्माशयाः सुखदुःखफला भवन्ति। 'तद्विपाका जात्यायुर्भोगाः' 'ते ह्लादपरितापफलाः'[24] इत्यादि पातञ्जले उक्तम्। सामान्यतस्तु जन्यमात्रं प्रति अदष्टं साधारणं कारणमिति सर्वे कर्मवादिनो दार्शनिका वदन्ति। वस्तुतः, यद्यपि किञ्चित्कार्यं दृष्टकारणकलापादेवोत्पन्नं दृष्टं तथापि दृष्टकारणानां एकत्र मेलनं त्वदृष्टवशादेवेति बोध्यम्, सर्वत्र तादृशमेलनादर्शनात्।

इदमत्रावधेयं यत् यदैवास्माकं कर्मविशेषे प्रवृत्तिर्जायते कर्मानुष्ठानकाले केचिदनुभवा अपि जायन्ते। ततः कर्मानुष्ठानात् कर्मजन्याः कर्मसूक्ष्मरूपा अदृष्टाख्यशुभाशुभकर्माशया जायन्ते। तथा कर्मानुष्ठानकालीनानुभवेभ्योऽपि केचिदनुभवसूक्ष्मरूपाः संस्काराख्या अनुभवाशया अपि जायन्ते। ते सहजाताः सहभाविनः परस्परसहकारिरूपेण च पुनः प्रवृत्तिविपाकादिफलान् जनयन्ति।

यद्यपि सर्वे सुखदुःखभोगा अदृष्टाख्यकर्माशयजन्यास्तथापि संस्कारा अपि तत्तद्विषयभोगानुकूलतया अभिव्यक्तास्तत्तद्विजातीयभोगहेतुर्भवति। न हि राजकीयसंस्काराभिव्यक्तिं विना राजोचितभोगादिः सम्भवति। तदुक्तं पातञ्जले—'ततस्तविपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्।'[25] तथा चक्षुरिन्द्रियसत्त्वेऽपि तत्तत्संस्काराभावात् वर्णान्धाः पीतादिवर्णविशेषान्धा दृश्यन्ते। तथा कर्मप्रवृत्तेरिष्टसाधनताज्ञानजन्यत्वात् इष्टसाधनताज्ञानानाञ्च पूर्वानुभवजन्यसंस्कारजन्यत्वाददृष्टजन्यकर्मप्रवृत्तिनां संस्कारजन्यत्वपि सिद्धम्। तथा ह्युक्तं शङ्करेण वृहदारण्यकभाष्ये—'न हि तया वासनया विना कर्म कर्तुं फलञ्चोपभोक्तुं शक्यते'[26] इति। एतदेवादृष्टवासनामयं चित्तं चित्तकारणभूताज्ञानं वा सुषुप्तिकाले तिष्ठति। अतः सुप्तचित्तमित्यमित्यभिधातुं शक्यते।

सर्वप्रवृत्तिभोगबीजभूतादृष्टसंस्काराश्रयभूता बुद्धिस्तादृशा वाऽदृष्टसंस्कारा एवास्माकं भाग्यं चरित्रं प्रवृत्तिञ्चाखिलं जनयन्तः नियमयन्ति। ते अतीन्द्रियाः सन्तोऽज्ञाता एव चित्ते तिष्ठन्त उक्तं सर्वं कुर्वन्तीति फ्र्येडियैः 'आन्कनशास्' इत्याख्यया अभिधीयमानेन चित्तस्तरेण तुलनीया भवन्ति।

24 Pāt. yo. sū. 2. 13, 14
25 Pāt. yo- sū 4.8.
26 Bṛ. up. Śā. bhā. 4. 4. 3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



एतानि तु मततुल्यत्वानि कथञ्चित् सादृश्यात् तत्स्थानीयत्वेन उक्तानि, न तु सर्वथा तुल्यत्वेन इति बोध्यम् ।

यद्यपि सर्वेषां दोषानां रिपूनां च कामक्रोधलोभमोहमदमात्सर्याणां रजस्तमोगुणौ मूलत्वनोक्तौ तथापि प्रकारान्तरेणाज्ञानमविद्या वा सर्वानर्थानां मूलमित्युक्तम् । यथाहुः व्यासपादाः—'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।' तथा पातञ्जलसूत्रेऽप्युक्तम्—'अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः' 'अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणा'मिति ।[27] अनात्मन्यात्माभिमानादिरूपाविद्या मिथ्याज्ञानमुत्तरेषां क्लेशान्तराणामस्मितारागद्वेषाभिनिवेशानां प्रत्येकं प्रसुप्ततनुविच्छिन्नोदारभेदेन चतुर्विधानां क्षेत्रं प्रसवभूमिरित्यर्थः । अद्वैतमते मूलभूतमज्ञानं हि अभाव-विलक्षणं त्रिगुणात्मकं यत्किञ्चिदिति । सांख्यपातञ्जलमतयोस्तदज्ञानं तमस एव कार्यम् । यथोक्तं गीतायां—'प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ।'[28] सर्वथापि तादृशे रजोयुक्ते तमसि अज्ञाने वा सर्वे क्लेशाः सर्वे कामक्रोधलोभादयः कारणभूतसंस्काररूपेण विद्यमाना यथाकाले स्वकार्यान् अस्मितारागद्वेषाभिनिवेशान् कुर्वन्ति । तत्र बुद्धि-पुरुषयोरहमस्मीत्येकत्वाभिमानोऽस्मिता । सुखाभिज्ञस्य सुखानस्मृतिपूर्वकं सुखेषु सुखसाधनेषु वा तृष्णारूपो रागः । तथा दुःखाभिज्ञस्य तदनुस्मृतिपूर्वकं दुःखेषु तत्साधनेषु वा यः क्रोधात्मकः चित्तपरिणामः स द्वेषः । जीवनतृष्णा मरणत्रासो वाऽभिनिवेशः ।

एतेषां क्लेशानां पुनः प्रसुप्त-तनु-विच्छिन्नोदारभेदभिन्नाश्चतुर्विधा अवस्थाः प्रोक्ताः । तत्र ये अविद्यादिक्लेशाश्चित्तभूमौ स्थिता अपि उद्बोधकाभावात् स्वकार्यं न जनयन्ति ते प्रसुप्ताः । यथा सुषुप्तौ बालावस्थायां वा; तत्र हि वासनारूपेण स्थिता अपि क्लेशा उद्बोधकसहकार्यभावे नाभिव्यज्यन्ते । प्रतिपक्षभावनया शिथिलीकृता क्षीणवासनारूपेण चेतस्यवस्थिता योगिनः क्लेशास्तनवः । ते विच्छिन्ना ये केनचिद्बलवता क्लेशेनाभिभूतशक्तयस्तिष्ठन्ति—यथा द्वेषावस्थायां रागः ।[29] ये प्राप्तसहकारिसन्निधयः स्वं स्वं कार्यं सम्पादयन्ति ते उदाराः । एतेषु उदारातिरिक्ताः सर्वे संस्काररूपेणैव चित्ते विद्यमानाः चित्तं क्लिश्नन्तीति बोध्यम् । उदारास्तु अभिव्यक्तस्वरूपेण रागद्वेषादिरूपेनैव क्लिश्नन्तीति सर्वे क्लेशा अभिहिताः ।

27 Pat. yo. sū. 2.3, 4 28 Gītā, 14. 87

29 Yo. sū. bho. vṛ. 2.4

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



पातञ्जले अन्या अपि पञ्च चित्तभूमयः क्षिप्त-मूढ़--विक्षिप्तैकाग्रनिरुद्धरूपा योगदृष्ट्या अभिहिताः। क्षिप्तं मूढञ्चाज्ञानामयोगिनामेव चित्तं भवति। क्षिप्तात् विशिष्टं विक्षिप्तं चित्तं कथञ्चिदैकाग्र्यवत्त्वेऽपि न योगोपयोगि भवतीत्युक्तं व्यासभाष्ये। तदुक्तम् —'विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते।'[30]

इतरेषामेकाग्रं निरुद्धं च चित्तं योगिनामेव भवति। तेषां चित्तानां हि श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञापूर्वकः असम्प्रज्ञातसमाधि भवति सर्वानर्थनाश-हेतुः। तदुक्तं व्यासेन —'श्रद्धा चेतसः सम्प्रसादः, सा हि जननीव योगिनं पाति, तस्य श्रद्दधानस्य विवेकार्थिनः वीर्यमुपजायते, समुपजातवीर्यस्य स्मृति उपतिष्ठते, स्मृत्युपस्थाने च चित्तं समाकुलं समाधीयते, समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते येन यथावत् वस्तु जानाति, तदभ्यासात् तद्विषयाच्च वैराग्यात् असम्प्रज्ञातः समाधिर्भवती'[31] त्यलमतिविस्तरेण।

उपसंहारे चैतत् वक्तव्यं यत् भारतीयमनोविद्या विशेषेण सांख्यपातञ्जल-वेदान्तोक्तं मनस्तत्त्वं बुद्धेरन्तःकरणस्य सत्त्वप्रधानत्वाभ्युपगमेन तस्य तत्त्वपक्ष-पातित्वस्वीकारात् आत्मनश्च नित्यशुद्धबुद्धत्वस्वीकारात् मानवान्तःकरणस्य यथार्थज्ञानसम्भावनायाः प्रतिपादनेन परमतत्त्वज्ञानस्यापि सम्भावनास्वीकरणात् मानवेषु निःश्रेयसलाभाय महतीमाशां सञ्चारयति। निःश्रेयसलाभोपायांश्च विधाय मनुष्यान् निरतिशयेनोपकुर्वन्ति।

———

SRI AUROBINDO LIBRARY PONDICHERRY (India)

**समाप्तोऽयं ग्रन्थः**

30 Yo. sū. bhā.—1.1

31 Yo. sū. bhā. 1.20

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

## शुद्धिपत्रम् ( Errata )

| Page | Line | Incorrect | Correct |
|---|---|---|---|
| 9 | 20 | व्यापारवत्त्वया | व्यापारवत्तया |
| 11 | 14 | शूण्यं | शून्यं |
| 14 | 5 | आत्मविशेगुण | आत्मविशेषगुण |
| 15 | 17 | विभुनाम् | विभूनाम् |
| 33 | 16 | बोध्यव्यः | बोध्यम् |
| 36 | 1 | ..दिवत्त्वात् | ..दिमत्त्वात् |
| ,, | 3 | हन्द्रियार्थ | इन्द्रियार्थ |
| 37 | 2 | माश्रित | माश्रितं |
| ,, | 23 | मुपादते | मुपादत्ते |
| 39 | 16 | कर्तृत्वादिवत्त्वात् | ..दिमत्त्वात् |
| 41 | 20 | व्यवस्थित | व्यवस्थितः |
| 44 | 3 | सुश्रुतटीकायां डल्लनाचार्येण | सुश्रुते |
| ,, | 4 | सर्वगताः | असर्वगताः |
| ,, | 9 | पुरुष स्मृतः | पुरुषः स्मृतः |
| 45 | 20 | संयोगो | संयोगः |
| 47 | 7 | शङ्कन् | शङ्कून् |
| 48 | 16 | यत्त | यत्तु |
| 60 | 7 | मिश्राः | मिश्रः |
| 63 | 12 | चन्द्रण | चन्द्रेण |
| 68 | 19 | उल्लना.. | उल्हना.. |
| 67 | 12 | तार्किकै | तार्किकैः |
| 72 | 18 | पाथवं | पार्थिवं |
| 76 | 4 | 'भोक्त.. | 'भोक्तु.. |
| 78 | 7 | भूतसंघातं | भूतसंघातः |
| ,, | 15 | बुद्धादे.. | बुद्ध्यादे.. |
| 84 | 18 | शिरानां | शिराणां |
| 85 | 1 | चतुर्दशः | चतुर्दश |
| ,, | 26 | ,, | ,, |
| 87 | 20 | काणकायां | कर्णिकायां |
| 91 | 5 | श्चित्तधर्मा | श्चित्तधर्माः |
| 94 | 13 | एवमेम | एवमेव |
| 99 | 17 | स्फूर्त्या | स्फुर्त्या |

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



| Page | Line | Incorrect | Correct |
|---|---|---|---|
| 104 | 4 | अयथार्थास्त्व.. | अयर्यार्थस्त्व.. |
| 106 | 10 | ह्यक्तं | ह्यु क्तं |
| ,, | 15 | मतिश्रता.. | मतिश्रुता.. |
| 108 | 13 | किन्तु | किन्नु |
| 113 | 4 | स्तााककादि | स्तार्किकादि |
| 118 | 15 | व्यापको | व्यापका |
| 124 | 26 | स्मृतिलक्षणामविद्या... | लक्षणां विद्या.. |
| 128 | 14 | लक्षण | लक्षणे |
| 129 | 24 | चोद्वद्धः | चोद्बुद्धः |
| 142 | 12 | दुखं | दुःखं |
| 143 | 14 | श्रति | श्रुति |
| ,, | 19 | तृष्णादुखं | तृष्णादुःखं |
| 149 | 20 | मनष्या | मनुष्या |
| 150 | 1 | सख | सुख |
| 152 | 13 | सखे | सुखे |
| 160 | 1 | धर्मा | धर्माः |
| 161 | 12 | रूप | रूपं |
| 173 | 18 | शुद्धमुच्यते | शुद्धमुक्त इत्युच्यते |
| 174 | 19 | सुखादिविषक | सुखादिविषयक |
| 176 | 14 | आत्मानो | आत्मनो |
| 191 | 9 | समथम् | समर्थम् |
| 212 | 22 | वत्तेः | वृत्तेः |
| 216 | 19 | विपम् | विषयम् |
| 225 | 12 | सम्मवात् | सम्भवात् |
| 227 | 22 | त्रियं | त्रितयं |
| 230 | 11 | पर्वप्रत्यक्ष | पूर्वप्रत्यक्ष |
| 233 | 14 | भासेतस्य | भासेतास्य |
| 253 | 25 | अप्राभाण्यम् | अप्रामाण्यम् |
| 254 | 2 | संशयाक्रान्तया | संशयाक्रान्ततया |
| 259 | 25 | ..त्वाल्लिङ्ग | ..त्वाल्लिङ्ग |
| 259 | 26 | प्रमितिन | प्रमितिर्न |
| 263 | 1 | लिङ्गापरामर्शो | लिङ्गपरामर्शो |
| 267 | 18 | परावत्य | परावृत्य |
| 267 | 28 | ऽर्थतीति | ऽर्थप्रतीति |
| 271 | 14 | संस्काररपेक्षा | संस्कारापेक्षा |

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



| Page | Line | Incorrect | Correct |
|---|---|---|---|
| 276 | 12 | सदसतो | सदसती |
| 277 | 4 | ..पादानविद्या | पादानाविद्या |
| 278 | 15 | विपपं | विषयं |
| 282 | 7 | ..रन्तकरण | ..रन्तःकरण |
| 284 | 9 | कर्तूमकर्तुंमन्यथाकर्तू | कर्तुमकर्तुमन्यथाकर्तुं |
| 292 | 4 | रत्रादीनां | रथादीनां |
| 296 | 2 | स्थानत्व | जनकत्व |
| 297 | 24 | मयोपसंहितः | भयोपसंहितः |
| 298 | 4 | दृष्टविपश्व | दृष्टविपयश्च |
| 299 | 2 | बु र्विषया | बुद्धेर्विषया |
| 299 | 6 | प्रतिविम्बनेनव | प्रतिविम्बनेनैव |
| 304 | 22 | तत्रवोवताः | तत्रैवोक्ता |
| 305 | 2 | सुषक्ति | सुषुप्ति |
| 312 | 8 | तत्त्वानसन्धाने | तत्त्वानुसन्धाने |
| 315 | 12 | ज्वल्यं | ज्वल्यं |
| 320 | 16 | क्रमशो | क्रमशः |
| 322 | 17 | मक्त | मुक्त |
| 326 | 25 | भेदानसारेण | भेदानुसारेण |
| 329 | 8 | श्वेननविशेपाः | श्वेतनविशेपाः |
| 335 | 25 | दाढ्यत् | दाढ्यात् |
| 336 | 10 | वेदिकं | वैदिकं |
| 340 | 5 | अन्यत्रः | अन्यत्र |
| ,, | 12 | शूत्रूपु.. | शुश्रूपु.. |
| 342 | 15 | कामग्या.. | कर्माण्या.. |
| 348 | 8 | त्वप्रिवमपि | त्वप्रियमपि |
| 349 | 22 | प्रमदाः | प्रमदा |
| 355 | 8 | श्लोकः | श्लोकाः |
| 356 | 20 | . स्वाकारात् | ..स्वीकारात् |
| 357 | 6 | सम्भनवति | सम्भवति |
| 358 | 17 | कयाञ्चित् | कथञ्चित् |
| 358 | 18 | ..स्मागअविरोध | ..स्माकमविरोध.. |
| 360 | 2 | ..पदार्थाम् | पदार्थान् |

---

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

# आलोचितमूलग्रन्थाः

## BIBLIOGRAPHY

**(with abbreviations)**


| *Work* | *Author, edition* | *Abbreviation* |
|---|---|---|
| Abhidharma-kośa | (of Basubandhu) | Abhi. ko. |
| Advaitadīpikā | (of Nṛsiṇghāśrama ; Medical Hall Press, Benares) | |
| Advaitasiddhi | (of Madhusūdana Sarasvati ; Nirnaya sagar) | |
| Advaitasiddhisāra | (by Sadānanda) | Advai. si. sā. |
| Agnipurāṇa | (Chowkhamba) | |
| Aitareyopaniṣad | (Ananda Asram) | Ait. up. |
| Aitareyopaniṣadbhāsya | (A. A.) | Ait. up. bhā. |
| „ Ānandagiri-ṭikā | (A. A.) | |
| Āsvalāyanagṛhyasūtra | (Ananda Asram) | |
| Āpastambhpa-dharmasūtra | (Bombay Sanskrit series) | |
| Atharva Veda | (Svadhyaya-mandal) | |
| Baudhāyana-dharmasūtra | | |
| Bhagavad-Gita | | Gītā |
| Bhaktirasāyana | (of Madhusūdana) | Bhak. ras. |
| Bhāmatī | (on Brahmasūtra-Śāṅkara-bhāsya, by Vacaspati Miśra) | |
| Bhāṣā-pariccheda | (of Viśvanatha ; Nirnaya-sagar) | Bhā. pa. (pari) (N.S.) |
| Brahmabindūpaniṣad | | |
| Brahmasūtra | (of Vādarāyaṇa) | |
| Brahmasūtra-Śāṅkara-bhāṣya | | Bra.sū. Śā. bhā. |
| Brahmsūtra-Rāmānuja-bhāṣya | (Śribhāsya) | Br. sū. Rā. bhā. |
| Bṛhadāraṇyakopaniṣad | | Bṛ. up. |
| Caraka-saṃhitā | (of Agniveśa) | Caraka. |
| Caraka-ṭikā | (by Cakrapāṇi) | |
| Chāndyogyopanisad | (Nirnayasagar) | Chā. up. |
| Dravyasangraha-vritti | (by Brahmadeva) | |
| Garbhopaniṣad | | Gar. up. |
| Gaḍurapurāṇa | (Chowkhamba) | |
| Hitopadeśa | (of Narayana ; Chowkhamba) | Hito. |
| Jaimini-sūtra | (Pūrvamīmāṃsā of Jaimini) | |




CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



| *Work* | *Author, edition* | *Abbreviation* |
|---|---|---|
| Jnānalakṣaṇāvicāra-rahasya | (of Harirama Takavagiśa) | Jnāna.lak. vic.(C.S.C.) |
| Jñānalakṣaṇa-vicāra-rahasya-ṭīkā | (by Ananta Tarkatirtha ; (Calcutta Sankrit College) | |
| Kaivalyopanisad | (Nirnayasagar) | |
| Kāla-siddhānta-darśinī | (by Mm. Haran Chandra Sastri, Calcutta) | |
| Kaṇada-rahasya | (on Praśatapādabhāṣya, by Śaṅkara Miśra, Chowkhamba) | |
| Kaṭhopaniṣad | Nirnayasagar | Kaṭha. up |
| Kenopaniṣadbhāṣya | (of Śaṅkara) | Kenop. bhā. |
| Kauṣitakyupanisad | (N. S.) | Kau up. |
| Lankāvatara-sūtra | (Kyoto ed.) | Laṅkā-sū. (Kyoto) |
| Madhvabhāṣya | (of Madhvācārya) | Madhva-bhā. |
| Madhva-bhāsya-ṭikā | (by Anandatirtha) | Madhva.-bhā. ṭikā, |
| Mānameyodaya | (of Baṭṭa Narayana ; Adyar) | Mā. me. (Adyar) |
| Māṇḍyukyopaniṣad | (N. S.) | Māṇḍ. up. |
| Muṇḍakopaniṣad, Śāṅkarabhāṣya | | Maṇḍ up. bhā. |
| Mīmāṃsā-laghucandrika | (of Brahmananda) | |
| Mīmāsā-ṭup-ṭīkā | (of Kumārila Bhaṭṭa) | Mī. ṭup. ṭīkā |
| Mīmāṃsā-Śavara-bhāṣya | (of Śavaraswamin) | Mī. Śa. bhā. |
| Nṛsiṃhatāpanīyopaniṣad | | |
| Nyāyabindu | (of Dharmakīrti, Chowkhamba ) | Nyā. bin. |
| Nyayabindu-tikā | (by Dharmottara ; chow.) | Nyā. bin-. ṭikā. |
| Nyāyabodhinī | (ṭikā on Tarkasaṃgraha by Govardhana, Benares Harikrisna series) | |
| Nyāya-Kandalī | (on Praśastapāda-bhāṣya, by Śrīdhara, Varanasi Sanskrit Visvavidyalaya ) | Nyā. Kan. (V. S.V) |
| Nyāya-kusumāñjali | (of Udayana) | |
| Nyāyamañjarī | (of Jayanta Bhaṭṭa ; Chowkhamba) | Nyā. man, (Chow.) |

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



| *Work* | *Author, edition* | *Abbreviation* |
|---|---|---|
| Nyāya-ratnāvalī | (on Siddhāntabindu, by Brahmananda ; Chowkhamba.) | |
| Nyāyasūtra | (of Gautama) | |
| Nyāyasūtrabhāṣya | (of Vātsyāyana) | Nyā. sū. |
| Nyāyasūtra-vṛtti | (of Viśvanātha) | Nyā. sū. bhā. |
| Nyāyāvatāra | (of Siddhasena) | Nyā. sū. vṛ. |
| Padārthatha-tattvasāra | (By Jayanarayan Tarkalankar ; Calcutta) | |
| Pañcadaśi | (of Vidyaraṇya) | |
| Pancapādikā | (on Brahmasūtra-Saṅkara bhāṣya, by Padmapāda, Madras Government ) | Pañ. pā. (Madras Gov.) |
| Pañcapādika-Vivaraṇa | (of Prakāśatman, Madras Government) | Pañ. viv. (Madras Govt.) |
| Pañcatantra | (of Viṣṇu-Śarman, Bombay) | Pañca. |
| Paramalaghumañjuṣā | (of Nāgeśa Bhaṭṭa) | |
| Parīksāmukhasūtra | (or Maṇikyanandin ; Nirnayasagar) | Pari. mu. sū. |
| Padārthasangraha | (of Padmanābha) | |
| Pāṇini-Mahābhāṣya | (of Patañjali) | |
| Pātañjala-yogasūtra | (of Patañjali) | Pāt. yo. sū. |
| Paingalopaniṣad | | |
| Prakaraṇa-pañjikā | (of Śālikanatha ; Chowkhamba) | Pra. pañ. (chow.) |
| " | (of Sālikanatha ; Banaras Hindu University) | Pra. pañ. (B. H. U) |
| Pramāṇa-Vārtika | (of Dharmakīrti) | |
| Prameya-Kamala-mārtaṇḍa | (of Pravāchandra ; Niranayasagar) | Pra. Ka. mār. (N.S.) |
| Prameyaratnamālā | (of Anantavīrya ; Chowkhamha) | Pra. rat. mā. (chow.) |
| Praśastapāda-bhāṣya | (on Vaiśeṣika-sutra, by Praśastapāda, Varanasi Sanskrit Visvavidyalaya) | Pra. bhā, (V. S. V.) |
| Praśnopaniṣad | (N. S ) | Pra. up. |
| Pratyabhijñā-hṛdaya | (of Kṣemarāja) | |
| Pratyabhijña-Kārikā | (of Utpaladeva) | |
| Prāvākara-Vijaya | (of Nandīśvara ; Sanskrit Sahitya Pariṣad) | Prā. vij. (S, S. P.) |
| Saḍdarśana-samuccaya | (of Haribhadra ; Chowkhamba) | Saḍ. dar. samu. (sam.) (chow.) |

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



| *Work* | *Author, edition* | *Abbreviation* |
|---|---|---|
| Ṛg-Vedą | (Svadhyaya-mandal) | |
| Saḍ-darśana-samuccaya-tīkā | (of Maṇi-Bhadra ; chow.) | |
| Sapta-padārthī | (of Śivāditya, Calcutta Sanskrit Series) | Sap. pad. (C. S. S.) |
| Śapta-padārthī-ṭīkā | (Mitabhāṣiṇī, by Madhava-sarasvati ; Calcutta Sanskrit Series) | Spa. pad. ṭīkā (C.S.S.) |
| Saṅgita-ratnakara | (of Damodara) | |
| Sarvadarśana-Kaumudī | (of Madhava Sarasvatī; Trivandrum) | Sar.dar.kau. (Trivandrum) |
| Sarvadarśana-saṃgraha | (of Mādhavācārya ; Ananda Asram) | Sar. dar. saṃ. |
| Sāhitya-darpaṇa | (of Viśvānatha ; Gurunath Vidyanidhi, Calcutta) | Sā. dar. |
| Sahitya-darpaṇa-ṭīkā | (by Rama Tarkavagis, Calcutta) | .... |
| Samkhya-kārikā. | (of Ivarakṛṣṇa) | Sā. kā. |
| Sāmkhyasūtra | (of Kapila ?) | Sā. sū. |
| Sāṃkhya-sūtra-bhāṣya, Sāṃkhya-pravacana-bhāṣya | (of Vijñanabhikṣu) | Sā. sū. bhā. Sā. pra. bhā. |
| Sāṃkhyasūtra-vṛtti | (of Aniruddha) | Sā. sū. vṛ. |
| Saṃkhyatattva-kaumudī | (of Vacaspati Miśra) | |
| Siddhānta-bindu | (of Madhusudana ; Bhandarkar Oriental Research Inst. Poona) | Sid. bin. (B.O.R.I.) |
| Siddhānta-bindu-prapātana | (by Vasudeva Sastri ; B.O.R.I.) | |
| Siddhānta-muktavalī | (on Bhāsāpariccheda of Viśvanatha ; Nirnyasagar ) | Siddhānta-(Sid.)muk (N. S.) |
| Siddhānta-muktāvalī-Dinakarī | (by Dinakara Bhaṭṭa) | Sid. muk. Dinakarī |
| Suśruta-saṃhitā | (of Suśrutamuni) | Suśruta. |
| Suśruta-ṭīkā | (of Dalhana) | Suśru.ṭīkā |
| Sphota-siddhi | (of Maṇḍana Misra, Madras University ) | |
| Sphoṭa-siddhi-ṭīkā | (Gopālikā, by Parameśvara ; Madras University) | |
| Sāṇḍilyopaniṣad | | Śāṇḍ. up. |
| Śāstradipikā | (of Partha-Sārathi Misra) | |
| Śiva-dṛṣṭi | (of Somananda ; Kashmir Series) | |

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



| *Work* | *Author, edition* | *Abbreviation* |
|---|---|---|
| Śivā-Saṃhitā | | |
| Śloka-Vārtika | (of Kumārila Bhaṭṭa ; Chowkhamba) | Ślo. vār. |
| Śloka-vārtika-ṭīkā | (by Sucarita Miśra) | Ślo. vār. ṭīkā (Ananda Asram) |
| Śrībhāṣya-ṭīkā | (Śrutaprakāśikā by Sudarśana) | |
| Śukla-yajurveda | ( Svādhyāya-mandal) | Sukla-yaju. |
| Śvetāśvataropaniṣad | (N.S.) | Śvetā. up. |
| Saṭcakra-nirupaṇa | | Sat. cak. |
| Satcakra-ṭīkā | (Vivaraṇa) | Sat. cak. ṭīkā. |
| Tarka-bhāṣā | (of Keśava Misra; Chowkhamba) | Tark. bhā. (chow.) |
| Tarka-saṃgraha | (of Annaṃbhatta ; Harikrisna, Benares ) | Tark. saṃ. |
| Tathvacintāmaṇi-Vyaptigrahopāya | (of Gangeśa) | |
| Tattvasaṃgraha | (of Śāntarakṣita ; Baroda , Bauddha Bharatī) | Tat. saṃ. (Baroda) (Bauddha Bḥaratī) |
| Tattva-saṃgraha-saṃgraha | (by Krisnamācarya, Boroda) | |
| Tattvasamgraha-ṭīkā or, Tattvasaṃgraha-Pañjikā | (by Kamalaśila, Baroda ; Bauddha Bhāratī) | |
| Tattva-Vaiśāradī | (on Yoga-bhāṣya, by Vacaspati Miśra) | Tattva. (Tat) Vaī. |
| Tattva-traya | (of Yāmunācarya ; Chowkhamba) | |
| Tattvāloka | (on Tarkabhāṣā of Keśava Misra, byRudradhar Jhā) | |
| Tattvānusandhāna | (of Mahādeva Sarasvati ; Asiatic Society) | Tattvānu. |
| Tattvārthādhigamasūtra | (of Umasvamin) | Tattvā. (Tat.) sū. |
| Tattvārtha-vṛtti | (on Tattvārthānhigamasūtra of Umāsvamin, by Bhaskaranandin) | Tat. sū. vr. or Tattvā. (Tat) vṛ. |
| Tātparyaṭīkā | (on Nyāya-bhāṣyavārtika, by Vācaspati Miśra) | |

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon



| *Work* | *Author, edition* | *Abbreviation* |
|---|---|---|
| Tripurarahasya-tantrā | (Sarasvati bhavan) | Tri. ra. tan. |
| Upadeśa-sāhasrī | (of Saṅkara) | Upa. sā. |
| „ ṭīkā | (by Ramatirtha) | |
| Vākyapadīya | (of Bhartṛhari ; Chowkhamba) | |
| Viṣṇupurāṇa | (Aryaśāstra) | |
| Viṣṇudharmottara | | |
| Vivāraṇa-prameya-saṃgraha | (of Vidyaraṇya) | Viv. pra. saṃ. (acyutagranthamālā) |
| Vedānda-kārikāvalī | (of Venkataṭanatha) | Vedā. kā. |
| Vedānta-paribhāṣā | (of Dharmarājā Adhvarindra, Chowkhamba ) | Vedā. pari. (chow.) |
| Vedānta-sūktī-mañjarī | (of Gangadharendra) | Vedā. sū. mañ. |
| Veiśeṣika-sūtra | (of Kaṇāda) | Vai. sū. |
| Vaiśeṣika-ṭīkā | (Upaskāra, by Śaṅkara Misra) | |
| Vaiseṣika-sūtra-ṭīkā | (by Jayanarayan Tarkapañcānan, Calcutta) | Vai. sū. ṭikā. |
| Vaiśeṣikadarśana-vṛtti | ( „ ) | |
| Vyomavatī | (on Praśasastapāda-bhāṣya by Vyomaśivacārya, Chowkhamba) | Vyomavatī (chow.) |
| Yāska-nirukti | (Sanskrit-Pustakalaya, Delhi) | Yāska. |
| Yatīndramatadīpikā | (of Śrīnivāsa : Ananda Asram) | Yat. mat. dīp. (A. A.) |
| Yatīndra-matadīpikā-prakaśa | (by Vāsudeva Sāstri, Ananda Asram) | |
| Yogasūtra-bhāṣya | (of Vyāsa) | Yo. sū. bhā. |
| Yogasūtra-Bhojavṛtti | | Yo. sū. bho. Vr. |
| Yoga-Vārtika | (on Yogabhāsya of Vyāsa, by Vijñāna-bhikṣu) | Yo. vār. |
| Yogasūtra-vṛtti | (by Nagojī Bhaṭṭa) | |
| Yoga-Vāśistha, utpattīprakarṇa | | Utpatti-prakaraṇa |
| Yuktidīpikā | (Calcutta Sanskrit Series) | |

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

*bbreviation*
ri. ra. taṅ.
Jpa. sā.

iv. pra.
ṃ. (acy-
agrantha-
ālā)
edā. kā.
edā. pari.
ow.)
edā. sū.
añ.
i. sū.

. sū. ṭīkā.

omavatī
how.)

ka.
. mat.
. (A. A.)

sū. bhā.
sū. bho.
Vr.
. vār.

atti-
rakaraṇa

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry